Digitized by Arya Samaj Foundation Chennai and eGangotri

SURIOYODAYA 1967

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

112600

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

112600.

सूर्योदयः

भारतधर्ममहामण्डलस्य
मासिकं मुखपत्रम्

वर्षम् ४३

अङ्कः १

सम्पादकः
गो० न० वैजापुरकरः

जनवरी
१९६७

वार्षिक-मूल्यम्
५) रूप्यकाणि

प्रत्यङ्क-मूल्यम्
अर्धरूप्यकम्

112600

भरत-मही...!

जयतु जयतु भरतमही पुण्यशालिनी ।
मन्दर-विन्ध्येन्द्रकील-
मलय-श्रीशैल-नील-
हिमगिरि-शीतल-समीर-तापहारिणी ॥ १.

सूर्यसुता - महानदी-
शोण-सिन्धु-विष्णुपदी-
सलिलसुधा-सिक्ततनु-लोकपावनी ॥ २.

बहुविध-साधनसहिता,
दुर्गाऽखिल-शक्तियुता,
सज्जनपालननिरता, दुष्टनाशिनी ॥ ३.

शौर्य - तप - स्त्यागमयी,
शान्तिरता, कान्तिमयी,
जननीयं क्षेममयी स्नेहरूपिणी ॥ ४.

—डा० शिवशरण शर्मा

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

ग्राहकेभ्यो निवेदनम्

सूर्योदय-ग्राहकानां सेवासु त्रिचत्वारिंशत्तमवर्षीयः प्रथमोऽयम् अङ्क उपायनीक्रियते। अस्याङ्कस्य प्राप्तेः समकालमेव यैरद्यापि नववर्षस्य वार्षिक शुल्कं न प्रहितम्, तैर्धनादेशपत्रेण (मनिआर्डर-द्वारा) पञ्चरूप्यकात्मकं तत् शीघ्रतरं प्रेषणीयम्। स्थायीग्राहकेभ्य एव बृहत्तमो विशेषाङ्कः अमूल्यं दीयते इति न विस्मर्तव्यम्। अस्मिन्नपि वर्षे विशेषाङ्कः शीघ्रमेव प्रकाशितो भविता। अतो वार्षिकमूल्यं त्वरितं प्रहेयमिति। —व्यवस्थापकस्य।

अनुक्रमः

प्रपानकम्	पत्रपुटम्	परिवेषकः
श्री सूर्यस्तुतिः	१	श्री स्व० दामोदरलाल गोस्वामी
श्री महर्षि-ज्ञानानन्दचरितम्	२	श्री विन्ध्येश्वरीप्रसाद शास्त्री
चिकित्साविज्ञाने भारतीयो दायः	३	सम्पादकीयम् (अग्रलेखः)
अस्माकं त्रिचत्वारिंशत्तमं वर्षम्	८	सम्पादकीया टिप्पणी
जगद्गुरुप्रभृतीनां महाव्रतसमाप्तिः	८	,, ,,
(१) द्विज-शूद्रयोर्भेदो वैदिक एव	९	श्री दीनानाथशास्त्री सारस्वतः
अस्माकं भारतम्	१३	श्री लक्ष्मीनारायण द्विवेदः
हरविजय-महा-महाकाव्यम्	१५	श्री गणेश उमाकान्त थिटे
सुप्त-प्रबुद्धम् (खण्डकाव्यम्)	२०	श्री स्व० लक्ष्मणशास्त्री तैलङ्गः
गोसेवा, तदादर्शो दिलीपश्च	२२	श्री श्रीकृष्णदत्त शर्मा
(२९) क्षत्रपति-महाकाव्यम्	२५	श्री उमाशङ्करशर्मा त्रिपाठी
मङ्गलाशंसनम्	२९	श्री श्री न० च० वे० नरसिंहाचार्यः
(३) गोवधनिरोधमहाभियानम्	३०	श्री 'अङ्गारः'
(८) मानस-भारती	३१	श्री जनार्दन गङ्गाधर रटाटे

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

SURYODAYA
7967.
G.K.V
Lib
HARDWAR

श्री

भास्वन् ! याति लघुर्गुरुत्वमचिरायान्त्योऽपि यत्सेवनाद्
भूयांसो भगणा भवन्ति भगवन् यद्वैभवाद् भास्वराः ।
पथ्यार्या विपुलाः श्रिताः सयति यन्मात्रावलम्बं सदा
तैः पादैरनुमापिता विजयते त्र्य्यात्मता तावकी ॥ १ ॥
वेदा यस्य मुखे मुखानि यदि वा द्वेधाऽपि वेधा न ते
सादृश्यं भजते तनौ हि भवतो द्वादश्यवेदात्मते ।
किं च स्तोतृजनैः पितामह इति प्रोक्तः प्रमाणात् कुतः
पद्मं जीवयसि त्वमेव, लभते तस्माद्ध्रुवं भास्कर ॥ २ ॥
रुग्-हान्यै त्वदुपास्यतेति नियमः कस्माद् बुधैः कीर्त्यते
पद्मा गीरपि तावकीनकृपया लालभ्यते वाञ्छिभिः ।
लक्ष्म्याधानदृढव्रतेन कमले सूर्य ! त्वयैवार्पितां
सिन्धोस्तां जगृहे हरिर्मुनिवरस्त्वत्प्राप विद्याः शुभाः ॥ ३ ॥
कमलभुवनवस्त्वद्वैतमुच्चैर्विचार्य, भ्रमसि भुवनकोशं हासयन् पद्ममैत्र्या ।
भजसि ननु यथार्थां मित्रतां तद्दिवस्वन्नुपदिशसि च कञ्चित् सख्यशिक्षाप्रकारम् ॥ ४ ॥

—स्वर्गीयाः श्री दामोदरलाल गोस्वामिपादाः—

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

श्रीभारतधर्ममहामण्डलस्य मासिकं मुखपत्रम्

रागद्वेषनिशाटनं विधुरयन् मोहं तमो नाशयन्,
तामिस्रं जडवादकैरवकुलं ज्ञानत्विषा ग्लापयन्।
विद्वत्कोकमशोकयन् नयसुधीरोलम्बमुन्मीलयन्,
सञ्जातः सुमनोमनो मधुरयन सर्वत्र सूर्योदयः॥

४३ वर्षे] वाराणसी, पौषः २०२३ : जनवरी १९६७ ई० [१ अङ्कः

श्री सूर्य-स्तुतिः

भास्वन्! याति लघुर्गुरुत्वमचिरायान्त्योऽपि यत्सेवनाद्
भूयांसो भगणा भवन्ति भगवन् यद्वैभवाद् भास्वराः।
पथ्यार्या विपुलाः श्रिताः सयति यन्मात्रावलम्वं सदा
तैः पादैरनुमापिता विजयते त्रय्यात्मता तावकी॥ १॥

वेदा यस्य मुखे मुखानि यदि वा द्वेधाऽपि वेधा न ते
सादृश्यं भजते तनौ हि भवतो द्वादश्यवेदात्मते।
किं च स्तोतृजनैः पितामह इति प्रोक्तः प्रमाणात् कुतः
पद्मं जीवयसि त्वमेव, लभते तस्माद्ध्रुवं भास्कर॥ २॥

रुग्-हान्यै त्वदुपास्यतेति नियमः कस्माद् बुधैः कीर्त्यते
पद्मा गीरपि तावकीनकृपया लालभ्यते वाञ्छिभिः।
लक्ष्म्याधानदृढव्रतेन कमले सूर्य! त्वयैवार्पितां
सिन्धोस्तां जगृहे हरिर्मुनिवरस्त्वत्प्राप विद्याः शुभाः॥ ३॥

कमलभुवनवस्त्वद्वैतमुच्चैर्विचार्य, भ्रमसि भुवनकोशं हासयन् पद्ममैत्र्या।
भजसि ननु यथार्थां मित्रतां तद्विवस्वन्नुपदिशसि च कञ्चित् सख्यशिक्षाप्रकारम्॥ ४॥

—स्वर्गीयाः श्री दामोदरलाल गोस्वामिपादाः—

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

श्रीमहर्षि-ज्ञानानन्दचरितं महाकाव्यम्

— श्रीविन्ध्येश्वरीप्रसादशास्त्री —

२१. स्वमृत्युकालं परिभाव्य चागतं
गृहस्थितांस्तान् निजदार-दारकान् ।
विहाय सर्वानिह पर्वते वसन्
ददर्श विप्रः स महर्षिमेकदा ।।

२२. सुदिष्टलाभात् परमर्षिदर्शनात्
स विप्रवर्यः कृतकृत्यतां गतः ।
यतीश्वरात् स्वापचितिप्रसादिताद्
गृहीतदीक्षो मुमुदेऽन्तरात्मनि ।।

२३. सपर्यया तस्य नितान्तरम्यया
महर्षिरेष प्रससाद मानसे ।
असेवत प्रत्यहमेव तं मुनिं
स भूसुरो योगजबोधकाम्यया ।।

२४. महीश्वरास्ते च महीसुरोऽप्यसौ
यतीश्वराद् योगविधिं बुभुत्सवः ।
समेत्य सर्वे मुनिपुङ्गवान्तिकं
न्यवेदयन् स्वं ह्यभिलाषमेकदा ।।

२५. विविक्तवासे निरतस्य योगिनो
विरक्तिरस्त्येव मनुष्यसंहतौ ।
तथापि तेषां परमाग्रहार्थितः
स्वशिक्षयद् दुस्तरयोगदर्शनम् ।।

२६. मनोरमः स्कन्धपुराणमध्यगः
कुमारिकाखण्ड इहाऽतिविश्रुतः ।
सुसिद्धयोऽशीत्यधिकं शतद्वयं
प्रकीर्तितास्तत्र सुरेन्द्रदुर्लभाः ।।

२७. अतीतसंख्याश्च विभिन्नमूर्तयो
लसन्ति चाष्टावणिमादिसिद्धयः ।
निरूपिता या इह योगदर्शने
न युष्मदासक्तिरमूषु शोभना ।।

२८. स्वशास्त्रदृष्टा अपि ताश्च सिद्धयो
निपातयन्त्येव यतीनधोगतौ ।
दुरन्तशक्तीरवधार्य ता अतो
न कोऽपि तत्पाशनिपातमीहताम् ।।

२९. प्रसिद्धविद्वानपि योगिनां वरः
स सर्वशास्त्रस्य च तत्त्वविद् गुरुः ।
इति प्रबोधं बहुशो ह्युपादिशत्
स्वशिष्यवर्गं प्रणतं दयानिधिः ।।

३०. अधीत्य गीतोपनिषत्-कदम्बकं
प्रयोगतस्तत् किल योगदर्शनम् ।
मनःस्थित-ग्रन्थि-विभेदनादिमे
ममज्जुरानन्दमये पयोनिधौ ।।

(क्रमशः)

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

सम्पादकीयम्

चिकित्सा-विज्ञाने भारतीयो दायः

सर्वविध-लौकिकसाधनसम्पत्ति-सुलभोऽपि जनो जातु नीरोगः स्वस्थो वा न स्यात्तदा तस्य सर्वाऽपि साधनसम्पत्तिर्मुधैव जायते, तदीयलाभैः स वञ्चित एव तिष्ठति। शरीरं पुनः 'व्याधिमन्दिरम्' उच्यते। क्षरणं नाम तस्य धर्मः। एवं सहजैर्व्याधिभिः आत्मनः संरक्षणं मानवस्य अनुपेक्ष्यं कर्तव्यं प्रतिफलति। अत एव विभिन्नेषु देशेषु न केवलम् आमानवम्, समुपयोगि-पश्वादिप्राणिजातं यावत् चिकित्साशास्त्रस्य अक्षुण्णा प्रवृत्तिः। कोऽपि जीवभृद् विषयममुं परिहृत्य न वर्तितुं शक्नोति, कामं तत्तद्देशीय-जल-वाय्वग्नि-बल-प्रकृति-देशकालादि-वैशेष्येन तत्तच्चिकित्सानां वैविध्यं स्यात्। तदिदं सर्वस्पृहणीयं सर्वानुपेक्ष्यं चिकित्साशास्त्रमेव समाश्रित्यात्र विगतमासद्वयेषु घटिताः काश्चन घटनाः समुल्लिख्यन्ते, समासतः समीक्ष्यन्ते च।

१. नवम्बरमासस्य सप्तम-दिनाङ्कतो दिनद्वयं यावत् वाराणसेय-संस्कृत-विश्वविद्यालये आयुर्वेदीय-शालाक्यगोष्ठ्या आयोजनमभूत्। २. दशमदिनाङ्के दिल्लीनगरस्य 'पञ्जाबीबाग'ख्यायां वसतौ प्रधान-मन्त्रिणाऽभिनवस्य 'धन्वन्तरिभवन'स्य शिलान्यासः कृतः। ३. नवम्बर-मासस्य विंशतिदिनाङ्के राजधान्यां तृतीयं 'विश्वचिकित्सा-शिक्षासम्मेलनम्' समायोजितमभवत्। ४. तस्मिन्नेवावसरे तत्रैव महती 'आयुर्वेद-प्रदर्शनी' अपि समायोजिता। ५. दिसम्बर-मासस्य विंशतितमदिनाङ्के पुनः धनबाद्नगरे 'अखिल-भारतीय (पाश्चात्त्य) चिकित्सक-सम्मेलनम्' समभूत्। सर्वेषामेषां समारोहाणां वृत्तमस्माकं चेतो बलादावर्जयति।

शालाक्य-गोष्ठी

शालाक्यगोष्ठ्याः शुभारम्भ-भाषणे केन्द्रीय-स्वास्थ्य-परिवार-नियोजन-मन्त्रिभिः डॉक्टर सुशीला-नायर महोदयाभिरुक्तम्—

'आयुर्वेदो हि चिकित्साविज्ञानस्य अगाधो भाण्डारः, तथापि तस्य समग्रमुपयोगं कर्तुं वयमक्षमा अभवम। अत इदमावश्यकं यज्ज्ञानस्यास्य भण्डारः अन्वेषणीयः, मानवताया हिताय च स नियोजनीयश्च।

अस्माकं देशे ईशवीय-पञ्चमशताब्दितः पूर्वमेव शल्यतन्त्रमिदम् अतितरां विकसितमासीत्। तावत् पर्यन्तमस्माकं देशे चिकित्साविज्ञानस्य काय-बाल-ग्रह-ऊर्ध्वाङ्ग-शल्य-दंष्ट्रा-जरा-वृष्यचिकित्सादीनि अङ्गानि चरमोत्कर्षतां गतानि। शल्यतन्त्रं पुनर्वाराणसीतो विशेषतः सम्बद्धमासीत्। नगरमिदं शल्य-चिकित्सा-शिक्षायाः प्रमुखतमं केन्द्रं परिगण्यते स्म। अत्रैव भगवता धन्वन्तरिणा महर्षिः सुश्रुतोऽध्यापितः। ते हि शल्यविज्ञानस्य जनकाः, प्रथमे आचार्याः समभवन्।

चिकित्साविज्ञानस्य शालाक्यशाखायां नेत्र-कर्ण-नासिका-कण्ठोष्ठ-मुख-दन्त-जिह्वा-ग्रीवादिगता रोगा अन्तर्भवन्ति। विषयेऽत्र भद्रक-शौनक-गालवादिभिराचार्यैः नैके ग्रन्था विरचिताः। सम्प्रति 'सुश्रुत-संहिते'व विषयस्यास्य मौलिको ग्रन्थः। शाखाया अस्या बहुलो भागः सुश्रुतसंहिताया उत्तरतन्त्रे समुपलभ्यते। तदा साम्प्रतिकानि उन्नततराणि शल्योपकरणानि वैद्येभ्यः सुलभानि नासन्। तथापि तेषां प्रेक्षाशक्तिरियती तीव्रतराऽऽसीद् यद् रोगस्य नितरां

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

सूक्ष्मतया निदानं कर्तुं ते प्राभवन्। स्पर्श-गन्ध-रङ्ग-स्वाद-स्वराणां सूक्ष्मतममन्तरमपि तैरवबुद्ध्यते स्म।

सत्यप्येवं पारतन्त्र्यादिविविधान्तरायैः विगत-सहस्रवर्षेभ्यो भारतीया शल्यचिकित्सा अत्यधिकम् उपेक्षिता समभवत्। अचिरादेव कियता कालेन पुनरत्र शास्त्रस्यास्य प्राचीनकालीनप्रगतेः अध्ययनं प्रारब्धम्। काशी-हिन्दूविश्वविद्यालयीयस्य भारतीय-चिकित्सास्नातकोत्तर-शिक्षासंस्थानस्य शल्य-शालक्य-विभागे सुश्रुतसंहितागतानां पूर्वकर्म-पश्चात्कर्मसिद्धान्तानां वैज्ञानिकपक्षीयमध्ययनं साम्प्रतं विधीयते। विषयेऽत्र यावत् प्रयतितम्, उत्साहवर्धकं किल तत्।

शालाक्यतन्त्रे त्रिदोषाणामसन्तुलनेन षट्सप्तति-संख्यकाः (७६) नेत्ररोगाः परिगणिताः। सुश्रुताचार्याणां तर्कोऽयं भूयान् प्रभावशाली यदेते नेत्ररोगाः नेत्रगोलकानाम् उपरितनपक्ष्मणां शोथेन जायन्ते। निदानपञ्चलक्षणेषु रोगस्य पूर्वरूपाख्येऽङ्गे तेषां विशेषाग्रहो दृश्यते, येन रोगाणां समुत्पत्तिरेव मूलतो निरुद्ध्यते। अत्र नियमतः अभ्यङ्गा-ऽञ्जन-नस्यादीनां रोगनिरोधे कियदुपकारकत्वम्, तन्नूनं गवेषणीयतां भजते। आशास्महे यदत्र गोष्ठ्यां विषयेऽस्मिन् विचार्येत' इति।

शालाक्यगोष्ठ्याः सभापतिभिः अन्ताराष्ट्रिय-लब्धप्रतिष्ठैः पद्मभूषण श्री शिवशर्म वैद्यराजैः आयुर्वेद-चिकित्साप्रणाल्या इतिवृत्तं निरूपयद्भिः प्रकटीकृतं यद् 'इयं विश्वस्य सर्वतः प्राचीनतमा चिकित्सा-प्रणाली। भारते पूर्णतो विकसितेयम्, वाराणसी चास्याः प्रमुखतमं केन्द्रमासीत्। सम्प्रति भारते चरक-सुश्रुतपद्धत्यौ प्रचलतः। सुश्रुतपद्धतेर्विकासस्य मुख्यं श्रेयो वाराणस्या एव। अतोऽस्याः पुनरुद्धाराय वाराणस्या सविशेषं प्रयतनीयम्।

साम्प्रतं देशेऽस्मिन् पाश्चात्त्यचिकित्साप्रणाल्या एवाधिराज्यं प्रसृतमास्ते। जनसाधारणैः आयुर्वेद-प्रणालीयं समुपेक्षितप्रायैव। तथापि ममेदं सुनिश्चितं मतं यद् येषां रोगविशेषाणां निदान-निरोधादिविचारः पाश्चात्त्यचिकित्साप्रणाल्यां जात्वपि नासाद्यते, आयुर्वैदिक-चिकित्साप्रणाल्यां सोऽपि निर्विचिकित्सितो भूयसा समुपलभ्यते। अहो महनीयता शास्त्रस्यास्य! सत्यप्येवं घोराज्ञतावशात् आयुर्वेदिकीं चिकित्सा-मिमामनादृत्य अहरहः सहस्रशो जना अकाले काल-कवलिता जायन्ते, किमतः परं विधुरम्! नूनं जगति आयुर्वेदवत् विकसिततरा चिकित्साप्रणाली असुलभैव। अतोऽस्माभिरस्याः समुन्नयने समुद्धरणे च दत्तचित्तै-र्भाव्यमि'ति।

सम्मेलनेऽस्मिन् नेत्र-कण्ठ-नासा-कर्ण-रोगेषु विचारितं सङ्कतैर्भारतीयचिकित्सकैः, अधिकृतैर्विद्वद्भिः गवेषणापूर्णा निबन्धा अपि पठिताः। उत्तरप्रदेशीय-राज्यपालाः श्री विश्वनाथदासदेवा गोष्ठ्यामत्र समुपस्थिता आसन्, ये किल प्राच्यविज्ञानसंशोधनाय गृहीतव्रता इव दृश्यन्ते। वाराणसेय-संस्कृत-विश्वविद्यालयोपकुलपतीनां डॉक्टर सुरेन्द्रनाथ शास्त्रिपादानां सविशेष-वैदुष्यानुरूपोऽभिनवः प्रयासोऽयमासीत्।

धन्वन्तरि-भवनम्

अखिलभारतीय-आयुर्वेदिकमहासम्मेलनस्य तत्त्वावधाने जायमाने धन्वन्तरिभवन-शिलान्यासावसरे प्रधानमन्त्रिभिः श्री इन्दिरा गान्धि महोदयाभिरुक्तम्—

'नूनं पश्चिमदेशवासिभिर्भूयांसो विषया भारतीयायुर्वेदशास्त्रतः परिगृहीताः, पुनरपि च ते आयुर्वेदे समुन्मुखाः दृश्यन्ते; तथापि साम्प्रतिकमावश्यकतमं कर्तव्यमेतत् यत्सर्वाः चिकित्साप्रणालीः सङ्गमय्य देशस्य कोटिशो जनाः समुद्धरणीया इति।

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

अतोऽहं प्रार्थये यद्देशस्यास्य सर्वेषां तत्तच्चिकित्सा-प्रणालीः अनुसरतां चिकित्सकानां मतयोऽत्र संयुञ्जन्तु, देशस्य स्वास्थ्यञ्च परिवर्धताम्। यतो हि सर्वतोमुखविकासाय समुन्नयनाय च शारीरिकं स्वास्थ्यमनुपेक्षणीयं भवतीति।

आयुर्वेदिक-चिकित्साप्रणालिर्हि सर्वतः प्राचीनतमा, तया च बहुशो जना लाभान्विता अभवन्। तथापि काऽपि प्रणाली तावत् न विकसति यावत्तस्याः द्वाराणि विभिन्नप्रणालिषु समुपलभ्यमानानां ज्ञानानां ग्रहणाय मुद्रितानि स्युः। अतो विज्ञानस्यास्य अन्यक्षेत्रेभ्योऽपि ज्ञानार्जनमस्माकमनुपेक्ष्यं कर्तव्यं समापतति। आयुर्वेद - चिकित्साप्रणाली नूनमल्पव्ययसाध्या, अतः सर्वसाधारणानां बहूनां रोगनिवारणे सर्वथा समुपयुक्तेयं प्रणाली सर्वैः समादरणीये'ति।

विश्व-चिकित्सा-शिक्षा-सम्मेलनम्

तृतीयं विश्वचिकित्सा-शिक्षासम्मेलनं श्री लक्ष्मण-स्वामि मुदालियर महोदयानामाध्यक्ष्ये षड्भिर्दिनैः सम्पन्नम्। भारतस्य कृते प्रथमोऽयमवसर आसीत्। सम्मेलनेऽस्मिन् विभिन्न - पञ्चाशद्देशीयाः ७२५ संख्यकाः वैज्ञानिकाः, अर्थशास्त्रिणः, समाजशास्त्रिणश्च सङ्गताः। विश्वस्वास्थ्य-सङ्गठनस्य महानिदेशकाः श्री डॉक्टर एम० जी० गांगुलिमहोदया आसन्।

सम्मेलनस्य शुभारम्भं कुर्वद्भी राष्ट्रपतिभिः डॉक्टर राधाकृष्णन् महोदयैरुक्तम्—'कस्यापि राष्ट्रस्य समुन्नत्यै शारीरिकक्षमता परमावश्यकी। अस्माकं प्राचीन-भारतीया चिकित्साप्रणाली अतितरां वैज्ञानिकी आसीत्, यस्यां योगप्रणाल्यपि सन्निविष्टा वर्तते। योगप्रणाल्याः महत्त्वं पुनः साम्प्रतिकाः चिकित्सा-शास्त्रिणोऽपि मन्वते, यतो ह्यनया शारीरिक-स्वास्थ्यादन्यत् मानसिको बौद्धिकश्चापि विकासो जायते' इति।

राष्ट्रपतिभिरुक्तम्—'आधुनिकचिकित्सकैः डॉक्टर-पदाभिधेयैस्तथा बहु प्रयतनीयं यथा किल आधुनिक-चिकित्साप्रणाल्या लाभः सर्वसाधारणेभ्यो जनेभ्यो भूयात्। अतः स्पष्टमिदं यत्तैरयं व्यवसायः केवल-मार्थिकलाभदृष्ट्या कथमपि न करणीयः। प्रत्युत पीडितानां पीडाशमनमेव तेषां मुख्यमुद्दिष्टं भाव्यम्' इति।

सम्मेलने समागतैर्वैदेशिकैः पञ्चभिर्विशेषज्ञैः वृत्त-पत्रप्रतिनिधि-सम्मेलने उक्तं यत् 'चिकित्साशिक्षा-वसरः समाजगतेभ्यो निम्नवर्गेभ्योऽपि देयः। यतो हि एतेऽद्यावधि लाभेनानेन वञ्चिताः।' तैरुक्तं यद् 'विकासोन्मुखदेशेषु रोगनिवारणं नाम आर्थिक-समाजिकी महती समस्या! यदि दारिद्र्यं निवार्य जन-साधारणस्य स्तरः समुन्नीयेत तदा तेनैव तेषु देशेषु सहजतो नैके रोगाः परिहृताः स्युः।' चिकित्सा-शिक्षाप्रणालि-विषयेऽपि नैकैः प्रतिनिधिभिः प्रातिस्विकं स्वीयमभिमतं प्रकटीकृतम्।

आयुर्वेद-प्रदर्शनी

अस्मिन्नेवावसरे तत्रैव विशाला प्रदर्शनी समा-योजिता, यस्यां भारतीय-चिकित्साविज्ञानस्य कथं क्रमिकप्रगतिः समभवदिति प्रदर्शितमासीत्। भूर्ज-पत्रीयः आयुर्वेदग्रन्थोऽपि तत्र प्रदर्शनार्थं संस्था-पित आसीत्, येन प्राचीनकाले शल्यचिकित्साविषये देशेऽत्र कीदृशी प्रगतिरभवदिति स्फुटमवगन्तुं शक्यते।

अ० भा० चिकित्सा-सम्मेलनम्

धनबाद-स्थाने दिसम्बरमासस्य २७ दिनाङ्के अखिल - भारतीय - चिकित्सासम्मेलनमभवत् यत्र सभापतिपदेन 'इण्डियन मेडिकल असोशियेशना'ख्य-संस्थाध्यक्षैः डॉक्टर भोलानाथ महोदयैरुक्तं यत् 'देशेऽस्मिन् 'डाक्टरी'ति ख्यातायाः पाश्चात्य-चिकित्साशिक्षायाः पाठ्यक्रमः पुनरामूलचूलं संशोध्य

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

नवीकरणीयः। पाठ्यक्रमोऽयमेतादृशो भाव्यो येन समाजस्य आवश्यकताः प्रपूरयेरन्, विशेषतो ग्रामीणानामावश्यकताः। देशस्य प्राथमिकी आवश्यकतेयं यन्मूलतः एतादृशा डाक्टर-पदाभिधेया निर्मातव्याः ये किल ग्रामेषु, नगरेषु च उभयत्र समं कार्यं कुर्वन्तो विभिन्नसेवासु नियोजिता भवेयुः। एतादृशैः डाक्टर-जनैरेव समाजस्य आवश्यकताः प्रपूरयिष्यन्ति। एतदर्थं समुचिता जना एव शिक्षायै निर्वाचनीयाः। सामान्याध्ययनेन सहैव प्रतिवर्षमन्यूनं मासत्रयं शिक्षकाश्छात्रानादाय ग्रामेषु निवसेयुः, तांश्च सक्रियं ग्रामीणचिकित्साविधौ कुशलांश्च विधीयेरन्नि'ति। अध्यक्षमहोदयैरुक्तम्—

'महत्खेदास्पदमिदं यत् स्वातन्त्र्यलाभाद् एकोनविंशतिवर्षोत्तरमपि अद्य डाक्टरी-शिक्षाया पाठ्यक्रमस्य, अध्ययन-क्रमस्य, अध्यापनविधीनां परीक्षास्तरस्य च निर्धारणाय ब्रिटेनदेशस्य साधारणचिकित्सासमितेः (जनरल मेडिकल कौन्सिल, ब्रिटेन) स्वीकृतिरनिवार्या भवति, विषयेऽत्र सा निर्दिशति च ! अस्य शीघ्रं परिष्कारो भाव्यः' इति।

अथेदानीं सर्वोऽप्ययं समारोहजातः समासतः समीक्ष्यते। इदन्तु स्पष्टमेव यत्सर्वस्य रोगस्य मूलं दारिद्र्यम्। षष्ठं महापातकमेव तत् खलु। राष्ट्रे, समाजे व्यक्तौ च धनसम्पदा सम्पन्ने प्रायो बहवो रोगाः दूरतः पलायन्ते। अतः प्रत्येकेन राष्ट्रेण, समाजेन, व्यक्तिना च सम्पन्नेन, अन्यूनं दैनन्दिन्यावश्यकवस्तुसौलभ्यभाजिना तु भाव्यमेव। परं कथमेतत् सम्भवेद् यदि तथाकथिता राजनीतिज्ञाः स्पर्धामयीं राजनीतिमेव सञ्चालयितुं दत्तचित्ताः स्युः? सामाजिकाः पुनर्जातीयता-दलीयतादिसङ्कुचितभावनाग्रहग्रहिलाः स्युः? व्यक्तिश्च स्वार्थसाधनमेव स्वीयमितिकर्तव्यतां मन्येत। अतो राष्ट्रस्य जगतश्च मूलतो नव्यः परिष्कारो शाश्वतिकानां प्राचीनानामादर्शानामेव नवयुगानुरूपप्रस्थापनं विश्वरोगस्य सफला चिकित्सा। साऽपि सर्वस्य चिकित्सकस्य चिकित्साक्षेत्रान्तर्गता। तां समुपेक्ष्य कोऽपि चिकित्सकः स्वीये चिकित्साविधौ साफल्यं नासादयेत्।

एतदर्थं सर्वैः 'कामये दुःखतप्तानां प्राणिनामार्तिनाशनम्' इति भगवतो धन्वन्तरेरुपदेशः स्वात्मनि आत्मसात् करणीयः। तस्य सुकरः कार्यान्वयनप्रकारो ग्रामीणजनानां चिकित्सितं नाम। तेन तेषु या व्यर्थाऽहङ्कृतिः, द्रव्यैकदृष्टिः, साधारणजनातिरिच्यता, अनार्द्रतादयो दोषाः प्रायो भारतीयायुर्वेदचिकित्सकेभ्योऽतिरिक्तं प्रामुख्येनोपलभन्ते तेषां रामबाणायिता चिकित्सा स्यात्। भारतीयेभ्यः आयुर्वेदचिकित्सकेभ्य एतत्पुनः पृथगुपदेश्यं नावशिष्यते। तेषां तथाऽकरणं तदीय-भारतीयतानिवारकमेव, फलतः स्वरूपहानिकल्पमिव स्यात्। विषयेऽत्र यावत् सत्वरं चिकित्सका अवधास्यन्ति, तावदेव श्रेयः। तत्रापि भारतदृष्ट्या विचार्यमाणे डाक्टर भोलानाथ महोदयानामभिनव - भारतीय-डाक्टर - निर्माणविषयिण्यः सूचनाः सर्वतोऽनुपेक्ष्याः। तेषामयं खेदो महते खेदाय यत्स्वातन्त्र्यलाभोत्तरं विंशतिवर्षेऽपि भारतीयडाक्टरी-चिकित्सा स्वीयशिक्षाविधौ अनिवार्यतया पाश्चात्त्यदेशमुखापेक्षिणीति। इयं स्थितिः कस्यापि सर्वतन्त्रस्वतन्त्र-प्रभुसत्तासम्पन्नस्य राष्ट्रस्य कृते परं लज्जास्पदं वस्तु। तद्धि यथाशीघ्रं परिहृतं भवेत्तथा सर्वैः भारतीयैश्चिकित्सकैः भारतीयैः शासकैश्च प्रयतनीयम्।

धन्वन्तरि-भवनस्य निर्माणम् आयुर्वेदिकचिकित्साप्रदर्शन्यादीनामायोजनानि नूनमभिनन्दनीयानि। इत्थमेव आयुर्वेद-महत्त्वस्य साम्प्रतिकैः प्रचारसाधनैः

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

प्रचारणम् आयुर्वेदप्रणयिनामावश्यकं कर्तव्यम्। नैतदेव, ये किल प्राचीना आयुर्वेदप्रस्थापकाः समभूवन्, तेषां स्थान-रचना-महत्त्वादीनां संशोधनम्, तेषां प्रसिद्धकर्मभूमेः पुनरुद्धारादिकमपि आयुर्वेदसमुन्नायकैः करणीयं वस्तु। उच्यते यद् वाराणसेयो वृद्धकालकूपो धन्वन्तरिकूपत्वेन प्रथित आसीत्, यत्र भगवता धन्वन्तरिणा अवतारोपसंहरणकाले स्वीयमोषधजातं तत्र प्रक्षिप्तम्। अत एव कूपस्य एकैकभागस्य जलं विभिन्नगुणधर्मकमुपलभ्यते। एतादृशानां स्थानानामन्वेषणमपि अखिलभारतीयायुर्वेदसम्मेलनस्य कर्तव्यम्। आशास्यते यदत्र ते नूनमवधास्यन्तीति।

यावद्धि शल्य-शालाक्यतन्त्रविषये विवेचनीयं वस्तु, केन्द्रीय-स्वास्थ्यमन्त्रिमहोदयाभिः शालाक्य-गोष्ठी-शुभारम्भभाषणे साधु निरूपितम्। प्रायो जनसाधारणेषु भ्रान्तेरस्याः बहुलः प्रचारो दृश्यते यत् शल्यचिकित्सा पाश्चात्त्यानामेव दायः। काममद्य तैरत्र विषये समयानुरूपो विकासः कृतः, तथापि अस्य मूलं वेदेष्वपि उपलभ्यते। तदा तन्त्रमिदम् एतादृग् विकसितमासीत् यस्य कल्पनाऽपि साम्प्रतिकैः कर्तुं न शक्या। अश्मरीरोगः कियान् भयङ्कर इति तु वैद्या जानन्त्येव। यदि दौर्भाग्यात् गर्भिणी तेन रोगेण ग्रस्ता भवेत्, तदा तु महत्सङ्कटम्। तस्मिन् कालेऽपि अथर्ववेदस्य ऋषिर्ब्रूते यदहं शल्यचिकित्सया अश्मरीरोगनिष्कासनं सजीवं पुत्रजन्म च कर्तुं प्रभवामि। यथा—

> वि ते भिनद्मि मेहनं वि योनिं वि गवीनिके।
> वि मातरं च पुत्रं च जरायुणा जरायु व पद्यताम्॥

विचार्यताम्, एतादृशसफल-शल्यचिकित्सकानां समवधाने को नाम प्राचीनकाले शल्यचिकित्साया विकासाभावं साधयितुं पारयेत्?

वस्तुतोऽद्य भौतिकशक्तिबलेन चिकित्साशास्त्रस्य विकासः क्रियते, प्राचीनकाले च भौतिकशक्तिम् उपकरणत्वेन परिकल्प्य करणरूपेण आध्यात्मिकशक्तिरेव समुपयुज्यते स्म। विवेचका जानन्त्येव यद् भौतिकताया यत्र अन्तो जायते, आध्यात्मिकतायास्तत एव आरम्भो भवति। अतः प्राचीनकाले शल्यचिकित्साया विकासो नासीदिति रिक्तं वचः। अत एव राष्ट्रपतिमहोदयैः विश्वचिकित्सासम्मेलने यौगिकचिकित्साप्रणाल्याः सङ्केतः कृतः। वस्तुतस्तस्या अपि विकासः प्राचीनभारतीय-शल्यचिकित्सायाः समुन्नयने महत्साहाय्यं विदध्यात्। आवश्यकतेयं यदायुर्वेदरसिकैः विद्वद्भिः संस्थाभिः आयुर्वेदापालकैश्च सम्भूय प्राचीनतमनिधेः रहस्यं मार्गयित्वा प्रकटनीयम्। वाराणसेय - संस्कृत - विश्वविद्यालयोपकुलपतीनामत्र दृष्टिरावर्जिता, शालाक्यगोष्ठ्याश्च तैरिदं बृहदायोजनं कृतमिति अभिनन्दनीयं वस्तु। गोष्ठ्या अस्या आयोजनोत्तरं कार्यमिदं विकासपथे नेयमित्यपि ते प्रार्थ्यन्ते।

प्रसङ्गेऽस्मिन् एकं संसूचनीयं वस्तु, विशेषत आयुर्वेदचिकित्सकानां कृते। तच्चेदं यत् बहव आयुर्वेदचिकित्सकाः तां चिकित्सां समाचरन्तोऽपि पूर्णतस्तत्र न श्रद्दधन्ते। अत एव आयुर्वेदौषधेन साकं ते पाश्चात्त्यौषधानपि स्फुटमस्फुटं वा समुपयुञ्जन्ते। इदमायुर्वेदस्य कृते तु सर्वथा मारकम्, प्रसङ्गविशेषे रुग्णस्यापि मारकं तद् भवेत्, भवति च। आयुर्वेदचिकित्सकैरत्र विशेषतो दृष्टिर्देया। आयुर्वेदसमुन्नायिकाभिः सञ्चालिकाभिश्च संस्थाभिरेतादृशानां चिकित्सकानां नियन्त्रणमवश्यं कार्यम्। अन्ते वयमायुर्वेदसमुन्नायकान् निवेदयामो यदायुर्वेदस्य सर्वेषां विभागानां विकासाय तैर्दृढं प्रयतनीयम्, शास्त्रस्यास्य वास्तविकं स्वरूपं प्रकटय्य दुःखतप्तानां स्वदेशीयजनानाम् आर्तिहरणेऽमोघप्रयत्नैर्भाव्यम्, यतो हि 'यस्य देशस्य यो जन्तुस्तज्जं तस्यौषधं मतम्' इति शास्त्रकृतामनुशासनादिति।

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

अस्माकं त्रिचत्वारिंशत्तमं वर्षम्

'सूर्योदयो'ऽयम् अनेनाङ्केन सह द्विचत्वारिंशत्तमं वर्षं परिसमाप्य त्रिचत्वारिंशत्तमे वर्षे प्रविशति। एतदर्थं सर्वप्रथमं स भगवतो जगन्नियन्तुश्चरणयोः सप्रश्रयं श्रद्धाञ्जलिं समर्प्य कृपालुपाठकेभ्योऽनुग्राहकेभ्यो धन्यवादान् वितरति। तेषामेव कृपया पत्रेणानेन अद्यावधि सुरभारतीसमाराधनविषये किञ्चित् प्रयतितम्। तत्कियन्मूल्यमावहतीति नास्माकं निर्णयपदम्। अत्र त एव प्रभवन्ति। वयं पुनरिदमेव संभावयामो यत्तेषां हार्दिकी स्नेहपरम्पराऽस्माभिरविरतं प्राप्यते इति तेऽस्मान् वाञ्छन्ति। सर्ववस्तुमहर्घतातिरेकसङ्कुलेऽस्मिन् काले सूर्योदयः कथं प्राणीतीति नापरोक्षं विपश्चितां ग्राहकानाम्। प्रतिवर्षमनेन बृहत्कायो विशेषाङ्कोऽपि स्वल्पतमेनानेन वार्षिकमूल्येनैव उपायनीक्रियते। यदि संस्कृतप्रणयिभिः सूर्योदय-पाठकैरिदं निर्णीयेत यद् वयं पञ्चरूप्यकात्मकं वार्षिकशुल्कं दत्त्वैव पत्रमिदं पठिष्याम इति, तदपि अस्मभ्यं परं सहायकं भवेत्। लोकतान्त्रिकेऽस्मिन् युगे 'जनाधारित'स्य पत्रस्य मूल्यमन्यामेव श्रियमुल्लासयति। शासनेनाऽपि एतादृशस्य पत्रस्य कृते इतोऽप्यधिकमनुदानं दीयेत, तदा वयं पत्रस्य आकार-प्रकारविकासिनीः योजनाः कार्यरूपेण परिणमयितुं प्रभविष्यामः। तदभावे ता योजना अस्माकं मनस्येव उन्मीलन्ति निमीलन्ति च। प्रादेशिक-शिक्षासञ्चालकाः, संस्कृतपाठशालानिरीक्षकाश्चापि पूर्ववत् पुनरपि प्रार्थ्यन्ते यत्तैरनुदानभाजि-पाठशाला-पुस्तकालयादिषु पत्रस्यास्य अनिवार्यग्राहकत्वं निदेश्येत तदाऽपि महदुपकृतं भवेत्। आशास्महे, सम्बद्धा अधिकारिणोऽत्र अवधास्यन्तीति।

जगद्गुरुप्रभृतीनाम् महाव्रत-समाप्तिः

गोवधनिरोध-महाभियानं तृतीयं पर्व जनवरीमासान्तेन सह प्रपूर्य चतुर्थे पर्वणि प्रविशति। प्रथमं पर्व स्वातन्त्र्यलाभकालतः विगत-नवम्बरमासस्य (६) षष्ठदिनाङ्कं यावत्, द्वितीयञ्च सप्तमनवम्बरतः दिसम्बरमासान्तं यावत् समभवताम्। इदं तृतीयं पर्व जनवरीमासव्यापि यस्य परिसमाप्तिः जगद्गुरुशङ्कराचार्य-पुरीपीठाधीश्वराणां श्रीनिरञ्जनदेवतीर्थपादानां सन्तवर प्रभुदत्त ब्रह्मचारिणां श्रीरामचन्द्रशर्म 'वीर'महोदयानाम् अन्येषाञ्च तादृशानामेव महात्मनाम् अनशनमहाव्रतस्य परिसमाप्त्या जायते। अत्र विषये ७२-७३ दिनानि यावत्, १६५ दिनानि च यावत् अनशनव्रतं कृत्वा एभिर्महात्मभिः गोवधनिरोधविषये दृढतरा निष्ठा दर्शिता। नैकैः भारतीयैर्महात्मभिः नेतृभिः सन्त विनोबा भावे-सदृशैर्महापुरुषैरपि ते समनुरुद्धा यदनशनमहाव्रतस्य लक्ष्यं जनजागरणं पूर्णतोऽत्र संसिद्धम्। वास्तविकी सत्ता जनेष्वेव लोकतान्त्रिके राज्ये प्रतिष्ठिता। सा चेद् पूर्णगोवधनिरोधमविलम्बं वाञ्छति तदा काऽपि शक्तिस्तामिच्छां निरोद्धुं न शक्नुयात्। यद्यपि शासनेन गोवधनिरोधप्रश्ने सर्वाङ्गीणविचाराय समितिसङ्घटनस्य घोषणा कृता यत्र केन्द्रीय-राज्यीय-प्रतिनिधीनां सहैव गोरक्षा-महाभियानसमितेरपि प्रतिनिधयो भविष्यन्ति; एवमेव प्रकारान्तरेण महाभियानसमितेः प्रस्तावा अपि स्वीकृता स्तेन; तथापि वक्तव्यमिदं यच्छासनेन राष्ट्रपितुः महात्मगान्धिनो अहिंसात्मकानशनोपायस्य किमपि मूल्यं न कृतम्। इतः परं महाभियानमिदं प्रचलत्येव। तावच्च प्रचलिष्यति यावत् पूर्णतः गोवधो न निरुद्ध्येत। परम् अनशनपर्व समाप्तम्। एतदर्थं वयं भगवतां जगद्गुरु-प्रभृतीनामधमर्णाः। भारतीयजनताश्चास्माभिः प्रार्थ्यन्ते यद् अहिंसकमार्गेण यावद् गोवधस्य पूर्णतः निरोधो न भवेत्, तावत् भवद्भिरत्र बद्धपरिकरैरेव भाव्यमिति।

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

द्विज-शूद्रयोर्भेदो वैदिक एव

— श्री दीनानाथशास्त्री सारस्वतः, विद्यावागीशः —

[प्रधानाचार्यः — रामदल-संस्कृत-महाविद्यालयस्य, दिल्ली]

[आचार्यश्री·सारस्वतमहाभागाः 'सूर्योदय'स्य प्राचीनतमाः सुप्रसिद्धलेखकाः। वैदिकसनातन-धर्मसमुद्धरणविधौ साम्प्रतिके भारते संख्यादृष्ट्या परिमाणदृष्ट्या च एतेषां वाङ्मयीनो दायः सर्वानतिशेते। व्यक्तिशोऽस्मांश्च ते बहु स्निह्यन्ति। तथापि अद्यावधि प्रायः पञ्च-षड्वर्षैः एतत्कार्यं सम्पादयद्भिः अस्माभिस्तेषां काऽपि रचना दौर्भाग्यात् 'सूर्योदय'स्य कृते नासादिता। अस्य हेतुस्तेषामेव शब्दैः 'श्रीसनातनधर्मालोक'-ग्रन्थमालायाः प्रणयनव्यापृतिरेव। सोऽयं हिन्दीभाषामयो नैकैः खण्डैर्विभक्तो ग्रन्थः सनातन-धर्मविषयिणीः सर्वाः कुशङ्काः सच्छङ्काश्च च्छेतुं तमोपहा दिवाकर इव वक्तुं शक्यः। बृहत्कायो ग्रन्थोऽयं कथं कथमपि अर्थसंयोजनं कृत्वा आचार्यपादैरेव प्रकाशितस्तत एव सुलभश्च। आशास्महे अनेन उपक्रमेण आचार्यपादाः स्वीयचिरसङ्गृहीतज्ञानराशिभिः एवमेव प्रायोऽखण्डं सूर्योदयमनुग्रहिष्यन्तीति। — सम्पादकः]

'भारती'-पत्रिकायां 'भारतोदये' च पत्रे 'किं द्विज-शूद्रभेदो वैदिकः ?' इति लेखः प्रकाशितो दृष्टः। तदीयलेखकमहाभागस्य अयमाशयो यद् 'द्विज-शूद्र-भेदः समस्तेषु स्मृतिशास्त्रेषु, सर्वेषु च सूत्रग्रन्थेषु, क्वचिद् ब्राह्मणग्रन्थेष्वपि साक्षात्क्रियते; परं मूलवेदानां परिशीलनेन द्विज-शूद्रभेदो न क्वापि मन्त्रे लक्ष्यते' इति। परं वयं तु वदामो यद् वेदे तु द्विजशूद्रभेद इतोऽप्यधिकः स्पष्टो दृश्यते। यथा—

(१) प्राक् तु लेखकेन 'वेदस्य सीमैव सङ्कोच-मानीता। ११३१ शाखात्मको मन्त्रभागः, तावानेव च ब्राह्मणभागो यत्र आरण्यकानि उपनिषदश्चापि अन्तर्भवन्ति, इति वेदस्य स्वरूपम्। एतत् सर्वं साहित्यं सम्भूयैव वेदनाम्ना आख्यायते। मूलवेदास्तु क्वचिन्न दृश्यन्ते, वृक्षस्य मूलं कदापि, क्वापि, केनापि न दृश्यते। तदीयाः शाखा एव दृश्यमाना भवन्ति। ता एव लेखकमहाभागो 'मूलवेदाः' इति वक्ति; ता अपि चतुर्वेदानां क्रमशः शाकल्य-माध्यन्दिन-कौथुम-शौनकशाखा भवन्ति। ऋग्वेद-यजुर्वेद-साम-वेदा-ऽथर्ववेदाः क्वापि न प्राप्यन्ते। यत्र प्राप्यन्ते, ऋग्वेदसंहिता-यजुर्वेदसंहिता - सामवेदसंहिता - ऽथर्व-वेदसंहिता एव प्राप्यन्ते। ऋग्वेदादयस्तु क्वापि न मुद्रिताः सन्ति। (अस्मिन् विषये आस्माकीनायाः 'श्रीसनातनधर्मालोक'ग्रन्थमालायाः ४ - ६ - ७ - ८ - ९ पुष्पाणि विलोकनीयतामर्हन्ति; ततो निर्णयो भवेत)। यदा खलु लेखको ब्राह्मणग्रन्थेषु द्विज-शूद्रभेदं मनुते, ततस्तत्र वैदिकता स्वतःसिद्धा। 'मन्त्रब्राह्मणयोर्वेद-नामधेयम्' इति ब्राह्मणानामपि वेदत्वात्।

(२) स्मृतिषु मनुस्मृतिः सृष्ट्यादिकालिकी, वेद-व्याख्यात्री च मन्यते। एतद् आर्यसमाज-सञ्चालकेन श्रीदयानन्दस्वामिनाऽपि 'सत्यार्थप्रकाश'स्य एकादश-समुल्लासारम्भे कण्ठतः प्रोक्तम्। वादिप्रतिवादि-मान्येन निरुक्तकृता श्री यास्काचार्येणापि "तदिदं 'विसर्गादौ (सृष्ट्यादौ) मनुः स्वायम्भुवोऽब्रवीत्" (३।९।२) इति महता कण्ठरवेणानुमोदितम्।

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

'यः कश्चित् कस्यचिद्धर्मो मनुना परिकीर्तितः।
स सर्वोऽभिहितो वेदे सर्वज्ञानमयो हि सः॥'

इति मनुस्मृति (२।२७)-प्रवक्तुः श्री भृगोरपि घण्टाघोषः। तत्र मनुस्मृतौ प्रोक्तो द्विजशूद्रभेदोऽर्थतो वैदिकः सिद्धः। 'मनोरयमिति मानवः'। स मनुः स्वसन्ततिषु यथार्थमेव व्यवहारं कुर्यात्, न पक्षपातम्, न वा सङ्कुचितव्यवहारम्।

(३) द्विजत्वमुपनयनसंस्कारेण भवति इत्यत्र न कस्यापि भवेद् विसंवादः। संस्काराश्च पारस्करादिगृह्यसूत्रैर्भवन्ति इति लेखकमहोदयोऽपि मन्येत। तानि च वेदस्य कल्प-नामकं हस्तस्थानीयमङ्गं कथ्यते। तत् किमङ्गमपि अङ्गिनं विरोद्धुमर्हेत ? तद् विरुद्ध्य लेखकमहाभागो वेदस्य हस्तं चिच्छित्सति ? तदेवं सूत्रग्रन्थेषु प्रोक्तो द्विजशूद्रभेदो वैदिकः फलितः। मन्त्रभागव्याख्याता ब्राह्मणभागः, वेदविनियोजकाः सूत्रग्रन्थाः, वेदधर्मप्रतिपादका मन्वादयश्च, किमेते सर्वे वेदानभिज्ञा आसन्, सन्ति वा ? केवलमेको लेखकमहोदय एव वेदज्ञो भवेत् ? नैषा श्रद्धेयवार्ता भवितुमर्हति।

(४) 'स्तुता मया वरदा वेदमाता··· पावमानी द्विजानाम्' इति चाऽपि च वेदे द्विजानामधिकारं पुष्णन्नस्ति। तद् लेखकमहोदयः स्वाऽभिमतं वेदं कथं नाम विरुणद्धि ? यदि वेदाः सत्यमेव मानवमात्रहितैषिणः, न तु द्विजहितैषिणस्तदा वेदेन 'वेदमाता ···जनानाम्' इति नोक्त्वा 'वेदमाता···द्विजानाम्' इति कथमुक्तम् ? एतेन सिद्ध्यति यद् लेखकः स्वकल्पितमेव सिद्धान्तं वैदिकं मनुते, न खलु वेदादिशास्त्रप्रोक्तम्। लेखकः शिक्षितमात्रं द्विजं वष्टि, वेदांश्च द्विजपावकान् मनुते। तद् वेदोऽपि लेखकसिद्धान्तविरुद्धं द्विजहिताय सिद्धः, न तु मानवमात्रहिताय। यः शिक्षितो नास्ति, स मानवोऽपि सन् द्विजो नास्ति। स लेखकाशयेन शूद्रः। तद् लेखकमतेऽपि वेदस्य द्विजमात्रहिताधायकत्वेन लेखकाभिमता वेदस्य मानवमात्रहिताधायकता निरस्ता इति तन्मतेऽपि द्विज-शूद्रभेदो वैदिकः फलितः।

(५) यत्तु खलु लेखक उक्तमन्त्रे 'द्विज'स्य व्यापकमर्थं गृह्णाति—'यस्य द्वे जन्मनी, एकं मातृतः, द्वितीयं विद्यातः' इति, अयमर्थोऽमुना कुत उपात्तः ? वेदे अयमर्थः कुत्रोक्तः, लेखकोऽत्र उत्तरयतु। 'यो गुरोः सकाशात् प्राप्तविद्योऽस्ति स द्विजः' इति स्वकथने यत् खलु लेखको गुरुद्वारा शिक्षितं द्विजं वक्ति, स छात्रो गुरुद्वारा शिक्षितः कदा भविष्यति ? यदि पञ्चविंशतिवर्षोत्तरमिति ? तदा ततः प्राग् लेखकमते स द्विजो न भविष्यति। तदा स द्विजत्वाभावाद् वेदमपि पठितुं न शक्ष्यति। लेखकमतानुसारं स वेदानुकूलं स्वजीवनमपि निर्मातुं न शक्ष्यति। तदनुसारं वेदमाता तं कथं पावयितुं शक्ष्यति ?

(६) वेदादिशास्त्रमतेन उपनयनसंस्कारदिने उपनयनेनैव द्विजत्वं भवति। उपनयनमेव शिष्यस्य द्वितीयं जन्म। तेन स बालक उपनयनदिनादेव द्विजो भवति, वेदेऽधिकृतश्च। तथा चोक्तं श्री मनुना (२।१६९)—

'मातुरग्रेऽधिजननं द्वितीयं मौञ्जिबन्धने।'

उपनयनं च ब्राह्मणादीनां त्रयाणामेव वर्णानामनुशिष्टम्। अत एव त एव द्विजाः, त एव च वेदाधिकारिणः। शूद्रो वर्णः, चाण्डालादयोऽवर्णास्तु अननुशिष्टत्वाद् उपनयनराहित्येन न द्विजाः, न च वेदाधिकारिण इति स एव प्राचीनो द्विजशूद्रभेदः स्वाभाविकः सिद्धः। 'घट्टकुट्यां प्रभातायितम्'। फलत उपनयनमेव आचार्यकुले प्रवेशस्य द्विजत्वस्य च द्वारसूत्रम्। तच्च आदिमवर्णत्रयस्य भवति, नेतरेषाम्।

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

अत एव अद्यतनो महासुधारकः अद्यतनैः पूर्णवेद-ज्ञतयाऽभिमन्यमानः श्री स्वामिदयानन्दमहाभागोऽपि सत्यार्थप्रकाशेऽलेखीत्—'९ वें वर्ष के आरम्भ में द्विज अपने सन्तानों का उपनयन करके आचार्यकुल में भेज दें और शूद्रादि वर्ण उपनयन किये विना विद्याभ्यास के लिए गुरुकुल में भेज दें। (२ समु०, पृ० १५) तद् उपनयनाधिकारी ब्राह्मणादिस्त्रैवर्णिक एव फलितः, न शूद्रादिः। एतेन शूद्रोऽद्विज आचार्यकुलेऽनधिकारी च सिद्ध्यति।

(७) यत् खलु लेखकमहोदयेन शिक्षितत्वेन द्विजत्वमुक्तम्, तद् वेदविरुद्धमेव। द्विजत्वं तु आचार्य-द्वारा उपनयन-दिनादेव वेदानुकूलम्। यथा अथर्ववेदे प्रोक्तम्—

'आचार्य उपनयमानो ब्रह्मचारिणं कृणुते गर्भमन्तः।
तं रात्रीस्तिस्र उदरे बिभर्ति तं जातं द्रष्टुमभिसंयन्ति देवाः॥'

अत्राचार्यकुले उपनयनसंस्कारो दिनत्रयमभिव्याप्य प्रचलति, तत्-समाप्तौ माणवकस्य द्वितीयं जन्म जायते इत्युक्तम्। स्वामिदयानन्दीये संस्कारविधावपि उपनयने दिनत्रयस्य व्रतमपि निर्दिष्टम्। तदत्र न शिक्षया, किन्तु उपनयनेनैव द्विजत्वं वेदाभिमतं सिद्धम्।

तच्च उपनयनं वेदाध्ययनप्राप्त्यै भवति। लेखक-महोदयो यदि सर्वाणि धर्मशास्त्राणि उपेक्ष्य केवलं वेदोक्तमेव आचरणीयं वक्ति; तदा वेदेन तु 'ब्रह्मणे (वेदाध्ययनाय) ब्राह्मणं ''तपसे (कृच्छ्रकर्मणे) शूद्रम्' (यजु० ३०।५) वेदाध्ययनाधिकारो ब्राह्मणाय दत्तः। शूद्राय तु 'सेवाधर्मः परमगहनः' इति सेवारूप-कृच्छ्र-कर्माधिकारो दत्तः। न खलु वेदाध्ययनाधिकारोऽमुष्मै दत्तः। एवञ्च लेखकमहोदयस्य सिद्धान्तो वेदविरुद्धः सिद्धः। सेवाधर्मसदृशे कृच्छ्रकर्मणि व्यापृते शूद्रे वेदज्ञानभारधारणं तु तस्मिन्नत्याचारः। स शूद्रः किं वेदाङ्गानि व्याकरणादीनि पठितुं शक्ष्यति ?

(८) 'ब्राह्मणोऽस्य मुखमासीत्''पद्भ्यां शूद्रो अजायत' (यजुः ३१।११) इत्यत्र वाद्यनुसारं वेदेन ब्राह्मणो मुखमुक्तः, शूद्रश्च पादः। यदि लेखकमहोदयः सर्वाणि शास्त्राणि विहाय वेद एव आस्थां निधत्ते; तर्हि तदनुसारं मुखं ब्राह्मणस्तु वेदं पठितुं शक्ष्यति, पादः शूद्रस्तु न। तथा च वेदानुसारं द्विज-शूद्रयोर्भेदः स्वतःसिद्धः। वेदे शूद्रादीनामनधिकारोऽपि सिद्धः।

(९) 'उत शूद्रे उत आर्ये' (अथर्व० १९।६२।१), 'यो नो दास (शूद्रः) आर्यो वा' (ऋ. १०।३८।३) इत्या-दिषु बहुषु मन्त्रेषु शूद्र आर्यतो भिन्नः स्वीकृतः। एतेन त्रैवर्णिक आर्यः, शूद्रस्तु अनार्यः सिद्ध्यति। पूर्वमन्त्रे 'अर्ये' इतिच्छेदस्तु पदपाठादितः, पदानुक्रम-णीतः, सर्वविद्वद्भ्यो वेदतोऽपि च विरुद्ध इति विषये आस्माकीने 'आलोक'-नवमपुष्पे द्रष्टव्यम्।

वेदे आर्यतो भिन्नः शूद्रादिर्दासो दस्युर्वा मतः। 'यो दासं वर्णमधरं गुहाऽकः (ऋ० २।१२।४) अत्र दासो वर्णः शूद्रः अधरः (निकृष्टः) गुहागतश्च सूचितः। 'प्रजापतिर्हि वर्णानां दासं शूद्रमकल्पयत्' (महा०, शान्ति-पर्व ६०।२८) इत्यत्र दासः शूद्रः। 'हत्वा दस्यून् प्र आर्यं वर्णमावत्' (ऋ० ३।३४।९) इत्यत्र दस्यून् = आर्येतरान्, हत्वा = अधः कृत्वा, आर्यो वर्णः = ब्राह्मणादिर्वर्णः (द्विजः) रक्षणीयो मतः।

'तिस्रः प्रजा आर्याः' (ऋ० ७।३३।७) इत्यत्र ब्राह्मणादयः तिस्रः प्रजा आर्याः सङ्केतिताः। यथा च छान्दोग्योपनिषदि—'रमणीयां योनिमापद्येरन्, ब्राह्मणयोनिं वा, क्षत्रिययोनिं वा, वैश्ययोनिं वा' (५।१०।७) इत्यत्र ब्राह्मणादयस्तिस्रो योनयो रमणीयाः (आर्याः) स्वीकृताः, शूद्र-चाण्डालादयश्च कपूया (अनार्याः) योनिः स्वीकृताः, एवं वेदे आर्या द्विजाः,

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

शूद्राश्च अनार्याः स्वीकृताः। ततो द्विज-शूद्रयोर्भेदः फलितः।

'न यो ररे आर्यं नाम दस्यवे' (ऋ० १०।४९।३) इत्यत्र दस्यवे दासाय वेदद्वारा आर्य इति नाम्नः प्रदानं सूचितम्। एवमीदृक् स्पष्टतया वेदे द्विज-शूद्रभेद उपन्यस्तः। अतो लेखकमहोदयस्य द्विज-शूद्रयोर्भेदस्य वेदविरुद्धताप्रतिपादनं तदीयमाहोपुरुषिकामात्रम्।

शिल्पेऽपि यद्यपि बुद्धिरपेक्ष्यते; तथापि तत्र शूद्रस्य मूर्खताख्यानं वेदज्ञानमपेक्ष्य, निकृष्टताख्यानं च वर्णमपेक्ष्य। अत एव तत् तदर्थे पारिभाषिकं 'बालानां सुखबोधाय' इतीव। नाऽत्र 'बाल'शब्दोऽर्भकवाचकः। सर्वे स्व-स्वस्थितौ उत्तमा भवति। मूत्रेन्द्रियं कियदुपकरोति अस्मान्? तदस्माकं वंशवृद्धिकरं भवति। पुत्रमुत्पाद्य अस्मान् पुन्नाम्नो नरकाद् रक्षति। दम्पती च कियदानन्दति? अस्मिन् संसारे इदमेव पापपुण्ययोर्द्वारम्। तच्च अस्मद्भक्षितस्य सारस्वरूपं शुक्रं स्वकीयाण्डकोषे निधत्ते। तद्धान्या आस्माकीना हानिर्जायते। मूत्रविसर्गेण तदस्माकं कियदुपकरोति। एवं सत्यपि तद् (मूत्रेन्द्रियं) मुखादिभ्यो निकृष्टमाख्यायते, अस्पृश्यमपि कीर्त्यते।

पादौ अस्मत्सेवकौ, कार्यकर्तारावपि। तथापि परमात्मना ताभ्यामधस्पदं दत्तम्, न तु शिरस्पदम्। तौ मुखादेशानुसारमेव, तद्दर्शितेनैव च पथा प्रचलतः, न तयोः स्वकीयाक्षिणी। इत्थं मुखपादयोर्मिथो भेदः फलितः। न तयोर्भेदोऽवैदिकः, न वा तयोरेककार्यता। एवं शूद्राऽन्त्यजानामस्मदुपकारित्वेऽपि तेषां द्विजेभ्यो निकृष्टत्वमस्पृश्यत्वमपि च शास्त्रोक्तं न गर्हणीयतां भजते।

(१०) "रुचं नो धेहि' इति मन्त्रे चातुर्वर्ण्यस्य समाना रुङ् नाभिप्रेता; किन्तु भिन्न-भिन्ना—

'कोकिलानां स्वरो रूपं नारीरूपं पतिव्रतम्।
विद्यारूपं कुरूपाणां क्षमारूपं तपस्विनाम्॥'
(चाणक्य० ३।९)

'बलं विद्या च विप्राणां राज्ञां सैन्यबलं तथा।
बलं वित्तं च वैश्यानां शूद्राणां पारिचर्यिका॥'
(चाणक्य० २।१६)

'ब्राह्मणस्य तपो ज्ञानं तपः क्षत्रस्य रक्षणम्।
वैश्यस्य तु तपो वार्ता तपः शूद्रस्य सेवनम्॥'
(मनु० ११।२३५)

इति रूप-बल-तपोभेदवद् वेदमन्त्रेऽपि चातुर्वर्ण्यस्य रुग् भिन्नभिन्नैव इष्टा। विषयोऽयं 'श्रीसनातनधर्मालोके' स्पष्टः।

(११) पाकिस्ताननिर्माणं न द्विजशूद्रभेदेन जातम्। अन्यथा तत्र स्थिताः शूद्रा अन्त्यजाश्च पाकिस्तान एवास्थास्यन्। प्रत्युत तेऽपि अस्मदादिवत् तत् पाकिस्तानीभूतं प्रदेशं विहाय हिन्दुस्थानं प्राप्ताः। तन्निर्माणं तु ब्रिटिशशासकानां राजनीतिमूलकम्। एतत्कृते लेखकमहोदयोऽस्मान् न भीषयितुमर्हति। दास-दस्यू पर्यायौ; तौ शूद्रान्त्यजादीनां कृते वेदे प्रयुक्तौ। न तदानीं लेखकमहोदयस्य इष्टा मुसलमाना ईशवीया वा वैदेशिका वेदकाले आसन्।

(१२) 'यथेमां वाचं'—इत्यत्र चातुर्वर्ण्यकृते प्रोक्ता वाग् वेदवाङ् नेष्टा, यतो न तत्र 'वेद'शब्दः सध्रीचीनः। यत्र 'वेद'शब्दः सध्रीचीनः, 'वेदमाता द्विजानाम्' इति मन्त्रे, तत्र चातुर्वर्ण्यस्य नाम नादाय 'द्विजानाम्' इत्युक्तम्। तेन वेदेऽपि द्विजानामेव अधिकारः सिद्धो न तु शूद्राणामिति द्विज-शूद्रयोर्भेदो वैदिकः फलितः। विशेषः श्रीसनातनधर्मालोकस्य तृतीयपुष्पे द्रष्टव्यः। (क्रमशः)

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

अस्माकं भारतम्

श्रीलक्ष्मीनारायण द्विवेदः
[प्रधानाचार्यः—श्रीधर-संस्कृत-विद्यालयस्य, तिवी]

१. एष देशोऽस्ति नः पावनः पावनानां
यत्र जाता मता मानवा मानवानाम् ।
यत्र विद्या उदीता गुणैः सज्जनार्है-
र्यत्र कर्माणि पूतानि दिव्योचितानि[1] ॥

२. यत्र देवागमा आदरेण क्रियन्ते,
यत्र यज्ञाः पवित्रैर्विधानैर्नियन्ते ।
यद्भवा वाडवा ज्ञान-कोष-प्रचारैः
सर्वदेशोद्भवान् मानवानुन्नयन्ते ॥

३. पावनी विष्णु-पादोद्भवा यत्र गङ्गा,
भानुजा भानु-भानूपमा राजमाना ।
यत्र सारस्वती भू-गता दिव्यधारा,
यत्र गोदावरी नर्मदा शर्मदा नः ॥

४. लोक-पावित्र्य-रक्षाकरीणां नदीनां
यत्र रम्याः शतानां प्रवाह-प्रदेशाः ।
यत्र भव्यान्यरण्यानि तीर्थानि शैला
दिव्य-माहात्म्यवन्तः सतां सेवनीयाः ॥

५. यत्र शैलेश्वरो यत्र रत्नानि भूरि-
क्षिप्तरश्मीनि दिव्यौषधीनां निधानम् ।
यो मुनीनामृषीणां सुराणां निवासो
देवखातैः पवित्रैर्धवित्रैरघानाम् ॥

६. सर्वदा सर्वतो वाहिनी ज्ञानगङ्गा,
स्नान-पुण्यं सदा सर्वलोके ददाति ।
यत्कृतैः सर्वभूमावहिंसोपदेशी-
र्जीव-रक्षान् गुणाञ्छिक्षिताः सर्वदेशाः ॥

७. यत्र चान्नैर्विशुद्धैरपाप्म-क्षमोत्थैः
सद्रसाढ्यैः फलैः सद्गुणैः सत्प्रभावैः ।
हन्त जाता वयं पालिताः पोषिताः स्मः
सद्धिया संयुताः सिन्धुरारि-प्रमाथाः ॥

८. यत्र गावो महिष्यो बलाढ्यैः सुमेध्यैः
प्राज्यधारैः पयोभिस्तनूर्नो ररक्षुः ।
यत्र हव्यैर्घृतैः शुद्धतैलैः सुवस्त्रै-
र्हा वयं काममेवान्वभूमाङ्गपोषम् ।

९. यत्र सद्रत्न-भूषा हिरण्यैरदभ्रै-
स्ते वयं राजमानाः स-माना अभूम ।
ओजसा वर्चसा लोकपालातिमाना-
स्तेऽभवन् भूभुजः सर्वभूमीश्वरा नः ॥

१०. एक-धेनोर्न रक्षा शरीरेण मे चेत्,
कुण्डकल्पस्तनीनां गवां किं प्रदानैः ।
का शरीरेण रक्षाऽमुना मे प्रजानां
स्यात् कृतेत्युच्च आदर्श आसीन्नृपाणाम् ॥

---

१. अत्र कान्तमाला नामच्छन्दः—"ऽ । ऽ—ऽ । ऽ—ऽ । ऽ—ऽ । ऽ—ऽ" ।
"वेद रैर्गैन युक्ता भवेत्कान्तमाला" इति लक्षणात् । "कान्तमाला तु लक्ष्मीधरं गेन युक्तम्" इति चान्यतः ।

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

११. हन्त देशोऽधुनाऽसौ महान् भारतं नः,
किं स एवास्ति किं मानवा वा त एव ।
अत्र ता एव कि हन्त विद्या यतो नः
स्वीय आत्माऽमलो दृश्यते स्माऽनुभूमा ॥

१२. अद्य हाऽन्नस्य लोकैः कणाश्चिन्तनीया
हा कणेहत्य वाऽप्यङ्ग ! दुग्धं न पेयम् ।
अत्र शाकेऽपि दौर्लभ्यमासाद्यते किं
भारतं नस्तदेवास्ति देशो महीयान् ॥

१३. धेनुचर्मावृता धेनुमांसाशना हा,
धेनुहत्या - महापाप - लिप्ताङ्ग-रम्याः ।
शासनं भारतीया वयं साधयामो
भारते तत्र हा भारतीय-प्रजानाम् ॥

१४. वेद-हेलां न देवावहेलां वयं
हन्त विद्मो न धर्मस्य चर्चामपि ।
साम्प्रतं सर्वलोकैकपूतं प्रियं
भारतं किं तदेवास्ति देशोऽद्य नः[१] ॥

१५. गव्यमांसाशना गव्यकृत्तीर्वसाना
अद्य वैदेशिका राक्षसाः सेवनीयाः ।
तैः कृपारूपमन्नं धनं हेतयोऽस्मद्-
रक्षणार्थं प्रदेयानि कूटोपचारैः[२] ॥

१६. यत्र लोकस्य रक्षाकृतेऽभूद्वणिज्या,
स्वल्पदेयेन लभ्यानि वस्तून्यभूवन् ।
स्वार्थसंछन्ननेत्रैर्धनात्युच्चराशिं
भोगहेतोरुशद्भिः कृतास्त्यद्य साऽहो ॥

१७. देवता हे भवत्यः प्रशंसां स्पृहां न-
स्तस्य गीतैरकार्ष्टेति जानीमहे तत् ।
भारतं द्रष्टुमिच्छाऽपि किं वर्तते वो
देश एषोऽद्य नो भारतीया वयं स्मः ॥

१८. गव्यरक्तैः कृताभ्यर्चना भूरियं नः
स्रग्विणी गोऽस्थिजालैः कलालङ्कृतिश्च ।
सभ्यता संस्कृतिर्वर्ततेऽस्या नवीना-
ऽध्येत तामद्य हे भारतीयां न एताम् ॥

१९. गर्विणा गौरवात्युच्चमानेन शैलान्
मस्तकेनातिगत्याऽत्र शैलेश्वरोऽसौ ।
वर्तते किं स एवाद्य मानं प्रतिष्ठां,
भारतस्याभितः ख्यापयन् व्योमगामी ॥

२०. रुद्र हे ! रौद्रकीलोत्किरां दाहघोरां
जातु मा दर्शयस्तां तृतीयां दृशं नः ।
भारतं प्राणतोऽपि प्रियोऽयं स एव,
भ्राजमानः पवित्रोऽस्ति देशोऽद्य रम्यः ॥

दृश्या नयन-विहीनैराकर्ण्या कर्णहीनैश्च । मन्तव्या हतहृदयैरकवेः कविता वि-कान्तमालेयम् ॥२१॥

---

१. स्रग्विणी छन्दः—"रैश्चतुर्भिर्युता स्रग्विणी सम्मता" इति । २. पुनः कान्तमाला ।

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

हरविजयं महा-महाकाव्यम् : एकं समीक्षणम्

— श्री गणेश उमाकान्त थिटे, पूना—

संस्कृतमहाकाव्यानां परम्परा विस्तृता वर्तते। परं तत्र कानिचित् महाकाव्यानि उपेक्षितप्रायाणि दृश्यन्ते। रामायणं महाभारतं च आर्षमहाकाव्यत्वेन प्रसिद्धिं गते। तेषां सर्वजनप्रियता च सर्वाधिका। तत्र धार्मिकं महत्त्वमपि कालौघेन प्रसृतम्। संस्कृतभाषायाः पारम्परिक्याम् अध्ययनपद्धत्यां लघुत्रयी बृहत्-त्रयी[1] चेति द्वे त्रय्यौ विशेषं भजतः।

संस्कृतभाषां बहु समधीतवत्स्वपि विद्यार्थिषु कानिचित् महाकाव्यानि स्थैर्यं नैव लेभिरे। अस्य नैकानि कारणानि स्युः। कालिदासीय-काव्यानां कलात्मकं सौन्दर्यं तत्पश्चाद्भाविनां कवीनां महाकाव्येषु विरलम् अधिगम्यते। कृत्रिमता पुनर्वर्धमाना आसीत्। शिशुपालसदृशं अतिकृत्रिममपि महाकाव्यं लोकप्रियम्, आदरास्पदं च बभूव। तेन एतादृशानि तत उत्तरं निर्मितानि महाकाव्यानि यशःसम्पादने अलं बभूवुः। परम् "अनामिका सार्थवती" एव स्थिता। तथापि कवयः कालिदासस्य गुणान् समुपेक्ष्य इतरेषां कवीनां कृत्रिमत्वेन सञ्जातकौतुकाः कृत्रिमकाव्यानि रचयांबभूवुः।

अस्मिन्नेव अधःपातयुगे 'हरविजयम्' नाम महाकाव्यं प्रादुरभूत्। प्राचीनाध्ययनपरम्परायां तत् प्रायः न शिक्ष्यते, नापि पाठ्यते। प्राचीनैस्तदतितरामुपेक्षितम, यतस्तदतिकठिनं वर्तते। नवीनैरपि तदुपेक्षितम, यतस्तत्र काव्यमयताया अनुपलम्भात्। तथापि इदं काव्यं संस्कृतमहाकाव्येषु वैशिष्ट्यपूर्णं स्थानं भजते।

हरविजयकर्ता राजानक-रत्नाकरः काश्मीरेषु जातः। अस्य कालनिर्णये नानल्पो विवादावसर इति अहो दौर्भाग्यं संशोधकानाम्। प्रतिसर्गान्ते पुष्पिकायामेते शब्दाः दृश्यन्ते—"इति बालबृहस्पत्यनुजीविनो राजानकरत्नाकरस्य कृतौ" इत्यादि। 'बालबृहस्पतिरि'ति नाम्नापि ज्ञातः चिप्पटजयापीडनामा राजा नवमस्य ख्रिस्ताब्दशतकस्य पूर्वार्धे काश्मीरेषु आसीत्। यथा चोक्तं राजतरङ्गिण्याम्—

> श्रीचिप्पटजयापीडो बृहस्पत्यपराभिधः।
> ललितापीडजो राजा शिशुर्देश्यस्ततोऽभवत्॥
>
> (४.६८०)

तथा च राजतरङ्गिण्यामेव अयमपरः श्लोकः—

> मुक्ताकणः शिवस्वामी कविरानन्दवर्धनः।
> प्रथां रत्नाकरश्चागात् साम्राज्येऽवन्तिवर्मणः॥
>
> (५.३४)

अवन्तिवर्मा काश्मीरदेशे ख्रिस्ताब्दस्य नवमशतकस्य उत्तरार्धे शशास। एतत् सर्वं विमृश्य रत्नाकरो जयापीडस्य अवन्तिवर्मणश्च आश्रित आसीत्। तस्य च कालो मुख्यतः ख्रिस्ताब्दस्य नवमशतकस्य मध्यभाग इत्यनुमीयते।

---

१. लघुत्रय्यां बृहत्-त्रय्यां च पञ्चमहाकाव्यानामन्तर्भावः। लघुत्रय्यां मेघदूतस्य खण्डकाव्यस्यापि समावेशः। अत्र महाकाव्येषु खण्डकाव्यस्य अन्तर्भावः कथं तन्न जानीमः। वस्तुतस्तु यथा महाकाव्यानि तथा नाटकादीन्यपि अध्ययनपरम्परायाम्। न च तेषामत्र त्रय्योरन्तर्भावः।

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

रत्नाकरेण लिखितानि त्रीणि पुस्तकानि दृश्यन्ते—

(१) हरविजयम् ।

(२) वक्रोक्तिपञ्चाशिका ।

(३) ध्वनिगाथा-पञ्जिका च ।

हरविजयस्य एकैव टीका दृश्यते । सा च "विषम-पदोद्योतिनी" नाम । यथार्थनाम्नी सा केवलं कठिन-शब्दानामर्थं ज्ञातैः पर्यायशब्दैः बोधयति । अन्वयं सरलार्थं वा न निरूपयति । क्वचिदतिसंक्षिप्ताः टिप्पण्यश्च सन्ति । अन्येभ्यो ग्रन्थेभ्य उद्धृतानां वाक्यादीनां ग्रन्थादिनिर्देशो न क्रियते । केवलमेक-स्मिन्नेव सर्गे सर्गस्थं वृत्तं प्रमिताक्षरा इति कथितम् (सर्ग ४२) । नैकत्र टीकाया कियानंशो विलुप्तो-ऽस्ति । षष्ठसर्गस्य २५ तमश्लोकादारभ्य ११७ तम-श्लोकं यावत् टीका नास्ति । ४६ तमसर्गस्य प्रायः ६८ तमश्लोकमारभ्य काव्यान्तं यावत् टीका न दृश्यते ।

टीकाकर्तुः नामधेयम् 'अलकः' इति । अनेन कृतायाष्टीकायाः अभावे हरविजय-पठनमतीव दुर्बोध-मभविष्यत् । अत्रस्था बहवः कठिनाः शब्दाः कोशे-ष्वपि न प्राप्यन्ते । यद्यपि इयं टीका कठिनशब्दार्थं व्याकरोति, तथापि श्लोकस्य सरलार्थज्ञानाय दीर्घसमास-विग्रहः, अन्वयादिकं सर्वमपि स्वयमेव कर्तव्यं भवति, तेन अध्येतुः सम्यक् परीक्षा जायते । "नैषधं विद्वदौषधम्" इत्युच्यते । तत्र मल्लिनाथस्य अतीव सुलभा टीकाऽपि, तथापि इयमुक्तिः ! तथासति "विजयं विदुषां विषम्" इत्येव वक्तव्यं स्यात् । पुनश्च स्वनिर्णीतार्थो युक्तोऽयुक्तो वेति निश्चेतुं न किमपि प्रमाणम् । चित्रकाव्ये तु अलकस्य टीका अन्धकारे दीपशिखेव उपयुक्ता । अपि च—यस्मिन् चित्रमयभागे न टीका, तत्र अर्थागमः सुतरां दुर्लभः ।

हरविजये ५० सर्गाः सन्ति । श्लोकसंख्या च ४३२१ (एकविंशत्युत्तरत्रयश्चत्वारिंशत्-शतमिता) । विविधानि वृत्तानि, बहुविधाः शब्दालङ्काराः अर्था-लङ्काराश्च, प्रदीर्घाणि वर्णनानि, बलादानीतः शृङ्गारः, उद्धतभाषणप्रचुरो वीररसः, पाण्डित्यप्रदर्शकाः संवादाः, अवास्तवानि युद्धानि, भक्तिहीनानि परं वावदूकानि देवता-स्तवनानि, इत्यादीनां समावेशेनायं काव्यविस्तारः अधिगतः । प्रथमसर्गे शङ्करनगरीवर्णनम् तृतीये ऋतुवर्णनम्, चतुर्थे पर्वतवर्णनम्, सप्तदशे पुष्पावचयस्य वर्णनम्, अष्टादशे जलक्रीडायाः, एकोन-विंशतितमे सायंकालस्य, विंशतितमे चन्द्रोदयस्य, द्वाविंशतितमे समुद्रोल्लासस्य, षड्विंशतितमे पान-गोष्ठयाः, सप्तविंशतितमे संभोगस्य, अष्टाविंशतितमे प्रत्यूषस्य, द्वात्रिंशत्तमसर्गतः अष्टात्रिंशत्तमं यावत् दूतकर्म, एकोनचत्वारिंशत्तमात् सर्गादारभ्य एकोन-पञ्चाशत्तमसर्गं यावत् युद्धवर्णनम्, इत्यादीनि वर्ण-नानि विस्तारकारणम् ।

हरविजयस्य कथानकमतीव सरलं स्वल्पं च । क्रीडासक्तया पार्वत्या शङ्करस्य नयनानि निमी-लितानि । तेन सर्वत्र अन्धकारः समजनि, (सूर्यचन्द्र-वैश्वानराणां शङ्करनयनत्वात्), स एव अन्धकासुरः । स च असुर उन्मत्तोऽभवत्, अन्ततश्च शङ्करेण हतः । कविः कथानके न रमते । स महता संक्षेपेण कथावस्तु निवेदयति । परं कथानकस्थानां प्रसङ्गानां परिसरं विस्तारेण वर्णयति ।

हरविजयस्य शब्दवैभवं पञ्चापि महाकाव्यानि अतिशेते । 'नवसर्गगते माघे नवशब्दो न विद्यते' इत्युक्तिः सांप्रदायिकेषु रूढा । परं हरविजयं यावत् दृष्टिपथं नायाति तावदेव सा विराजते । यतः अतिदुर्बोधाः अप्रचलिताश्च शतशः शब्दाः हरविजये दृश्यन्ते ।

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

तेषु च केचित् कश्मीरदेशप्रयुक्ताः एव स्युरिति तर्क्यते। उदाहरणार्थं दृश्यताम्—

वासतेयी = रात्रिः। कासरः = महिषः। कुलिः = चटका। निशान्तः = गृहम्। रसायुः = भृङ्गः। एकपिङ्गलः = कुबेरः। सङ्कसुकम् = अस्थिरम्। आवरवी = कलिका। तालूरः = जलावर्तः। झरङ्कः = तृणमयः पुरुषः[1]।

रत्नाकरेण प्रयुक्ता चित्रकाव्यप्रकाराः विपुलाः। मुरजबन्धः, गोमूत्रिकाबन्धः, सर्वतोभद्रबन्धः, पद्मबन्धादयः सुप्रसिद्धाः बन्धास्तु सन्त्येव, आवलिबन्धः, समसङ्गसबन्धः, तूणीबन्धः, काञ्चीबन्धादयोऽप्रसिद्धाः चित्रप्रकारा अपि तेन साधिताः। अर्थादेव एते चित्रप्रकाराः भारवि-माघनिर्मितायाः रूढ्या अनुसारं युद्धवर्णने एव सन्ति।

द्व्यक्षरश्लोकाः शतप्राया अत्र। किरातार्जुनीये, शिशुपालवधे च द्व्यक्षरबन्धाः सन्ति, परं ते तदपेक्षया अधिका अत्र। अपि च—किराते माघे च ये द्व्यक्षरादिकास्ते तुलनया सुलभे अनुष्टुप्-छन्दसि वर्तन्ते। हरविजये पुनः अनुष्टुप्छन्दसि एतादृशाः चमत्काराः सन्त्येव (सर्ग. ४३); परं वसन्ततिलका, शार्दूलविक्रीडितम्, मन्दाक्रान्तादिषु प्रौढवृत्तेष्वपि ते समुपलभ्यन्ते। यथा षट्चत्वारिंशत्तमे सर्गे (१३६)—

तोत्ता तां मतिमत्तमो ममततातीतामतामुत्तमा
माત્તો मूममितामतामतिमतां मीमातितोऽतुत्तिमाम्।
मत्तामूतिमतीममातिममिता मीतितिमत्तातता
मेत्तोऽत्तातितुमीतिमत्ततिमतां मातामिमीताततताम्॥

अत्र शार्दूलविक्रीडिते द्व्यक्षरबन्धः। तथैव अस्मिन् सर्गे एकाक्षरबन्धो वसन्ततिलकायां वर्तते—'तत्तातोऽति तुतुत्तिततोतितातैतितातीतिततोतितुत्तिः। ताताતोऽतितोऽतुत्तु तु तत्ततोऽत्ता तुत्तोत्ततातातिं ततिं तु तोतुम्॥' इति।

एतादृशानां श्लोकानामर्थज्ञानं तावत्सुतरां दुःशकम्। संस्कृतभाषायाः शब्दसमृद्धिः एतादृशान् एकाक्षरबन्धादीन् चमत्कारान् सोढुमलम्। परमियमतिरिक्तता क्लेशावहा। तां दृष्ट्वा रत्नाकरसदृशाः कवयः कथं काव्यमार्गात् भ्रष्टाः संस्कृतभाषीयस्य च काव्यस्य कथमधःपातो जात इति विलोक्य मनश्चेखिद्यते। अत्र गच्छता मार्गेण इदमप्यवधेयं यत् एकाक्षरादिबन्धस्य कृते तवर्गः, र, स इत्यादयो वर्णा अधिकमुपयुज्यन्ते। संस्कृते एतेषां वर्णानामधिकं प्रयोगः। अपि च—टवर्गः ख, घ, झ इत्यादीनां प्रयोगो न। किराते माघे चापि इत्थमेव चित्रभागे दृश्यते।

रत्नाकरस्य पाण्डित्यं हरविजयस्थानां नैकानां विषयाणामुल्लेखेन प्रतीयते। व्याकरणम्, न्यायशास्त्रम्, वेदान्तः, सांख्यम्, कामशास्त्रम् एवमादिशास्त्रेषु तस्य प्रभुत्वं बहुशो दृश्यते। सङ्गीतविषयेऽपि तस्य रुचिः सङ्गीतोल्लेखैर्दृश्यते। भगवतः शङ्करस्य स्तुतौ विविधदर्शनानां मतप्रणाल्यनुसारं शङ्करस्य वर्णनं कृतम्। तत्र उदाहरणार्थं सांख्यमतानुसारिणी स्तुतिः प्रेक्ष्यताम्—

प्रकृतेः पृथक् प्रकृतिशून्यतां गतः
प्रतिषिद्धवस्तुगतधर्मनिष्क्रियः।
पुरुष त्वमेव किल पञ्चविंशकः
स्फुटचूलिकार्थवचनैर्निगद्यसे॥

(चूलिकः = पञ्चशिखः)।

---

[1] अत्र उदाहरणार्थं प्रदर्शिताः शब्दाः। तेषु केचित् शब्दाः कैश्चित् अन्यतोऽपि ज्ञाताः स्युः, परमत्र अभिप्रेतमिदं यत् कठिनाः शब्दा बहव इति।

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

अथवा न्यायवैशेषिकमतानुसारिणी स्तुतिरियम्—

जनतेन्द्रियातिगविशुद्धगोचरः
द्व्यणुकादिबन्धगतकार्यदर्शनात् ।
घटकुम्भकारवदकारकात्मन-
स्तव कारणत्वमनुमीयते बुधैः ॥

हरविजयस्थाः केचित् श्लोकाः काव्यगुणपूर्णा अपि दृश्यन्ते । यथा—

प्रेयांसमर्कमुपकण्ठगतं विकासि-
पद्माननाः कटकवर्त्मनि पङ्कजिन्यः ।
रागादिवालिविरुतैः स्मरकेलिगर्भ-
मत्रानिशं किमपि कोमलमालपन्ति ॥

अयं च सुभाषितात्मकः श्लोकः ।

न्याय्यं तदेतदिह तावदुपप्लवेऽपि
कुर्वन्ति यन्न जगति स्थितिभङ्गमार्याः ।
मर्यादया विरहिताः प्रलयागमेऽपि
किं वाच्यतां जलधयो भुवने न याताः ॥

एतादृशाः केचन श्लोकाः कुत्रचिद् अवलोक्यन्ते । तत्र सुलभता, सौन्दर्यं च, परं बहुधा साङ्केतिकता, हठादाकृष्टत्वं, नीरसतैव । प्रतिभायाः रमणीयो विलासः, रससिद्धत्वम् , सूक्ष्मता, ध्वनिः—इत्यादीनामभावेऽपि केवलं पद्यप्रभुत्वं विद्वत्तां चैव समाश्रित्य महाकाव्यमिदं पारं गतम् ।

श्री रत्नाकरस्य वसन्ततिलका-वृत्तं प्रियम् । तथा चोक्तम्—

वसन्ततिलकारूढा वाग्वल्ली गाढसङ्गिनी ।
रत्नाकरस्योत्कलिका चकास्त्याननकानने ॥

स 'पट्ट'शब्दं बहु प्रयुङ्क्ते । यथा कृपाणपट्टः, निर्काषपट्टः वैडूर्यपट्टः, दशनपट्टः, कुट्टिमपट्टः, ओष्ठपट्टः, अलिकपट्टः (ललाटपट्टः) इत्यादि । एवमेव 'छटा-शब्दः धूमच्छटाशब्दो वा बहुशो दृश्यते । 'खण्ड'-शब्दोऽपि नैकवारमायाति । 'कूटो'त्तरपदाः शब्दाः यथा कुम्भकूटम् , कटकूटम् , अंसकूटम् , कालकूटम् , इत्यादयोऽपि वारं वारं प्रयुक्ताः । यमपर्यायः 'समवर्ति'-शब्दस्तस्मै रोचते । "प्रेङ्खत्" इति शब्दः, प्रेङ्खधातुः प्रेङ्खच्छब्देन प्रारब्धाः श्लोकाश्च नैकत्र दृश्यन्ते । झाङ्कारः, टाङ्कारः, टङ्कारः इत्यादीनां ध्वन्यनुकारिणां शब्दानां बहुत्र प्रयोगः । गूढम् , पीठम् , टवर्गीयव्यञ्जनबहुलाः "ट्ट" इति संयोगेन युक्ताः अट्टादयः शब्दा अपि पुनः पुनः दृश्यन्ते । 'व्रणे पट्टिकाबन्धनमि'तीयमुत्प्रेक्षाऽपि तेन मुहुर्मुहुः क्रियते । यथा मन्दरपर्वतवर्णने—

आकृष्टिवेगविगलद्भुजगेन्द्रभोग-
निर्मोकपट्टपरिवेष्टनयाऽम्बुराशेः ।
मन्थव्यथाव्युपशमार्थमिवाशु यस्य
मन्दाकिनी चिरमवेष्टत पादमूले ॥

यथा किरातार्जुनीये प्रतिसर्गम् अन्तिमश्लोके लक्ष्मीशब्दः, शिशुपालवधे च श्रीशब्दस्तथैव हरविजये 'रत्न'शब्दः । यथा चोक्तम्—

'पर्यन्ते प्रतिशब्दं रत्नपदं यत्नतः प्रयुक्तवता ।
निजनामाङ्कं कविना विरचितमेतन्महाकाव्यम् ॥'

सामान्यतया एतद् वक्तुं शक्यते यत् हरविजयं कृत्रिमताया अतिरेकं करोति । स्वतन्त्रविचारशक्तेः अभावः, वैशिष्ट्यपूर्णस्य व्यक्तिमत्त्वस्य अभावः, क्षुण्णमार्गस्य अपरित्यागः इत्यादिकारणैरिदं महाकाव्यं रसिकानां धन्यवादान् नार्हति । रत्नाकरः साहित्यशास्त्रे कथितान् नियमान् (महाकाव्यविषये) यथाशब्दं प्रतिपालयन् निर्जीवां तथापि कौशलपूर्णां कलाकृतिं रचयति । भिन्नपथानुसरणे न तस्य इच्छा, नापि क्षमता । ततश्च बाह्यतः परिपूर्णम् , पर-

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

मन्ततो रिक्तं "महामहाकाव्यम्" सञ्जातम्। विस्तारः, कृत्रिमता, अनावश्यकानि वर्णनानि, शब्दचातुरी, राजकीया वादविवादा इत्यादीनां बहिरङ्गानां यथा-नियमं समावेशे कृतेऽपि काव्यात्मनोरभावात् इदं महाकाव्यं निष्फलप्रायम्।

हरविजयस्य पाठकः किरातार्जुनीय-शिशुपालवधयोः हरविजयस्य च तुलनां न परिहर्तुं शक्नोति। एकस्या एव व्यक्तेः बृहत् बृहत्तरं बृहत्तमं च इत्येवं छाया-चित्राणि स्युः, एवमस्ति तेषु साम्यम्। यथा—किरातार्जुनीये हिमालयवर्णनम्। शिशुपालवधे रैवतक-वर्णनम्। हरविजये मन्दरवर्णनम्। युद्धं कार्यं न वेति विषये त्रिष्वपि काव्येषु विवादाः। तत्र शान्त-तावादिनः, आक्रमणवादिनश्च विवदन्ते। तस्मिन् विवादे राजकीयानि साङ्केतिकानि सुभाषितानि वाचकैः पठ्यन्ते। कथानस्य ओघे प्रस्तुते शृङ्गारो बला-दाकृष्यते। तदा एतेषां कवीनां कामशास्त्रीयं ग्रान्थिकं ज्ञानं प्रदर्श्यते। बहवः सर्गाः गच्छन्ति एतादृशमेव। ततो युद्धं स्मर्यते। सत्यं युद्धं केनापि कविना नैव दृष्टं स्यात्, परमनेन अज्ञानेनैव कार्यं सुकरं भवति। शराणां वेगाः, सैनिकानां चापल्यम्, वीराणां शब्द-बहुलानि उद्धतभाषणानि, इत्यादीनां पुनरुक्तिबहुलं शब्दार्थालङ्कारमयं युद्धं भवति। अन्ततश्च महता जवेन मङ्गलमयोऽन्तो भवति, काव्यं च समाप्यते। इयमेव त्रयाणामपि काव्यानां रीतिः।

शिशुपालवधकर्ता भारविं जेतुं प्रयतते इति सर्वै-रपि अङ्गीक्रियते। प्राचीनैः पण्डितैस्तावद् 'जितं जितं माघेन' इति बहुश उक्तम्। परं ततोऽपि अधिकं विस्मयास्पदं यत् रत्नाकरो माघमतिशयितुं समुद्युक्तः। येषु कृत्रिमतादि-निकषेषु माघो भारविं जितवान् इत्युक्तिः, तेष्वेव निकषेषु रत्नाकरोऽपि माघमतिशेते। माघस्य सामर्थ्यं केषुचित् श्लोकेषु सम्यक् प्रतीयते। तेन च तस्य महाकवित्वं सत्स्वपि बहुषु अधमकाव्य-प्रकारकेषु श्लोकेषु अङ्गीकर्तव्यमेव भवति। रत्नाकरस्य सविधे इदं सामर्थ्यं मूलत एव नास्ति। चित्रकाव्यो-पजीव्यत्वमेव तस्य। तेन स महाकविरिति उपाधिं नार्हति।

संस्कृतमहाकाव्यस्य अधःपतनस्य परा कोटिः हर-विजयेन सूच्यते। तेन संस्कृतमहाकाव्येषु तस्य स्थानम् ऐतिहासिकदृष्ट्या लक्षणीयम्। आश्चर्यं चेदं यत् बृहत्-त्रय्यां किरातार्जुनीयम्, शिशुपालवधम्, नैषधीयचरितं चेति त्रीणि काव्यानि गण्यन्ते। परं नैषधीयचरितस्य स्थाने हरविजयेन भाव्यम्। किरातार्जुनीयात् शिशु-पालवधम् अधिकं कृत्रिमम्, हरविजयं च शिशुपाल-वधादपि। तेषां कृत्रिमताया विषया अपि समानाः। केवलं प्रमाणभेदो न प्रकारभेदः। नैतत् नैषधीय-चरितविषये। तस्य तु प्रकारभेदः प्रमाणभेदश्च। एकः, द्वौ, चत्वारः इत्येतेषामङ्कानामनन्तरम् अङ्कः अष्टौ इति, न षट् इति। नैषधीयचरितस्य गुणदोषाः, श्रेष्ठता, कनिष्ठता चेति नात्र विषयः। परम् "उदिते तु पुनर्हर्षे क्व माघः क्व च भारविः" इति पङ्क्तिः हर्षेण भारवि-माघयोः पराभवः कृत इति सूचयति। तन्न; भारवि-माघयोः पराभवो न हर्षेण कृतः, अपि तु रत्ना-करेण। हर्षस्तु नैव स्पर्धते इति सारस्वतार्णवोन्मज्जना-वदातान्तःकरणा विभावयन्तु।

———

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

सुप्त-प्रबुद्धम् : अभिनवं खण्ड-काव्यम्

—स्वर्गीयाः महामहोपाध्यायाः श्रीलक्ष्मणशास्त्रि तैलङ्गाः—

पूर्वं समृद्धिगेहे सपत्नदाहे विदामनाम्नि पुरे।
हारीतनाम - विदितक्षोणीपति - शासनाधिकृते ॥१॥
यक्षेश्वरमपि विभवैर्विहसन् लक्षेश्वरः कश्चित्।
वणिगग्रणीरवात्सीदुदारचरितो गुणाधारः ॥२॥
तस्यास्त बाल्यकालात् सयन्त्रणं वर्धितः सूनुः।
अप्राप्तेप्सितलाभाऽपर्याप्तधनः प्रहासाख्यः ॥३॥
अथ तस्मिन् कुतुकमयीमासेदुषि यौवनावस्थाम्।
दुःसाधामयबाधाऽऽमिषतां समवाप तज्जनकः ॥४॥
तस्मिन्नुपरतमात्रे मितव्ययाश्रान्तकार्यपरताभ्याम्।
तेनार्जितोऽर्थराशिः सहसा तद्धस्तगः सोऽभूत् ॥५॥
बाल्ये रुद्धप्रसरो धनव्ययेऽत्यन्तपरतन्त्रः।
स्वातन्त्र्यं सवयोजननिर्विष्टं वीक्ष्य परिखिन्नः ॥६॥
आकस्मिकधनवैभवमधिगत्यैवं प्रहासोऽसौ।
स्वच्छन्दं परिभोक्तुं मनसा निर्धारयामास ॥७॥
एवं निर्धार्य पुनः सकलां संपत्तिमात्महस्तगताम्।
द्वेधा व्यभजत् पृथुलामसौ स्वतन्त्रो वणिक्पुत्रः ॥८॥
एकेन तत्र भागेनाक्रीणाद्भूरि संवसथान्।
नगरे च पस्त्यसमुदयममितद्रविणाऽऽयभाजमसौ ॥९॥
अन्यत् पुनस्तदर्धं चिरकालिकलालसाविषये।
विषयोपभोगकर्मणि विनियोक्तुं निश्चिकाय ततः ॥१०॥
तदनु प्रहासमभितः स्वार्थैकपराः परःशता सुहृदः।
मधुसंभृतं सरोजं भ्रमरा इव पर्यवृण्वँस्तम् ॥११॥
स च तैः समानशीलव्यसनवयोभिर्वृतोऽजस्रम्।
नानाविनोदकुतुकैः समयं संयापयामास ॥१२॥
सहभोजनप्रतानैरासवपानैस्तथा मानैः।
द्यूतैः सततप्रसृतैर्गणिकागणविभ्रमोल्लासैः ॥१३॥
मित्रैस्तद्वसुहरणप्रवणैरनिशं प्रशस्यमानजनिः।
सानन्दं समयमयं गमयन् स्वं धन्यमिव मेने ॥१४॥
एवं नियन्त्रणलवं भुञ्जानस्यास्य वर्षमात्रेण।
स महानपि धनराशिर्विलयं समवाप निःशेषः ॥१५॥
तमवेक्ष्य क्षीणधनं सर्वे सुहृदोऽर्थकल्यवर्तास्ते।
शाखिनमिव फलहीनं शकुनाः संत्यज्य कुत्रचिद्याताः॥१६
मार्गे दैवान्मिलितं तं परिजहुर्वयस्यचेलास्ते।
'मां प्रार्थयेत किञ्चिद्धनमि'ति चित्ते कृताशङ्काः ॥१७॥
तं वीक्ष्य वक्तुकामं केनापि मिषेण सन्त्यज्य।
स्वेन पथा व्यगमदसावकृतज्ञो मित्रसङ्घातः ॥१८॥
पूर्वं मधुरैर्वचनैस्तं भृशमुपतिष्ठमानानाम्।
भुक्तात्मसम्पदां तां कृतघ्नतां वीक्ष्य मित्राणाम् ॥१९॥
अत्यन्तं हृदि खिन्नो व्यपगतहासः प्रहासोऽसौ।
संसारं गतसारं जानन् निर्विण्णतां भेजे ॥२०॥
शोकावनम्रवदनं भ्रान्ताकुलमानसं सूनुम्।
संवीक्ष्य जातशङ्का सातङ्काऽम्बा तमप्राक्षीत् ॥२१॥
'किं वत्स! तेऽद्य खिन्नं वदनं दीनं निरानन्दम्?
यदि हापितविभवकृतः खेदोऽयं तेऽलमेतेन ॥२२॥
अद्यापि वत्स! धत्से बहुवित्तं तावकाधिकारगतम्।
क्रीतचर-ग्राम-गृह-प्रचयोपचिताऽऽयबाहुल्यम्' ॥२३॥
बाष्पाम्बुरुद्धकण्ठो विषण्णचेताः स तामवदत्।
'असमीक्ष्यकारितैषा मम समुपेक्ष्या त्वया मातः ॥२४॥
वैभवभरं महान्तं हापयतैकं मयाऽग्रगतम्।
दारिद्र्यात् पापतरं म किञ्चिदन्यद्धरीवर्ति ॥२५॥
एतद्धि निखिलगुणगणहरणं सम्मानसंहरणम्।
परिहरणं प्रियसुहृदां मरणं शरणं नृणां दिशति ॥२६॥

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

मातः ! पश्य पुरा ये मां चाटुशतैरुपासेदुः ।
ते साम्प्रतं न सम्मुखदर्शनमपि हन्त ! वाञ्छन्ति ॥२७॥
दिष्ट्या सर्वस्वं मम न हृतं, मातस्तदेतेन ।
अविशिष्टेन धनेन प्रसन्नचेता निवत्स्यामि ॥२८॥
किन्त्वेतस्मात्पूर्वं तान् सुहृदो भुक्तपूर्वमद्विभवान् ।
एकैकशः परीक्षितुकामोऽहं जननि ! कपटेन ॥२९॥
हृतसर्वस्वमिव स्वं प्रकटय्य तदर्थनाः कुर्वन् ।
साहायकाय, तेषां कृतज्ञतां संपरीक्षिष्ये' ॥३०॥
'अन्विष्यतस्तवायं कृतज्ञतां वत्स ! पिशुनेषु ।
नूनं तैलमवाप्तुं सिकतानिष्पीडने यत्नः' ॥३१॥
एवं मातुर्वचनं तथ्यं पथ्यं च समुपेक्ष्य ।
स्वचिकीर्षितसंसाधनमुद्दिश्य सपद्यसौ प्रययौ ॥३२॥
एकैकशोऽथ सोऽयं तान् सुहृदधमान् समभ्येत्य ।
दीनैर्वचनप्रचयैरेवं संप्रार्थयामास ॥३३॥
'हन्त वयस्य ! नियत्या दौर्गत्यं सांप्रतं यातम् ।
दुःखाम्बुधौ निमग्नं तारय मां, दर्शयौदार्यम् ॥३४॥
ऋणदानेन समुद्धर विपदा परिभूतमेवं माम् ।
दैवे पुनरनुकूले ऋणशुद्धिं मित्र ! कर्ताऽस्मि ॥३५॥
ईशानुक्रोशवशाद्भूयोऽपि समृद्धिमाप्तोऽहम् ।
प्रियमित्रसहचरः सन्नेनां भोक्ष्ये यथापूर्वम्' ॥३६॥
श्रुत्वा तद्दीनवचः पस्पर्श दयाऽणुमात्रमपि ।
नैषां प्रस्तरनिर्मितमिव हृदयं नीचमित्राणाम् ॥३७॥
'कस्त्वं ? भद्र ! कुतस्त्यः ? कीदृश्यस्मासु ते मैत्री ।
आननमपि दृष्टचरं नास्माकं स्मृतिपथं याति' ॥३८॥
इत्थं सोल्लुण्ठमसौ सहावहेलं च तैरधिक्षिप्तः ।
अतिवेलं खिन्नमनास्तूर्णं गेहं समापेदे ॥३९॥
'अक्षरशस्तत्र वचनं पूर्वोक्तं सत्यमासीत्तत् ।
नैते हि किंसखायो मन्मैत्रीं मातरर्हन्ति ॥४०॥
अद्यप्रभृति दृढां मम सन्धामेतां विजानीहि ।
नो जातु कुत्सितधियां मुखमपि तेषां मया दृश्यम् ॥४१॥
किं बहुना नैतत्पुरवासिषु कश्चिद् गृहे हि सह भोक्तुम् ।
मातर्निमन्त्रयिष्ये, सर्वे ह्येतेषु पापिष्ठाः ॥४२॥
नगरं समागत इदमेकां रजनीं यियापयिषुः ।
यः कश्चन वैदेशिक इतः परं मातरामन्त्र्यः ॥४३॥
भोजनपानविनोदै रजनीं सन्तोष्य नूनमतिथिरसौ ।
प्रस्थाप्यो निजमार्गं, न पुनस्तस्याननं वीक्ष्यम् ॥४४॥
एवं हि मातरस्मदभ्यागतनियतभोजनं भवति ।
किंच परिह्रियतेऽधमनागरिकजनौघसम्पर्कः' ॥४५॥
एवं कृतसङ्कल्पः सोऽयं सायं नियमपूर्वम् ।
ईप्सितमतिथिविशेषं प्रत्यैक्षत नगरसीमान्ते ॥४६॥
संप्राप्य तादृशमिमं सोदारप्रश्रयप्रणति ।
आमन्त्र्य तत्प्रभूतसत्कारपरो निशा अनमत् ॥४७॥
एतत्क्रमेण कालक्रमणं कुर्वन् प्रहासोऽसौ ।
एकस्मिन्नहनि यथानियमं पुरसीमभूमिगतः ॥४८॥
'हारीतनृपवरेण्यं हालिकवेषं प्रभूतपरितोषम् ।
परिचितजनैरपि मनागनभिज्ञेयं समद्राक्षीत् ॥४९॥
स हि भूपः प्रकृतिजनावस्थायाथार्थ्यजिज्ञासुः ।
परिवर्तितात्मवेषा नगरीं रात्रिं भ्रमन्नास्त ॥५०॥
तं वीक्ष्य सादरमरं प्रणम्य विनयेन मधुरेण ।
आकृष्टतदवधानः प्रहास एवं समाचष्ट ॥५१॥
'दिष्ट्या त्वं नगरमिदं संप्राप्तः, स्वागतं तेऽस्तु ।
रजनीमिमां गृहे मे प्रसीद वासं कुरु श्रीमन् ॥५२॥
प्रतिरात्रिनूतनातिथिसत्कारः सादरातिशयः ।
प्रस्थापनं प्रभाते तस्यैवं मे क्रमो नित्यः ॥५३॥
तस्याद्भुतातिथेयीपद्धतिमाकर्ण्य विस्मितो भूपः ।
अनुमेने सप्रणयामन्त्रणमेतस्य कुतुकेन ॥५४॥
अविदिततन्नृपभावस्ततः प्रहासः सहासं तम् ।
साधारणातिथिधिया विस्रब्धः स्वं गृहं निन्ये ॥५५॥
सोपस्करेऽथ तस्मिन्नुच्चासनमेनमावेश्य ।
समुदाचारैर्मधुरैरुपतस्थेऽसौ महीपालम् ॥५६॥

(क्रमशः)

112600

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

गो-सेवा, तदादर्शौ दिलीपश्च

— श्री पं० श्रीकृष्णदत्तशर्मा —

महानुभावाः! यावद्विकरालकालसुचक्रितैरस्माभिर्लोकोऽयं वीक्ष्यते, तावदारभ्यतेऽश्रुधाराप्रवाहविमोचनम्। स्मारं स्मारञ्च पौरातनं भारतीयमनुत्तमं चरितं भारतीयमनुत्तममादर्शं दोदूयते स्वान्तमस्माकम्। स्मर्यते च तत्र विषये पौनःपुन्येन, किमिदं तदेव भारतवर्षम्? यत्र पयःपयोभरितसरितः प्रोहुः, यत्र सर्वकामधुग्गवीनां सुपूतदर्शनमन्तरा नहि लोका लोकायात्रां प्रावर्तन्त, यत्र चात्मप्रियान् गोभ्योऽसूंश्च उपाहरन्त मनुजाः। हा कष्टतरम्! इदानीं तस्मिन्नेव आबालब्रह्मचारिमुनिवृन्दपदपङ्क्तिजुष्टे भगवच्छ्रीकृष्णचन्द्रसमभ्यर्हितगोदर्शनसन्तुष्टेऽनार्ते भारतेऽत्याचर्यते गोजननीषु, अवमन्यते च तासु।

विज्ञाः! पुरा सुभिक्षम्, अनवरतं देवमन्दिरेषु निखिलनिगमागमकर्मकाण्डपटूनां ब्रह्मचारिबटूनां सामगानम्, क्रत्वनुष्ठानम्, भीम-भीष्मार्जुननिभानां महिष्ठानां बलिष्ठानां मनुजानाम्, कुलचन्द्रभूपाल-हरिश्चन्द्रसमानां तथ्यगामिनां राज्ञाम्, आतिथ्यशीलशालिनाम्, सात्त्विकप्रज्ञावताम्, वैदिक-पौराणिक-पूर्वजचर्यानुचारिणाम्, सद्धर्मप्रचारिणाम्, भौतिक-भाविक-वार्तमानिक-चरितज्ञानाम्, काश्यपकल्पानां महर्षिणानाञ्च सम्भवः, तद्धेनुजुष्टिफलमेव आसीदित्यवसेयं ध्रुवम्। परन्त्वद्य तासां प्रातर्दर्शनीयानां धेनूनां निरन्तरनैरादर्येण हिंसया चैतदुस्सहं विपरीतं फलं बोभुज्यते खल्वस्माभिः। किं तद् इत्यधो निर्दिश्यते—

दुष्प्रेक्षानुसृतिः, सद्धर्मकर्माऽप्रवृत्तिः, आध्यात्मिका-धिभौतिका-धिदैविकान्तर्गतानेकक्लेशप्रचण्डता, अकाले निधनम्, स्वल्पमायुष्यम्, क्लैब्यम्, भीरुत्वम्, मनोवैक्लव्यम्, उत्साहदैन्यञ्चेत्याद्यनल्पदुष्फलानि स्वसमाचरणीयव्यवहारादपसारयन्ति खल्वस्मान् स्वीयाऽधिकारञ्च तत्र नियोजयन्ति। आस्माकीनं तदेव साहसम्, यौवनसम्पादकं बलम्, कर्मक्षमत्वम्, मौखिकलाल्यम्, चामत्कृत्यमोजस्वित्वञ्चेत्याद्याः पारिषद्याः सम एव गुणाः सहसैवैकत्र अन्तर्दधुः।

अत्र विषये केचिदल्पज्ञाः पुमांसः सहसेत्याचक्षते नेदं गोऽभ्यर्चनम्, न किल परमात्मसमभ्यर्हणमस्तीति, यतः किं कदाचिद् धेनुरित्यचेतनपदार्थस्यापि अस्मदभ्युदयहेतुत्वम्, जीवनाधारत्वञ्चोपपद्यते? इत्यनुयोग इदमुत्तरमुपन्यस्यते खलु तेषां पुरः—

कियद्दूरदर्शित्वेन विवेच्यम्, नैवंविधैः स्वान्तसरोद्भूतैर्बुद्बुदैरभिलषितसिद्धिलाभः, अत्र तु प्राधान्येनासुधारणोपयोगी पदार्थो मार्ग्यः। किन्तद्? "अन्नम्" इति, यतः— "अन्नं वै प्राणिनां प्राणाः" इति व्यवस्थायामत्र ऊह्यते—कुतोऽन्नं समुद्भवति? ततस्तत्र सहसेति भण्येते— अन्नोद्भूतिर्वर्षाऽऽयत्तैवास्तीति निर्विकल्पम्। वर्षणन्तु क्रत्वादिसमनुष्ठानतो भवति। क्रत्वादिकञ्च नहि पयोऽन्तरा समनुष्ठीयते, अतो भवति तत्र सात्त्विकपयःपीयूषशालिनां गवामावश्यकता। परमिदानीन्तनेऽनेहसि न हि सा पौर्वी जोजुष्टिः, न हि तद्यज्ञादिकृतसंसाधककृत्यनुष्ठानम्, न तदन्नसम्पादकबलाहकसुवर्षणम्, येन दुर्भिक्षव्यथाव्यथिताः पुमांसो विकरालकालकवला जायन्ते। क्षुधया चाकृत्यमपि कृत्यत्वेनाचरन्ति। यथा व्याहरन्ति

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

नीतिज्ञाः—"बुभुक्षितः किन्न करोति पापं क्षीणा जना निष्करुणा भवन्ति।" अर्थाद्रिक्तजठरत्वादसौ पुमानस्वास्थ्यं व्रजति, अस्वस्थः सँश्च सुकर्मदुष्कर्माऽनुष्ठानेऽविवेकितामधिगच्छति। अतो यद्यनवरतं नैरोग्यं स्वान्तसन्तुष्टिम्, करुणाभाजनताम्, "अहिंसा परमो धर्मः" इत्यस्मिन् स्मार्तिकशास्त्रांशे आस्थाशालिताञ्च कामयन्ते तत्रभवन्तो भवन्तस्तर्हि 'गोजुष्टिः' परमधर्मोऽयं समाश्रयेलिमो भवद्भिः। धर्मस्यास्य परितोषणेन ऐहिकमैश्वर्यादिकसुखमामुष्मिकमपवर्गञ्च विन्दते मनुजः।

प्रेष्ठाः! आस्माकीनोऽयं परम्पराप्रचलितो 'हिन्दूधर्मः' सर्वजन्मसत्करणं सर्वप्राणिष्वात्मवद्दृष्टिञ्च शिक्षयति, अतो हि गौरियं मातृत्वेनोच्चार्यते। मातेति गोर्विशेषणं न हि केवल प्रतिष्ठाद्योतकमातिशयिकमस्ति। किन्त्वियं मातुरप्यधिकमुपकुरुते। नेयं केवलं स्वापत्यं क्षीरं पाययति, किन्त्वन्यानपि। इयं हि विपिने क्षेत्रे वा भ्रान्त्वा तृणैः स्वोदरं बिभर्ति। तदेव तृणं नाहारो मानुषस्य, न चासौ तस्मात्कथञ्चिदन्नमुत्पादयितुं क्षमः। परं सुरभिस्तस्मादेव तृणात् पीयूषकल्पं रसायनं निष्कास्यास्मानहर्निशं पुष्णाति। सीरादिप्रचालनकार्यनिमित्तञ्च वत्सानाददाति। अत एव निस्सन्दिग्धमियं मातृकल्पैवेति।

प्रेक्षावन्तः! भारतीयानां मानवानां जीवनाधारः कृषिरेवास्तीति निर्विवादम्। तन्निमित्तञ्च वरीवर्ति गवामावश्यकता। तस्माद् गोगुप्तिमन्तरा नहि भारतवासिनां सुखोपलब्धिरिति। किं भूयसा पल्लवितेन? विषयमिमं द्रढयितुं गोरक्षायामादर्शभूतस्य वसुन्धराधिपस्य श्रीमतो दिलीपस्य स्वनिर्मितपद्यमयं दृष्टान्तं सङ्गमय्य गोजुष्टिप्रशस्तिः समाप्यते। यथा हि—

पुरैको ह्यभूत् क्षात्रधर्मानुसारी
सदा गोऽर्चितो दत्तरागो महीपः।
महैश्वर्यवान् विश्वमान्यो दिलीपः
सुताऽभावदूनः परं नो सुखी सः॥ १॥

अपुत्रस्य गतिर्नास्ति शास्त्रोक्तिरिति लभ्यते।
नश्यन्ति च क्रियाः सर्वास्तस्य यो नास्ति पुत्रवान्॥ २॥

एत्याऽतः स्वपुरोधसं कुलगुरुं पूज्यं व[illegible] मुनिं
तं प्रीत्या प्रणिपत्य नम्रशिरसा प्रोचे दिलीपो नृपः।
अन्वष्ठायि जघन्यकर्म किमु भोः! कृत्वानुकम्पां वद
सन्तानस्य सुखं न वा भवति मे येनाऽस्मि खिन्नो महान्॥३॥

समाधिमाधाय ततः स ऊचिवाँ-
स्त्रिविष्टपादाऽऽव्रजता त्वया विभो!।
रजस्वलां स्वां महर्षी सुवाञ्छता
व्ययाजि धेनुर्न हि कामदायिनी॥ ४॥

अतस्तया त्वमित्थं शप्तः—

सञ्चिन्त्य प्रतियासि वत्स! महिषीं तूर्णं तिरस्कृत्य मां
तन्न प्राप्स्यसि पुत्रजन्मसुफलं शप्तस्त्वमित्थं तया।
बीजञ्चात्र वरीवृतीति नृपते! सन्तानरोधात्मकं
तस्मान्न त्वमुपैषि राज्यतिलकं सूनुं महीपाग्रगम्॥ ५॥

सज्जनाः! अवधारयन्तु भवन्तः, इदमेवासीद् गोरसत्कृतिफलम्, गवामभ्यर्चनं नमस्करणञ्च सर्वथा लोकैर्व्यपोहितमिदानीम्। परं वयमाधुनिका गोष्ठे ता अनभ्यर्च्यानमस्कृत्य च तत्र विगर्हितकर्माणि समनुतिष्ठामः। तद्दारुणकर्मफलमनुभवन्तोऽपि कुशेमुष्या स्वीयाऽनिर्मलान्तःकरणेन च न हि विद्मस्तानि। सम्प्रत्याऽऽरब्धसम्बन्धेऽनुस्रियते—

उपायोऽत्र को भोः! विधीयेत नूनं
विलीयेत दुःखं यथा शाधि मां त्वम्।
मुनिस्तं बभाषे निशम्येति गां मे
नृप! त्वं समभ्यर्च्य तामाप्स्यसीहाम्॥ ६॥

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

ऊरीकृत्य मुनेर्वचो धरणिपः प्रानर्च धेनुं तत-
स्तां नीत्वा विपिनेऽनिशं तदनुगः सन्तोषयामास सः ।
भूपालं सुपरीक्षितुं भगवती वव्राज वन्यां गुहां
तत्रत्येन मृगाधिपेन लघु सा क्लिष्टा विपत्तिं ययौ ॥ ७ ॥

विलोक्य भूपो घटनामिमामरं
कण्ठीरवं नाशयितुं सुसज्जितः ।
[illegible] निरोधतां ययौ
ततो मृगेन्द्रं विनयं चकार सः ॥ ८ ॥

जहीहि कण्ठीरव ! गामिमां गुरो-
स्त्यक्ष्याम्यहं नो उपवासकारणात् ।
ऊचे दिलीपस्त्यज मे गुरोर्धनं
ममासुभिस्त्वं कुरु जीवधारणम् ॥ ९ ॥

निशम्यैतत् मृगाशनोऽवादीद् वसुन्धरेशम् । यथा रघुवंशे कालिदासः—

एकातपत्रं जगतः प्रभुत्वं
नवं वयः कान्तमिदं वपुश्च ।
अल्पस्य हेतोर्बहु हातुमिच्छन्
विचारमूढः प्रतिभासि मे त्वम् ॥ १० ॥

क्षात्रधर्मानुसारी दिलीपः सिंहवचः समाकर्ण्येदमब्रवीत् । तत्राऽपि कालिदासः—

क्षतात्किल त्रायत इत्युदग्रः
क्षत्रस्य शब्दो भुवनेषु रूढः ।
राज्येन किं तद्विपरीतवृत्तेः
प्राणैरुपक्रोशमलीमसैर्वा ॥ ११ ॥

तदग्रे—

अतो जहीहि गामिमां न गर्हितं कुरुष्व मा
विधेहि देहधारणां मृगेन्द्र ! भो ममासुभिः ।
इदं प्रगद्य भूधरोऽक्षिपन्निजं कलेवरं
पुरो मृगारिसन्निधौ द्रुतं स्वदण्डरक्षकः ॥ १२ ॥

समुपस्थिते इत्यसह्येऽदृश्ये च दृश्ये किमभूदित्यधो निर्दिश्यते—

पुष्पाण्यवर्षन् सुतरां नभस्तो
मृगाशनस्तत्र तिरोहितोऽभूत् ।
ददर्श किञ्चिन्न नृपो विना गां
ततः स आनर्च भृशं वरिष्ठाम् ॥ १३ ॥

सम्पूज्यमाना क्षितिपं बभाषे
त्वयि प्रसन्नाऽस्मि नरेन्द्र ! कामम् ।
किं ते वरं ब्रूहि यथायथं मां
सुतासिकामोऽस्मि वरं तमीहे ॥ १४ ॥

धीराः ! अतोऽयमन्वयोऽद्यावधि 'रघुकुल'-मित्यभिधेयेन विख्यातः । अस्मिन्नेव सुपूताऽभिजने भगवच्छ्रीरामचन्द्रोऽवततार । अतो मान्याः ! चेद्भवन्तः परम्पराप्रचलितस्य भारतस्य प्राकृतनमभ्युदयम्, एतादृशवंशप्रदीपरत्नोद्भवञ्चाभिलषन्ति तर्हि गोजुष्टिरेव समनुष्ठेलिमा । तावद्धि भावत्कं भव्यं भवितुमर्हति, नान्यथेत्यलमतिविस्तरेण ।

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

पूर्वतोऽनुवृत्तम् : २८

छत्रपति-महाकाव्यम्

—श्री उमाशङ्करशर्मा त्रिपाठी—

[आंग्लभाषा-प्राध्यापकः—काशीविद्यापीठम्, वाराणसी]

★

॥ अथ त्रयोदशः सर्गः ॥

पूज्यातिथेः पथपरिक्लमनोदनाय
रात्रिर्निषेवितुमनाः स्वयमेव तावत् ।
सन्ध्यामुखेन नवरागविजृम्भितेन
स्वोपस्थितेरिव निवेदयति स्म बोधम् ॥ १ ॥

मूलं त्रिलोकमहसामपि वन्द्यपादं
सन्ध्यामुपासितुमिवाऽश्रयदस्तशैलम् ।
रावैर्विहङ्गकलितैः - खकाशवार्ता
युक्तोद्यमाय जगते प्रकृतिस्ततान ॥ २ ॥

उच्छ्वासवातचलितैरभितो रजोभि-
र्यद् दिग्वधूसुवदनानि यथाङ्गरागैः ।
आपूर्य धूसररुचीनि करोति धात्री
गोधूलिमित्यभिदधाति तदेव लोकः ॥ ३ ॥

अन्तर्बहिः प्रतिदिशं शतदीपराजिः
संहर्तुमिच्छति तमः प्रसृतं प्रसह्य ।
उद्योगवर्त्ममनसो विनिहत्य बाधां
नूनं विधेरनुपमा मनुजावताराः ॥ ४ ॥

सौधेषु दीपहसितेषु नरेन्द्रमार्गे
नाह्नो निशश्च खलु कापि विभेददृष्टिः ।
प्रायेण हीनविभवान् हि विडम्बयन्ति
व्याधिर्विधिश्च निखिलाः प्रकृतेर्विकाराः ॥ ५ ॥

भानुः सहस्रकिरणैरपि नेत्रकल्पै-
र्नोद्वीक्षते यदखिलं तदियं तमिस्रा ।
दीपप्रदर्शितपथै - स्तिमिरान्तराऽपि
स्वान्तःप्रवृत्तिरिव पश्यति सर्वदिक्षु ॥ ६ ॥

प्रेक्षाकुतूहलनिबद्ध - मनोरथाना-
मालक्ष्य लक्ष्यविषयं प्रणतानुरागी ।
याच्ञानुबन्धविरहेऽपि समादिदेश
द्रष्टुं श्रियः पुरमपूर्वरुचं जनानाम् ॥ ७ ॥

ते रामसिंहचरदर्शितराजमार्गे-
पार्श्वोदिताट्टपटलावलि - मुग्धनेत्राः ।
रात्रौ विकासिकमलोत्करमत्तभृङ्गान्
कोकान् वियोगविधुरान् ददृशुर्दिने च ॥ ८ ॥

नक्तं दिनेन शिशिरेण निदाघकालः
श्रीशान् सहस्थितिजुषः समुपासमानाः ।
अन्यर्तुदेशपरिबन्धमुपेक्ष्य नित्य-
मत्राऽऽनयन्ति सुरपादपकामदोहम् ॥ ९ ॥

रात्रौ सवितृतनयासलिलेषु 'ताजं'
सङ्क्रान्तबिम्बमवलोक्य फणीन्द्रकन्याः ।
हित्वा रसातलममर्त्यगिरा विनम्रा-
स्तामर्थयन्ति चलदूर्मिततिं विरन्तुम् ॥१०॥

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

यं[1] कालपाणिरपि वैभवकल्पशाखं
हत्वाऽपि नाक्षमत तत्प्रणयं निहन्तुम् ।
तीर्त्वा जगत्परिभवं स्फटिकान्तराले
पार्श्वं परासुरपि सः श्रयति प्रियायाः ॥११॥

यो जीवनेऽखिलधरातिलकोऽपि यस्याः
से[illegible] वीक्षितुमकारणमप्यमर्षम् ।
प्राणान् तदध्वे[illegible]उपकल्प्य सोऽयं
तत्सन्निधिस्थितिजुषा वपुषाऽपि शेते ॥१२॥

काऽन्या नरेन्द्रमहिषी जगतीतलेऽस्मिन्
सौभाग्यमिदृशमुपैति दिवङ्गताऽपि ।
प्राणान् विहातुमपि का न कृतप्रतिज्ञा
प्रयान् स्मरेद्यदि जनं सदृशानुबन्धैः ॥१३॥

नव्याऽवनीशचपला यदि जातु दिल्ली
हित्वा तुरुष्ककुलमन्यकुले रमेत ।
प्रेम्णः कथाऽनिशमियं जनलोचनाना-
सासेचनं तदपि शारदकौमुदीव ॥१४॥

प्रेमा मृदूपकरणो मृदुलोऽपि चित्र-
मात्माकृतिं लिखति वज्रकठोरभित्तौ ।
स्पृष्टोऽथवा कृतिकलाधरपाणिनाऽयं
ग्रावाऽपि पुष्पमृदुतामुररीकरोति ॥१५॥

पाथोधिनेमिभरणे रिपुभिः स्तुतोऽपि
श्रीमान् महीपतिकुलाऽब्जविकासिहासः ।
शुष्यत्स्वकण्ठशमनाय जलाभिलाषी
सेहे न कं परिभवाङ्कुशमात्मजात्[2] सः ॥१६॥

यो दुर्विनीतसुतवेजितमानसोऽपि
वातायनोदित - निकेत - सुषुप्तिभाजः ।
वात्सल्यगद्गदवचो वदनं प्रियायाः
राजा स्मरन्निव मुमोच रुषं सहास्रैः ॥१७॥

पाथेयममृतमिदं प्रणयाऽध्वगानां
दीपार्चिरक्षतशिखं गहनान्धकारे ।
आदर्श एव समवेक्षितुमात्मरूपं
प्रेम्णो निसर्गवसतिः हृदयौकसोऽपि ॥१८॥

यत्राऽव्यलीकमिव लोकमनःस्वरूपं
मुक्ताङ्गरागपरिधानमुदेति दृष्टौ ।
वेशं विकारमिव को न बुधस्तदेनं
वीक्ष्याऽवच्छति यथार्थजगत्प्रतीतिम् ॥१९॥

यत्राऽवमर्दविवशा कलिकाऽस्फुटाऽपि
पुष्पाण्यनाप्तसुरभीण्यपि निष्पतन्ति ।
वृन्तच्युतानि विरसानि दलान्यलज्जं
छद्मस्मितै रमयितुं भुजगान् यतन्ते ॥२०॥

शीलं विनाश्य विधुरा जठराय बाला
भुक्ताः शरीर - मनुजैर्मनुजादकृत्यैः ।
वेशे वसन्ति कृतकप्रणयैर्हरन्त्यो
मिथ्योदितस्मितकलैः कनकान्धचित्तान् ॥२१॥

लोकेषु शास्त्रवचसो विजने पिशाचाः
नग्नाः नवाम्बरजुषोऽपि सुवर्णमत्ताः ।
जीवन्ति यावदधमाः परशीलकामाः
का सभ्यता पशुकुलं किमतोऽपि चिन्त्यम् ॥२२॥

बुद्धेर्विलोकय फलं बुधवन्दितायाः
ऐन्द्रये पदेऽपि मधुवारवधूप्रबन्धः ।
नूनं जगत्पतिरपि स्थितयेऽस्वतन्त्रो
मानुष्यकीमनुकरोति रुचिं विपन्नः ॥२३॥

नेपथ्यकञ्चुकमपास्य यथाभिनेता
मञ्चाद्बहिः सहजभावमुरीकरोति ।
लोकस्तथैव निरुपाधिमना यथार्थ-
मत्र स्वभावमनुगच्छति मुक्तबाधः ॥२४॥

---

१. शाहजहान्नृपमित्यर्थः । २. अवरङ्गजीवात् इत्यर्थः ।

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

एकं वयो लसति यौवनमेव यस्मि-
न्नेकं व्रतं मदिरवारवधूविलासः।
एकं फलं विषमपुष्पशराऽनुतोषो
वेशस्तथाऽमरधरा ह्ययमेव सर्गे ॥२५॥

चित्राः कथा प्रणयपेशलनर्मगोष्ठी
लालित्यलोभि विनयं सहजं सुवेषः।
हर्म्यं सुरेन्द्रभवनं सुरतानि चर्या
स्वर्गं नयन्ति गणिका भुवनेऽप्ययत्नम् ॥२६॥

प्रायेण नाकिसदने भुवनाद्विरक्ता
लब्ध्वाऽप्यनङ्गमधुराः मधुरागमत्ताः।
वामास्तपस्विवृषभाः स्मरवर्त्मवामा
गच्छन्ति कुण्ठितधियोऽप्सरसां निकारम् ॥२७॥

भोगारतिर्यदि विलोभ्यवपुष्षु मोक्षो
यद्वा सुखोपकरणातिशयप्रणाशः।
षण्डो दरिद्रपरमो नु तदेकपात्रं
मुक्तिः स्थितिः शमविवेकमतात्मदृष्टेः ॥२८॥

पेयं निसर्गरमणीयसुधोन्मदिष्णु
भोगाः स्पृहोल्लसितकामदुघानुभावाः।
फुल्लारविन्दमुखलुब्धतिलोत्तमा त्वं
पुण्यर्षभा वयमये किमतोऽधिकं द्यौः ॥२९॥

सर्वं हि नाम परिवर्तनभाजि दृश्यं
यैर्घोषितं तव मुखं न निरीक्षितं तैः।
धाताऽपि विस्मरति यत्पुरतः स्वभावं
कालः कथं तदनुगः प्रभवेदसौ त्वाम् ॥३०॥

ताम्बूलिकेऽलमलमेभिरतिप्रयासै-
र्नूनं कलावति ! कलाऽभ्यसिता त्वयैव।
दृष्ट्यैव रागि हृदयं प्रथमं विधाय
पश्चाद् विडम्बयसि नागलताऽर्पणेन ॥३१॥

आश्चर्यमेतदयि ! यच्चरणाविमौ मे
देवालयाऽभिमुखमेव बलान्नियुक्तौ।
अश्वौ यथा समवलङ्घ्य कशोपदेशं
त्वद्वासधाम्नि वहतो मम देहयानम् ॥३२॥

चर्चासु तन्वि वसुदेवपरासु यासां
चेतः प्रसीदति भृशं गणिका ध्रुवन्ताः।
हृद्याऽनुरागगुणमात्ररता त्वमत्र
मन्ये स्वजातिदुरितोपशमाय सृष्टा ॥३३॥

देशोऽयमत्र बहुशो जितरूपदर्पाः
शुल्कोरसो रसकलाकृतकानुरागाः।
जाने तथापि भवतीं फलमप्यदृष्ट्वा [illegible]
चेतः कथं किमपि नेच्छति नव जाने ॥३४॥

स्नेहप्रकर्षममलं यदि पार्थिवस्य
'ताजो' निरूपयति पार्थिवजातसङ्घः।
युक्तं हि तत् प्रकृतिसिद्धगुणानुबन्धं
लोकः क्षमोऽपि परदान् वितथं विधातुम् ॥३५॥

क्वेमाः सुवर्णरजतस्फटिकप्ररोहाः
क्वासावचिन्त्यमहिमा प्रणयावतारः।
कान्तं वधूर्भजतु दानतुलाधनेन
भेदं द्वयोर्नियतमज्ञतमोऽपि वेत्ति ॥३६॥

स्वर्गं खनिर्हृदयसौरभसूतिरत्नं
नीरं सुधासुकृति दारु च देवदारु।
कर्ताऽतनुः स्वयमचञ्चलचित्तवृत्ति-
स्तन्निर्मितं तदपि किं प्रणयोपमं स्यात् ॥३७॥

अस्मत्कुलं सशपथं प्रतिषिद्धशुल्कं
मूर्ध्ना शपामि तव माऽस्तु तदत्र खेदः।
यद् गृह्यतेऽत्र चरणैरवशं सुवर्णं
तद्वर्णशोधनविधौ प्रथमो हि कल्पः ॥३८॥

प्रायः कुवर्णपरुषा भणितिर्जनाश्च
वेशं व्रजन्ति शुचयोऽपि मलीमसत्वम्।
वश्याः सुवर्णरतयो वयमात्तसन्धा-
स्तस्मात् सुवर्णमहितान् हि जनान् भजामः ॥३९॥

मेवाः प्रसादविधुराऽपि समुत्सुकेव
यातैव हन्त ! नृपमस्तसमस्तचेष्टम्।
आहूयते यमदिशो यमनस्तुकार-
स्तच्छ्रूयते सविनयं विजितः शिवाजिः ॥४०॥

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

प्राणद्विषं नयमना यमनाय दित्सुः
शस्त्रक्रियाशतमखं तमखण्डवीर्यम् ।
आहूय सत्कृतिपथेन नृपः शिवाजिं
तस्याचरिष्यति वयोऽवधिबन्धमोक्षम् ॥४१॥

आहोस्विदप्रतिहता - ऽऽहवदर्पकीर्तेः
प्रायोऽनुषङ्गमधुरेष्वपि विभ्रमेषु ।
धीमानसं[illegible]य सुमित्रधर्मा
तं शि[illegible] ललितानि सह प्रयोगैः ॥४२॥

प्राणा भटे भटरमासु नताभिलाष-
स्तोषो नृपे स्तुतिततिर्जडमागधेषु ।
स्थैर्यं प्रजासु कनकर्द्धिचयश्च कोशे
प्राप्ते शिवेऽखिलशिवं वयमेव नष्टाः ॥४३॥

वन्यातिथीन् वितथरागरमान् विधाय
हेमालयं जितहिमालयमाशु लब्ध्वा ।
एतानकिञ्चनविधीन् कथमाश्रयेन्नः
सामन्तमौलिमणि - मण्डित-वारनारी ॥४४॥

यः सम्मतः पविकठोरतरः स एव
जातः प्रसूनमृदुलो हतदैवदष्टः ।
लोकेऽथवा नमति को न गृहीतमूल्यः
को वा न संस्खलति पिच्छिलदेशमुक्तौ ॥४५॥

नूनं नृपेण परिणामदशा विधत्तं
यद्दक्षिणाञ्चलरमाः स्पृहणीयवीर्याः ।
आमन्त्रिता युधि परीक्षितकीर्तयोऽपि
निर्जेतुमत्र कुटिलालकपाशबद्धाः ॥४६॥

निर्हेतुहासशकलीकृतशूलिधैर्यं
सूक्ष्मांशुकाकुलकुचं वलिताक्षिकोणम् ।
रूपं निरीक्ष्य रणमूर्धनि ते त्वदीयं
मूढाः वनेचरमृगा निहताः पतन्तु ॥४७॥

यल्लोष्टवत्त्यजति निस्पृहमर्थराशीन्
स्वस्थो वशी जयपराजयमोहमुक्तः ।
एकान्तरागि कुरुते बलवन्मनोऽपि
द्यूतं तदेव जगतोऽथ समाधिना किम् ॥४८॥

आमुष्मिकोऽपि महतः कृतकृत्यसिद्धे-
स्तस्यैव येन नियतं विजितस्त्रिवर्गः ।
अर्थेन काममभिषिष्य निषेव्य धर्मं
जीवन्निहैव भजते पुरुषोऽपवर्गम् ॥४९॥

प्रायो जलानि शमयन्ति शरीरतापं
साधौ[1] जने तदपि निष्फलमेव वर्त्म ।
दिव्यं त्वदीयतनुतीर्थमवाप्य कोऽसौ
यस्यात्मदाहविरहं न जहाति चेतः ॥५०॥

व्रीडाविशीर्णविभवोऽपि निशि प्रलीनः
प्रातस्तनोत्यनुदिनं नवरागलक्ष्मीम् ।
मोघाऽऽग्रहं सुमुखि पाटलपुष्पबन्ध-
स्त्वद्विद्रुमौष्ठपदवीग्रहणे बिभर्ति ॥५१॥

ज्योत्स्नां सुहासधवलां मदिरां स्खलन्तीं
गन्धाञ्जलीनि कुसुमानि मिथः समेत्य ।
कामो दिदर्शयिषुरात्मकलां वसन्ते
त्वामालिलेख नवयौवनलोलभित्तौ ॥५२॥

मा मा रुषाऽपनय दृष्टिमुदीर्णरागां
दासात् कृशोदरि सहेलमदृष्टनीतात् ।
देवालयं प्रचलितं सहठं न जाने
कोमामिहानयति वीतधियं प्रकृष्य ॥५३॥

यन्मामनागसमपि क्षमसे न पातुं
त्वद्बुद्धिसूक्तपटवो बटवो हतास्तत् ।
सुस्नेहपिच्छिलपथे सरलस्वभावाः
प्रायः स्खलन्ति निपतन्ति न मादृशाः के ॥५४॥

यज्ञस्थली तव वपुर्वयमृत्विजोऽत्र
स्नेहो हविः सुरतकूजितमेव साम ।
वह्निर्मनोरथकथा रतिरेव यागो
मुक्तिः फलं कुटिलभूतभविष्यमुक्तिः ॥५५॥

---

१. आधिसहिते जने ।

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

मङ्गलाशंसनम्

काकोलो यस्य पेयः शिशुतुहिनकरश्शेखरो नागनाथो
जूटग्रन्थिः, करोटिग्रथित - गललसद्धार एकावली च ।
वामाङ्गं धर्मपत्नी, गलिततरुणिमा सौरभेयश्च वाहः,
कृत्तिर्वासो, निवासः पितृवनमही, नागवक्त्रः षडास्यः ॥ १ ॥
पुत्रौ, भस्माऽङ्गरागश्च, तिलकमनलः, पारिषद्याश्च भूताः
इत्थं वैचित्र्यधाम्ना परिकरविभवेनाऽपि युक्तोऽद्वितीयः ।
नित्यं सोऽनष्टमूर्तिर्विसृमर - महिमाऽप्यष्टमूर्तिः सुरेड्यः
शम्भुर्गङ्गाभुजङ्गो जगदिदमवतात् क्लेशजातं व्यपोह्य ॥ २ ॥

—श्री न० च० वे० नरसिंहाचार्यः—

द्वित्रद्विजा विरलवर्णवचाः स्खलन्ती
वीतादरा वपुषि कौतुकलब्धचेताः ।
स्तोकाम्बराऽविदितयौवनलक्ष्मदेहा
कन्यागुणाऽपि जरती न जहाति वेशम् ॥५६॥

नर्मोक्तिभिः परिचितेषु विनोदयन्ती
नव्यासु चित्रचरितं परिकीर्तयन्ती ।
मिथ्याग्रहैः समदशासु रुषा दहन्ती
सर्वंसहेयमुदरानलतप्तवृद्धा ॥५७॥

रोगो हि नाम हतदैवपराभिधानं
यो जीवयन्नपि मृतेरधिकं दुनोति ।
मामेव पश्य, मदपाङ्गसमर्पितासुः,
'वृद्धां' सहेलमभिधाय जनोऽपयाति ॥५८॥

कच्चिद् युगस्थितिरियं समयाग्रहो वा
हृद्येऽनुरागविषये यदियं प्रवृत्तिः ।
ऐकान्तिकः क्व निखिलोपधिभित्प्रसङ्गः
क्वेमे विकारिविभवास्तनुपक्षपाताः ॥५९॥

व्यापारहेतुविषमेपशुनिर्विशेषे
रागे तनूलसवहृतो रमतां विमूढः ।
स्नेहस्वभावविदनन्यरसप्रवीणः
सिद्धान्तरक्षमतनुं सहृदं धिनोति ॥६०॥

भद्रे ! विलासवसताविह धर्मवर्त्मा
बाल्यं विटेषु धनयौवनमिष्टदेषु ।
सम्भुज्य वृद्धपरमेष्ठ्वधुना चरन्ती
निष्ठावती त्वमिव तापसि राजसे त्वम् ॥६१॥

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

पूर्वतोऽनुवृत्तम्

गोवधनिरोध-महाभियानम्—उद्भवः, प्रगतिश्च

—श्री 'अङ्गारः'—

महाभियाने बलिभूतानां महापुरुषत्रयाणां विरहेण जगद्गुरुशङ्कराचार्य - पुरीपीठाधीश्वर-सन्त - प्रभुदत्त-ब्रह्मचारिप्रभृतीनां दीर्घकालिकेन अनशनेन भारत-शासनस्य गोवधनिरोधनियमाकरणविषयकेन हठवादेन च सर्वत्र भारतीयेषु प्रसृतायाः चिन्तायाः खेदस्य रोषस्य मध्ये १९६७ तमेशवीयः वत्संरस्यारम्भः समजनि। भारतीयैः नैकैः प्रतिष्ठितनेतृभिः शासनं समनुरुद्धं यत् सिद्धान्ततः गोवधनिषेधस्वीकारघोषणया महात्मनामनशनाग्रहं निवार्य तेषाममूल्याः प्राणाः संरक्षणीया इति।

अन्ततः शासनेन जनवरीमासस्य पञ्चमदिनाङ्के एकस्या उच्चाधिकारसम्पन्नायाः गोरक्षासमितेः सङ्घटनस्य घोषणा कृता, यस्याः सदस्येषु केन्द्रीय-शासन - प्रतिनिधिः, राज्यशासनानां प्रतिनिधयः, गोरक्षा - महाभियानसमितेः प्रतिनिधिः, विशेषज्ञाश्च भविष्यन्ति। समितिरियं गोवंशवधप्रतिबन्ध - विषये विचार्य प्रतिवेदनं प्रदास्यति, तदनुसारं शासनं नियमादिकं विधास्यतीति। गोरक्षामहाभियानसमित्या प्रस्तावोऽयं तिरस्कृतः। तस्या इदं मतं यदेतेन प्रश्नस्य समुचितं समाधानं न जायते। पूर्वं शासनेन सिद्धान्ततो गोवधनिरोधनीतिः घोषणीया। तदैव महाभियानं महात्मनामनशनञ्च निरुद्ध्येत। जगद्गुरुभिः ब्रह्मचारिमहाभागादिभिरपि एवमेवोक्तम्।

अत्रान्तरे बहुभिर्नेतृभिः शासनं समनुरुद्धम्, परं तत्तु स्वहठे एव दृढमतिष्ठत्। जनवरीमासस्य ६ दिनाङ्के दिल्लीनगरीये तिहाड - कारागृहे गोभक्तानां श्रीकृष्णचन्द्राणां चतुर्थं बलिदानमभवत्। महा-भियान - समित्या महाभियाने तीव्रता प्रापिता। जगद्गुरुभ्यः केनापि अज्ञातनामधेयेन पत्रं संप्रेष्य लिखितं यद् भवन्तोऽनशनं न समापयिष्यन्ति चेत् भवतां वधो विधीयेत इति। प्रधानमन्त्रिप्रभृतिभिः स्वीयनिर्वाचनभाषणेषु महाभियानकर्तृणामभद्रा निन्दा कृता। १६ दिनाङ्के श्रीकरपात्रस्वामिनः सत्याग्रहप्रसङ्गे पुनः शासनेन कारागारे निबद्धाः। उत्तरप्रदेशीय-उच्चन्यायालय - विचारपतिना श्री धवनमहोदयेनापि शासनपक्षपातेन जगद्गुरवः समालोचिताः। प्रयागीय-विद्वद्भिस्ते शास्त्रार्थाय समाहूताः, परं नागताः। १९ दिनाङ्के असमराज्यीयानां श्रीनिर्मलचन्द्राणां तिहाड-कारावासे पञ्चमं बलिदानभवत्।

अन्ततो गोरक्षामहाभियान-समित्याऽपि निश्चितं यत् शासनं सर्वथा हठे स्थितम्। इतोऽधिकं किमपि कर्तुं तन्न प्रवर्तते। एवंस्थितौ व्यर्थमेव महापुरुषाणां प्राण-हानिः किमिति कार्या? अतः समित्या जगद्गुरु-प्रभृतयः संप्रार्थिता यद् भवद्भिरनशनव्रतं परिसमाप्य-मिति। ब्रह्मचारिमहोदयैस्तु एतत् स्वीकृतम्, परं जगद्-गुरवस्तु स्वनिर्णये दृढा एवासन्। अत्रान्तरे उत्तर-प्रदेशीयमहाधिवक्तृ - महोदयैर्माध्यस्थमत्र कृतम्। श्रीकरपात्रस्वामिचरणानादाय ते शासकीय - विमानेन पुरीनगरे गताः। जगद्गुरवः सम्प्रार्थिता यदत्र शास-नाय गोवधनिरोध विषयो नूनं सम्मतः। वैधानिकप्रश्नेन तद्बद्धम्। अतो भवद्भिरनशनं परित्याज्यमिति।

फलतो जनवरीमासस्य ३० दिनाङ्के श्रीप्रभुदत्त-ब्रह्मचारिभिः ७२ दिवसीयस्य अनशनस्य पारणा कृता, जगद्गुरुशङ्कराचार्यैश्च ३१ दिनाङ्के ७३ दिवसीयस्य व्रतस्य पारणा कृता। तैरुक्तं यत् 'शासनस्य कृते अवसरोऽयं दीयते। महाभियानं प्रचलिष्यत्येव यावद् गोवधो न निरुद्ध्येत! परम् अनशनपर्व समाप्यते। यदि शासकीयो हठोऽत्र दृश्येत तदा पुनरपि अनशनं मया प्रारभ्येत' इति। श्री 'वीरा'दिभिरपि अनशनं त्यक्तम्। इत्थं महाभियानस्य तृतीयं पर्व परिसमाप्यते।

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

पूर्वतोऽनुवृत्तम् : ८

मानस-भारती—देवगिरा गुम्फितं मानसम्

— श्रीजनार्दन गङ्गाधर रटाटे —

[बी० ए०, साहित्याचार्यः]

★

[उदीयमानकविना विदुषां जनार्दनशास्त्रिणा संग्रथिताया मानस-भारती-मालाया इदं सुन्दरकाण्डं पर्व पूर्णतां याति । राष्ट्रभाषा-शिरोरत्नायमाणस्य रामचरितमानसस्य इदं देवभाषागुम्फनं नूनमतितरां महनीयं वस्तु । आशास्महे सुविद्यः सहजशक्तिः कविरयमुपक्रममुम् अग्रेऽपि प्रसार्य समग्रं मानसं संग्रथ्य 'सूर्योदय'-पाठकेभ्य उपायनीकरिष्यते । सूर्योदयः कविवरस्य सदैव सर्वतोमुखं समुत्कर्षं कामयते ।

—सम्पादकः]

रामस्य तेजसः शक्तेर्बुद्धेश्चाधिक्यमीरितुम् ।
लक्षाण्यपि न शक्ता स्युः शेषा, रामः पुनः शतम् ॥
सिन्धूनेकेन बाणेन शक्तः शोषयितुं प्रभो ।
किन्तु युक्तिं भ्रातरं ते पृष्टवान् नीतिपारगः ॥
तस्य वाक्यात् कृपालुः स पद्धतिं याचतेऽर्णवम् ।
श्रुत्वा दूतस्य वचनं विहस्योचे दशाननः ॥
ईदृशी धीस्ततस्तेन सहायाः कपयः कृताः ।
प्रमाणीकृत्य वचनं भीरोस्तेनाब्धिना सह ॥
बालकृत्यं समारब्धं किं मृषा कल्पसे रिपुम् ।
तस्य बुद्धेर्बलस्यापि विज्ञाताऽगाधता मया ॥
भीतो विभीषणो मन्त्री तस्य सम्पज्जयौ कुतः ।
इति श्रुत्वा खलवचो दूतोऽत्यस्तं चुकोप सः ॥
विचिन्त्य युक्तं समयं समयं ददौ लक्ष्मणपत्रिकाम् ।
गृहीत्वाऽऽहूय सचिवं तद्द्वारा समवाचयत् ॥

न केवलं वाग्रचनेन चित्तं
प्रसाद्य वंशं शठ नाशय स्वम् ।
विरुद्ध्य रामं न भविष्यसि त्वं
गतोऽपि विष्णुं द्रुहिणं शिवं वा ॥५६॥ क
त्यक्त्वाऽभिमानं सदृशोऽनुजेन
रामाङ्घ्रिपद्मे भव भृङ्गराजः ।
रे दुष्ट वा रामशरानले स्व-
कुलेन साकं भव दुष्पतङ्गः ॥५६ ॥ ख

तच्छ्रुत्वा रावणो भीतो हृदि हृष्टो मुखेऽवदत् ।
करो भूपतितो व्योम ग्रहीतुं यतते यथा ॥
वाग्विलासं प्रकुरुते तथाऽयं लघुतापसः ।
ऊचे शुको नाथ गर्वं त्यक्त्वा वाक्यं मनुष्व सद् ॥
कोपं विहाय शृणु यद् देव रामेण मा द्विषः ।
मृदुः स्वभावो रामस्यातीव यद्यपि लोकराट् ॥
दृष्ट एव प्रभू रामः कृपां त्वयि करिष्यति ।
रामायार्प्य सीतां त्वमिति स्वीकुरु मे वचः ॥
उक्तवन्तमिदं दूतमङ्घ्रिणाऽताडयच्छठः ।
दूतोऽपि नत्वा तत्रागाद् यत्र रामः कृपाम्बुधिः ॥
नत्वा वृत्तान्तमुक्त्वेश कृपयाऽगाद् गतिं स्वकाम् ।
अगस्त्यशापादार्थे स मुनिरप्यस्तपोऽभवत् ।
रामपादौ मुहुर्नत्वा स्वाश्रमं गच्छति स्म सः ॥

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

वचोऽतिनम्रं त्रिभिरप्यहोभि-
मूँढोऽब्धिरङ्गीकुरुते स्म नैव।
रामस्तदा कोपयुतोऽब्रवीद् यद्
भयं विना प्रीतिरहो न लोके ॥५७॥

आनयानुज [illegible]चापेषू शोषयिष्यामि वह्निना।
विनय[illegible] मूढेन प्रेम वक्रजनेन च ॥
कृपणेनोत्तमा प्रीतिर्ज्ञानं मोहरतेन च।
लोभिना सह वैराग्यचर्चा शान्तिश्च कोपिना ॥
हरेः कथा कामिना च सह बीजं यथोषरे।
इत्युक्त्वा लक्ष्मणायेष्टं राघवः सन्दधे शरम् ॥
सन्धत्तेऽग्निशरे भीष्मेऽब्धौ ज्वाला भीषणाऽभवत्।
व्याकुला मत्स्य-मकर-सर्पाणां विविधा गणाः ॥
ज्ञात्वाऽब्धिर्ज्वलतो जन्तून् नम्रो विप्रवपुर्धरः।
नानामणिगणान् स्वर्णपात्रे संगृह्य चागमत् ॥

कोटिप्रकारैरपि कोटयुपायैः
सिञ्चेत, रम्भा फलदा न किन्तु।
कृत्तैव, तद्वद् विनयेन नैव
खगेश नीचः कुमिरैव वश्यः ॥५८॥

रामस्याङ्घ्री प्रणम्याब्धिर्भीतः प्राह प्रभो मम।
दोषाः क्षम्याः पञ्चभूतकृत्यं स्वभाविकं जडम् ॥
ससर्जेमानि सृष्टयर्थे मया सम्प्रेरिता त्वया।
इति ग्रन्था वर्णयन्ति त्वदाज्ञापालकः सुखी ॥
शिक्षितोऽहं युक्तमिदं मर्यादा रचिता त्वया।
भेरी शूद्रः पशुर्ग्राम्यः स्त्री च दण्डाधिकारिणः।
शुष्कः स्यां राममहसोत्तरिष्यति च वाहिनी ॥
ममास्मिन्नास्ति वैशिष्ट्यं नोपेक्ष्याऽऽज्ञा प्रभोरिति।
वेदा वदन्ति तस्मात्ते रोचते तत्करोम्यहम् ॥

अतीव नम्रं वचनं निशम्य
मन्दं हसन्नाह कृपालुरब्धिम्।
येनैव सेना कपिपुङ्गवानां
तरेदुपायं वद तात तं माम् ॥५९॥

राममब्धिः प्राह नीलो नलश्चेत्यनुजाबुभौ।
ऋष्याशीःसंयुतौ बाल्ये स्पर्शादेव तयोः प्रभो ॥
प्रतापात्ते महान्तोऽपि तरिष्यन्त्यद्रयो मयि।
यथाशक्ति सहायोऽहमपि वीर्यं स्मरन् प्रभोः ॥
बध्योऽब्धिरिति गीतं स्यात् त्रिलोक्यां ते यशो यथा।
वाणेनानेन हन्तव्या ममोत्तरतटे स्थिताः ॥
अघौघा दुर्जना नाथ श्रुत्वाधिमुदधे प्रभुः।
रणधीरः कृपालुश्च रामस्तामहरत्क्षणात् ॥
रामस्यातिबलं वीर्यं दृष्ट्वाब्धिर्मुदितः सुखी।
ततो दुश्चरितं तेषां रामं ब्रूते स्म सोऽखिलम्।
रामपादाब्जयुगलं नत्वाऽगच्छद् यथाऽऽगतः ॥

गृहं गतोऽब्धिरीप्सितं मतञ्च राघवाय तत्। कलिप्रभाव - नाशकं चरित्रमेतदुत्तमम् ॥
यथामतीरितं तुलस्यनन्यदाससाधुना। विहाय सर्वलालसां समाश्रयं भवस्य च ॥
गृणीहि च भ्रमापहान् विषंदहान् सुखावहान्।
गुणान् रघूत्तमस्य तु मनो ममाज्ञ संश्रृणु ॥
गुणानुवादो रघुनायकस्य सुमङ्गलं यच्छति सर्वमेव।
शृण्वन्त्यमुं ये तु समादरेण तरन्ति पोतेन विना भवाब्धिम् ॥६०॥

श्रीमत् सुन्दरकाण्डं भाण्डं त्वानन्दरत्नस्य।
रामाङ्घ्रिपूजनार्थं पद्मं पर्णात्मकं मेऽस्तु ॥

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

श्रीभारतधर्म-महामण्डल-शास्त्रप्रकाश-विभागद्वारा प्रकाशितानि पुस्तकानि

१. धर्म-कल्पद्रुम प्रथम खण्ड	२)
२. ,, द्वितीय खण्ड	१॥)
३. ,, तृतीय खण्ड	२)
४. ,, चतुर्थ खण्ड	२)
५. ,, पंचम खण्ड	२)
६. ,, षष्ठ खण्ड	३॥)
७. ,, सप्तम खण्ड	२)
८. ,, अष्टम खण्ड	३॥)
९. धर्म-कल्पद्रुम द्वितीयखण्डसहित, रायल एडी०	५)
१०. प्रवीण दृष्टि में नवीन भारत प्र० द्वि० खण्ड	२)
११. नवीन दृष्टि में प्रवीण भारत	१)
१२. साधन-चन्द्रिका	१।।।)
१३. शास्त्र-चन्द्रिका	१॥)
१४. धर्म-चन्द्रिका	१।)
१५. आर्य-गौरव	॥)
१६. नीति-चन्द्रिका	॥)
१७. धर्म-प्रश्नोत्तरी	।)
१८. चतुर्दश-लोकरहस्य	।)
१९. गीतार्थ-चन्द्रिका सजिल्द	३)
२०. ,, ,, अजिल्द	२॥)
२१. सनातनधर्म-दीपिका	।।।)
२२. धर्म-विज्ञान प्रथम खण्ड	५)
२३. ,, द्वितीय खण्ड	४)
२४. ,, तृतीय खण्ड	४)
२५. सतीचरित्र-चन्द्रिका	२)
२६. नित्यकर्म-चन्द्रिका	।)
२७. धर्म-सोपान	।)
२८. धर्मकर्म-दीपिका	।)
२९. सदाचार-सोपान	–)
३०. कन्याशिक्षा-सोपान	–)
३१. ब्रह्मचर्य-सोपान	।)
३२. सज्जन-सोपान	॥)
३३. शास्त्र-सोपान	।)
३४. उपदेश-पारिजात	॥)
३५. कल्कि-पुराण	१॥)
३६. पातञ्जल-योगदर्शन	३)
३७. महामण्डल-रहस्य	१॥)
३८. मन्त्रयोग-संहिता	१)
३९. हठयोग-संहिता	॥)
४०. तत्त्वबोध	=)
४१. स्तोत्र-कुसुमाञ्जलि	।)
४२. भगवद्गीता प्रथम खण्ड	१)
४३. विष्णु-गीता	१)
४४. सूर्य-गीता	॥)
४५. शक्ति-गीता	१)
४६. धीश-गीता	।।।)
४७. शंभु-गीता	१)
४८. संन्यास-गीता	१)
४९. गुरुगीता	।)
५०. कर्ममीमांसा-दर्शन प्रथम खण्ड	१॥)
५१. ,, द्वितीय खण्ड	२)
५२. ,, तृतीय खण्ड	५)
५३. कर्ममीमांसा-दर्शनम् (संस्कृत)	२)
५४. राम-गीता	२॥)
५५. कहावत-रत्नाकर साधारण रायल	१०)
५६. रामायण तुलसीकृत	१॥)
५७. दैवीमीमांसा-दर्शन प्रथम भाग	३॥)
५८. ,, द्वितीय भाग	५)
५९. त्रिवेदी सन्ध्या	।=)
६०. गोत्रत-तीर्थमहिमा	॥)
६१. मार्कण्डेय-पुराण प्रथम खण्ड	१)
६२ ,, द्वितीय खण्ड	१)
६३. ,, तृतीय खण्ड	१)
६४. ऋजु-पाणिनीयम्	।।।)
६५. संगीत-सुधाकर	।)
६६. पुराण-रहस्य	१॥)
६७. संन्यासधर्म-पद्धति	१॥)
६८. पातञ्जल-योगदर्शनम् (संस्कृत)	४)

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

पञ्जीकृतसंख्या एल० १८९७

सूर्योदयस्य नियमाः

पत्र-संहिता

१. 'सूर्योदय'-मासिकपत्रस्य वार्षिकं शुल्कं रूप्यकपञ्चकं वर्तते। धनादेश (मनीआर्डर) द्वारा तत्प्रेषणीयम्। वी० पी० द्वारा प्रेषणे ५० पणाः पृथक् प्रदेयाः स्युः।

२. वर्षे गम्भीरसाहित्यसमन्विताः १२ अङ्काः प्रकाश्यन्ते। नवीनग्राहकत्वं प्रथमाङ्कतः (जनवरी-अंकतः) एव स्वीक्रियते। माध्यमिकेन केनापि अङ्केन ग्राहकत्वं न स्वीक्रियेत।

३. आंग्लमासस्य २६ दिनाङ्के 'सूर्योदयः' प्रकाशितो भवति, वारद्वयं संशोध्य ग्राहकेभ्यः स प्रेष्यते। तदलाभे पूर्वं स्वकीय-पत्रालयस्तदनागमनस्य निश्चयं कृत्वैव १० दिनाङ्कानन्तरं वयं सूचनीयाः।

४. लेखकवितादीनां भाषा संयता, सरला, शुद्धा च भाव्या। प्रकाशनीय-लेखादीनां स्पष्टाक्षरैः कर्गलस्यैकपृष्ठे एव लेखनमावश्यकम्। अस्वीकृता लेखादयः पोस्टविभागीय-चिटिका (टिकट) प्राप्त्यनन्तरं परावर्तयितुं शक्ष्यन्ते।

५. सम्पादकीय-विषयसम्बद्धे पत्र-व्यवहारे 'सम्पादकः' इति, व्यवस्थाविभागीय-पत्रव्यवहारे च 'व्यवस्थापकः' इति च स्पष्टं लेखनीयम्। तेन उत्तरलाभे मुधा विलम्बो न भवेत्।

विज्ञापन-शुल्कम्

सूर्योदये सुरुचिपूर्णं विज्ञापनं प्रकाश्यते। एकवारं तस्य प्रकाशनस्य शुल्कक्रमश्च अधोलिखितोऽस्ति। सार्वकालिकस्य दीर्घकालिकस्य च विज्ञापनस्य कृते विशेष-सौविध्याय पत्र-व्यवहारः कार्यः।

साधारणस्य प्रतिपृष्ठस्य	१००) रु०	साधारणस्य प्रत्यर्धपृष्ठस्य	६०) रु०
साधारणस्य चतुर्थांशपृष्ठस्य	३५) रु०	आवरण-चतुर्थपृष्ठस्य	२००) रु०
आवरण-द्वितीय-तृतीयपृष्ठयोः	१५०) रु०	प्रथमावरणपृष्ठे विज्ञापनं स्वीक्रियते।	

— सङ्केतः —

'सूर्योदय'-कार्यालयः, भारतधर्म-महामण्डलम्, जगत्गंज वाराणसी।

सम्पादकः, प्रकाशकः, मुद्रकश्च—गोविन्द नरहरि वैजापुरकरः,
श्रीभारतधर्ममहामण्डलम्, जगतगंज, वाराणसी कैण्ट।
मुद्रण-स्थलम्—मनोहर प्रेस, जवनबर वाराणसी।

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

सूर्योदयः

भारतधर्ममहामण्डलस्य
मासिकं मुखपत्रम्

वर्षम् ४२

अङ्कः २

सम्पादकः
गो० न० बैजापुरकरः

फरवरी
१९६७

वार्षिक-मूल्यम्
५) रूप्यकाणि

प्रत्यङ्क-मूल्यम्
अर्धरूप्यकम्

पुनराह्लादय, जगदेतदलम् !

अखिलेश ! दयारसधाराभिः
पुनराह्लादय जगदेतदलम् !
अभिराम ! विरामं सन्तापा-
ल्लभतां सकलं हृदयं विकलम् !!

१.

तव नाम परं ललितं महितं
तव धाम हि सौख्यरसैर्भरितम् ।
अविचिन्त्य विचिन्त्य तवाचरितं
सुखितेन परं हृदि निर्झरितम् ।।
भवतापहारं तवशीलमहो
प्रददाति चिराय नितान्तकलम् !

२.

विपरीतमतीतमभून्निखिलं
नहि मानवताचरितं विमलम् ।
अभिशप्तमिदानीं हे भगवन्,
निजभारभरेण हि भूमितलम् ।
कमलेश ! विहाय सुशान्तिजलं
जगदद्य समीप्सति क्रान्त्यनलम् !

— श्री ओङ्कारप्रसाद त्रिपाठी

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

परीक्षा-विषयिणी सूचना

अखिल-भारतवर्षीय धार्मिकाध्यात्मिक-संस्कृतविद्यापीठस्य परीक्षामन्त्रिणः सूचयन्ति यत् विद्यापीठस्य ऐषमः परीक्षाः मई मासस्य ५ दिनाङ्कतः ८ दिनाङ्कं यावत् भवितारः। विशेषविवरणं कार्यक्रमश्च परीक्षा-केन्द्रतोऽवसेयः।

अनुक्रमः

प्रपानकः	पत्रपुटम्	परिवेषकः
श्री सरस्वती-स्तुतिः	३३	श्री पूज्य श्रीधरस्वामी
श्रीमहर्षि-ज्ञानानन्दचरितम्	३४	श्री विन्ध्येश्वरीप्रसाद शास्त्री
तुरीयं महानिर्वाचनम्, शासन-संस्था च	३७	सम्पादकीयम्
(१) भक्ति-रसार्णवः	४१	श्री पूज्य करपात्रस्वामिनः
(२) सुप्त प्रबुद्धम्	४४	श्री स्व० लक्ष्मण शास्त्री तैलङ्गः
(२) द्विज-शूद्रयोर्भेदो वैदिक एव	४८	श्री दीनानाथ शास्त्री सारस्वतः
काव्यशास्त्र-विनोदेन	५०	श्री पद्मनाभ निरौला
(१) शाकुन्तलीयं जीवनदर्शनम्	५१	श्री न० च० वे० नरसिंहाचार्यः
(२९) क्षत्रपति-महाकाव्यम्	५८	श्री उमाशङ्करशर्मा त्रिपाठी
लुण्ठिते वेश्मनि यामिक-जागरणम्	६०	श्री हरिद्वारस्थो हरिप्रियः
कल्पनापोढं कहानीतिवृत्तम्	६१	श्री मधुसूदन शास्त्री

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

सूर्योदयः

श्रीभारतधर्ममहामण्डलस्य मासिकं मुखपत्रम्

रागद्वेषनिशाटनं विधुरयन् मोहं तमो नाशयन्,
तामिस्रं जडवादकैरवकुलं ज्ञानत्विषा ग्लापयन्।
विद्वत्कोकमशोकयन् नयसुधीरोलम्बमुन्मीलयन,
सञ्जातः सुमनोमनो मधुरयन सर्वत्र सूर्योदयः ॥

४३ वर्ष] वाराणसी, माघः २०२३ : फरवरी १९६७ ई० [२ अङ्कः

श्री सरस्वति-स्तुतिः

मतिर्मे वाणी वा भगवति तवांशौ सुविमले
महाब्धिस्तारङ्गैः स्फुटमसि तथा त्वञ्च सकलैः।
भवत्प्रज्ञैकत्वं स्फुटतरविकासं वितनुते
यदा बुद्धौ देवि स्तुतिरिति तदानीं घटयति ॥ १ ॥

पृथिव्यां या माता वसति शिशुभिर्या परिवृता
रुषा पश्यन्त्येनान् रुदत इति सा नैति वहति।
तथा त्वं नैवासि ह्यमितकरुणापाङ्गनिभृता
यदा जाने मातः स्तुतिरिति तदानीं घटयति ॥ २ ॥

जगन्मातः स्तोतुं भवति खलु को वा मतियुतः
कृपापाङ्गो न स्याद्यदि, मयि ततस्त्वं कुरु कृपाम्।
अहं याचे मातर्मदभिलषिता पूरितधिया
यदा सर्वज्ञोऽस्मि स्तुतिरिति तदानीं घटयति ॥ ३ ॥

जगत्सत्यं नो वा भवति न च को वाऽस्य विषयः
इमौ कौ जीवेशौ जगदिदमनीशं किल न वा।
इयं माया कस्मात् प्रभवति च भिन्नोऽत न च वा
न जाने मां शाधि स्तुतिरिति तदानीं घटयति ॥ ४ ॥

— समर्थानुगृहीत महात्मा श्री श्रीधरस्वामी —

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

पूर्वतोऽनुवृत्तम्

श्रीमहर्षि-ज्ञानानन्दचरितं महाकाव्यम्

— श्रीविन्ध्येश्वरीप्रसादशास्त्री —

[श्रीमतां समादरणीयानां सारस्वताम्भोधिनिमज्जनोन्मज्जनावदातान्तःकरणानां विद्वत्तल्लजानां विन्ध्येश्वरीप्रसाद-शास्त्रिपादानामिदं महाकाव्यं प्रमुखतो वसन्ततिलकाग्रथितम् एकादशसर्गावधि अस्माभिः क्रमशः प्रकाशितम्, यथा-सौलभ्यं क्रमशश्च समग्रं प्रकाशयिष्यते । श्रीभारतधर्ममहामण्डल-संस्थापकानां महर्षिवर-ज्ञानानन्दस्वामिपादानां गुरुवराणां जीवनवृत्तं समाश्रित्य प्रवर्तितमपीदं महाकाव्यं विविधधार्मिकैतिहासिक वैदिक दार्शनिकगूढतत्त्वजातैः कविवरेण तथा समलङ्कृतं यथैतत् पठनेन सर्वसाधारणस्य ज्ञानभाण्डारमनिच्छन्नपि नूनं संवर्धयेत् । महाकाव्यीयसर्वलक्षणलक्षितं नूत्नतरमेतन्महाकाव्यं सूर्योदयपाठकाः परमेण समुत्साहेन पठन्तीति नातिरोहितमस्माकम् । अत एव यथास्थानमधिका-धिकमत्र तत्प्रकाशयितुं नूत्नोऽयमुपक्रमः क्रियतेऽस्माभिः । आशास्यते चानेन पाठकानां मनस्तोषो भवेत् । एतादृश-महनीयमहाकाव्यसमर्पणाय शास्त्रिपादानां वयमतितरां कृतज्ञा इति शब्दशक्त्या समुद्घोष्य तस्य गौरवं ह्रसयितुं न वाञ्छाम इति ।—सम्पादकः]

३१. गतेष्वनेकेषु च हायनेष्वसौ
विदामगम्येऽत्र च योगदर्शने ।
अरीरचद् भाष्यमलौकिकं यति-
र्निमित्तमासीदिह खेतड़ीपतिः ॥

३२. तपस्विनो योगतपश्चिकीर्षया
विपश्चितस्त्यक्तसमस्तकामनाः ।
अनेकशोऽध्यूषुरिमं गिरिं च, तैः
प्रसर्पदेतच्चिचिते प्रशिक्षणम् ॥

३३. विभिन्न-योगाध्ययनार्थमुद्यताः
समे समेत्यानुदिनं प्रशस्तया ।
निरस्तशङ्काश्च महर्षिशिक्षया
परं प्रमोदं समवापुरात्मनि ॥

३४. कदाचिदेको दशमीं गतो मुनिः
समाजगामास्य यतेः शुभाश्रमम् ।
स गुप्तरूपोऽपि निजेन वर्चसा
बलाहकाच्छादितभानुवद् बभौ ॥

३५. स आतिथेयापचितिं यतीश्वरान्
मुनीश्वरः प्राप्य सुविष्टरे स्थितः ।
अपृच्छदेनं किमिहार्षदर्शनैः
प्रचार्यते - ऽन्योन्यविभेद - भावना ॥

३६. यतीश्वरः प्रश्नगिरं निशम्य ता-
मवोचदेषोऽपि मुने निशम्यताम् ।
न दर्शनेष्वेष्विह विद्यते क्वचिन्
मुनिप्रणीतेषु विरोधवादिता ॥

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

३७. विद्याऽप्यविद्येति च शास्त्रसम्मतं
रूपं च शक्तेर्द्विविधं परात्मनः ।
विमुच्यते जीवगणोऽत्र चाद्यया
द्वितीयया कर्मसु संनिबद्ध्यते ॥

३८. द्विसप्तसंख्याः क्रमबोधशालिनः
स्तरा लसन्ति श्रुतिविश्रुताः श्रुताः ।
अविद्ययाऽऽद्याः किल सप्त चालिताः
प्रचालिताः सप्त च विद्ययाऽन्तिमाः ॥

३९. यथा च सोपानततेः समाश्रयान्
नरो हि सौधोपरि गच्छति द्रुतम् ।
तथैव विद्वानपि दर्शनक्रमं
स्वधीत्य तद् ब्रह्म समेति सत्वरम् ॥

४०. चतुर्दशाप्ता भुवि बोधभूमयो
लसन्ति वेदप्रतिपादिताश्च याः ।
उदेष्यमाणोदित-संविदस्तिता
कदापि नैवात्र ततोऽतिरिच्यते ॥

४१. चतुर्विधायामिह भूतसंहतौ
क्रमाच्चतस्रो विकसन्ति चित्कलाः ।
चिदो विकासस्य च पञ्चमः स्तरो
देहात्मवादाह्वयतां प्रपद्यते ॥

४२. यथायथं भूतसमूहमेलनाद्
देहेषु देही सुविकासमञ्चति ।
देहावसाने तु पुनर्विनश्यति
श्रुतेति चार्वाककथा पुरातनी ॥

४३. स्कन्धाश्च ये पञ्च लसन्ति विश्रुताः
समष्टिरेषां किल चात्मरूपताम् ।
बिभर्ति चेत्थं कलयन्ति ये बुधा
बौद्धास्तु देहात्मभुवि प्रतिष्ठिताः ।

४४. जैनाश्च ये पुद्गलवादिनो विद-
स्तरीय आत्मा गलनाच्च पूरणात् ।
समं शरीरैर्ह्रसति प्रवर्धते
देहात्मकक्षामिह तेऽपि बिभ्रति ॥

४५. स्नेहाश्रिता दीपशिखा यथा भुवि
स्नेहं विना निर्वृतिमभ्युपैति सा ।
अनादिसंस्कार - समूह - नाशत-
स्तथाऽऽत्मसत्तेति मतं हि सौगतम् ॥

४६. विमुक्त आत्मा कुहचित्स्थले भृशं
विश्रान्तिमाप्नोति न जायते पुनः ।
न तत्र चेशस्य दया ह्यपेक्ष्यते
मतं त्विदं पुद्गलतत्त्ववादिनाम् ॥

४७. विपश्चितां बौद्धमतावलम्बिनां
जिनाश्रितानां विदुषां च भारते ।
अनेकभेदा विलसन्ति तात्त्विका-
स्तेषां कथा व्यर्थमिह प्रतीयते ॥

४८. एवंविधा दर्शनपद्धतिः क्षिता-
वुदेष्यमाणा ह्युदिता च याऽधुना ।
निरीश्वरा नैव समादृताऽऽस्तिकैः
सत्ता तदीयाऽपि च वेदसम्मता ॥

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

४९. विरोचनः स्वर्गपतिश्च वृत्रहा
चतुर्मुखस्यान्तिकमभ्युपेत्य तौ ।
तदात्मतत्त्वं ह्युपदिश्यतां प्रभो
सप्रश्रयं वाचमिमां तमूचतुः ॥

५०. उवाच वेधाः 'शृणुतं मुखाकृतिः
प्रतिष्ठिता या परिशुद्धदर्पणे ।
तदात्मतत्त्वं हृदि चिन्तयेत्सुधीः'
वचस्तदाकर्ण्य विरोचनो गतः ॥

५१. परन्तु नैतेन तुतोष वृत्रहा
पुनः पुनः सत्परिपृच्छया चिरम् ।
तदात्मतत्त्वं ह्यनुशीलयन्नसौ
समध्यगच्छत् किल तत्त्वतोऽखिलम् ॥

५२. इमां कथां चोपनिषत्प्रकीर्तितां
विदन्ति सर्वेऽपि विवेकिनो बुधाः ।
तदाश्रयावास्तिक-नास्तिकाभिधौ
प्रशस्तवादौ भुवने ससर्पतुः ॥

५३. देहातिरिक्तात्म - विवेकिदर्शनं
प्रचारितं यद् यदिहोपलभ्यते ।
समस्तमेतच्छ्रुतिसम्मतं भव-
त्यसंशयं षष्ठकवर्गमाश्रितम् ॥

५४. शक्तिर्भवेत् काचिदगम्यरूपिणी
जगत्समग्रं परिचाल्यते यया ।
अशेषविज्ञानविदां मतं त्विदं
ज्ञेयं बुधैः सप्तमकक्षगं ध्रुवम् ॥

५५. वैज्ञानिका ये जडतत्त्ववादिन-
स्तच्छक्तिरूपं नहि तत्त्वतो विदुः ।
प्रत्यक्षभिन्ना - मनुमानगोचरां
तदेकशक्तेः कलयन्ति कल्पनाम् ॥

५६. इमास्तु बोधप्रदसप्तभूमयः
क्रमस्तुतास्ताः श्रुतिसम्मता मताः ।
परन्त्वविद्या परिचालिता अतः
समादृता नैव महर्षिपुङ्गवैः ॥

५७. अमूर्तसप्ताऽपि परात्मदर्शनं
स्वसेविनः कारयितुं नरानलम् ।
अतः परब्रह्मविचिन्तकैर्बुधै-
रुपेक्षिता नैव तिरस्कृता अपि ॥

५८. अनार्यविद्वद्गणनोदिताऽत्र या
निवेदिता दर्शनपद्धतिस्तु सा ।
मुने त्वया ध्याननिरुद्धचेतसा
निशम्यतां दर्शनरीतिरद्भुता ॥

५९. यतोऽखिलं दार्शनिकं विदां मतं
समाप्तिमाप्नोति जगत्प्रवर्तितम् ।
ततः समुद्यन्ति हि सप्त संख्यका
महर्षि - सञ्चालित - दर्शनक्रमाः ॥

६०. स गौतमोऽसौ कणभुक् पतञ्जलिः
सांख्यो भरद्वाजमुनिश्च जैमिनिः ।
अथाङ्गिरा व्यासमुनिश्च सन्त्यमी
प्रवर्तका दार्शनिकार्षपद्धतेः ॥

(क्रमशः)

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

सम्पादकीयम्

तुरीयं महानिर्वाचनम्, शासनसंस्था च

भारत-राष्ट्रस्य कृते फरवरीमासः समग्र एव महान् क्रान्तिकरो वक्तुं शक्यते। अस्मिन्नेव मासि भारतीयं चतुर्थं महानिर्वाचनं सम्पन्नम्। मासस्य अर्धभागो महानिर्वाचन-पूर्वायोजनेष्वेव समतीतः। शिष्टेऽर्धभागे अर्धाधिकोंऽशो मतदान-तत्परिणाम-विमर्शनेन समतिक्रान्तः। मासस्य चान्तिमः शिष्टोंऽशो नवशासनसङ्घटन-पूर्वपीठिकाप्रयत्नेषु नियोजितो ऽभवत्। भारतीयत्वेन अस्माकमपि कृते विषयस्यास्य समीक्षणं निरुपेक्ष्यं कर्तव्यं भवति। तदेव समासतोऽत्र प्रस्तूयते।

निर्वाचन-पूर्वायोजनविषये विचार्यमाणे स्पष्टं प्रतीयते यत् महानिर्वाचनत्रयानन्तरमपि भारतीयानामस्माकं कृते विषयेऽत्र अद्यापि बहु शिक्षणीयं वर्तते। विभिन्नदलीयैः स्वीया नैके प्रत्याशिनो निर्वाचनाय समुपस्थापिताः, तेषां विजयाय च तैः सर्वे वैधा अवैधा वा उपाया अनुगृहीताः। निर्दलीयाः प्रत्याशिनः पुनः कस्यापि दलविशेषस्य अनुशासनात् नितान्तं मुक्ताः। अतस्तेषां यथेच्छं विजयोपायसंयोजने किमु वक्तव्यं नाम?

यावानत्र शासकदलीय-प्रत्याशिनां विषयः, स्व-स्वदलप्रचाराय विपुलं धनं शासकीयः प्रभावश्च नियोजितोऽभवत्। कुत्र कुत्रचन सर्वोच्चसत्ताकेन्द्र-भूताः मतदातारो भय-लोभ-समुत्पीडनादिभिरपि स्ववशीकृताः। शासनबाह्यैर्दलैरपि यथाशक्ति एवमेव प्रयतितम्। एकत्र प्रधानमन्त्रिणामुपरि प्रस्तर-प्रहारोऽभवत्, अपरत्र च समाजवादि-मधुलिमये महोदयानां प्राणसङ्कटप्रायं व्यसनं समुपस्थितम्। संविधानेन धनव्ययादि-मर्यादाविषयका यावन्तो निर्देशा दत्ताः, प्रत्याशिदलैस्तदनुयायिभिश्च तेषु विंशतिप्रतिशत-स्यापि पालनं कृतं न वेति को नाम निश्चेतुं शक्नुयात्?

नैतदेव, दैनिकजीवनोपयोगि-वस्तुजातदौर्लभ्येन सर्वक्षेत्रीयाऽरक्षामहामारीसमाक्रमणेन च साधारणं जनमतमपि अवसरेऽस्मिन् शासकदलतो बहुलं प्रतीपमिव समजायत। अत एव यदा तदीयाः प्रत्याशिनो विविधप्रभावसमन्विता भूत्वा तेषां पुरतो मतयाचनाय समायान्ति स्म, तदा समुत्पीडितानां जनानां स्वाभाविकः क्षोभोऽपि सभाभङ्ग - सभानिषेध - हिंसकोत्पातादिभिर्नैकविधै रूपैः परिस्फुटितो दृष्टोऽस्माभिः। शासकीय-दलस्य पुनः अन्तःकलहाः पक्षपाताः एकैकस्य उन्नयनमधोनयनञ्चेत्यादयो दोषाः रोगस्यास्य परिवर्धने कुपथ्यमिव समजायन्त। शासनबाह्यैर्विरोधिदलैरपि शासकदलगतस्य दौर्बल्यस्यास्य स्वीय-दलीयहितसाधनाय समुपयोगः कृतः। यद्यपि तेष्वपि बहुदलता, परस्परमनैक्यं विरोधश्च विपुलो दृष्टिगोचरो बभूव तटस्थानाम्।

इत्थं परस्परं स्वार्थमात्रसाधनाय संलग्नदलानाम् अमर्यादित-स्वपक्षजयसाधक-संरम्भेण तपस्वी मतदाता किं विचारयेत्, किं वा निर्धारयेत्? भारतीया सर्वसाधारणी जनता अद्यापि बहुलमशिक्षितैव, लोकतन्त्रं पुनः साकल्येन शिक्षितेष्वेव सर्वांशतः परिस्फुरति। अतो महानिर्वाचनात्पूर्वं जनशिक्षणस्य कीदृगनिवार्यत्वमिति पृथक् वक्तुं नावशिष्यते। विषयेऽत्र केनापि दलेन निर्वाचनात्पूर्वं मनागपि न

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

प्रयतितमित्यहो तेषां निर्वाचन-प्रेम ! यद्यपि सर्वोदयविचारकैः नेतृभिः कार्यकर्तृभिश्च विषयोऽयं किञ्चन समवहितः । नागरिकपरिषदादि-सङ्घटन-मुखेन मतदातॄणां शिक्षणस्य केचन विधयः समुपस्थापिताः, परं समुचितप्रचारसाधनानामनुपलम्भात्, मिथ्या स्वार्थहानिभयाद् बहुसंख्यक-दलानुयायिभिरननुग्रहाच्च ते प्रायो विचारसम्पदमेव समलङ्कृत्य कृतकृत्यतां गताः । तेषामिदं मतं को नाम तटस्थो विचारको नानुमन्येत यत् तत्तद्दलीयाः पृथक् पृथक् निर्वाचनप्रचारसभा निरुद्ध्य सर्वेषां दलानामेक एव सभामञ्चस्तत्र तत्र नगरेषु ग्रामेषु निर्मातव्यः, यत्र समुपस्थाय प्रातिस्विकरूपेण तत्तद्दलीयैः स्व-स्वमन्तव्यानि समुपस्थाप्यानि, ततश्च जनैस्तानि सर्वाणि विचार्य स्वमतं निर्धारणीयमिति ।

एवंस्थितौ यावती मतदातॄणां मतिः, यादृशी राष्ट्रस्य स्थितिः, यादृशा दलानां विचाराः प्रभावादयश्च, तान् सर्वमनुलक्ष्यैव भारतीयैर्जनैः प्रत्याशि-निर्वाचने स्वीयानि मतानि प्रयुक्तानि । अतस्तैर्विशुद्धस्य लोकमतस्य इदमित्थं-विशिष्टाकारो निर्णय इति कथमपि वक्तुं न शक्यते । तथापि वस्तुद्वयमनेन सुनिश्चितं दर्शितम् । एकम्, भारतीय जनता लोकतान्त्रिकपद्धत्यैव अहिंसकमार्गमनुसृत्य क्रान्तिं वाञ्छति इति । अपरम्, भारतीयजनता शासकदलस्य शासननीत्या सर्वथा असन्तुष्टेति तां नीतिं परिवर्तयितुमतितरां समुत्सुका, तथैव दलविशेषशासनस्य निष्ठां शिथिलीकृत्य सा राष्ट्रियं सर्वदलीयम् अर्थात् निर्दलीय शासनं कामयते इति ।

मतदानप्रसङ्गेऽपि यथा एभिर्दलीयैः निर्दलोपपदधारिभिश्च भयलोभातङ्कादिभिः कपटजालैश्च तपस्विनो मतदातारः स्व-स्वनिर्धारित-विवेकानुप्राणित-पथेभ्यः प्रच्याविताः, विशेषतः शासनारूढदलीयैरत्र यावती कूटनीतिः परिचालिता, तत्सर्वमपि स्वस्थस्य विशुद्धस्य लोकतन्त्रस्य कृते न भूषणास्पदं वस्तु । एवं मतगणनाप्रसङ्गेऽपि सर्वं चैतत् कूटजालं न विस्तीर्णमिति को नाम सशपथं वक्तुं पारयेत् ? तथापीदं निष्पक्षं वक्तव्यं भवति यत् जाग्रज्जनमतस्य भयेन पूर्वत एव सुनियोजिताऽवधानतादिभिश्च मतगणनाप्रसङ्गे तावती अनैतिकता पदं न प्राप यावती विगतमहानिर्वाचनीय-मतगणना-परिणामेऽभवत् । इत्थम् अपेक्षाकृतं बहुलं लोकमतस्य निदर्शनमभवत् ।

मतदान-परिणामैः स्फुटीकृतं यत्केन्द्रे बहुसंख्यक-दलरूपेण कांग्रेस-दलमेव चतुर्थवारमपि निर्वाचितम्, यद्यपि समग्र भारतीयसंसदि तद्दलीयं बलम् अत्यल्पमात्रमस्ति । शिष्टा निर्दलाः विभिन्नदलीयाश्च विशकलिताः संयुज्य संयुक्तदलं सङ्घट्टयेयुस्तदा सुपुष्टविरोधिपक्षो भवेत्, यश्च लोकतन्त्रशासनस्य सुदृढः प्रग्रहो निगद्यते । विभिन्नेषु प्रायः सप्ताधिकेषु राज्येषु कांग्रेसदलातिरिक्तानामेव बाहुल्यं निर्वाचन-परिणामेन संवृत्तम् । अतः स्पष्टमेव केन्द्रे, सप्ताधिकानि राज्यानि व्यवकलय्य शिष्टेषु राज्येषु च कांग्रेसशासनं सुनिश्चितम् । कांग्रेसाल्पमतराज्येषु च कांग्रेसेतरशासनम् । निष्कृष्य परिणामोऽयं लोकतन्त्रस्य अपेक्षाकृतं स्पष्टं निदर्शनं वक्तुं शक्यम्, यद्यपि एतद् वर्तमानशासन-विद्रोहप्रेरितं विरोधपक्षीयाणां सङ्घटनमद्यापि तथा सुदृढं वक्तुमशक्यम् ।

एवमेव यद्यपि केन्द्रे अन्येषु च प्रदेशेषु कांग्रेस-दलस्य बहुमतं संवृत्तम्, तथापि तत् कुत्रचित् नाममात्रम्, कुत्रचन च अल्पम्, सुपुष्टातिस्वल्पाल्प-मत-प्रभावितम्, निर्दलोपपदधारिणां सङ्क्रमनरूप-परपोषितमपि इति न विस्मर्तुं शक्यम् । विंशतिवर्षैः

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

एकच्छत्रं समग्रं भारतं शासितवतो दलविशेषस्य एकच्छत्रताया एतादृशो विच्छेदविपाकः, पुनरपि तं मूलतोऽत्र स्वकर्तव्यविषये विचारयितुं बलात् नोदयति। कामं दलमिदं स्वीयबहुमतेन स्वदलीयं शासनं केन्द्रेषु राज्येषु च तत्र तत्र स्थापयेत् निर्दलादीनां साहाय्येन, परं तद् उच्चपदतोऽधोऽवतरणमेव। विकासस्य पदे ह्रासस्य प्रतिष्ठापनमेव।

नानेन निरूपणेन कांग्रेस-दलस्य निन्दनमस्माकमुद्दिष्टम्। या किल वस्तुस्थितिः सैवात्र समुट्टङ्किता। तथापि ततोऽपेक्षाद्वयं सुनिश्चितमामनन्ति विपश्चितो राजनयिकाः। प्रथमा अपेक्षा किल दलेनानेन स्वीयं प्रौढत्वमालक्ष्य बहुतरपराजयसन्दर्भे तथा यथान्यायं जनानुगं वर्तनं वर्तनीयम्, येन अचिरादेव पुनस्तत्पूर्ववत् सुपुष्टतरं यथार्थतो जनप्रति-निधि च भवेत्। इदानीं पूर्ववत् दृढकूटनीतिप्रभृतीनामुन्मुक्तप्रयोगैः सत्वरं विरतिस्तस्य पथ्याय कल्पेत।

द्वितीयाऽपेक्षा किल निर्दलीय-राष्ट्रिय-केन्द्रीयशासनसङ्घट्टनं नाम। राष्ट्रपति - लोकसभाध्यक्षसेनाध्यक्षादीनां कतिपयानां पदानां राष्ट्रीकरणं दलनिरपेक्षत्वञ्च संप्रत्यपि तेन क्रियते। तामेव व्याप्तिं विस्तीर्य यदि नाम केन्द्रीयशासने सर्वावयवावच्छेदेन सङ्क्रमय्य च तथादर्शमयं राष्ट्रियं दलातीतं केन्द्रशासनं संस्थाप्येत, तदा मन्ये साम्प्रतिक्यो नैकाः समस्याः स्वयमेव समाहिता भवेयुः। राष्ट्रपित्रा महात्मगान्धिना तु स्वातन्त्र्यलाभसमकालमेव आदिष्टं यत् कांग्रेससंस्थाया इतिकर्तव्यमद्य परिपूरितम्, इतः परं तां विघटय्य 'लोकसेवक-सङ्घ'रूपेण परिणमनं राष्ट्रस्य स्वयं संस्थायाश्च हिताय कल्पेत' इति। राष्ट्रपितुरिदं मतं मन्ये, तात्कालिकैः कांग्रेसानुगै राजनयिकैर्लोकातीतं मत्वा समुपेक्षितं स्यात्। तेषां भारतराष्ट्ररक्षणस्य ऐकान्तिकी निष्ठैव (?) विषयेऽत्र परप्रेरिकाऽभवदित्यपि क्षणमात्रं स्वीक्रियतां नाम। तदा तथाकरणे लोकस्थितेः विश्रृङ्खलताया आशङ्का आसीदित्यपि उच्यतां नाम तैः। परमिदानीं तु तद्विघटनविरतिरेव नवां नवां विश्रृङ्खलतां जनयतीति बहूनां दलनिरपेक्षाणां तटस्थानामपि दृढं मतम्।

अन्यच्च—वयं त्वत्र इममपि विकल्पं सूचयामो यद् राज्येषु काममन्यदलवत् कांग्रेसदलीयमपि शासनं भवेत्—यद्यपि तत्रापि संयुक्तविधायकदलशासनमेव ज्यायः—केन्द्रे पुनः सर्वथा निर्दलीयं राष्ट्रियमेव शासनं हितकरम्। ये केचन तत्र दलीया निर्वाचिताः स्युस्तैस्तत्र गत्वा स्वीयं दलं सविधि परित्यज्य विशुद्धराष्ट्रियैर्भाव्यम्, ततः परमेव प्रधाननेतृ-प्रधानमन्त्रिप्रभृतीनां निर्वाचनं तेभ्यो भाव्यम्। राज्येषु पुनः सर्वेषां दलानां प्रवेशेन तत्तद्दलानां स्वरूपाण्यपि सुरक्षितानि स्युः। तत एव राजनीतेः प्रायोगिकेनानुभवेन सम्पन्ना एव लोकसभा-सदस्यता-प्रत्याशिनो भाव्याः। तत्र च गत्वा तैर्दलीयं बन्धनमनुशासनञ्च त्यक्त्वा विशुद्धराष्ट्रियैर्भाव्यमिति। कालान्तरेण स्थितिरियं राज्य-केन्द्रसहिते समग्रे भारते निर्दलीयविशुद्ध-राष्ट्रियशासनरूपेण परिणेतुं शक्नुयादित्यस्माकं दृढा मतिः।

अन्ततो राजतन्त्रीय-दोषाणां शमनाय प्रचलितानां दोषपूर्णानां धर्मतन्त्र-(पोपवादी)-धनिकतन्त्र-साम्यवादाऽधिनायकवादानां विकल्परूपेण राजमार्गकल्पो लोकतन्त्रमार्गोऽनुसृतो जागरूके कल्याण-शान्ती समीहमानैः राजनयिकैः। सोऽपि दैशिकस्थितिभेदात् पृथक्-पृथगाकारतां गतः पाश्चात्त्येषु तत्र तत्र देशेषु। भारतस्य पुनरन्या स्थितिः। अत्र तादृशः स्वस्थतमो विकल्पो धर्मनियन्त्रित-राजतन्त्राख्यो 'रामराज्या'-परपर्यायैः सहस्राधिकैः वर्षैः समनुभूतपूर्वः। तस्मिन् विराजति प्रकाशात् तमस इव त्रिविधतापा विलयं

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

गता इत्यपि पुरावृत्तवेदिनां न तिरोहितम्। सर्ववादीय-सद्गुणानामनुग्रहो दुर्गुणानां त्यागश्च तत्र करामलकायितश्च। तथापि दौर्भाग्यात् 'परिचितजनद्वेषी लोको नवं नवमीहते' इतिन्यायेन साम्प्रतिका नव्यशिक्षादीक्षिता लोकतन्त्रमेव स्पृहयन्ति। प्रयोगप्रेमिणामस्मिन् समुत्सुकतामये संरम्भे न वयं प्रतीपभूताः। तथापि इदं सुस्पष्टं वक्तव्यं यद् दैशिकस्थितिभेदात् पाश्चात्त्यदेशेष्वपि भिन्नरूपतां गतमिदं लोकतन्त्रं भारतदेशगत-परिस्थित्यनुरूपमेवास्माभिः अनुग्राह्यम्। केवलं बिम्बप्रतिबिम्बभावात्मकः संवादो न सहृदयैः कदापि समादृतः। न च तस्मात् काचिदपूर्वा अभिव्यञ्जना स्फुरति।

एवंस्थितौ भारतीय-लोकतन्त्रस्रोतः कामं बहुमतसम्भूतं स्यात्, तत्प्रवाहो विस्तारश्च परकालिकः सर्वानुमति-खातानुसारी एव भाव्यः। दलीयैर्निर्वाचितैः सदस्यैर्निर्वाचनोत्तरं दलानुशासनधुरं परमेण समादरेण भूमौ निक्षिप्य राष्ट्रियधूरेव वोढव्या। तदैव भारतराष्ट्रस्य ऐकान्तात्यन्तिकहितस्य नान्दी भवेत्। ततः परं भारतीय-देशकालसभ्यता-संस्कृत्यनुरूपं शासनतन्त्रं परिचालनीयम्। आदर्शस्तु 'विश्वमानुप'स्य, विश्वनागरिकताया एव मनसा परिकल्पनीयः, न ततो लेशतोऽपि सङ्कुचितो भावोऽस्मभ्यं रोचेत, भावाद्वैतस्य भगवता आद्यशङ्कराचार्येण पूर्वत एव समादेशनात्। तथापि कार्यक्षेत्रे क्षेत्रीयां व्याप्तिमेव समाश्रित्य पूर्वं तत्सङ्गोपनं विधाय विश्वसङ्गोपनस्पृहाः परिणेयाः। वस्तुतः इदमकृत्वा विश्वहित-विश्वसङ्गोपनस्पृहा तद्यत्नो वा सोपानपरम्परामतिक्रम्य उत्प्लुत्य अट्टालिकागमनायितमिव भवेत्।

यदि निर्वाचितैर्भारतीय - राजनयिकैरस्माभिः संसूचिते साङ्केतिकेऽस्मिन् विचारे मतिं समाकृष्याऽवधीयेत, तदनुसारं विशुद्धजनसेवाभावनया परमया शुद्धया प्रणाल्या भारतीयं शासनमेतादृशे परिष्कृते भारतीयतारञ्जिते लोकतान्त्रिके पथि नीयेत तदा भारतस्य कृते तु सर्वथा हितावहमेव, अखिलस्य विश्वस्य कृतेऽपि शुभङ्करमादर्शायितं च जायेत। किमपि तन्त्रं कियदपि समुचितं स्यान्नाम, यदि तत् तत्तद्देशीय-परिस्थितिपरिष्कृतं न भवेत्तदा तत् तद्देशस्य कृते कथमपि सर्वतो हितावहं न भवेत्। काममद्य भारतीयराजनयिका विशेषतो दलीया निर्वाचिताः सदस्या यथापूर्वस्थित्यैव केन्द्रीयं प्रादेशिकानि वा राज्यानि सङ्घट्टयेयुः, परमन्ततस्तेषां कृते निरूपितेयं प्रणाल्येव समनुग्राह्या भवेत्। भारतीयजनतया लोकतन्त्रीय - सत्ताकेन्द्रभूतया भारतीय - जनतन्त्रस्य कृते नवमार्गानुसरणस्य स्पष्टः सङ्केतोऽनेन तुरीयेन महानिर्वाचनेन प्रदत्तः। कामं सङ्केतदानेऽस्मिन् भारतीयजनता सर्वथा विविक्तलक्ष्यनिर्धारणे पारिता न स्यात्, बहुलतया लोकतन्त्रेऽपि दलीयसाम्राज्यतन्त्रस्य तत्रापि व्यक्तिविशेषतन्त्रस्य बलवत्समाक्रमणेन प्रतिक्रियावती स्यात्, तथापि स्पष्टमिदं यत्सा भारतीयपरम्परानुसारं वैधानिकमार्गेणैव राजकीयां क्रान्तिं समभिवाञ्छति, सा च तावत्पर्यन्तं प्रचलिष्यति यावदत्र दलातीतं निष्पक्षं राष्ट्रियं रामराज्यं न प्रतितिष्ठेत। इयन्तु तस्या मङ्गलमयी नान्दी एव या च महतीमाशामस्माकं चेतसि समुद्भावयति। भगवन्तं प्रार्थयामो यत्स भारतस्य स्वातन्त्र्यरक्षणेन सहात्र सुपुष्टं सर्वमङ्गलं शासनं प्रतिष्ठापयेदिति।

—:॰:—

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

भक्ति-रसार्णवः—साङ्गं भक्तिरस-विवेचनम्

— श्री पूज्य करपात्रस्वामिनः —

['सूर्योदय'स्य ३९–४० तम वर्षीयेषु ९,१०,११; १–३ अङ्केषु पूज्यपादानाम् अनन्तश्रीविभूषितानां श्री करपात्रस्वामिमहाभागानां 'रसस्वरूपविमर्श' - शीर्षकेण कियान् निबन्धांशः क्रमशः प्रकाशितोऽस्माभिः। तदनन्तरमग्रिमपाण्डुलिपेरलाभेन तत्प्रकाशनं तत्रैव मध्येनिबन्धं मुद्रितम्। पूर्वतनीयः सः परिष्कृतो निबन्धो दौर्भाग्यात् कुत्रचन गतः, केवलं तस्य विशकलितानि टिप्पणान्येवासन्। तानादाय पूज्यपादैः पुनरपि नूतनरूपेण निबन्धोऽयं महता श्रमेण संग्रथितः, सूर्योदये प्रकाशनाय परमया कृपया प्रदत्तश्च। स्वामिपादानामयं न निबन्धः, त्रिशतपृष्ठात्मको विशिष्टो ग्रन्थ एव। तथापि यथास्थानं क्रमशोऽस्माभिः अधिकाधिकमत्र प्रकाश्यते।

महानिबन्धस्यास्य मुख्यमुद्दिष्टं भक्ति-रसस्वरूपविमर्शः भक्तिरस-निरूपणे सर्वेषां प्रस्थानानां विवेचनं राधासहितगोपीनां श्रीकृष्णस्य च प्रेम समाश्रित्य विभिन्नभक्तकवीनां भक्तिप्रवणसूक्ति-कल्पनादीनां विलासा निरूपिताः। विषयस्यास्य उपष्टम्भकरूपेण आदौ प्रकरणषट्कं संग्रथितमास्ते। तच्च यथा—

१. भजनीयतत्त्वम्, २. भजनीयस्य शास्त्रैकसमधिगम्यत्वम्, ३. तत्त्वे मतान्तराणि सिद्धान्ताश्च, ४. कृष्णस्य सर्वदैव प्राधान्यम् 'आपाला'सूक्तस्य तात्पर्यञ्च, ५. राधाकृष्णयोर्वेदादिशास्त्रप्रतिपाद्यत्वम्, ६. वृषाकपि-सूक्तेन विष्णुमाहात्म्यातिशयस्य नेन्द्रापेक्षया परवर्तित्वम् इति। एतत्प्रकरणषट्कं 'फुलिस्केप'-आकारकेषु (६०) षष्ठिपृष्ठेषु लिखितम्। सप्तमं मुख्यं प्रकरणं (रसस्वरूपविमर्शो भक्तिरसश्च) २२० पृष्ठैः ग्रथितम्। परिशिष्टञ्च 'एक्सर साइज बुक' आकारकेषु २० पृष्ठेषु ग्रथितं यत्र भक्तिपथप्रदर्शनाय 'भक्तिरसायन'-ग्रन्थस्य औचित्यम् अद्वैतदार्शनिकदृष्ट्या साधितम्।

स्वामिपादानामयं 'भक्तिरसार्णव'नामा महाप्रबन्धो भगवद्भक्तिभावितानां सचेतसां कृते सुदुर्लभं वस्तु, यत्र महात्मनोऽस्य सुदीर्घसाधनापरिपाकपूरितं हृदयं निक्षिप्तमिवाऽऽस्ते। आशास्यते च सूर्योदयवाचकाः सूर्योदयस्य सत्वरं ग्राहकत्वं स्वीकृत्य प्रबन्धमेनमादित एव संग्रहिष्यन्ति। मध्येनिबन्धमस्य याचना कदाचित् पूरयितुं न शक्नुयादिति।—सम्पादकः]

नमोऽस्तु रामाय सलक्ष्मणाय देव्यै च तस्यै जनकात्मजायै।
नमोऽस्तु रुद्रेन्द्रयमानिलेभ्यो नमोऽस्तु चन्द्रार्कमरुद्गणेभ्यः॥

१. भजनीयतत्त्वम्

श्रीमतोऽचिन्त्यानन्तकल्याणगुणगणाकरस्य भूम्नोऽघटितघटनापटीयस्या सत्त्वासत्त्वाभ्यां निर्वक्तुमनर्हया सकलाश्चर्यैकभूम्या अनन्तशक्तिमूलभूतया मायया प्रवहमाणे प्रपञ्चे प्रेक्षावद्भिः सूक्ष्मेक्षिकया पर्यालोच्यमाने क्रमेण आत्मैव सर्वोत्कृष्टतत्त्वमाभाति। तस्य कैश्चन अणुत्वम्, कैश्चिन् मध्यमत्वम्, कैश्चिच्च विभुत्वमुपेयते। विभुत्वेऽपि कैश्चिद् अचित्त्वम्, चित्परिणामित्वम्, चिदचित्त्वम्, अपरैश्च चिद्रूपत्वम्, असङ्गत्वञ्चाभ्युपेयते। तत्राप्यन्यैः कस्यचिदात्मविशेषस्य क्लेशकर्मविपाकाशयैरपरामृष्टस्य नित्यशुद्धबुद्ध-

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

मुक्तस्वभावत्वं सर्वज्ञत्वं सर्वशक्तिमत्त्वञ्चोपेयते। यद्यप्यत्रैव सद्वितीयत्वं चिदचिद्विशिष्टत्वं चिदचिद्भिन्नाभिन्नत्वं तत्रापि स्वाभाविकौपाधिकाचिन्त्यभेदाभेदपक्षाः शुद्धाद्वैताद्वैतपक्षाश्च भवन्ति, तथापि भक्तिरसायनकारास्तु अद्वैतसिद्धान्तानुसारिणः। परमार्थतया स एव भोक्तृ आत्माऽपीत्यौपनिषदनयः। वस्तुभूतं तत्त्वं तदेवेति श्रीमद्भागवतेऽपि—

वदन्ति तत्तत्त्वविदस्तत्त्वं यज्ज्ञानमद्वयम्।
ब्रह्मेति परमात्मेति भगवानिति शब्द्यते॥ इति।

अद्वयं यज्ज्ञानं सर्वविधभेदशून्यं यत्स्वप्रकाशं ज्ञानं तदेव तत्त्वमिति तत्त्वविदो वदन्ति। तदेव अद्वितीयत्वात् त्रिविधपरिच्छेदशून्यत्वेन अनन्तं ज्ञानत्वादवेद्यत्वे सत्यपरोक्षत्वात् स्वप्रकाशमद्वितीयत्वादेव सर्वोपद्रवविवर्जितत्वात् परमानन्दरूपं त्रिकालाबाध्यत्वात् परमसत्यञ्च। तदेवानतिशयबृहत्त्वाद् ब्रह्मात्मनामपि आत्मत्वात् परमात्माऽचिन्त्यानन्तभगैः कल्याणगुणगणैश्च सेव्यमानत्वात् भगवानित्यप्युच्यते।

यत्तु—कैश्चिद् ब्रह्मतायां ज्योतीरूपतया एतस्य अमूर्तता, भगवत्तायाञ्च ज्योतिष्मत्त्वेन मूर्तता, प्राकृतगुणगणराहित्येन निर्विशेषता, अप्राकृतानन्तकल्याणगुणगणाकरतया सविशेषता प्रोच्यते। तन्न; तत्त्वं यज्ज्ञानमद्वयमिति तत्त्वलक्षणस्यैकविधत्वेन तदनुपपत्तेः। एतेन किरणादित्यवद् ब्रह्मभगवतोर्भेदः, कृष्णादित्यस्य किरणरूपं ब्रह्मेत्याद्युक्तयोऽपि भावमात्रमूलिका न तत्त्वानुसारिण्यः, तथात्वे अनौपनिषदत्वापत्तेः। श्रीमद्भागवते च—

यन्मित्रं परमानन्दं पूर्णं ब्रह्म सनातनम्।

इति कृष्णस्य पूर्णब्रह्मत्वोक्तिः, 'अथातो ब्रह्मजिज्ञासे'ति चतुर्लक्षण्याम् उत्तरमीमांसायामपि ब्रह्मण एव विचार्यत्वोक्तिरिति तस्यैवौपनिषदत्वमपि स्पष्टमेव।

अपि च—ज्योतिर्ज्योतिष्मतोर्भेदे स्वगतभेदप्रसक्त्या अद्वयमित्यस्य अनौपचारिकत्वानुपपत्तिः। तयोर्भेदाभावे धर्मधर्मिभावश्च निर्मूलः। विरुद्धत्वान्न स्वाभाविको भेदाभेदवादः सम्भवद्युक्तिकः, औपधिकश्च अतात्त्विक एवेति तन्मूलकवादोऽपि तथाविध एव। अचिन्त्योऽपि मनोवचनातीतत्वादनन्तत्वाद्वा अनिर्वचनीयत्वाद्वा नाद्यौ। तथाऽनुपगमादेव नान्त्यः; तथात्वे सिद्धान्तहानिः।

'एकमेवाद्वितीयमि'ति त्रिविधभेदनिषेधिका श्रुतिस्तु स्वगतभेदमपि निषेधत्येव। 'सदेव सोम्येदमग्र आसीदि'ति श्रुतौ इदमर्थस्य सदात्मकत्वावधारणेऽपि एकमेवाद्वितीयमिति विशेषत्रयोपादानं त्रिविधभेदवारणायैव, अन्यथा तदानर्थक्यापत्तिः। एवमेव 'नेह नानास्ति किञ्चन', 'नात्र काचन भिदाऽस्ति' इति श्रुत्योः किञ्चनकाचनशब्दाभ्यां नानाभिदादि-पदव्यवहृतस्य भेदस्य सर्वविधस्यैव निषेधः। 'नात्र कश्चन घट' इत्युक्तौ घटत्वावच्छिन्नप्रतियोगिताकस्यैव निषेधास्यावगमदर्शनात्।

अपि च—ज्योतिष्मदादित्यस्थानीयाद् भगवतः सकाशाज्ज्योतिस्थानीयस्य ब्रह्मणो न्यूनत्वे ब्रह्मत्वमेव नोपपद्यते। सङ्कोचे मानाभावेन 'सत्यं ज्ञानमनन्तं ब्रह्म'ति श्रुतौ अनन्तपदसमभिव्याहारेण च निरतिशयबृहतोऽर्थस्यैव ब्रह्मशब्दार्थत्वात्। ततो यत्रातिशयकल्पना परम्परायां वाचस्पतेरपि मतिः श्राम्येत तस्याः समाप्तावेव अनतिशयबृहत्त्वोपपत्त्या यस्यैव भगवतः कृष्णस्य वाऽनतिशयबृहत्त्वमुच्यते तस्यैव ब्रह्मत्वोपपत्तिः।

इयांस्तु विशेषः—आदित्यस्थानीयस्य ज्योतिष्मतः किरणानां ज्योतिषां प्रदेशेषु भवन्मतेऽविद्यमानत्वेन देशपरिच्छेदः, अस्मन्मते तु भगवतः कृष्णस्य वा सर्वविधपरिच्छेदराहित्येन अनतिशयबृहत्त्वोपपत्त्या तत्रैव

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

अनुपचारेण अद्वयत्वानन्तत्वब्रह्मत्वाद्युपपत्तिः। एवमेवाप्राकृतगुणसत्त्वेऽपि प्राकृतगुणराहित्याभिप्रायेण निर्गुणत्वाभिधाने निष्क्रियत्वाव्रणत्वादिशब्दानामपि तथार्थत्वापत्तिः। न च तत्र सगुणत्वादिश्रवणं विशिष्यते, सक्रियत्वादिश्रवणस्यापि सत्त्वे तदनुपपत्तेः। तथा च अनिर्वाच्याचिन्त्य-दिव्यलीलाशक्त्याऽप्राकृत-दिव्यगुणगणाद्यङ्गीकारेणैव निर्गुणस्यापि सगुणत्वाद्युपपत्तिः।

निर्गुणं मां गुणाः सर्वे भजन्ति निरपेक्षकम्।

इत्याद्युक्तेः। न च सधनस्य धननिरपेक्षत्वेऽपि निर्धनस्य निरपेक्षानुपपत्तिवत् सगुणस्य गुणनिरपेक्षत्वेऽपि निर्गुणस्य गुणानपेक्षतानुपपत्तिरिति वाच्यम्; तत्र गुणकृत्याभावेन तदुपपत्तेः। निर्धनस्यानाप्तकामस्य भवत्यपेक्षा, पूर्णकामस्य भगवतस्तु गुणाद्यनपेक्षता युज्यत एव। तथा हि—ब्रह्मणि परमात्मनि भगवति महत्त्वातिशयाधायकत्वेन आनन्दातिशयाधायकत्वेन वा अनर्थनिबर्हकत्वेन वा गुणानां नोपयोगः। तस्य निरतिशयबृहत्त्वात् निरतिशयानन्तानन्दरूपत्वात् नित्यनिरस्तसमस्तानर्थसत्ताकत्वाच्च। नेतोऽन्यो गुणोपयोगः, अतस्तत्र गुणकृत्याभावेन निर्गुणोऽपि निरपेक्ष एव।

यत्तु—कैश्चिन्निराकारस्य प्रेमानास्पदत्वमुच्यते। तदप्यज्ञानविजृम्भितम्; परमाभिमत-सगुण-साकारप्राप्तिसुखस्यापि प्रेमास्पदत्वदर्शनात्। तं निर्गुणं निरपेक्षं गुणाः स्वगुणत्वाय भजन्ति। यथा कौस्तुभमणेरधिभूषणाय तत्तपस्तुष्ट इव तमङ्गीकरोति, न कण्ठभूषणाय। एवमेव गुणानां गुणत्वायैव तत्तपस्तुष्ट इव तानङ्गीकरोति, न स्वस्य सगुणत्वाय अनर्थनिबर्हणाय महत्त्वातिशयानन्दातिशयाधानाय वा। श्रीधरस्वाम्यादिभिरपि तत्त्वश्लोके ब्रह्मणि परमात्मनि भगवति न वैलक्षण्यमङ्गीकृतं निर्मूलत्वाच्छास्त्रयुक्तिविरुद्धत्वाच्च।

चयस्त्विषामित्यवधारितं पुरा
ततः शरीरीति विभाविताकृतिम्।
विभुर्विभक्तावयवं पुमानिति
क्रमादमुं नारद इत्यबोधि सः॥

इति न्यायस्य नात्रोपपत्तिः। सर्वान्तरतमे ब्रह्मणि भगवति परमात्मनि सन्निधानासन्निधानादिकृतस्य तारतम्यस्यानुपपत्तेः, एकत्रैवानतिशयबृहत्तमत्वेन आत्मनामप्यात्मत्वेन गुणगणसेव्यत्वेन च ब्रह्म-परमात्म-भगवत्त्वाद्युपपत्तेश्च।

सकलसच्छास्त्र-तात्पर्यगोचरस्य अशेषविशेषातीतस्य निर्गुणस्य निराकारस्य सच्चिदानन्दघनस्य अचिन्त्यशक्त्यानन्तकल्याणगुणगणाकरस्य अनन्तकोटिकन्दर्पसुन्दरस्य शक्रशतकोटिविलासस्य नभश्शतकोटिप्रविस्तारस्य वायुशतकोटिविपुलबलस्य रविशतकोटिप्रखरप्रकाशस्य शशिशतकोटिसुशीतलस्य कालशतकोटिदुस्तरस्य अमितकोटितीर्थपावनाभिधानस्य मेरुशतकोटिनिश्चलस्य सिन्धुशतकोटिगम्भीरस्य कामधेनुशतकोटिकामपूरकस्य शारदाशतकोटिचतुरस्य विधिशतकोटिसृष्टिनिपुणस्य विष्णुशतकोटिपालकस्य रुद्रशतकोटिसंहारकस्य धनदशतकोटिसमैश्वर्यस्य मायाकोटिशतदुर्घटघटनापटीयसः शेषशतकोटिधारकस्य भगवतोऽनुपमत्वमेव।

वस्तुतो यथा शतकोटिखद्योतैरपि नादित्यस्योपमेयत्वं तथैवानन्तकोट्यादित्यैरपि प्रकाशप्राखर्यादौ भगवतो नोपमेयत्वं सम्भवति। तत एवाशेषविशेषातीतस्य अनन्तगुणगणाकरस्य भगवतः संस्तवे मनोवचनातीतत्वादनन्तगुणत्वाच्च ब्रह्मादीनामप्यसामर्थ्यं श्रूयते। भक्तकल्पपादपस्य सर्वेऽपि गुणाः भक्तोपयोगिन एव। सर्वशास्त्रपरमतात्पर्यविषयस्य कर्मोपासनतत्त्वज्ञानादिसमाराध्यस्य भगवत एव मुक्तोपसृप्यत्वमपि तत्र तत्रोक्तमेव। 'मुमुक्षुर्वै शरणमहं प्रपद्ये', 'यमेवैष वृणुते', 'तमेव चाद्यं पुरुषं प्रपद्ये', 'आत्मक्रीड आत्मरतिः' इत्यादिश्रुतिस्मृतिभिः मुमुक्षूणां मुक्तानाञ्चाप्यस्यैव प्रपदनीयताबोधनात्। (क्रमशः)

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

सुप्त-प्रबुद्धम् : अभिनवं खण्ड-काव्यम्

—स्वर्गीयाः महामहोपाध्यायाः श्रीलक्ष्मणशास्त्रि तैलङ्गाः—

सरसान् भोज्यविशेषान् सार्धं तेनाथ संभुज्य ।
नानालापविनोदैराराधयति स्म तच्चेतः ॥५७॥
प्रचलति कथाप्रसङ्गे भूपतिना कुतुकिना पृष्टः ।
सर्वं स्वीयमुदन्तं विस्रब्धं श्रावयामास ॥५८॥
ऊचे च 'भद्र ! गेहं कृतकृत्यं मामकं वीक्ष्य ।
त्वादृशसज्जनसङ्गतमद्यात्यन्तं प्रसीदामि' ॥५९॥
तन्मधुराचारहृतस्वान्तोऽत्यन्तं प्रसन्नात्मा ।
हारीतभूपतीन्द्रः सस्मितमेवं समाचष्ट ॥६०॥
'अद्यैव नगरमेतत् संस्तुतजनहीनमायातः ।
आतिथ्येन सखेऽहं भवतोपकृतः कियन्नास्मि ? ॥६१॥
तद्ब्रूहि, किंनु वाञ्छसि ? किं कुर्यां तावकं कार्यम् ।
अधनोऽपि धनिवयस्यो भवदुपकारे समर्थोऽहम्' ॥६२॥
एवं हालिकवेषक्षोणीपतिवचनमाकर्ण्य ।
सविनयमानतमूर्धा प्रहास एवं जगादैनम् ॥६३॥
'औदार्यं भवदीयं नूनं लोकातिशायि सखे ।
स्वावस्थितिपरितुष्टो नान्यत् किञ्चित्तु वाञ्छामि ॥६४॥
एकैव मित्र ! चिन्ता सन्ततमस्मन्मनो दहति ।
हारीतनृपतिराज्येऽप्रतिकार्या मादृशैरबलैः ॥६५॥
एतस्मिन् किल नगरे कश्चन देवालयाधिकृतः ।
बलिभिश्चतुर्भिरन्यैः सह लोकान् सततमर्दयति ॥६६॥
ते किल परस्परं नः कलहानुत्पाद्य धर्षयन्तोऽथ ।
तर्जनताडनमुख्यैः कर्मभिरनिशं तुदन्त्यस्मान् ॥६७॥
दिनमेकमेव यदि मे वितरति धाता पुरस्यास्य ।
प्रभुतां नूनमहं तानधमजनान् दण्डयिष्यामि ॥६८॥
येनैते पुनरेवं विगतभया निःसहायजनतायाः ।
पीडनसाहसकार्याद्विरता अधमा भविष्यन्ति' ॥६९॥
'दण्ड्यान् दण्डयितुं ते वाञ्छां यदि भूपतिः शृणुयात् ।
एकाहं निजराज्यं त्वदधिकृतौ स्थापयेन्नूनम्' ॥७०॥
इत्येवं नरपतिना कौतुकिनोक्तः प्रहासः सः ।
'अलमेतेन सखे ! तव परिहासेने'ति तमवादीत् ॥७१॥
'नायं परिहासो मे' सैषा मे तात्त्विकी वाञ्छा ।
अभिलाषस्तव सोऽयं साफल्यं तूर्णमावहतु ॥७२॥
सम्प्रति निशीथकालः सम्प्राप्तोऽध्वश्रमेण श्रान्तोऽस्मि ।
अनुजानीहि सखे ! मां शयनाये'त्यब्रवीद् भूपः ॥७३॥
शयनोत्सुकमनसमिमं वीक्ष्यासौ साग्रहप्रणयम् ।
नवपानकं चषकगं तस्मै समुपाहरत् सरसम् ॥७४॥
स्वस्मै च पेयपूर्णं चषकं परिकल्प्य सानन्दम् ।
एतत्तत् परिपातुमन्वनयत्तं महीपालम् ॥७५॥
क्षणमीक्षमाण एनमन्यमनस्कं स भूपालः ।
चिक्षेप चूर्णमेकं तत्पेयेऽलक्षितं तेन ॥७६॥
अथ करधृतनिजचषकस्तमातिथेयं स्वकं पातुम् ।
सस्मितमसाववनिपोऽन्वरुणत्प्रणयेन गुणराशिः ॥७७॥
एवं तस्य प्रणयं सम्भावयता प्रहासेन ।
पेयं चूर्णविमिश्रं निखिलं निःशङ्कमापीतम् ॥७८॥
तस्मिन् हि पीतमात्रे पेये सोऽयं मुहूर्तेन ।
निद्रां प्रगाढरूपां कालापोह्यां समापेदे ॥७९॥
तादृगवस्थमथैनं पश्यन् विहसन्नसौ भूपः ।
सहसा तत्रोपगतं समुवाचासन्नपरिचारम् ॥८०॥
'एतं स्वस्कन्धगतं कुर्वन्ननुयाहि मम पदवीम् ।
मा विस्मर पुनरेतत् सदनं भूयस्त्वयाऽऽगम्यम्' ॥८१॥
एवं तेनानुसृतः प्रासादं निभृतलोकं स्वम् ।
प्रविवेश कौतुकभृतः पक्षद्वारेण भूपालः ॥८२॥

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

शयनालये स्वकीये मृदुलतमे हंसतूलशयनीये ।
संवेशयितुमथैतं समादिशद् भूमिपोऽनुचरान् ॥८३॥
अथ तैर्यथानिदेशं तस्मिन् विनिवेशिते तल्पे ।
भूयः सौधानुचरान् सकलानाज्ञापयामास ॥८४॥
'मन्निर्विशेषमेष युष्माभिस्तल्पगो मनुजः ।
सादरसमुदाचारं परिचर्याभिर्व्यवह्रियताम् ॥८५॥
आज्ञाः समास्तदीया निर्विचिकित्सं भवद्भिरनुमान्याः ।
नात्र व्युत्क्रमलेशः कार्यः, सोऽयं ममच्छन्दः ॥८६॥
व्यवहारेषु सदाऽसावधिराजपदेन सम्बोध्यः ।
संक्षेपतोऽत्र कार्या सद्बुद्धिः सर्वकार्येषु' ॥८७॥
मूर्ध्नाऽवहत्तदाज्ञामनुचरवर्गो नृपालस्य ।
विज्ञाततत्कुतूहलिशीलो मालामिवाभिनवाम् ॥८८॥
क्षितिपतिरथ सपदि निजं मुख्यामात्यं समाहूय ।
इत्थं समादिशदमुं विनयादरनम्रमूर्धानम् ॥८९॥
एतं मच्छयनगतं वीक्ष्यार्य ! श्वस्तने दिवसे ।
सिंहासनमधिरूढं न विस्मयः संप्रदर्श्योऽल्पः ॥९०॥
अहमिव संबोध्योऽसावधिराजपदेन मन्त्रिवर' ।
आज्ञा एतद्विहिताः सकला अपि भद्र परिपाल्याः ॥९१॥
मद्बुद्धिमत्र बद्ध्वा भवताच्छन्दानुरोधेन ।
अस्मिन् हि वर्तितव्यं मयीव सकलेषु विषयेषु ॥९२॥
यद्यपि सकलं कोशं मम दातुं सोऽयमभिवाञ्छेत् ।
मात्रमनागपि भवता दोलायितचेतसा भाव्यम् ॥९३॥
आर्य ! विधेयं भवता तथा, यथाऽयं ममच्छन्दः ।
सर्वैः सभासदश्चैरनुवर्त्यैताविकल्पांशम्' ॥९४॥
अथ तस्मिन् सचिववरे शुद्धान्तान्तादपक्रान्ते ।
वेश्मान्तरं विवेश क्षितिपतिरुद्वेलकुतुकभृतः ॥९५॥
तत्र च पर्यङ्कगतो घटनां तामेव चिन्तयन् मनसा ।
नानाविजल्पभेदात् भूपतिरेवं मनस्यतनोत् ॥९६॥
'कामानस्य सतोऽहं सर्वानिच्छामि पूरयितुम् ।
जिज्ञासे राज्यमसौ संप्राप्य कथं नु वर्तेत' ॥९७॥

तच्चेष्टितं च सकलं सोत्कण्ठो द्रष्टुमवनीशः ।
आज्ञापयत् परिचरान् प्रत्यूषे स्वं प्रबोधयितुम् ॥९८॥
अथ काश्चनावशिष्टा भूप घटिकास्त्रियामायाः ।
निद्रोत्सङ्गगतो-ऽभूच्छयनीये - ऽत्यन्तमहनीये ॥९९॥
उत्थापितः प्रभाते तैः परिचारैर्यथादिष्टैः ।
अविशत्प्रहासशयनालयसक्तं वेश्म भूपोऽन्यत् ॥१००॥
तत्र स्थितश्च निभृतं प्रतिपालयति स्म सोत्कण्ठम् ।
तस्य प्रबोधवेलामवनिपतिः कौतुकाक्रान्तः ॥१०१॥
अवसन्नायां तस्यां क्षणदायां तदनु सुखसुप्तः ।
प्राभातिकशिशिरानिलवीजितगात्रः प्रबुद्धोऽसौ ।१०२॥
प्रासादे नवकुसुमस्तवकावलिमिलितसौरभ्ये ।
नानाविधहृदयङ्गमचित्रालेख्यप्रकारनयनहृति ॥१०३॥
बहुमूल्यकुथवितानास्तरणे रमणीयतमहर्म्ये ।
मणिभङ्गिभूषित - महासौवर्णस्तम्भ - भव्याभे ॥१०४॥
पर्यङ्के हेमाङ्के मृदुतमशयने शयानं स्वम् ।
स ददर्श वाद्यहस्तैर्युवतिजनैः संवृतं परितः ॥१०५॥
कार्तस्वरभृङ्गारकहस्ताः काश्चिद् भुवोऽप्सरसः ।
प्रत्यैक्षन्त पुनस्तन्मुखधावनसेवनावसरम् ॥१०६॥
आसन्ने मणिपीठे स्थापितमतिरोचमानरत्नरुचि ।
नेपथ्यं नृपधार्यं मुकुटं चासौ ददर्श पुरः ॥१०७॥
देवेन्द्रभवनरुचिमपि धिक्कुर्वत्तद् विलोक्यासौ ।
भूमीशशयनसदनं विस्मयजलधावभून्मग्नः ॥१०८॥
'किमयं क्षणरमणीयो विजृम्भते स्वप्नवृत्तान्तः ।
आहोस्वित्तथ्यमिदं दृश्यं नो हन्त ! जानामि ॥१०९॥
नूनं स्वप्नविजृम्भितमेतत्सत्यं न सम्भाव्यम् ।
अतिथिविशेषालापप्रसङ्गचिन्तोदितं भाति' ॥११०॥
तन्वन् मनसि विकल्पानेवमनल्पान् प्रहासोऽसौ ॥
अप्रतिपत्तिविमूढो न्यमीलयल्लोचने भूयः ॥१११॥
अत्रान्तरे च सूताः सूनृतवचनैः प्रहासं तम् ।
प्राबोधयन् प्रभूतप्रश्रयमसृणैर्यथा भूपम् ॥११२॥

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

'राधाधिराज ! जागृहि पश्य त्वद्दर्शनोत्कण्ठः ।
अहिमांशुरुदयशिखरे प्रतीक्षते कीर्णमृदुकिरणः' ॥११३॥
'किमहं सुप्तोऽस्मि ? किमु प्रबुद्ध ? इत्याकुलात्मा सन् ।
उत्थाय समुपविष्टः शनकैः शयने प्रहासोऽभूत् ॥११४॥
अथ तं गृहीतवाद्याः प्रशस्यवेषाश्च ता योषाः ।
उपतस्थिरे प्रबोधौपयिकीभिर्गीतभङ्गीभिः ॥११५॥
पीयूषसमधुरां तां मधुरां तद्गीतिनवरीतिम् ।
शृण्वन्नयं प्रमोदभ्रमसंभिन्नां दशां भेजे ॥११६॥
'किमिदं ? काहं ? किं मे सञ्जातं ? को ह्ययं सौधः ।
परिवृत्य सर्वतो मां तिष्ठन्त्यो विभ्रमातिशयैः ॥११७॥
अप्सरसोऽपि हसन्त्यः काः पुनरेता वरारोहाः ।
मिथ्या - वास्तव - वस्तुभेदावगमेऽसमर्थोऽहम्' ॥११८॥
एवं व्याकुलचित्तं नेत्रे विस्फार्य पश्यन्तम् ।
आगत्य सौविदल्लो नतमूर्धा तं न्यवेदयत ॥११९॥
'राजाधिराज ! राज्याधिकृताः करदाश्च भूपालाः ।
देवं सिंहासनगं सोत्कण्ठं संप्रतीक्षन्ते' ॥१२०॥
श्रुत्वैतत्तद्वचनं मन्वानः सत्यमेवैतत् ।
भूयोऽप्यसत्यमत्या व्याकुलचेता असावासीत् ॥१२१॥
भ्रान्त्यावेगभृतोऽथो सहसाऽप्राक्षीत्स कञ्चुकिनम् ।
'उद्दिश्य कं त्वमेवमधिराजपदं प्रयोजयसि ?' ॥१२२॥
'अलमन्यथागृहीत्वा जनमेतं देव तावकाङ्घ्रिजुषम् ।
अपि कश्चन दुःस्वप्नो निद्रां देवस्य समभाङ्क्षीत् ।१२३।
एतत्तदीयवचनं श्रवसोरतिथित्वमानीय ।
सहसाऽहसत् प्रहासो हारीतनृपालकुतुकसन्दृष्टः ।१२४॥
पर्याप्तमथ हसित्वा कञ्चुकिनं सोऽन्वयुङ्क्त पुनः ।
कोऽहं सखे कथय मामप्रतिपत्त्या गृहीतोऽस्मि' ।१२५।
'त्वं देव निखिलपृथिवीपतिरखिलप्रकृतिशरणात्मा ।
करदक्षिणीन्द्रलसन्मौलिमणिव्रातपूजिताङ्घ्रिरसि' ।१२६।
इत्थं श्रुतवान् सोऽयं भूयो भ्रान्तौ भ्रमन् मनसा ।
आसन्नयुवतिपङ्क्त्या - वन्यतमा - मेवमब्रूत ॥१२७॥

'अयि सुन्दरि मम संनिधिमायाहि, दशाङ्गुलिं मत्काम् ।
येनावगम्यमेतत् किं सुप्तोऽहं प्रबुद्धो वा ?' ॥ १२८॥
सविलासं विहसन्ती सा सत्वरमेनमभ्येत्य ।
कुरुविन्ददलविलासैर्दशनैस्तस्याङ्गुलिं व्यदशत् ।१२९।
तद्दंशजातबाधाविकलः सहसाऽपसारितात्मकरः ।
'नेदं स्वप्नविजृम्भितमि'ति क्षणं निश्चिकायासौ ॥१३०॥
'विधया कया नु सोऽहमधिराजपदं समधिरूढः ?' ।
दोलायमान इत्थं चेतसि भूयो भ्रमं भेजे ॥१३१॥
शयनं विहातुकाममेनमथोद्वीक्ष्य सुन्दरी काऽपि ।
कोमलनिजबाहुलतालम्बममुष्मै मुदा व्यतरत् ॥१३२॥
तस्मिन्नुत्थितमात्रेऽधिकृताः सहसा समुन्नेदुः ।
'राजाधिराज जय जय, भवतुतमां सुप्रभातं ते' ॥१३३॥
'रात्रौ प्रहास आसं, सम्प्रति राजाधिराजोऽस्मि ।
किमिदं ? को विशयं मे छिनत्तु तत्त्वोपदेशेन ?' ॥१३४॥
एवं शङ्काव्याकुलचेतसमेनं वरारोहाः ।
निर्वर्तितदिवसमुखौपयिकविधिं ता असेवन्त ॥१३५॥
उपवेश्य हैमपीठे परिकर्मकृताङ्गसंस्काराः ।
अभिषिषिचुर्मणिकुम्भावर्जितसलिलैस्ततस्तास्तम् ।१३६।
स्नातानुलिप्तमेनं निर्वर्तितसकलदिवसमुखकृत्यम् ।
नवराजवेषभूषाभेदैर्भृत्या अलञ्चक्रुः ॥१३७॥
एवं प्रसाधितः सन् कञ्चुकिनादिश्यमाननिजमार्गः ।
सभ्याधिकारिवर्गानुसृतोऽसावथ विवेशराज सभाम् ।१३८।
विनयावनम्रसचिवप्रदत्तहस्तावलम्बः सः ।
सद्रत्नरुचिवितानं सिंहासनमग्र्यमधितष्ठौ ॥१३९॥
सिंहासनमधितिष्ठन् निखिलैरपि तैः सभास्तारैः ।
'जय देव जीव चिरमि'ति तारस्वरमभ्यनन्द्यत सः ।१४०।
हारीतभूमिपतिरप्यासन्नागारनिभृतविनिविष्टः ।
निरवर्णयत् सकुतुकं प्रहासचेष्टाविशेषान् सः ॥१४१॥
आत्मप्रबोधकालात्ताँस्तान् विषयान् प्रहासोऽसौ ।
प्रत्यक्षं परिपश्यन्नात्मानं भूपमभिमेने ॥१४२॥

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

कथमेतत्परिणतमिति विहाय चिन्तामसौ तूर्णम् ।
लब्धं निजमधिकारमुपयोक्तुं साधु निरणैषीत् ॥१४३॥
आत्मनि नृपाभिमानात् क्रमशः परिवृद्धवैयात्यः ।
साटोपं विनयनतं मन्त्रिणमित्थं बभाणासौ ॥१४४॥
'अप्यार्य ! निखिलराज्यप्रबन्धकार्यं निराबाधम् ? ।
किं विनिवेद्यं वद ते कार्यं ? तच्छ्रोतुमिच्छामः' ।१४५।
राजाधिराज ! करदास्त्वत्पदसन्दर्शनात्युत्काः ।
अध्यासीना द्वारं भवदाज्ञां सम्प्रतीक्षन्ते' ॥१४६॥
एवं निशम्य वचनं सचिवस्यानम्रमूर्ध्नोऽसौ ।
'तूर्णं प्रवेशयैतानिति तं धीरं समाचष्ट ॥१४७॥
अथ ते महार्हवेषाभरणाः सामन्तभूपालाः ।
मुकुटमणिरुचिभिरेतच्चरणौ समरञ्जयन् परितः ॥१४८॥
क्रमशो यथाधिकारं सर्वेऽधिकृताः समेत्य नतगात्राः ।
जानुभ्यामवनितले निपत्य तं भूरिशो नेमुः ॥१४९॥
अथ बहुलराज्यविषयकपत्राणि निवेदितानि सचिवेन ।
प्रत्युत्पन्नमतिः स निरणैषीत्तत्क्षणं गतभीः ॥१५०॥
न्यायासनकार्यभरं वैदग्ध्येनोद्वहन्नेषः ।
अन्तःसन्तोषभृता दृष्टः कुतुकेन भूपेन ॥१५१॥
तदनु पुरःस्थितमेष रक्षाधिकृतं समुद्दिश्य ।
अवदत् 'त्वामधुनाहं गुरुकार्ये योक्तुमिच्छामि ॥१५२॥
अधिपुरपरिसरमेकः पापो देवालयाधिकृतः ।
दुष्टात्मभिश्चतुर्भिरपरैः सार्धं जनाँस्तुदति ॥१५३॥
साधय सत्वरमेतं कशाभिघातैः प्रताड्य मुहुः ।
अधमैः सहायकैः सह निर्वासय, सूचयाऽथो माम्'।१५४।
स तु तस्यैतामाज्ञां शिरसा सन्धार्य तत्क्षणं प्रययौ ।
तत्पालनाध्यवसितो, हारीतोऽप्यास्त मुदितमनाः ॥१५५॥
भूयोऽपि न्यायासनकार्यपरं तं समभ्येत्य ।
'देवादेशोऽनुष्ठित' इति तं रक्षाधिकृन्न्यगदत् ॥१५६॥
तद्वचनं परिश्रृण्वन् दुष्टात्मविनिग्रहेणासौ ।
नितरां प्रसन्नचेता आदिशदेनं समुपवेष्टुम् ॥१५७॥
कोशागाराधिकृतं तदनु समाज्ञाप्य सविधमागन्तुम् ।
एवं प्रहास एष प्रहासपूर्वं समब्रूत ॥१५८॥
एतत्पुरीपरिसरे कृतवासायाः किलैकस्याः ।
मातुः प्रहासनाम्नो वणिजो गेहं त्वमुपगच्छ ॥१५९॥
तस्मिन् हि नगरमार्गे प्रथिततमः सार्थवाहोऽसौ ।
तद्गृहगवेषणे तव न मनाक् क्लेशो हि संभाव्यः ।१६०।
दीनारायुतभरितं स्यूतं चास्यै समुपहृत्य ।
अविलम्बितं पुनरिह प्रत्यावर्तस्व, याह्यधुना ॥१६१॥
एवं तस्यादेशं शिरसि वहन् सपदि सोऽधिकृतः ।
आदिष्ट - कार्यसत्वर - सम्पादनहेतवेऽयासीत् ॥१६२॥
गत्वा प्रहासमात्रे तत्स्यूतं सादरं समुपहृत्य ।
अवदत् 'स एष राजाधिराजवर्यप्रसाद' इति ॥१६३॥
अविदितसौधगताखिलवृत्तान्ताऽथाधिगत्यैतन् ।
उद्वेलविस्मयमहासिन्धुतलस्पर्शिमानसा साभूत् ॥१६४॥
तेन च कोशाधिकृता सपदि समागत्य सप्रणामतति ।
विनिवेदिते तदाज्ञानुष्ठानविधौ प्रसन्नात्मा ॥१६५॥
संपादितराज्यासननानाकार्यः प्रहासोऽथ ।
उदिते च मध्यमह्नः सूचयति प्रौढशङ्खरवे ॥१६६॥
सामन्तलोक - सभ्याधिकारिभिर्दत्तनिजमार्गः ।
सूतानुगीतविरुदो विवेश साटोपमवरोधम् ॥१६७॥
मणिकुट्टिमरमणीये रमणीगणविभ्रमस्फुरत्कान्तौ ।
यस्मिन्नसौ प्रहासः सानन्दमभुङ्क्त सरसान्नम् ॥१६८॥
एवं भुञ्जानमिमं काश्चित् संवीजयन्ति स्म ।
काश्चिच्च विभ्रमैः सह गीतैः संमोदयामासुः ॥१६९॥
कृतभोजनं पुनरिमं नृत्यादिविनोदनै रम्यैः ।
आराधयन् समन्तात्ता हृद्याः सौधसुन्दर्यः ॥१७०॥
एवं प्रायैः कार्यैस्तस्याविज्ञातघटिकस्य ।
सर्वं दिनं व्यतीतं सविस्मयस्य प्रहासस्य ॥१७१॥
(क्रमशः)

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

पूर्वतोऽनुवृत्तम् २

द्विज-शूद्रयोर्भेदो वैदिक एव

— श्री दीनानाथशास्त्री सारस्वतः, विद्यावागीशः —

[प्रधानाचार्यः—रामदल-संस्कृत-महाविद्यालयस्य, दिल्ली]

लेखकमहोदयानुसारं वेदप्रापकेषु अग्निवाय्वा-ऽऽदित्याङ्गिरस्सु द्विजा एव सर्वे आसन्; नहि काऽपि स्त्री, न वा कोऽपि शूद्रोऽन्त्यजो वा इति। तद-त्रापि द्विजशूद्रयोर्भेदो वैदिकः फलितः।

(१३) 'उद्यानं ते पुरुष ! नाऽवयानम्' इति मन्त्रस्य अर्थविषये 'आलोक'स्य षष्ठं पुष्पं द्रष्टव्यम्। द्विजेभ्यो वेदा यज्ञोपवीतित्वात्। शूद्रेभ्यो न वेदा यज्ञोपवीताऽभावात्। पुराणानि तूभयेषां कृते, तत्र यज्ञोपवीतस्य अतिशयितावश्यकताऽभावात्। पुरा-णानि वेदसमकालिकान्येव, न तु पञ्चसहस्रवर्षकाणि। अत एव वेदेऽपि 'ऋचः सामानि छन्दांसि पुराणं यजुषा सह। उच्छिष्टाज्जज्ञिरे (अथर्व. ११।९ (७)। २४) इति।

अत्र वेदेऽपि पुराणानां वर्णनम्। 'पुराणम्' इति जातौ एकवचनम्। अत एव पुराणेऽप्युक्तम्--

'पुराणं सर्वशास्त्राणां प्रथमं ब्रह्मणा स्मृतम्।

अनन्तरं च वक्त्रेभ्यो वेदास्तस्य विनिस्सृताः॥'

(शिव० वायु० पू० १।३१-३२, मत्स्य० ५३।३, ३।३-४)। प्रतिद्वापरं तु पुराणानां विविधव्यासद्वारा सम्पादनं जायते, न तु निर्माणम्। तेन तेषां पञ्च-सहस्रवर्षेभ्योऽर्वाङ् निर्माणकथनं लेखकमहोदयस्य निर्मूलमेव। अस्मिन् विषये 'आलोक'स्य सप्तमपुष्पे द्रष्टव्यम्।

(१४) "वेदाध्ययनाधिकारः स्त्रीशूद्रविषयको-ऽप्यस्ति, मानवमस्तिष्कस्य ज्ञानमात्रेऽधिकारित्वात्, वर्तमानकालिकगृहीतवेदज्ञानप्रभूतस्त्रीशूद्रवत्। तथा च सर्वाः स्त्रियः शूद्राश्च मानवमस्तिष्कयुताः। तस्मात् स्त्री-शूद्रयोरपि वेदाध्ययनाधिकारः सिद्धः" इति लेखकमहोदयप्रोक्तो न्यायो न्यायाभास एव, 'यत् पुनरनुमानं प्रत्यक्षागमविरुद्धं न्यायाभासः सः' (१।१।१) इति मुनिश्रीवात्स्यायनोक्त्यनुसारमागमविरोधात्। आगमविरोधस्य पूर्वं दर्शितत्वात्।

एवं सति तु कश्चिद् इदमनुमानमपि प्रवक्तुं शक्ष्यति यद् 'मानवमात्रस्य मानवीमात्रेण (कामं सा भगिनी स्यात्, कामं वा पितृव्यमातुलादेर्दुहिता) परस्परविवाहाधिकारोऽप्यस्ति, सर्वेषां सर्वासु गर्भा-धाने योग्यतादर्शनात्; अद्यतनकाले तादृशसम्पर्केऽपि सन्तत्युत्पत्तिदर्शनात्। यत्र गर्भाधानजननोभय-विधयोग्यतावत्त्वम्, तत्र तत्र विवाहाधिकारवत्त्वम्। तथा च भगिनी-भ्रातरोऽपि मिथो विवाहाधिकारिणः; तस्मात् तथा।' लेखकमहोदयो यदि इदमनुमानमागम-विरुद्धत्वाद् अनुकरणार्हं न मनुते। तथा तदीयमनुमान-मपि आगमविरुद्धमेव। विषयेऽस्मिन् 'आलोक'स्य षष्ठपुष्पे स्पष्टता द्रष्टव्या।

(१५) 'वेदस्तु सूर्यचन्द्रादिवत् सर्वेषां कृते' इति लेखकमहोदयस्य कथनमपि विषम उपन्यासः। सूर्य-चन्द्रादयोऽपि उलूककृते, कालप्रकोष्ठिका (काल-कोठरी)-निगृहीतवन्दिकृते च निरुद्धा भवन्ति। जल-

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

मपि कचिद् कस्यचिद् मधुरं, कस्यचिच्च क्षारं लभ्यते, कापि कस्यचिल्लभ्यत एव न। विषयेऽस्मिन् 'आलोक'-स्य षष्ठं पुष्पं द्रष्टव्यताम्।

केवलं द्विजपुत्रत्वेन द्विजत्वं न भवति, किन्तु तस्य उपनयनधारणेन। उपनयनधारणात् प्राग् द्विज-पुत्रोऽपि शूद्रसम आख्यायते (मनु० २।१७२)। एतेन शूद्रस्य तु नित्यमेकजता सिद्धा।

(१६) 'जन्मना जायते शूद्रः संस्काराद् द्विज उच्यते' इति लेखकसहोदयसम्मतं वचनं न कस्यापि धर्म-शास्त्रस्य मूले इति निर्मूलमेव। 'जन्मना ब्राह्मणो ज्ञेयः संस्काराद् द्विज उच्यते' इति वचनं तु 'अत्रिस्मृतौ' (१।८), पद्मपुराणे सृष्टिखण्डे (४३।३४) ब्राह्मणकृते लभ्यते। ततस्तदीयकल्पितताऽऽख्यानं लेखक-महोदयस्य आहोपुरुषिकतामात्रम्।

'जन्मना जायते शूद्रः' इति वचने 'शूद्रः' इत्यस्य 'शूद्रवद्' इत्यर्थः। 'अन्तरेणापि वतिमतिदेशो गम्यते' इति महाभाष्यात् (१।१।२३)। अत्र मनोरपि साक्ष्यम्—'शूद्रेण हि समस्तावद्' (२।१७२) इति। महाभारते अनुशासनपर्वणि (१८०।३५), वसिष्ठस्मृतौ (२।१२), शङ्खस्मृतौ (१।८) चापि तेन लेखकस्य नेष्टसिद्धिः।

(१७) 'यमेव विद्याः शुचिमप्रमत्तम्' इति मन्त्रे पूर्वमन्त्राद् 'विप्रः' इत्यनुवर्तते। 'विप्र'शब्दश्च तत्र 'ब्राह्मण'-वाचकः। ततस्तत्र शूद्रादेः प्रसक्तिरेव न इति विषये 'आलोक'स्य तृतीयपुष्पे द्रष्टव्यताम्।

(१८) द्विजपुंसामेव वेदेऽधिकार औत्सर्गिकः, 'दीक्षितो दीर्घश्मश्रुः' (अथर्व० ११।५।६) इति ब्रह्म-चर्यदीक्षायां दीर्घश्मश्रुः इति लिङ्गात्। न खलु स्त्री श्मश्रुमती भवति, तेन जातिपक्षोऽपि बाध्यते। 'ब्रह्म-चर्येण कन्या' इति मन्त्रे तु 'ब्रह्मचर्य'स्य 'उपस्थसंयमः' इत्यर्थः। एतन्मन्त्रोत्तरार्धे 'अनड्वान् ब्रह्मचर्येण अश्वो घासं जिगीर्षति' इत्यत्र पशूनां ग्रहणस्य लिङ्गात्। न खल्वत्र घासपाचने युवपतिवेदने च वेदाध्ययनस्य उपकारः, किन्तु उपस्थसंयमस्यैव, उपस्थसंयमरहितानां घासाशने पाचनाऽभावात्। तादृशीनां च कन्यानां युवपतिवेदने क्षमताऽभावात्। अस्मिन् विषये विशिष्य 'आलोक'स्य तृतीयपुष्पे द्रष्टव्यताम्।

(१९) स्त्री कापि शूद्रा नोक्ता, शूद्रसमा तु प्रोक्ता। परं विवादे जाते तस्या द्विजसदृशता भवति।

'वैवाहिको विधिः स्त्रीणां संस्कारो वैदिकः स्मृतः।'

इति मनुवचनात् (२।६७)। ततस्तस्या उत्पन्नायाः सन्ततेर्न वर्णसाङ्कर्यप्रसङ्गः। विषयेऽत्र विशिष्य 'आलोक'स्य तृतीयपुष्पे द्रष्टव्यताम्।

(२०) 'यस्मिन् ऋचः' इति मन्त्रे मानवमात्र-मनसि वेदत्रय्याः स्थितिर्नोक्ता, किन्त्वेतत्प्रतिपाद-कस्य याज्ञवल्क्यर्षेर्मनसि वेदत्रय्याः स्थितिरुक्ता। विषयेऽत्र 'आलोक'स्य षष्ठपुष्पं द्रष्टव्यताम्।

(२१) अतिप्राचीनतमकाले प्रादुर्भूतो वेदः केवलं लेखकेन दृष्टः, न सृष्ट्यादिजातैर्मन्वादिभिः, धर्मशास्त्रकृद्भिः, पारस्करादिभिः सूत्रकृद्भिश्च, इति तु अश्रद्धेयम्। लेखकेन वेदः सुधारकदृष्ट्या दृष्टः, न वेदभाषादृष्ट्या, न वा सर्वाङ्गीणदृष्ट्या इत्यस्माभिर्यत्र-तत्र दर्शितमेव। लेखकमहोदयो मानवजातौ दय-ताम्। यदि तन्मतानुसारं शूद्रादिभिर्विमानादि-निर्माणं त्यक्त्वा वेदेष्ववधास्यते, तर्हि चीनपाकि-स्तानयोरत्र शीघ्रमधिकारो भवेत्, तच्च अनिष्टम्।

(२२) "नमस्तक्षभ्यो रथकारेभ्यश्च वो नमो नमो' इत्यादिमन्त्रेण निषादादयोऽपि नमस्कारार्हाः स्वीकृताः" इति लेखकस्य कथनमस्थाने। सूक्तेऽस्मिन

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

काव्य-शास्त्र-विनोदेन......

किं पीत्वा पवनः प्रवाति सततं देशे सदा निर्जले
किं भुक्त्वा भ्रमति प्रभातसमये भानुर्निरन्ने स्थले।
किं कृत्वा ह्यटति द्विजातिरहह ! पाश्चात्यदेशे त्विति
कृत्वा सूक्ष्मविचारणामपि वयं किञ्चिन्न जानीमहे ॥ १ ॥

सत्यं ज्ञानमनन्तब्रह्म विदुषां चित्ते यथा राजते
नीले व्योम्नि सदैव सूर्यभगवान् प्रातर्यथा भ्राजते।
गङ्गायां प्रतिबिम्बितो दिनकरः सायं यथा शोभते
हिन्दुस्तादृशि नीलकण्ठनगरे नीले सुवर्णायते ॥ २ ॥

निर्बीजा पृथिवी निरोषधि रसा नीचा महत्त्वं गता
भूपाला निजधर्मकर्मरहिता विप्राः कुमार्गे रताः।
भार्या भर्तृविरोधिनी पररता पुत्राः पितुर्दूषका
हा कष्टं खलु वर्तते कलियुगे धन्या मृता ये नराः ॥ ३ ॥

— श्री पद्मनाभ निरौला —

ब्राह्मणादीनां नाम सर्वथा नास्ति। तत् किं ते नमस्कारयोग्या न सन्ति ? तत्रैव तस्करा वधिकाश्चापि प्रोक्ताः। तत् किं लेखकमहोदयस्तेषां प्रणमनमनुशिष्य तेषां प्रणमनं स्वीकुर्यात् ? वस्तुतस्तत्र किरातरूपधारिणो रुद्रस्य उक्तगणा नम्या मताः, न तु सर्वसाधारणा निषादादयः। एतदेवात्र रहस्यम्। विषयेऽत्र 'आलोक'स्य १–२ पुष्पे प्रत्युत्तरं दृश्यताम्।

(२३) 'पञ्चजना अग्निहोत्रं जुषध्वम्' इति मन्त्रोऽपि लेखकेच्छापूरणक्षमो नास्ति। अत्र 'अग्निहोत्रं जुषध्वम्' इति पाठो नास्ति, किन्तु 'मम होत्रं जुषध्वम्' इत्येव। 'होत्रम्' इत्यस्य 'आह्वानम्' इत्यर्थः। 'यज्ञः' इत्यर्थे मतेऽपि सर्वेषां यज्ञे भिन्न-भिन्नसेवा भवति। शूद्रान्त्यजादीनां 'यज्ञभूमेः संशोधनम्, परिष्करणं' च यज्ञस्य सेवा भवति, न तु यज्ञस्य साक्षाद् विधानं विधापनं वा। यज्ञे अधिकारस्तु द्विजानामेव भवति। यथा च वेदे—'अयं स होता यो द्विजन्मा' (ऋ० १।१४९।५)। अत्र द्विजस्यैव होतृत्वमुक्तम्, न तु एकजस्य। शेषविषये 'आलोक'स्य तृतीयपुष्पे दृश्यताम्।

ये शूद्रान्त्यजा वेदानुसारं कृच्छ्रकर्म विहाय लेखकमहोदयानुसारं वेदपठनव्यग्राः, ते भारतीयसंसारहानिकराः, 'ब्रह्मणे ब्राह्मणं'.....तपसे (कृच्छ्रकर्मणे) शूद्रम्' (यजुः ३०।५), 'तपः शूद्रस्य सेवनम्' (मनु० ११।२३५) इति श्रुति-स्मृतिवचनविरोधिनः। एवं लेखकमहोदयो वेदमपि स्वेच्छानुसारं चालयितुमीहत इति महान् विषादः। अत्र विद्वज्जना अवदधतु।

लेखकमहोदयस्य लेखे परस्परविरोधोऽपि दृश्यते। कचित् स शूद्रादिकं जन्मनाऽमन्यत ; कचिच्च कर्मणा। अत एव तदीयलेखस्तदनुसारमपि प्रामाण्यं नार्हति। यदि गुणकर्मणा वर्णः, तर्हि शूद्रं मूर्खमाचक्षाणः श्रीस्वामिदयानन्दो लेखकेन कथमधिक्षिप्तः ? यदा खलु लेखकोऽपि अशिक्षितं शूद्रं मनुते। वस्तुतस्तु वेदस्य जन्मना वर्ण इष्टः ; तत्र 'ब्राह्मणोऽस्य मुखमासीद्' इति मन्त्रः प्रमाणम्। अत्रत्या मुखबाहूरुपादा जन्मना दृष्टाः, न गुणकर्मणा। ततो मुखपादादिप्रतिनिधयो ब्राह्मणशूद्रादयोऽपि वेदस्य जन्मना अभिमताः। ततो द्विजशूद्रादिभेदोऽपि वैदिकः फलितः।

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

शाकुन्तलीयं जीवन-दर्शनम्

— श्री न० च० वे० नरसिंहाचार्यः —

आमुखम्

साधुकाव्यरसोन्मिश्रं शास्त्रमप्युपभुञ्जते ।
प्रथमा'लीढमधवः पिबन्ति कटु भेषजम् ॥

इत्यालङ्कारिक-पितामहस्य भामहस्य श्लोकेन अस्य लेखस्य समारम्भो युक्तरूप इत्यमुं श्लोकमुदाहार्षम् ।

कश्चिद्बालः रोगातुरोऽपि हितमिति बोधितोऽपि कटुभेषजमप्रियत्वात् स्वारसिकप्रवृत्त्या 'पातुं न प्रथमं व्यवस्यति' । परन्तु तस्मिन्नेव भेषजे गुडगर्भिते सति झगित्यादाय सुखेन ग्रसते । फलन्तु औषधसेवनस्य स प्राप्नोत्येव । गुडगर्भितस्य अतथाविधस्य च भेषजस्य गुणभागे नाऽस्ति काचिदपि भिदा । इयानेव विशेषः—कटु निराक्रियते, मधुरमुरीक्रियते । अमुमेवाऽर्थं मनसि निदधानाः प्रेक्षावन्तो 'गुडजिह्विका'न्यायं लोके प्रवर्तयामासुः ।

वात्सल्यमूर्तिर्माता कटुभेषजमनिच्छन्तं तनयं न तूष्णीमुज्झति, अपि तु युक्त्या तमौषधसेवनोन्मुखं करोति । एवंविधमातृसहस्रेभ्योऽपि वत्सलतरः लोकोद्दिधीर्षाबद्धपरिकरः क्रान्तदर्शी नानृषिः कविरिति न कश्चित् सन्दिग्धो य एव प्रशस्यतर उपदेशः प्रभुसम्मितैर्वेदैः प्रतिपिपादयिषितः, यश्चाऽपि सुहृत्सम्मितैः पुराणादिभिः बुबोधयिषितः, स एव ननु ललितमधुरया सरण्या कविनाऽपि कान्तासम्मितेन काव्येन चिकीर्षितः । 'काव्यात् कर्तव्यताधीः सरसा', अन्यत्र न तथा । सरसे प्रवृत्तिः अनेवंवर्णे निवृत्तिश्च निसर्गसिद्धा जनस्य । अतः सरसैः काव्यैः क्रियमाणः सदुपदेशः सदातनः सहृदयानां हृदयलग्नश्च सम्बोभवीति । अत एव श्रुतिस्मृतिपुराणेतिहासादिभिः सद्भिः काव्यस्य अन्यथासिद्धत्वम् अभिधातुं न पार्यते ।

दृश्य-महिमा

काव्यं हि नाम लोकोत्तरं रसोल्लसितशब्दार्थसङ्घटनात्मकं कवेः कर्म । तच्च स्थूलतो द्विविधम्—श्रव्यम्, दृश्यञ्चेति । तत्र दृश्यं नाटचप्रधानम् । अवस्थानुकृतिर्नाटचम् । तच्च जले तैलबिन्दुरिव क्षणेनैव निखिलहृदयालु-हृदयसञ्चरण-चटुलता - चणताकृतप्रशस्तिपात्रम् । तादृशञ्च नाट्यं दशधा कथितेषु रूपकेषु उपरूपकेषु च बहुलमुपलभ्यते । अत एव काव्येषु दशरूपकस्य अनितरसुलभा प्रशस्तिः । 'सन्दर्भेषु दशरूपकं श्रेयः; तद्धि चित्रं चित्रपटवद्विशेषसाकल्यात्' इति काव्यसमयज्ञानामग्रणीः वामनाचार्योऽपि मुक्तकण्ठं दशरूपकस्य सकलातिशायित्वमातिष्ठते ।

तेष्वपि रूपकेषु, सर्वाङ्गशोभीति, नवरससम्भृतमिति, पुण्यश्लोकानुबन्धीति, उदात्तनायकमिति, समस्तरूपकप्रकृतिभूतमिति, एभिरन्यैश्च हेतुभिः नाटकमभ्यर्हिततममिति अभिधीयमानं नैवातिशयोक्तिं पुष्णाति । तन्मूलैव इयमुक्तिरपि

1963 (ई. स.) संवत्सरे उज्जयिन्यां कालिदास-जयन्तीमहोत्सवं पुरस्कृत्य प्रकल्पितायै निबन्धस्पर्धायै (Essay Competition : Category I) प्रहितोऽयं लेखः ।

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

'नाटकान्तं कवित्वमि'ति । 'कविताकलधौतस्य नाटकं निकषोपलः' इति च । कवित्वशक्तेः पराकाष्ठा नाटके उपलक्ष्यते । नाटकप्रणेतुरपेक्षिता सामग्री बहुविस्तृता । आधेयमवधाम् अतिगभीरम् । बहुदेशाचार-भाषा-वैदुष्यमावश्यकम् । इतिवृत्तविस्तरणकलापारीणता समादरणीया, सर्वतोमुखविसृत्वर-विशिष्टप्रतिभा-प्रभावपरिणाहविभूषितेन लोकवृत्तमनतिवर्तमानेन लब्धवर्णेन महान्तं क्लेशमास्थाय नाटकनिर्मितिः साधनीया भवति ।

अपि च—नाटकं खलु चम्पूरूपम् । 'गद्यपद्यमयं काव्यं चम्पूरित्यभिधीयते ।' अतो गद्यपद्योभयरचनाधुरन्धर एवाऽत्र पादन्यासाय प्रगल्भते । उभयत्र समं कौशलं 'नाल्पस्य तपसः फलम्', 'बाणोच्छिष्टं जगत्सर्वम्', 'बाणादन्ये कवयः काणाः खलु गद्यबन्धरचनासु', 'कादम्बरीरसास्वादादाहारोऽपि न रोचते' इति च अन्यथा च बहुधा प्रशस्यमानोऽपि 'यावान् गद्यविधौ बाणः, पद्यबन्धो न तादृशो भवति । गद्यनिर्माणकौशलात् पद्यनिर्माणकौशलमन्यदेव । तावता, पद्यनिर्माणदक्षाः सर्वेऽपि गद्यकाव्यानि हेलयैव निर्मास्यन्तीति वचनमतिसाहसिकम् । गद्यनिर्माणं सुकरमिति 'गद्यं कवीनां निकषं वदन्ती'त्याभाणकं यथावद्विदितवान् को वा सचेतनो ब्रूयात् ? अतो द्विगुणतरो हि भारो नाटकप्रणेतुः । चतुस्समुद्रमुद्रित - मेदिनीमण्डल - महाधिपत्यमिव, नाटकनिर्माणमपि निर्मातुरतिवेलं क्लेशमावहति । अमुं तत्त्वमनुभवपुरस्सरं जानानः कविराज-शिखामणिः विशाखदत्तः ''कार्योपक्षेपमादौ''कर्ता वा नाटकानामिममनुभवति क्लेशमस्मद्विधो वा' इति 'राक्षस'मुखेन परानुद्बोधयति ।

एवं कविना अनुभूयमानः निर्माणक्लेशः न क्लेशायैव भवति । सकलोऽपि क्लेशो नाटकस्य माहात्म्यमुद्भावयितुमेव ऐकमुख्येन पर्यवस्यति । सहृदयहृदयाराधनेन साफल्यमृच्छति । 'क्लेशः फलेन हि पुनर्नवतां विधत्ते ।' एवमनेकधा भावुकसमीडितं नाटकं काव्येषु नानारूपेषु रुचिरतममिति सिद्धम् । तेषु नाटकेषु अभिज्ञानशाकुन्तलं कमनीयतममिति अनुभवपुनरुक्तमेव । लोके च प्रथते 'काव्येषु नाटकं रम्यं नाटकेषु शकुन्तला' इति ।

समस्या-प्रस्तावः

ईदृशेऽस्मिन् शाकुन्तले कालिदासनिरूपितं 'जीवनदर्शनम'धिकृत्य किञ्चिद्यथामति विमृष्टुमुत्सहे ।

'जीवनदर्शनमि'ति कोऽर्थः ? तत्र द्वेधा विकल्पः स्वीक्रियते—जीवनस्य = जीवितस्य, दर्शनम् = प्रदर्शनम् इति । तथा च कविना स्वानुभवपूर्वकं ज्ञातानां जीवनविशेषाणां यथावद् ग्रन्थमुखेन तटस्थेनेव पठितृप्रेक्षकयोः पुरतोऽवस्थापनमिति फलति । तथा च जनिमन्तः के नाम ? ते च कथं प्रत्यक्षिताः ? तेषामाहारविहारादि - व्यवहाराः किमाकाराः ? तादात्विकसाङ्घिकजीवनविधानं कीदृशम् ? मनुष्याणां पारस्परिकः सम्बन्धः किंवर्णस्तत्र निर्व्यूढः ? प्रजानां प्रभूणाञ्च पाल्यपालकभावः कथं वर्णितः ? प्रजासु प्रशान्ता वृत्तिः, आहोस्वित् भृशमुद्विग्ना वा वृत्तिरासीत् ? कथङ्कारमेषां सामरस्येन समन्वयः साधितः ? इत्यादयः परश्शता विषया अत्र निरूपणीयतापथमवतरन्ति, इति प्रथमो विकल्पः ।

द्वितीयस्तु—पश्यन्त्यनेनेति दर्शनं नेत्रमित्यर्थः ।

१. 'कार्योपक्षेपमादौ तनुमपि रचयंस्तस्य विस्तारमिच्छन्, बीजानां गर्भितानां फलमतिगहनं गूढमुद्भेदयंश्च । कुर्वन् बुद्ध्या विमर्शं प्रसृतमपि पुनः संहरन् कार्यजातं, कर्ता वा नाटकानामिममनुभवति क्लेशमस्मद्विधो वा ।।'

[मुद्राराक्षसम् : ४.३]

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

अत्र चर्मचक्षुर्नाभिसंहितम्। 'सविधेऽपि न सूक्ष्म-साक्षि यत् वदनालङ्कृतिमात्रमक्षि तत्'। अपि तु—

'अनेकसंशयच्छेदि परोक्षार्थस्य दर्शकम्।
सर्वस्य लोचनं शास्त्रं यस्य नास्त्यन्ध एव सः॥'

इति तत्त्वदृष्टिरत्र विवक्षिता। अतो दर्शनशब्दः तत्त्वशास्त्रपरः। Philosophy इत्यर्थे दर्शनपदं केचन अद्यत्वे प्रयुञ्जते, विशिष्य औत्तराहाः। अत्र 'फिलासफी'शब्दस्य वेदान्तरूपे व्याख्यार्थे न तात्पर्यम्, अपि तु तत्त्वशास्त्रमिति व्यापकार्थे—तत्त्वशास्त्रेष्वन्यतमत्वाद् वेदान्तविद्यायाः। एतावता, कालिदासेन निरूपितं जीवनतत्त्वमित्यर्थः पर्यवस्यति। एतदेव Philosophy of Life इति आङ्गल्या भाषया वक्तुं शक्यते।

पूर्वव्याख्याने यथावत् जीवनवर्णनमुल्लेखनीयं भवति। द्वितीये तु सकलप्रयोजनमौलिभूता जीवित-रहस्योपदेशपद्धतिः प्रतिपादनीया भवति। अतो द्वैतीयीकमेव व्याख्यानं ज्याय इति तदेवावलम्बे।

प्रयोजन-समुल्लेखः

काव्यप्रयोजनानि[1] सुधीभिर्बहुभिः श्लोकैस्तत्र तत्र बहुधोल्लिखितानि। तथापि तत्र विज्ञस्य सहृदयस्य प्रयोजनद्वितयमेव सारभूतमिति मन्ये। प्रथमं प्रयोजनमानन्दः, द्वितीयन्तु उपदेशः। द्वयोरनयोर्मध्ये आनन्द एव परमं प्रयोजनमिति सुधियः सङ्गिरन्ते। तत्र न काचिद्विप्रतिपत्तिः। अत एव सारालङ्काररीत्या सारतमा प्रीतिरेव 'करोति कीर्तिं प्रीतिञ्च साधुकाव्यनिषेवणम्' इति वदता भामहेन पर्यन्ते उपक्षिप्ता। अमुमेवाऽभिसन्धिं एतत्पद्यप्रस्तावे लोचनकारोऽपि निर्दिशति "...तथाऽपि तत्र प्रीतिरेव कारणम्"...चतुर्वर्गव्युत्पत्तेरपि चाऽऽनन्द एव पार्यन्तिकं मुख्यं फलम्' इति।

अत्र किञ्चिद्विवेक्तव्यम्—चर्वणाप्राणोऽयं रसानन्दो न शाश्वतिको भवति। चर्वणामहिम्ना ननु आवरणभङ्गः सम्पद्यते। जाते चावरणभङ्गे रसरूपमात्मचैतन्यं स्वप्रकाशतया स्थितं गोचरीक्रियते—[1]"विभावादिचर्वणावधित्वादावरणभङ्गस्य। निवृत्तायां तस्यां प्रकाशस्याऽऽवृतत्वाद्विद्यमानोऽपि स्थायी न प्रकाशते।" इत्थम्भूते च सन्दर्भे रसानन्दानुभवस्य प्रसक्तिः का नाम? निमित्तापाये नैमित्तिकस्याप्यपायः। नवीनमतानुधावनेनाऽपि नाऽस्ति निस्तारः। ते खलु [2]'भावनाविशेषरूपस्य दोषस्य महिम्ना कल्पितदुष्यन्तत्वावच्छादिते स्वात्मनि अज्ञानावच्छिन्ने शुक्तिकाशकले इव रजतखण्डः समुत्पद्यमानो रत्यादिरेव रसः' इति वदन्तः रसास्वादो भ्रममूलक इत्यभिप्रयन्ति। अनयाऽपि विधया रसानन्दः सदातन इति वक्तुं न शक्यते। अनुभवबेलायामयमतिवेल आनन्दो ब्रह्मानन्दसविधवर्तीत्यत्र न कोऽपि संशेते।

किन्तु रसप्लुतया सरण्या सहृदयमुन्मुखीकृत्य क्रियमाणस्तु सदुपदेशः शाश्वतं प्रयोजनं साधयत्येव। हृदयमधिरूढोऽयं सदुपदेशो विस्मर्तुं न शक्यते। प्राप्ते काले स स्वयं फलं प्रसूते। चतुर्वर्गव्युत्पत्त्यादिकं निगमादिभ्योऽपि सम्पद्यते। तथाऽपि

---

१. काव्यं यशसेऽर्थकृते व्यवहारविदे शिवेतरक्षतये।
सद्यः परनिर्वृतये कान्तासम्मिततयोपदेशयुजे॥
[काव्यप्रकाशः, १.२]

धर्मार्थकाममोक्षेषु वैचक्षण्यं कलासु च।
करोति कीर्तिं प्रीतिञ्च साधुकाव्यनिषेवणम्॥
[भामहस्य काव्यालङ्कारः, १.२]

१. रसगङ्गाधरे प्रथमाननात् रस प्रकरणात्।
२. „ तत एव।

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

काव्ये कान्तासम्मितत्वं विशेषः। तत्राऽपि तथा क्रियमाणः इतिकर्तव्यतोपदेशः रूपकेषु मधुरतमेषु विशिष्यते। अत्र धनञ्जस्य वचनमनुस्मरणमर्हतीत्युपक्षिपामि।

'आनन्दनिःस्यन्दिषु रूपकेषु
व्युत्पत्तिमात्रं फलमल्पबुद्धिः।
योऽपीतिहासादिवदाह साधु-
स्तस्मै नमः स्वादुपराङ्मुखाय॥'

रूपकेष्वेवंविधेषु रामणीयकशिखरमधिरूढे अभिज्ञानशाकुन्तले कालिदासनिरूपितं जीवनदर्शनं कीदृशमिति विचारयामि।

कण्टकोद्धरणम्

प्रथमत एव पथि कण्टकोद्धरणं विधेयम्। तत एव तत्र सञ्चरणं सुशकम्। नीरसहृदयाः केचन श्रोत्रियम्मन्याः 'प्रेक्षणकदर्शनं पापकृत्यमिति, नटा व्रात्या इति, दृष्टवता सता सचेलस्नानमाचरणीयमिति, अविद्वज्जनक्षुण्ण एव पन्था इति, अशिष्टपरिगृहीतेयं सरणिरिति, अवेदचोदितमिदं वर्तनमि'ति च बहुधा निनिन्दुः। 'गायकनर्तकादीन् नगरा[1]न्निष्कासनीयान् निर्दिदिशुः। कुत्सितं शीलमेषामस्तीति व्युत्पत्तिमपि लिलिखुः। 'काव्यालापांश्च वर्जयेदि'ति ब्रुवाणाः स्वयं परावृत्तवदनास्ततः परानपि कांश्चन तथा चक्रुः।

एतत्सर्वं विदन्निव कालिदासो नाट्यप्रबन्धप्रेक्षणं प्रणयनं वा न पापायेति निश्चिन्वन्, चतुर्वर्गव्युत्पत्तिमुखेन मन्दबुद्धीनां क्रीडनैकपरायणानामपि लोकानां पुरुषार्थप्रवणतामाधातुं पितामहपरिकल्पितो ललितो पायो नाट्यमिति विश्वसन्, [1]'परमेष्ठि-वाङ्मु[...] प्रमाणयन् नाट्यस्य अतिपवित्रतां विधातृविधुशेख[...] रादिभिः प्रवर्तितस्य लोकक्षेमङ्करतां, चाक्षुषयज्ञ[...] आबालगोपालं आराजरङ्कं आपण्डितपामरं भिन्न[...] रुचीनां समेषामपि अभेदेन अपक्षपातेन आनन्द[...] सन्धायकत्वञ्च निर्णयन्, [2]'देवानामिदमामनन्ति'' इति श्लोकमेकं निबबन्ध। अयं मालविकाग्निमि[...] नाटिकायां विद्यते। एतच्च रूपकं तदीयेषु प्रथमम[...] अतो मार्गावरोधिकण्टकोद्धरणपूर्वकं ग्रन्थारम्भसम[...] नार्थोऽयमुपन्यासस्तत्र सुष्ठु सङ्गच्छते। ऋग्वेदा[...] वाचिकं, यजुष आङ्गिकं, साम्नो गीतं, अथर्वाङ्गिरोभ्[...] रसञ्चाऽऽदाय विरिञ्चिर्निरमास्त दृश्यमिति लिख[...] भरताचार्यः वेदेभ्य एव दृश्यप्रबन्ध-प्रधानसाम[...] समुदधारि इति निरदिक्षत्।

नटराजो राजचूडामणिः न केवलं नर्तकः, नर्त[...] प्रवर्तको वा, परन्तु प्रेक्षी सभ्योऽप्यकारि। परिण[...] नन्तरं जगतः पितृभ्यां पार्वती-परमेश्वराभ्याम[...]

---

1. कितवान् कुशीलवान् क्रूरान् पाखण्डस्थांश्च मानवान्।
विकर्मस्थाञ्छौण्डिकांश्च क्षिप्रं निर्वासयेत् पुरात्॥
[स्मृतिः]

---

1. सर्वशास्त्रार्थसम्पन्नं सर्वशिल्पप्रवर्तकम्।
नाट्याख्यं पञ्चमं वेदं सेतिहासं करोम्यहम्॥
महर्षीणाञ्च विज्ञेयं नाट्यवृत्तान्तदर्शनम्।
धर्म्यं यशस्यमायुष्यं हितं बुद्धिविवर्धनम्॥
लोकोपदेशजननं नाट्यमेतद्भविष्यति।
[भरतनाट्यशास्त्रे प्रथमाध्याय[...]

2. देवानामिदमामनन्ति मुनयः कान्तं क्रतुं चाक्षु[...]
रुद्रेणेदमुमाकृतव्यतिकरे स्वाङ्गे विभक्तं द्विधा[...]
त्रैगुण्योद्भवमत्र लोकचरितं नानारसं दृश्य[...]
नाट्यं भिन्नरुचेर्जनस्य बहुधाप्येकं समाराधनम्[...]
[मालविकाग्निमित्रम्, १[...]

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

किञ्चित् प्रेक्षणकमदर्शीति कालिदासः कुमारसम्भवे वर्णयति—

तौ सन्धिषु व्यञ्जितवृत्तिभेदं रसान्तरेषु प्रतिबद्धरागम् ।
अपश्यतामप्सरसां मुहूर्तं प्रयोगमाद्यं ललिताङ्गहारम् ॥[१] इति।

एवं कालिदासः भङ्गीभेदेन नाट्यवेदप्रणयनप्रदर्शन-प्रेक्षणेषु क्रमशः कवि-नट-सहृदयान् उन्मुखीकरोति। अयं कश्चिदेतदभिसंहित उपदेशः ।

'काव्यालापांश्च वर्जयेत्' इति स्मृतिवचनं पुण्य-चरिताननुबन्धि काव्यपरमिति सर्वे एव विजानन्ति। अन्यथा मधुमयभणितीनां मार्गदर्शिनो महर्षेर्वाल्मीके रामायणस्याऽपि विगीतता समापतेत। गायकाः सर्वेऽपि व्रात्या यदि भवेयुः, वाल्मीकिः किमिति कुशलवौ गेये व्यनैषीत्, स्वयञ्च तत्र कुतः प्रावीण्य-मधिजगाम? अतः स महर्षिर्लोकपावनस्य रामायणस्य प्रचाराय गानमेवोत्तमं साधनममन्यतेति मन्तव्यं भवति। यदि कश्चिद् ज्ञानपण्यो भूत्वा वणिगिव लोभलङ्घितो विद्यां विक्रीणीते, स तु निन्द्य एव। यद्यन्यस्तामेव विद्यां विश्वश्रेयसे आयोजयति, स शुद्धसङ्कल्पः प्रशस्य एव भवति। अतः कवि-गायक-नर्तकादयो जगत्कल्याणाय प्रयतमानाः प्रशंसार्हा एव।

आजन्म-शुद्धिः

अत्र कवेरभिनिवेशोऽतिमात्रः, तत्रैव कुलप्रतिष्ठा सुव्यवस्था भवति। धर्मसङ्ग्रह-मञ्जूषिकाया रघुवंशा-भिधानायाः कृत्या उपक्रम एव रघुवंश्यानां मूर्धाभि-षिक्तानां गुणविशेषान् सङ्गृह्णन् कालिदासः 'सोऽह-माजन्मशुद्धानाम्' इति ब्रुवाणः, सत्स्वपि बहुषु गुणेषु प्रतिपादनीयेषु एतेन विशेषणेन प्रथमतो निर्दिष्टेन जन्मशुद्धेः सर्वाभ्यर्हितत्वं पिशुनयति।

१. कुमारसम्भवः, ७.९१।

अथ जन्मशुद्धिः कोच्यते?—गर्भाधान-पुंसवन-सीमन्तोन्नयन-जातकर्म-नामकरणा-ऽन्नप्राशन-चौलोप-नयनादिभिः शिष्टक्रियाभिर्जनितः संस्कार इत्या-पाततो भायात्। भातु नाम, तावता जन्मशुद्धिः पूर्णा न भवति। जन्मान्तरीयैरपि संस्कारविशेषैः जायमाना शुद्धिः कालिदासेनात्र विवक्षिता। उद्भवा-नन्तरमुपपादिता अपि संस्काराः शुद्धिं सम्पादयितु-मलम्भूष्णव एव। पूर्वपुरुषाः पित्रादयः संस्कार-साकल्यपरिपूर्णाश्चेत्, आजन्मशुद्धिमाप्नोति तनयः। तथा जायमानः सः जन्मान्तरसम्भृतात् सुचरिता-दृते, तादृशात्पितुर्जन्म प्राप्तुं न प्रभवति। अतो जन्मान्तरीयसुचरितानुबन्धिनी किल स्वशुद्धिः, पितु-सकाशाल्लब्धा च सा, जातस्य कमपि महिमातिशय-मावहत्येव।

निगूढममुं तत्त्वं बोधयितुमेव कुशाग्रबुद्धिः कालिदासः कविकुलशिरोमणिः "आजन्मशुद्धानामिति प्रथमं प्रतिज्ञां कृत्वा तद्विशदीकरणोपयुक्तं कथाभाग-मुपरिष्टाद्घटयति। अन्यथा हि कथं दिलीपवृत्तान्त-वर्णनस्य सङ्गतिः? 'रघूणामन्वयं वक्ष्ये' इति हि काव्यार्थ-प्रतिज्ञा। अतिशयित-महत्त्वशालित्वेन हि रघूणां वंशस्य व्यपदेशः। नहि दिलीपवंश इति व्यपदेशं कविरिहेच्छति। तथाप्रसिद्धस्य रघोः कः पितृवृत्तान्त-वर्णनेन अतिशयः साधयितुमिष्यते, विना जन्मनः शुद्धिम्?"

ईदृशी जन्मशुद्धिः कवेर्भृशमभिमतेति—'क्व सूर्य-प्रभवो वंशः', 'वैवस्वतो मनुर्नाम······प्रणवश्छन्दसा-

१. जन्मशुद्धिविचारे अयमनुवादचिह्नाङ्कितो (" ") भाग अन्ये केचनांशाश्च 'उद्यानपत्रिका'तः उदाहारिषत। एतत्पत्रिकासम्पादकेभ्यः पण्डितराजेभ्यः श्रीमद्भ्यः दे० नि० तातचार्यमहोदयेभ्यः कृतज्ञता निवेद्यते।

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

मिव', 'तदन्वये शुद्धिमति प्रसूतः शुद्धिमत्तरः' इत्यादिभिर्वचनोपन्यासैः प्रतिपदं द्योत्यत एव। एवमुत्पत्तिपरिपूत एष पुत्रः 'पुनातीति पुत्र' इति व्युत्पाद्यतां, पुन्नाम्नो नरकात् त्राणकर्तृताञ्च लभते। सर्वैरपि जन्मशुद्धेराशास्यत्वात् प्रजार्थे गृहमेधिभिः प्रयतैश्च भाव्यम्। स्वयं पितृभ्यामाजन्मशुद्धाभ्यां भवितव्यम्। तदैव च जायमाना प्रजा आजन्मशुद्धा, वंशप्रतिष्ठानिर्वहणदक्षा च सम्पद्यते। एवं जन्मशुद्धिमपेक्षमाणैः जागरूकैः [1]'कुलस्त्रियोऽपि रक्षणीयाः। तत्र चोपायाः महर्षिभिः बहुधोपन्यस्ताः। तदैव कुलक्षयः परिहृतो भवति। सर्वथा रक्षिताः कुलस्त्रियः त्रिकरणशुद्धया भर्तारमनुगच्छन्त्यो भावदोषस्पर्शलेशाभावादेव सर्वथा पितृसदृशमेव पुत्रं प्रसुवते। पश्यत—

"रूपं तदोजस्वि तदेव वीर्यं तदेव नैसर्गिकमुन्नतत्वम्।
न कारणात्स्वाद्बिभिदे कुमारः प्रवर्तितो दीप इव प्रदीपात्॥'

एतल्लक्ष्यसाधनायैव प्रसन्नैस्त्रिकालज्ञैर्महर्षिभिरप्याशीः प्रयुज्यते—'पुत्रमेवङ्गुणोपेतं चक्रवर्तिनमाप्नुहि', 'पुत्रं लभस्वात्मगुणानुरूपं भवन्तमीड्यं भवतः पितेव' इत्यादीनि वचनान्यत्र उपोद्बलकानि स्मारयामि। तथा प्रधानभूता जन्मशुद्धिः रघुवंशे, विशिष्य शाकुन्तले कया विधया समभिव्यञ्जितेति किञ्चिदिव निरूपयितुमुत्सहे।

रघोर्जन्मशुद्धिं द्योतयितुं दिलीपो निखिलगुणमणिगणपरिकर्मितो महता ग्रन्थेनाऽभ्यवर्णि। तस्य परमधार्मिकत्वं बहुधाऽभ्यधायि। महान्तमनेहसं अदृष्टसदृशप्रजः स भृशं चिखिदे। सर्वा दुस्साधा अपि सिद्धयः वसिष्ठस्य महर्षेरनुग्रहेण सुसाधा भवेयुरिति मेने। आश्रममासाद्य मुनिं प्रणनाम। महर्षिश्च राज्ञे ससान्त्ववचनमुपायमुपदिदेश। नृपतिश्च तदाज्ञया नन्दिनीमतन्द्रः परिचचार। कष्टसाध्यां नियमसरणिमनुससार। नन्दिनीपरिकल्पितां परीक्षासरितमुत्ततार। प्रसन्नया च कामगव्या आदिष्टं दुग्धं वत्सहुतावशेषमसतितृष्णः पपौ। एवं धर्म्येण पथा सञ्चरमाणात् राज्ञः सञ्जातस्य वत्सस्य रघोः आजन्मशुद्धौ शङ्कागन्धोऽपि नोदियादेव। रघुरप्येवमेव उपरिष्टात् वितरणगुणविवशीकृतेन कौत्सेन आशिषाऽभिनन्दितः। 'परं हि दैवतमृषयः!' तेषामाशीर्वादाः फलिता भवन्त्येव।

अद्य दुष्यन्तमुपसर्पामः। 'अहो मृगानुसारी साक्षात् पिनाकी स राजते!' अत्र राज्ञः पिनाकिसादृश्येन कविना किं विवक्षितम्? बह्वस्ति, वशिनां प्राग्रहरो हरः। सोऽपि शैलाधिराजतनयामुपयेमे। कुतः? किं सुखलोभेन? तत्तु न सङ्गच्छते; यतः [1]"विदितं वो यथा स्वार्था न मे काश्चित् प्रवृत्तयः" इति शम्भुः स्वयमेव व्याजहार। अतः स देवानुग्रहीतुमेव तथाऽकरोत्। अयमपि राजा वशी धर्मानुवर्तनशीलः पितृदेवताराधनायैव परिणयाय प्रवर्तिष्यते इति सूचनमुपमायाः प्रयोजनम्। अयमंशः उपरिष्टात् पुनः स्पष्टीकरिष्यते।

अभिमानधनो दुष्यन्तः। मृगमनुधावन् सुदूर-

---

१. कुलक्षये प्रणश्यन्ति कुलधर्माः सनातनाः।
धर्मे नष्टे कुलं कृत्स्नमधर्मोऽभिभवत्युत॥
अधर्माभिभवात्कृष्ण प्रदुष्यन्ति कुलस्त्रियः।
स्त्रीषु दुष्टासु वार्ष्णेय जायते वर्णसङ्करः॥
सङ्करो नरकायैव कुलघ्नानां कुलस्य च।
पतन्ति पितरो ह्येषां लुप्तपिण्डोदकक्रियाः॥
[भगवद्गीता, १.४०—४२]

१. कुमारसम्भवात्, ६.२६।

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

मगमत्। स च मृगो वञ्चयन्नेव तं महान्तं कालमनयत्। तथा पराभूतः क्रुद्धो दुष्यन्तः तस्य वधाय धनुष्यमोघं समधत्त बाणम्। अत्रान्तरे सम्प्राप्तास्तपस्विनः 'आश्रममृगोऽयं न हन्तव्यो न हन्तव्यः' इत्याचुक्रुशुः। क्षणेन शस्त्रमुपसंहृतम्। अत्र पौरवेण प्रदर्शितो निग्रहो निस्तुलः। तत एव प्रसन्नेन वैखानसेन—

> जन्म यस्य पुरोर्वंशे युक्तरूपमिदं तव।
> पुत्रमेवङ्गुणोपेतं चक्रवर्तिनमाप्नुहि॥

इत्याशिषा सोऽभिनन्दितः। इतराभ्यां मुनिभ्यां 'सर्वथा चक्रवर्तिनं पुत्रमाप्नुही'ति वदद्भ्यां आशिषोऽधिकं बलमुपनीतम्। दुष्यन्तश्च सप्रणामं ब्राह्मणवचनं प्रत्यगृह्णात्। सत्यवचनास्तपस्विनः। तेषां वाचमर्थोऽनुधावति। मुनिवचनेषु कालिदासस्य नाऽऽशीर्वादबुद्धिः। अपि तु वर इत्येव विश्वासः। 'वरौ खल्वेतौ, नाऽऽशिषौ' इति गौतमी एतत्कथयति। उत्तरस्मिन्नेव क्षणे साऽऽशीः कार्योन्मुखी बभूवेति 'इदानीमेव दुहितरं अतिथिसत्काराय नियुज्य ⋯कुलपतिः सोमतीर्थं गतः।⋯⋯प्रतिगृह्यतामतिथिसत्कारः' इत्यादिभिर्वाक्यैर्व्यज्यते। अत आरम्भदशायामेव 'जन्म यस्य' इत्यादिश्लोकं निबध्नता कविना जन्मशुद्धेः सूत्रपातश्चक्रे।

केचनाऽत्र दुष्यन्तस्य चारित्रे सन्दिहते। 'प्रथमदर्शनमात्रेण अज्ञातकुलशीलायां मुनिकन्यकायां युक्तानुरागो दुष्यन्तः प्रागल्भ्यमास्थाय, प्रवेशमुपलभ्य, मुनिकन्यकाभिः परिचयं सम्पाद्य, ताभिस्तास्ताः कथाः कुर्वन् स्वभावोत्तानहृदयां शकुतलां मनोभववशवर्तिनीं विधाय, तातेऽप्यसन्निहिते, प्रलोभेन प्रतार्य आत्मनोऽभिलाषमपूरयत्। अत्र नायकः कामवासनादूषितः इदमकृत्यमकार्षीत्। एवमधर्म्यसङ्कल्पनिर्वृत्तोऽयं विवाह इति, ततो जायमानस्य पुत्रस्य जन्मशुद्धौ सन्देश उपजायते इति?

नैतद्विचारसहम्। दुष्यन्तोऽवलोकनमात्रेण मुनिकन्यकायां चक्षुःप्रीतिमान् अजनिष्ट। 'यस्यां मनश्चक्षुषोर्निर्बन्धस्तस्यामृद्धिः'। तावता नो हानिः। 'सर्वजनमनोभिरामं खलु सौभाग्यम्? अप्सरस्सम्भवायां सौन्दर्यस्य का न्यूनता? ततो गच्छति काले अङ्कुर-पल्लव-कलिका-प्रसून-फलादिरूपेण प्रणयस्य परिणामोऽभूत्। परन्तु दुष्यन्तः किमेतत्सर्वं धर्ममार्गमुल्लङ्घ्यैव समपादयदिति किञ्चिदिवाऽऽलोचनीयम्। 'अपि नाम कुलपतेरियमसवर्णक्षेत्रसम्भवा स्यात्!' इति सन्दिहानः किञ्चिद्विललम्बे। कुतः? स्मृत्यादिवैरुद्ध्यमाकलय्य। सा चेन्मुनेरौरसपुत्री स्यात्, तत्र नाऽऽत्मनः प्रवृत्तिरुचितेति शकुन्तलाप्रणयवृत्तान्ताय जलाञ्जलिं दद्यादेव। दिष्ट्या तस्य मनः उचिते एव वस्तुनि प्रावर्तत। 'न परिहार्ये वस्तुनि पौरवाणां मनः प्रवर्तते!'

अवनिपतिरप्यात्म परीक्षां तनोति। 'असंशयं क्षत्रपरिग्रहक्षमा यदार्यमस्यामभिलाषि मे मनः' इति। सात्त्विकाहङ्कारदत्तावलम्बो निश्चिन्वन्नपि विद्यावितीर्णेन विनयेन 'तथाऽपि तत्त्वत एनामुपलप्स्ये' इति प्रतीक्षते। तस्या जन्मवृत्तान्तमधिगच्छति। यद्ययं ब्राह्मणीमेव परिणेष्यति तदा काचन विलोमजातिः आत्मना समेधिता स्यात्। शासकेन सता तेन न तत्कर्तुमुचितम्। 'पथः श्रुतेर्दर्शयितार ईश्वरा मलीमसामाददते न पद्धतिम्।' 'ब्राह्मण्यजीजनत्पुत्रान् वर्णेभ्य आनुपूर्व्याद् ब्राह्मणसूतमागधचाण्डालान्' इति गौतमधर्मसूत्ररहस्यं राजा वेद। ब्राह्मण्यां क्षत्रियाज्जातः सूतः विलोमजातिः अतोऽत्र जागरूकतां स वहत्येव। (क्रमशः)

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

पूर्वतोऽनुवृत्तम् : २६

छत्रपति-महाकाव्यम्

—श्री उमाशङ्करशर्मा त्रिपाठी—

[आंग्लभाषा-प्राध्यापकः—काशीविद्यापीठम् , वाराणसी]

यत्र स्थितस्य सुखदुःखविभेदमुक्तः
स्वान्तःप्रतीतिपरमो मनसः समाधिः।
कालत्रिदोषमवजित्य धिनोति कोऽपि
तत्सूतिरस्तु चषकः सततं गतिर्नः ॥६२॥

दासो धनेन रहितः सजरः श्लथाङ्गः
सद्यःफलां भगवतीं मदिरामुपास्य।
वीतं निहत्य रमते नवसर्गकल्पः
स्वामी धानी नवयुवा त्वरयाऽनुलीढः ॥६३॥

आरोपितोषधिधुरुद्यमनिस्सहार्ति-
स्वेदोत्करश्लथगतिस्थगिता 'नुभावम्।
लब्ध्वाचिरावनिनिखातसुराऽभिषेकं
सद्यो मनः सहजलाघवमभ्युपैति ॥६४॥

सूक्ष्मैव काऽपि सरणिस्तवदण्डतन्त्रे
स्वस्थे वपुष्यपि जनो विकलान्तरात्मा।
मूढोऽवसीदति करीव निलीनपङ्को
हित्वा मनोज्ञविषयानकुतःप्रसादः ॥६५॥

दण्डो निरागसि कृपा चपलेऽपपात्रे
रक्ते विरागमधिकं विमुखेऽनुरागः।
भिक्षुं मनोरथकथेव जनं दिधक्षु-
स्त्वं वर्धसे हृतविधेर्विधिरेव वामे ॥६६॥

१. 'स्तिमिता' इति पाठान्तरम्।

कोपो दुरागसि वरं जनशासनाय
सोढव्य एव हृदयं परमेजते मे।
श्यालः स्वसारमिव वीक्ष्य रुषारुणां त्वा-
मेषो ममान्तकविधिं विधुरातनोति ॥६७॥

पीयूषकुम्भवति ! किं वृणुषे विषादं
कोपैर्मनोज्ञ[1]हृदयेऽलमनात्मशीलैः।
मानोऽपमानकठिनासु तनोतु वर्त्म
क्षेमे क वाऽत्र भवती भवतीर्थकीर्तिः ॥६८॥

ज्योत्स्ना स्वरूपमिव पश्यति दीर्घिकासु
सम्मन्त्रयन्निव शनैरनिलोऽभ्युपैति।
कोलाहलः स्वपिति पौरपथे विपन्नः
कान्ते ! स्मरस्थितिरियं किमुपेक्षणीया ॥६९॥

लावण्य[2]दत्तमनसो वसुमत्प्रतिष्ठाः
भिक्षुव्रतान् मधुकरानवमत्य दिक्षु।
सन्तापयन्ति करुणं कमलश्रियो मा-
मस्तावलम्बिनि रवौ समयं स्मरन्त्यः[3] ॥७०॥

अन्योऽभिनन्दतु ममाऽऽर्जवकौशलादीन्
चित्ते गुणान् स्मरतु वाऽभिमतान् वियोगे।
धीमन् त्वमेत मम पार्थिवजातमेकः
सङ्क्रान्तवक्षसि विभर्ष्युदरे शरीरम् ॥७१॥

१. 'प्रसाद' इत्यपि पाठः।
२. 'गन्धकुटिला' इति पाठान्तरम्।
३. 'स्वहठं शपन्त्यः' इत्यपि पाठः।

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

तत्स्वागतं प्रतिपलं मम भागधेये-[1]
धिङ् मां यदर्थमयि संकुचितं त्वयाऽपि ।
श्रेष्ठिन् त्वदीयजठरे परिरम्भसुप्ता
मत्प्राणतुन्दिलपितामहमास्मरामि ॥७२॥

क्षोणीव भीषणवराहरदाग्रलग्ना
शक्रद्विपोल्लसितदन्तगतेव माला ।
त्वत्तुन्दिलोदरनभस्युदितेन्दुलेखा
मा कातरा पततु हेमगिरे गृहाण ॥७३॥

कामं सदुद्यमरताः रमयन्तु लक्ष्मी
प्रीताऽथ पौरुषरताऽभिसरेत् स्वयं सा ।
त्रीण्येव वासभवनानि तथापि तस्या
अम्भोनिधिश्च भगवांश्च महाजनश्च ॥७४॥

रत्नाधिपाः प्रसभरत्नमुषो मिथस्त्वां
वीतागसश्च कलुषाधमवर्त्मभाजः ।
मूढाः विदग्धचरिताश्च भजन्ति नित्यं
सृष्टिं विधेरिव विरोधिगुणप्रबन्धाम् ॥७५॥

नित्यातिथिर्न कृपणो न परासुरक्तः
श्रेष्ठी तथापि रमते त्वयि नेति चित्रम् ।
किंस्वित् स्वयं शुक इवाभिमुखं विकारां
जेतुं व्यवस्यति चलेन्द्रियवाजिकल्पान् ॥७६॥

दृष्ट्वा व्यपेतवसनोरसमर्कतेजाः
गाधेः सुतोऽपि न शशाक मनो नियन्तुम् ।
अद्याऽपि मोहिनि तवाञ्चलवीजितास्ते
स्वस्था महाजनसुता इति कौतुकं मे ॥७७॥

चारित्र्यचारुविभवै - रभितर्प्य लोकं
बद्धास्यगौरिव बलादवरुद्धचेष्टः ।
सम्प्रीणयत्यपभयं स्वमनो बुधोऽसौ
क्षेत्रे चरन् तमसि वासरबन्धमुक्तः ॥७८॥

यन्नामसंस्मरणदग्ध - समस्तबन्धो
मत्तो विलङ्घ्य विमुशाक्रकृतान्तसन्धाम् ।
त्वामेकशासनबलां श्रयतेऽस्तशङ्कः
सा किं सुरा[1] नृपभयादपि निन्दनीया ॥७९॥

कामं निषेधतु वृको[2] मधुपानगोष्ठीं
शूलेन निर्दहतु वा विटचेटपण्डान् ।
कम्रस्तनार्पितकरेण शपेऽङ्कपीठे
नामैव ते त्रिदिवदुर्लभवारुणी मे ॥८०॥

पीता सुरा हरतु विस्मृतवर्त्मचित्तं
नृत्यन्तु पामरधियः क्षणमात्रमत्ताः ।
काऽपि स्थिरा तवदृशोर्मदिरेव वामे
यद्वीक्षिता हि सुधियोऽपि हठात् पतन्ति ॥८१॥

प्रीतिर्निबद्धनियमा गृहमेधिनीषु
भावाहतेऽपि हतमूढविधेः प्रबन्धः ।
मुक्तस्यदस्तु कनकासवमर्दितासु
स्नेहो दधातिपदवीं परमाममर्त्याम् ॥८२॥

यच्छृङ्गयुग्मकठिनौ त्वदुरोऽधिरूढौ
तत्कौतुकं हिमवतो महतोऽपि वीक्ष्य ।
पाथोधिकल्पमुदरं सृजता विधात्रा
मैनाक एव नियतं परिदर्शितोऽस्ति ॥८३॥

वेल्लत्तरङ्गमवतीर्य पयोधिपूरं
शक्तोऽधिरोहतु तटाद्रिशिरस्स्थलीषु ।
उच्छ्रायपातशतवीचिकुलाकुलं ते
सन्तीर्य कोऽलमुदरं श्रयितुं स्तनाद्रिम् ॥८४॥

घोरस्वनोत्सुकजगन्नयनोत्सवं ते
वक्षोहरं जठरमाहतजानु वीक्ष्य ।
त्रैलोक्यजातमुदरे यदि विश्वमूर्तिः
पूर्वं दधौ कथय काऽतिशयोक्तिरत्र ॥८५॥

(क्रमशः)

---

१. 'भाग्यदोषैः' इत्यपि पाठः ।

१. अवरंगजीवो मुगलमहीपतिः । २ अवरंगजीवः ।

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

लुण्ठिते वेश्मनि यामिक-जागरणम्

—श्री हरिद्वारस्थो हरिप्रियः

श्रीमन्मध्वाचार्य-विद्यामान्यतीर्थस्वामिचरणकृतात् जेतृभ्यः पञ्चसहस्रमुद्रादान-प्रतिज्ञापूर्वकादाह्वानादनन्तरं हरिद्वारीया द्वैताद्वैताचार्यकथा संवृत्ता। अतः सा सम्पन्ना विजिगीषुकथा। समयबन्ध-मध्यस्थादिवरणेषु वादि-प्रतिवादि-मध्यस्थहस्ताक्षरैः सम्पादितेषु सा प्रवृत्ता। एवं स्वयं समयं बद्ध्वा मिथः सम्प्रतिपत्त्या प्रवर्तनात् विजिगीषुकथायाः जय-पराजयावधारणपर्यवसायित्वाच्च सम्प्रतिपन्नमध्यस्थेन यदीयवाग्व्यवहारे समयबन्धनियमेन नोक्तमिति अवगम्यते स्म, तस्य पराजयः मध्यस्थकर्तव्यत्वात् मध्येसभमुद्घोषितः। तावतैव प्रक्रान्तविजिगीषुकथाया अन्तः।

तत्र यदिदानीं 'न स्वाचार्यविरुद्धमुक्तमिति यत्किञ्चिद्'द्वारा राघवेन्द्रीयटीकापङ्क्त्यादिकमुदाहृत्योदाहृत्य सिषाधयिष्यते तस्य कोऽवसरः? विरुद्धमुक्तमिति समयबन्धोल्लङ्घने वादिनोद्भाविते तदानीमेव कथायामेवैताः पङ्क्तीरुदाहृत्य अविरोधोद्भावनं कर्तव्यमासीत्। तथा अकृत्वा तदानीं तासामनुद्भावनमेव कृतं तदधुना शतश उद्घोषणेऽपि कथं निवर्तेत? कथायामेव हि उद्भावने निग्रहानिग्रहौ, न पुस्तके स्थितमात्रेण यदा कदाचिदुद्भावनेन वा! विजिगीषुकथेयं श्रीविद्यामान्यतीर्थस्वामिभिरेव 'जेतृभ्य' इत्युदाहृत्य स्वयमाहूता, न वादकथा। तत्रापि 'नेदं विरुद्धभाषणमि'ति न प्रतिज्ञामात्रेण। किन्तु टीकापङ्क्तीरुदाहृत्य सहेतुकं प्रतिज्ञानिर्वहणेन उद्भावनीयोऽविरोध आसीत्। तत्र विषये अभाषणमेव तदानीं कृतम्। उत्थाय गतम्। इदानीं किमुद्भावनेन?

यैरप्यधुना श्रीशङ्कराचार्येति श्रीवीरराघवाचार्येतिप्रमुखैः उभाभ्यां कथायामवृतायै दूरगमध्यस्थीभूत्यै प्रयासः क्रियते तैः पुस्तके स्थितमात्रेण काले सहेतुकमनुद्भावितेऽपि विजिगीषुकथायां निग्रहानुग्रहौ व्यवस्थाप्येते! तर्हि ते तत्रैवोद्गिरन्तः पुरस्सरन्तु। अथवा किं तैरुच्यते—श्रीविद्यामान्यतीर्थैः कथायामेव सहेतुकमविरोध उद्भावित इति? तथा चेत्तदुच्यताम्। टेपरेकार्डयन्त्रं व्यवस्थापयिष्यति। अधुना किं तेषां गम्भीरभद्रमुद्रया! आसुराद्वैतमतमुत्सयतः पृष्ठघट्टितमतीभूय विनिद्रया!

विजिगीषुकथायामुद्भावितस्य निग्रहस्य वास्तवत्वं न वेति नहि सम्प्रति प्रश्नः। किन्तु कथमप्युद्भाविते तत्र प्रतिवादिना कथायामेव सहेतुकं पङ्क्तीरुदाहृत्य अयथार्थत्वमुद्भावितं न वेत्येव प्रश्नः। मध्यस्थेन सम्प्रतिपन्नेन तत्परीक्ष्य तथा अनुद्भावनात् पराजय उद्घोषिते कस्तत्र पक्षपातगन्धः? काले प्रतिवादिनः स्वकर्तव्यच्युतौ किमिदानीं दूरगैर्मध्यस्थीभूय तत्र सम्प्रति प्रतिपत्तुं शक्यते! किं च तत्राकृष्य जातिदेशभाषाभूषा - दिशादशाद्वैतसुरासुरत्वभेदाभेदवृथाकथया?

अपि च—नाप्येते उभाभ्यां वृता मध्यस्थाः, न वा सर्वोच्चन्यायाधिकरणवत् राज्ञा अस्माकं सर्वेषामुपरि नियुक्ता एते, येन स्वीकरणीयत्वनिर्बन्धः। नाप्यधुना कार्यम्। कृतमुभयसम्प्रतिपन्नमध्यस्थेन यथासमयबन्धं कार्यम्। नात्र किमपि कुत्रचिद् येन परावर्तेत।

अधुना 'एवमर्थस्तन्मतेऽपसिद्धान्तो न वेति वा, तादृशमन्यद्वा किमपि विप्रतिपत्त्यन्तरमादाय कौचन वादिप्रतिवादिनौ तान् मध्यस्थत्वेन वृत्वा कथां प्रविवर्तयिषेते तर्हि तत्कथान्तरम्। न तेन वृत्तं निवृत्तयेत्।

प्रत्युत सम्प्रति अन्यकच्छावलम्बनेन तद्द्वारा पङ्क्तीरुदाहृत्य अविरोधोद्भावने प्रयतनं प्राप्तकाले कृतस्यानुद्भावनस्य स्वतः स्वीयैरन्यदीयैश्च दृढीकरणमेव भवतीति दरमुकुलितनयनं चिरं विचिन्त्य विरम्य चेतः सर्वैः हरिश्चिन्त्यताम्। ॐ शान्तिः शान्तिः शान्तिः।

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

कल्पनापोतं कहानीतिवृत्तम्

— श्रीमधुसूदन शास्त्री —

[साहित्यविभागाध्यक्षः - संस्कृतमहाविद्यालयस्य, हि० वि० वि०, वाराणसी]

अस्ति सुरसरितः सलिलसम्पृक्तसमीरसञ्चार-पूतान्तराले तीरे साहित्यसुधास्वादनासादितसौहित्यस्य कस्यचित् पटीयसो महाकवेर्महीयसी स्वाध्याय-मही । यत्र हि तस्य शिष्याः प्रशिष्या उपशिष्याश्च सहस्रशः साङ्गान् सरहस्यान् चतुरो वेदानध्यैषत ।

अथैकदाऽऽषाढवलक्षपक्षे
क्षपाकरक्षान्ततमःसमूहा ।
गुरोः सपर्यातिथिपूर्णिमापत्
सम्भूय तस्यां सुगुरोर्निवासे ॥

'तद्विद्धि प्रणिपातेन परिप्रश्नेन सेवया' इति श्रीमद्-भगवद्गीतोक्तिमनुसरन्तस्ते प्रणिपातपरायणाः सेवाया-मुपतस्थुरुपतुष्टुवुश्च गुरुम्—

अयि स्वीयानुभावपरिभावितामावमहानुभाव, चातुर्य-माधुर्य - धैर्य-स्थैर्य - सौन्दर्य-सौकुमार्य - मर्यादा-दया-नया-ऽऽचार - दाक्षिण्य - तितिक्षादि-गुणग्रामाभिराम, मधुमथन-चरणस्मरण-परिणतागणित-पुण्यजन्या-नन्यसामान्यवैभवाधिवास ! अतिमात्रमत्र भवतो भवतः सेवासमवसरः संसारमरुसञ्चारसम्भूतप्रभूत-खेदानामधीतवेदानां कोविदानां तथा सुरगवीसमुपासकानामन्तेवसतां काशिनिवासिनामस्माकमकस्माद् अजनि सुधाकादम्बिनीकदम्बसम्बन्धः ।

किमनल्पजल्पनया ? निःसन्देहं निःशेषमहोदयानां भूमिमभ्यास्महे ।

यतो हि सदसद्विचारचातुरीचतुर - चतुराननस्य, वरिवसित - सरस्वती - वरप्रसाद - समासादित - महित-महिम्नो, मानोन्नताऽन्तेवासि-वासनोचित-व्याख्यानस्य, सङ्ख्येय - सङ्ख्यावत्सङ्ख्यायां मुख्यतया लिख्यमानस्य श्रीमतः समधिगम्य सेवावसरं वेदम्, वेदान्तम्, निःसीमां मीमांसाम्, कणादाक्षपादाभ्यां प्रवर्तितेऽवदाते विद्ये, सङ्ख्यातं साङ्ख्यम्, सुयोगं योगम्, गुणानां साहित्यं साहित्यम्, तत्तद्रसप्रसवित्वं कवित्वं विमर्शोऽथ च आपातप्राञ्जल-पातञ्जलजलधि-मपि सन्तरामो वयम् । यथेदमनुवदति पद्यमिदम्—

चिन्तामणिश्चिन्तितमेव सूते
कल्पद्रुमः कल्पितमेव दत्ते ।
सा कामधेनुर्द्रवतेऽन्यसङ्गाद्
भवन्ति चिन्तादिमपेक्षते गुणी ॥

एवं परिणतगुरुगुणोदयाः सर्वे स्व-स्व-स्वाध्यायविधिना समेधमाना गुरोर्यशांसि परितो विसारयामासुः ।

[षट्षष्टिपरकैकोनविंशतितमे ईशवीये सितम्बर-मासस्य पञ्चमतारिकायां राष्ट्रपति-राधाकृष्णन् महोदयस्य जन्मदिवसे तेष्वन्यतमः शिष्यो गुरोः प्रकोष्ठे प्रविश्य]

शिष्यः—गुरवः ! दश वादनवेला प्रसरति । कालेज-गमनं न त्वरयति भवतः । तत्किमिति ? इदानीं यावत् किमनुसन्धाय कार्यान्तरे व्यापृण्वानैः स्थितम् ?

गुरुः—किस्सा-कहानी-लेखने व्यापृतेन मया समयगवयः पुरतो धावन्नपि नावलोचितः ।

शिष्यः—किं किं किस्सा-कहानी-लेखने ! किं 'कहानी'शब्दः, 'किस्सा' शब्दश्च संस्कृतौ ? इमौ तु हिन्दीभाषायां वर्तेते !

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

गुरुः—नहि भोः ! इमौ संस्कृताविव्येव न, अपितु सुसंस्कृतौ ।

शिष्यः—कथमेतत् ?

गुरुः—श्रूयताम् । 'एकः शब्दः सुप्रयुक्तः सम्यग् ज्ञातः स्वर्गे लोके च कामधुक् भवति' इति तत्र भवन्तो महाभाष्यकाराः समामनन्ति । तत्र 'सम्यग्'-ज्ञातः' इति पदं वर्तते । केवलं सर्वैः सर्वे शब्दाः व्यवह्रियन्ते, परं सम्यग् ज्ञानं सर्वेषां नास्ति । तादृशं ज्ञानं तु कवीनामेव । अत एवेदमुच्यते—

यानेव शब्दान् वयमालपामो
यानेव चार्थान् वयमुल्लिखामः ।
तैरेव विन्यास - विशेष - भव्यैः
सम्मोहयन्ते कवयो जगन्ति ॥ इति ।

शिष्यः—केयं प्रकृते विन्यासविशेष-भव्यता ?

गुरुः—समनुविन्दस्व स्वान्तं नितान्तं शान्तम् ।

शिष्यः—तथाऽस्तु ।

गुरुः—

या दुग्धाऽपि न दुग्धेव कविदोग्धृभिरन्वहम् ।
हृदि नः सन्निधत्तां सा सूक्तिधेनुः सरस्वती ॥

शिष्यः—'न दुग्धेव' इत्यस्य कोऽर्थः ?

गुरुः—अत्र 'इव'शब्द ईषदर्थे । तेन कवयो दोहनकर्तारः । तैर्दुग्धा निःसारितक्षीरा । तथापि ईषदपि दुग्धा न अमृतरहिता नीरसा न, अर्थात् सदा सरसा अमृतमयी च । अस्तु, प्रकृतमनुसरामः ।

'कहानी' इतिशब्दः सुसंस्कृतः कथमित्युच्यते— 'कं शिरोऽम्बुनि सुखे चे'ति कोषात् सुखवाचकः 'क'-शब्दः । 'ओहाङ् गतौ' इत्यस्मात् 'ये गत्यर्थास्ते ज्ञानार्थाः' इत्यनुशासनात् ज्ञानार्थकात् ओकार-ङकारयोर्निवन्धयोर्लोपे 'हा' धातोः निष्ठा-'क्त'-प्रत्यये 'हानमि'ति निष्पद्यते । ततः 'क्तादल्पाख्यायाम्' (४.१.५१) इति पाणिनिसूत्रेण 'केन = सुखेन हानं = ज्ञानं यस्याः सकाशादि'ति विग्रहे अल्पाख्यायां 'ङीष्'-प्रत्ययः । तेन 'कहानी' इति शुद्धं रूपं सिद्ध्यति । या कहानी भवति, तत्र अल्पमेव आख्यायते । नेयं ग्रन्थरूपा, न च निबन्धरूपा वा ।

एवमेव 'किस्सा'-शब्दश्च 'कस गतौ' इत्यस्मात् भावे क्विपि 'कस्' इति निष्पन्नम् । ततो 'वुञ् छण् कठि'ति सूत्रस्थेन 'तृणादिभ्यः सः' इति विधानेन 'स'-प्रत्यये 'बहुलं छन्दसि (७.४.७८) इति पाणिनि-सूत्रेण आदेरित्त्वे स्त्रियां टापि 'किस्सा' इति रूपं निष्पद्यते । यथा—'भिस्सा' इति रूपम् । 'भिस्सा स्त्री भक्तमन्धोऽन्नमोदनोऽस्त्री सदीदिविरि'त्यमरः । एवं किस्सा, कहानी, संवादः, आख्यानम् , आख्यायिका, जातकम् इति सर्वे पर्यायाः ।

शिष्यः—आश्चर्यम् ! पूज्यपादाः, श्रीमद्भिः नवीनं व्याकरणं निर्मातव्यम् ।

गुरुः—किं भोः ! कर्तव्यं बहु, अल्पीयांश्च कालः । बोद्धव्यं बहु, प्राप्तव्यं बहु । पाणिनि-गोष्पदे येषां शब्दानां भानं न भवति, तेऽपि तु शब्दाः । यथा भगवत्पादशङ्कराचार्य - विरचिते महात्रिपुरसुन्दरीस्तवे—'परमशिवमहेले मज्जनागारमेहि' इति । अत्र 'महिला'-परपर्यायो 'महेला' शब्दः ('मेहरारू' शब्दः) । 'गृहाण कनकाञ्चितां तां तैत-पालिकां वरे' । कटकाग्रतो धारणीयं स्वर्णभूषणं 'तैत-पालिका' । निवेहि पदपङ्कजे कनकघुंघुरूमम्बिके' इति । इत्थं 'घुंघुरू' शब्दोऽपि तत्रैव दृश्यते । 'वस्तु-सन्दर्शनादूर्ध्वं लीला च्यावो हि लालचम् ।' णिजन्ता-ल्ललधातोरचि लालः । स्त्रियां टापि चेत् लाला । तत्र टाबन्त-लालोपपदाच् च्युधातोः 'अन्येभ्योऽपि दृश्यन्ते' इति भावे डप्रत्यये डित्वसामर्थ्यादभस्यापि

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

इकारस्य टेर्लोपे प्रत्ययलोपे 'लोपो व्योर्वली'ति च्यशब्दगत-यलोपे प्रातिपदिकत्वात् स्वोरुत्पत्तौ सोऽस्मि। सर्वमेतत् मन्निर्मिते संस्कृत-तदितरभाषा-शब्दानां समन्वयि-कोषे द्रष्टव्यम्, तत एवावधार्यं तेषां साधनमिति।

शिष्यः—माननीयाः! मम तु इदमेव ज्ञातमासीद् यत् 'किस्सा-कहानी' लौकिको विषयः, न शास्त्रीयः। सोऽपि आधुनिको, न प्राचीन इति। अस्मिन् विषये प्रकाशकिरणानुपक्षिपन्तु। निश्चप्रचमेतत् श्रीमन्तः किमपि लोकोत्तरमेव कथयिष्यन्ति।

गुरुः—आम्! अयं विषयोऽतिचिरन्तनः। कश्यपपत्नी दक्षपुत्री मनुरासीत्। तत एव मानवाः सम्भूताः। इयमेव मानवी सृष्टिः।

शिष्यः—आश्चर्यम्, आश्चर्यम्! मनुमहाराजतो मानवीसृष्टिः प्रवृत्तेति समुद्घोष्यते लोकैः। श्रीमद्भिः सर्वं पुनर्विस्मयकरमेव उच्यते।

गुरुः—किमत्र विस्मयकरम्? अज्ञानं तत्र कारणम्। दनुः, दितिः, अदितिः, कद्रुः, विनता कश्यपपत्न्यः। तत एव दनोरपत्यानि दानवाः। कद्र्व्या अपत्यानि काद्रवेयाः सर्पाः। विनताया अपत्यानि वैनतेयाः गरुडः, जटायुः, अन्ये च सर्वे पक्षिणः। दैत्याः आदित्याः यथा, तथा मनोरपत्यानि मानवाः। यथेदमुच्यते—'काश्यपी क्षितिः।' यस्य गोत्रज्ञानं नास्ति तस्य गोत्रः कश्यपः। न तु मनुमहाराजसन्ततिः मानवी। तथा चेत् सर्वं जगत् क्षत्रियं स्यात्, मनोः क्षत्रियत्वात्। एवं हि नाम ब्राह्मणत्वमेव हि लुप्येत। जहाहि इदम्।

[अत्रान्तरे कश्चित् प्रणमति–'कश्यपगोत्रः, पञ्चप्रवरः शुद्धबालोऽहं भो गुरो! भवन्तमभिवादये इति।]

गुरुः—आयुष्मानेधि सौम्य! श्री शुद्धबालशर्मन्! अयं कः? किं तव सहचारी?

शिष्यः—किं श्रीमद्भिर्न परिचीयते? अयं मणिबालमित्रं शुद्धबालः।

गुरुः—आम्, आम्! स्मृतम्, नितान्तं गुरुभक्तः। आस्तीकपितुः प्रतिच्छविरयमिति मया कदाचिदुक्तोऽसि त्वम्।

शिष्यः—स्मरामि, किन्तु श्रीमतामुक्तेः स्वारस्यं नास्वादितम्।

गुरुः—आस्वाद्यताम्! पुरा राजर्षेः परीक्षितः पुत्रो जनमेजय आसीत्। तेन हि कदाचित् स्वमातुर्मुखादिदं श्रुतं यत्तव पिता परीक्षित्, सर्पेण दष्टः पञ्चत्वमगमत्। तच्छ्रुत्वा रोषावेशाकुलः सर्पक्षयकरं यज्ञमातनिष्ये इति प्रतिज्ञातवान्। राज्याधिरोहणानन्तरं कदाचिद् राज्ञः सभाजनावसरे सङ्घीभूय समागतेभ्यो महर्षिभ्यः स्वाशयं न्यवेदयत्सः। महर्षिभिरनुमोदितः स तथा अनुतस्थौ। तदा सर्पैरनुभूतं समवेतैर्विचारितञ्च। अनन्तरं पितामहसम्मुखे सर्वं जनमेजयचिकीर्षितं समश्रावि, आज्ञाप्रतीक्षैरास्थायि च। पितामहेन संस्मृत्य बोधिताः सर्पाः—उतथ्यपुत्र आस्तीको युष्मान् अस्मद्विक्रमात् तारयिष्यति। उतथ्यो हि क्रोधाकुलः सन् स्वधर्मपत्न्यै 'तलाकं' दास्यति। पुनर्महता प्रार्थनेन पुत्रार्थमनुकूलितः पत्न्याः उदरं स्पर्क्ष्यति। कथयिष्यति च 'अस्ति गर्भः' इति। एवं स्पर्शमात्रेण आस्तीको नाम सुपुत्रः समुत्पन्नः। सर्पापसर्प! भद्रं ते, दूरे गच्छ महाविष! जनमेजयस्य यज्ञान्ते आस्तीकवचनं स्मर इति प्रसिद्धः। येन सर्पकुलक्षयाद् धृतास्ते सर्पाः। अयमपि परीक्षाभवने स्वासने उपविश्य 'कापीं' स्पृशति, अनुत्तीर्णताभयादात्मानं संरक्षति। तत एवेदानीमियं शुद्धबालः शास्त्री आचार्यश्च संवृत्तः। अत एवोक्तम्—आस्तीकपितुः प्रतिच्छविः। सोऽपि अस्पार्क्षीत्, अयमपि अस्पृशत्; उभावपि स्वस्वफलभाजौ सञ्जातौ।

शिष्यः—'तलाक' इति, 'कापी' इति च शब्दौ अतिशयं कमपि ब्रूतः। कः सः?

गुरुः—'अधः स्वरूपयोरस्त्री तलं स्यादि'त्यमरः। तत्र हर्म्यतले हर्म्यस्य अधोभागे इत्यर्थः। भूतले

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

पृथिव्यां स्वरूपार्थे सः। अक अग कुटिलायां गतौ। तलमकति अधो गच्छति येनेति अर्थे करणे घञि निष्पन्नः 'तलाकः' पृथक्-शय्येत्यर्थः।

आज्ञाभङ्गो नरेन्द्राणां विप्राणां मानभञ्जनम्।
पृथक्शय्या च नारीणामशस्त्रवध उच्यते॥ इति।

एवम् 'को ब्रह्मणि समीरात्मयमदक्षेषु भास्करे' इति मेदिनी। कमात्मानं स्वरूपम् आप्नोति अत्र लेख इति विग्रहे अणि निष्पन्नात् काप-शब्दात् 'टिड्ढाणि'-ति ङीपि 'कापी' इति सिद्ध्यति। को वाऽत्र विशेषः? नास्ति कोऽपीति।

शिष्यः—गुरवः, किस्सा-कहानीति वृत्तविषयकः प्रश्नस्तु सुदूरं पिहितः?

गुरुः—अहं किं कुर्याम्? त्वमेव व्यवधानं सञ्चारयसि। तवैव मध्ये मध्ये इदं किम्, इदं कथमिति पृच्छा जागर्ति। अहं तु किमपि रमणीयं कहानी-विषयकमितिवृत्तं श्रावयितुमुत्सुकोऽस्मि। शृणु तत्, सावधानो भव—

विश्वस्य प्रथमं पुस्तकम् ऋग्वेदः। तत्र प्रथम-मण्डले २४.१६५.१७०-७९ सूक्तेषु; तृतीये मण्डले ३३ तमे सूक्ते; चतुर्थे मण्डले १८ तमे सूक्ते; सप्तमे मण्डले ३३ तमे सूक्ते; दशमे मण्डले च १०, २७, २८, ५१, ५२, ५३, ८६, ९५, ११९ सूक्तेषु अजीगर्तपुत्रस्य शुनःशेफस्य स्वगतमापणम्, इन्द्र-मरुदगस्त्यानाम्, अगस्त्यस्य लोपामुद्रया धर्मपत्न्या शिष्यैश्च, इन्द्रादिति-वामदेवानाम्, वशिष्ठ-तत्पुत्रयोरिन्द्रस्य च, इन्द्रभार्गव-नेमानाम्, यम-यम्योः, इन्द्र-वसुकयोः, वसुक-तत्-पत्न्योश्च, अग्नि-देवगणानाम्, इन्द्रेन्द्राणीवृषाकपीनाम् उर्वशी-पुरूरवसोश्च संवादाः कथोपकथनात्मकाः विश्वस्मिन् सर्वप्रथमतया वर्तन्ते। इदमेव कहानी-मूलम्। संवादः, किस्सा कहानीति पर्यायाः इति तु पूर्वमेव प्रत्यपादि मया।

ततः उपनिषत्सु, महाभारते, पुराणेषु, उपपुराणेषु इयं विष्वग् दृश्यते। ततः परं बौद्धानां जैनानाञ्च जातकग्रन्थेष्वपि उपलभ्यते। ततो गुणाढ्यस्य बृहत्कथायाम्, क्षेमेन्द्रस्य कथासरित्सागरे च। दशकुमार-चरितम्, वासवदत्ता, कादम्बरी, भोजप्रबन्धः, पञ्चतन्त्रकम्, हितोपदेशः, वेतालपञ्चविंशतिः, उदयन-कथा ('उदयन-कथा कोविदा ग्रामवृद्धाः' इति मेघदूत-प्रामाण्यात्), नल-दमयन्ती, उषा-ऽनिरुद्धम्, दुष्यन्त-शकुन्तला—इत्येवं रूपेण महाविस्तृतोऽयं कहानी-संप्रदायः संस्कृते।

भाषायामपि विक्रमादित्यस्य सिंहासन-बतीसी, महाराजभर्तृहरेः वैराग्य-कथा, पृथ्वीराजस्य श‍ृङ्गार-कथा, आल्हा-ऊदलयोः वीरासमयी कहानी बहुधा प्रसृता। इदानीमपि तोता-मैना, उडनखटोला, छबीली भटियारिन, गुलबकावली, किस्स ए चार यार, अकबर-बीरबल इति प्रसिद्धाः कहान्यो वर्तन्ते।

आदित आरभ्य इदानीं यावत् साहित्यिक-वैज्ञानिक सांस्कृतिक-धार्मिकैतिहासिक-राजनैतिक-स्वाभाविक कलात्मक-विविधिरुचिभ्यो बहुविधास्ताः परिदृश्यन्ते।

तासु च क्वचिद् वस्तुनः चरित्रस्य शीलस्य शैलीरूपस्य, कुहचन अनुभवस्य, क्वचन अवदानस्य कर्मणः, कथञ्चिदाकस्मिकघटनानाम्, वातावरणस्य, कथायाः पात्रस्य, अवस्थाविशेषस्य, रसस्य, दैववशादुपस्थितस्य विलक्षणसंयोगस्य च प्राधान्यम्।

इदन्तु वश्येनावश्यमाश्वसनीयं यदासु सर्वासु कहानीषु यथ्यमुच्यते तत् कल्पनाकौशलं मुख्यं तथ्यम्। तदपि निसर्गसर्गवर्गीकृतमेकम्। प्रौढिम्ना समुपेतं द्वितीयम्। मुरारेस्तृतीयः पन्था इव तृतीयं मदीयं स्वभावकल्पनापोढम्।

श्रुतं त्वया कहानीतिवृत्तस्य शास्त्रीयत्वं, लौकिकत्वं प्राचीनत्वमाधुनिकत्वं वेति।

शास्त्रीयं लौकिकं वृत्तं प्राचीनं साम्प्रतं नु वा।
कच्चिदज्ञानकं नष्टं कहानीविषये तव॥

इमामेव कहानीं कश्यपपत्नी मनुः स्वसुःपुत्रेभ्यः स्वपुत्रेभ्यश्चाचकथत्। ततो लोके कहानी प्रावर्तिष्ट।

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

श्रीभारतधर्म-महामण्डल-शास्त्रप्रकाश-विभागद्वारा प्रकाशितानि पुस्तकानि

१.	धर्म-कल्पद्रुम प्रथम खण्ड	२)
२.	,, द्वितीय खण्ड	१।।)
३.	,, तृतीय खण्ड	२)
४.	,, चतुर्थ खण्ड	२)
५	,, पंचम खण्ड	२)
६.	,, षष्ठ खण्ड	३।।)
७.	,, सप्तम खण्ड	२)
८.	,, अष्टम खण्ड	३।।)
९.	धर्म-कल्पद्रुम द्वितीयखण्डसहित, रायल एडी०	५)
१०.	प्रवीण दृष्टि में नवीन भारत प्र० द्वि० खण्ड	२)
११.	नवीन दृष्टि में प्रवीण भारत	१)
१२.	साधन-चन्द्रिका	१।।।)
१३.	शास्त्र चन्द्रिका	१।।)
१४.	धर्म-चन्द्रिका	१।)
१५.	आर्य-गौरव	।।)
१६.	नीति-चन्द्रिका	।।)
१७.	धर्म-प्रश्नोत्तरी	।)
१८.	चतुर्दश-लोकरहस्य	।)
१९.	गीतार्थ-चन्द्रिका सजिल्द	३)
२०.	,, ,, अजिल्द	२।।)
२१.	सनातनधर्म-दीपिका	।।।)
२२.	धर्म-विज्ञान प्रथम खण्ड	५)
२३.	,, द्वितीय खण्ड	४)
२४.	,, तृतीय खण्ड	४)
२५.	सतीचरित्र-चन्द्रिका	२)
२६.	नित्यकर्म-चन्द्रिका	।)
२७.	धर्म-सोपान	।)
२८.	धर्मकर्म-दीपिका	।)
२९.	सदाचार-सोपान	—)
३०.	कन्याशिक्षा-सोपान	—)
३१.	ब्रह्मचर्य-सोपान	।)
३२.	साधन-सोपान	।।)
३३.	शास्त्र-सोपान	।)
३४.	उपदेश-पारिजात	।।)
३५.	कल्कि-पुराण	१।।)
३६.	पातञ्जल-योगदर्शन	३)
३७.	महामण्डल-रहस्य	१।।)
३८.	मन्त्रयोग-संहिता	१)
३९.	हठयोग-संहिता	।।)
४०.	तत्त्वबोध	=)
४१.	स्तोत्र-कुसुमाञ्जलि	।)
४२.	भगवद्गीता प्रथम खण्ड	१)
४३.	विष्णु-गीता	१)
४४.	सूर्य-गीता	।।)
४५.	शक्ति-गीता	१)
४६.	धीश-गीता	।।।)
४७.	शंभु-गीता	१)
४८.	संन्यास-गीता	१)
४९.	गुरुगीता	।)
५०.	कर्ममीमांसा-दर्शन प्रथम खण्ड	१।।)
५१.	,, द्वितीय खण्ड	२)
५२.	,, तृतीय खण्ड	५)
५३.	कर्ममीमांसा-दर्शनम् (संस्कृत)	२)
५४.	राम-गीता	२।।)
५५.	कहावत-रत्नाकर साधारण रायल	१०)
५६.	रामायण तुलसीकृत	१।।)
५७.	दैवीमीमांसा-दर्शन प्रथम भाग	३।।)
५८.	,, द्वितीय भाग	५)
५९.	त्रिवेदी सन्ध्या	।=)
६०.	गोव्रत-तीर्थमहिमा	।।)
६१.	मार्कण्डेय-पुराण प्रथम खण्ड	१)
६२	,, द्वितीय खण्ड	१)
६३.	,, तृतीय खण्ड	१)
६४.	ऋजु-पाणिनीयम्	।।।)
६५.	संगीत-सुधाकर	।)
६६.	पुराण-रहस्य	१।।)
६७.	संन्यासधर्म-पद्धति	१।।)
६८.	पातञ्जल-योगदर्शनम् (संस्कृत)	४)

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

पञ्जीकृतसंख्या एल० १८५१

सूर्योदयस्य नियमाः

पत्र-संहिता

१. 'सूर्योदय'-मासिकपत्रस्य वार्षिकं शुल्कं रूप्यकपञ्चकं वर्तते। धनादेश (मनीआर्डर) द्वारा तत्प्रेषणीयम्। बी० पी० द्वारा प्रेषणे ५० पणाः पृथक् प्रदेयाः स्युः।

२. आवर्षं गम्भीरसाहित्यसमन्विताः १२ अङ्काः प्रकाश्यन्ते। नवीनग्राहकत्वं प्रथमाङ्कतः (जनवरी-अंकतः) एव स्वीक्रियते। माध्यमिकेन केनापि अङ्केन ग्राहकत्वं न स्वीक्रियेत।

३. आंग्लमासस्य २६ दिनाङ्के 'सूर्योदयः' प्रकाशितो भवति, वारद्वयं संशोध्य ग्राहकेभ्यः स प्रेष्यते। अतस्तदलाभे पूर्वं स्वकीय-पत्रालयस्तदनागमनस्य निश्चयं कृत्वैव १० दिनाङ्कानन्तरं वयं सूचनीयाः।

४. लेख-कवितादीनां भाषा संयता, सरला, शुद्धा च भाव्या। प्रकाशनीय लेखादीनां स्पष्टाक्षरैः कर्गजस्यैकपृष्ठे एव लेखनमावश्यकम्। अस्वीकृता लेखादयः पोस्टविभागीय-चिटिका (टिकट) प्राप्त्यनन्तरं परावर्तयितुं शक्ष्यन्ते।

५. सम्पादकीय-विषयसम्बद्धे पत्र-व्यवहारे 'सम्पादकः' इति, व्यवस्थाविभागीय-पत्रव्यवहारे च 'व्यवस्थापकः' इति च स्पष्टं लेखनीयम्। तेन उत्तरलाभे मुधा विलम्बो न भवेत्।

विज्ञापन-शुल्कम्

सूर्योदये सुरुचिपूर्णं विज्ञापनं प्रकाश्यते। एकवारं तस्य प्रकाशनस्य शुल्कक्रमश्च अधोलिखितोऽस्ति। सार्वकालिकस्य दीर्घकालिकस्य च विज्ञापनस्य कृते विशेष-सौविध्याय पत्र-व्यवहारः कार्यः।

साधारणस्य प्रतिपृष्ठस्य	१००) रु०	साधारणस्य प्रत्यर्धपृष्ठस्य	६०) रु०
साधारणस्य चतुर्थांशपृष्ठस्य	३५) रु०	आवरण-चतुर्थपृष्ठस्य	२००) रु०
आवरण-द्वितीय-तृतीयपृष्ठयोः	१५०) रु०	प्रथमावरणपृष्ठे विज्ञापनं न स्वीक्रियेत।	

— सङ्केतः —

'सूर्योदय'-कार्यालयः, भारतधर्म-महामण्डलम्, जगतगंज वाराणसी।

सम्पादकः, प्रकाशकः, मुद्रकश्च—गोविन्द नरहरि वैजापुरकरः,
श्रीभारतधर्ममहामण्डलम्, जगतगंज, वाराणसी-कैण्ट।
मुद्रण-स्थलम्—मनोहर प्रेस, जतनबर वाराणसी।

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

सूर्योदयः

भारतधर्ममहामण्डलस्य
मासिकं मुखपत्रम्

वर्षम् ४३

अङ्कः ३

सम्पादकः
गो० न० बैजापुरकरः

मार्च
१९६७

वार्षिक-मूल्यम्
५) रूप्यकाणि

प्रत्यङ्क-मूल्यम्
अर्धरूप्यकम्

नाम्नापि नाम्नायते

या लक्ष्मीस्त्रिजगच्छरण्यचरणा तस्याः पतिर्यच्छरो,
यद्देयं निखिलैर्वदान्यनिवहैस्तद्यस्य जीर्णं धनुः ।
या संविच्छ्रुतिषु स्मृता रहसि सा यत्पादसंसेविनी,
स स्वामी मम दैवतं तदितरो नाम्नापि नाम्नायते ॥ १ ॥

यत्केशाग्रविलग्नमम्बु जगतां तीर्थं परं पावनं,
यद्वीर्यं भुवि दक्षिणेति विदितं यज्ञेषु सर्वेष्वपि ।
श्वानो यस्य तपस्विनां च जगतां कामप्रदा धेनवः,
स स्वामी मम दैवतं तदितरो नाम्नापि नाम्नायते ॥ २ ॥

वक्त्राब्जेषु पितामहस्य जगतां वक्षःस्थले श्रीपतेः,
सर्वाङ्गेषु शतक्रतोरपि दृढानुच्छ्रित्य जैत्रध्वजान् ।
संप्राप्तो मदनोऽपि यस्य निटिलज्योतिःपतङ्गायितः,
स स्वामी मम दैवतं तदितरो नाम्नापि नाम्नायते ॥ ३ ॥

प्राचीनेत्यधुनातनीति भुवने वाङ्नाम या यावती,
ताः सर्वाः परितः परीत्य चरणे यस्यायतीर्विश्रमम् ।
शृण्वन्नङ्गदतां गतः फणिपतिः शब्दागमं व्याकरोत्,
स स्वामी मम दैवतं तदितरो नाम्नापि नाम्नायते ॥ ४ ॥

'शिवोत्कर्षमञ्जरी'तः —श्री नीलकण्ठ दीक्षितः

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

अनुक्रमः

प्रपानकः	पत्रपुटम्	परिवेषकः
श्री त्रिगुणेश्वर स्तुति-नुती	६५	श्री अमृतवाग्भवाचार्यः
श्री महर्षि ज्ञानानन्दचरितम्	६६	श्री विन्ध्येश्वरीप्रसादशास्त्री
रत्नं समागच्छतु काञ्चनेन	६८	सम्पादकीयम् (अग्रलेखः)
नवशासकानामभिनन्दनानि	७०	सम्पादकीया टिप्पणी
भजनीयस्य शास्त्रैकसमधिगम्यत्वम्	७२	श्री पूज्य करपात्रस्वामिनः
(३) सुप्त-प्रबुद्धम् : खण्डकाव्यम्	७५	श्री स्व० लक्ष्मणशास्त्री तैलङ्गः
(२) शाकुन्तलीयं जीवन-दर्शनम्	७९	श्री न० च० वे० नरसिंहाचार्यः
जानकीजानेः वन-प्रस्थानम्	८४	श्रीलक्ष्मीनारायण द्विवेदः
(१) मानस-भारती : किष्किन्धाकाण्डम्	८५	श्री जनार्दन गङ्गाधर रटाटे
निखिलभारतीय-तीर्थानां पदयात्रा	८६	श्री धर्मदूतः गङ्गाप्रकाश ब्रह्मचारी
(३०) क्षत्रपति-महाकाव्यम्	९१	श्री उमाशङ्करशर्मा त्रिपाठी
पृथ्वीराजाख्यानकम्	९४	श्री विश्वनाथ त्रिपाठी

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

सूर्योदयः

श्रीभारतधर्ममहामण्डलस्य मासिकं मुखपत्रम्

रागद्वेषनिशाटनं विधुरयन् मोहं तमो नाशयन्,
तामिस्रं जडवादकैरवकुलं ज्ञानत्विषा ग्लापयन्।
विद्वत्कोकमशोकयन् नयसुधीरोलम्बमुन्मीलयन्,
सञ्जातः सुमनोमनो मधुरयन् सर्वत्र सूर्योदयः ॥

४३ वर्ष] वाराणसी, फाल्गुनः २०२३ : मार्च १९६७ ई० [३ अङ्कः

श्री त्रिगुणेश्वर-स्तुतिनुती

आदर्शचिक्कणकपोलतलं सुनासं चञ्चद्बृहच्छ्रुवयुगं स्वलिनीलकण्ठम्।
भोगोपम - प्रथित-सुन्दरदीर्घबाहुं पद्मासने समुपविष्टमहं स्वतुष्टम् ॥ १ ॥
शान्तं त्रिनेत्रमलिकेऽब्जकलां वहन्तं नागेन्द्रचर्मवसनं भुजगोपवीतम्।
अन्तर्बहिश्च रमणीयतमस्वरूपं विद्यामृताभय-वराश्रय-दानदक्षम् ॥ २ ॥
गौरीं गणेशसहितां दधतं निजाङ्के गौरं प्रसन्नमुखमम्बुजलोचनाढ्यम्।
गङ्गां स्वमूर्धनि जटापटले दधानं ध्यायामि तं हृदि शिवं त्रिगुणेश्वरं स्वम् ॥ ३ ॥
ब्रह्मा हरिर्हर इति त्रिगुणीमतीत्य यस्तन्मयो वरकलो नयति त्रिलोक्याम्।
विश्वप्रपञ्च-कलनाचतुराय मह्यं तस्मै नमो भगवते त्रिगुणेश्वराय ॥ ४ ॥
यं वैद्यनाथ इति वैद्यजना वदन्ति मृत्युञ्जयं यमिह मर्त्यजनाः स्तुवन्ति।
शं काङ्क्षिणः स्वमिह शङ्करमामनन्ति, तस्मै............ ॥ ५ ॥
वाचो बृहस्पतिममुं निगदन्ति तिस्रो वेदत्रयी सततमेनमिह स्तवीति।
अग्नित्रयी ज्वलति यं श्रितवत्यजस्रम्, तस्मै............ ॥ ६ ॥
धामत्रयी परमधामनि साऽपि यस्मिन् विश्रान्तिमेति परनिर्वृतिभावरम्ये।
स्वेभ्यो ददाति कृपया तदपि प्रसन्नः, तस्मै............ ॥ ७ ॥
शक्तित्रयी घनतयाऽऽश्रयते यतोऽमुं तुर्योऽपि पञ्च तनुते सततं कृतीः स्वाः।
पञ्चाननः सुर-नरा-ऽसुरपूज्यसङ्घः, तस्मै............ ॥ ८ ॥
वैभूत्यवांस्त्रिदिव-सेवितपादपोऽद्य पाकार्थिनां विजयते सफलः परोऽर्थः।
वह्नीन्दुसूर्यनयनः परमार्थसारकल्पः श्रियोऽस्तु सततं त्रिगुणेशलीलः ॥ ९ ॥

स्वनिर्मितेन स्तोत्रेण प्रीणयँस्त्रिगुणेश्वरम्।
शमिच्छति समस्तानामाचार्यामृतवाग्भवः ॥ १० ॥

—श्रीमदाचार्याः अमृतवाग्भवाचार्याः—

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

श्रीमहर्षि-ज्ञानानन्दचरितं महाकाव्यम्

— श्रीविन्ध्येश्वरीप्रसादशास्त्री —

६१. स गौतमेन प्रतिपादितोऽमलो
न्यायाख्यया विश्रुत आदिमः स्तरः ।
तमाश्रयन् षोडशतत्त्वबोधतो
ज्ञानं प्रशस्तं विबुधोऽधिगच्छति ॥

६२. दृशं सुसूक्ष्मामधिगत्य वादतो
बुधेन नित्याः परमाणुसन्ततीः ।
अवेत्य चैशोऽनुमतः कुलालवत्
स चास्ति कर्ता जगतश्च मन्यते ॥

६३. स्तरेण चानेन जनस्य मानसे
परात्मबोधस्य सुबीजमुप्यते ।
अतोऽस्त्ययं 'ज्ञानद'-संज्ञया श्रुतः
समूल - मज्ञानतते - विनाशकः ॥

६४. स्तरो द्वितीयः स कणाद-दर्शितो
दधाति वैशेषिकनाम यो भुवि ।
विविच्य वैज्ञानिक - धर्मलक्षणं
पदं च नैश्रेयसिकं नयत्यसौ ॥

६५. बहूँश्च संन्यस्य पदार्थसङ्घा-
निहैकया केवल - धर्मसेवया ।
निदर्शयत्येष परात्मनः पदं
ततोऽस्ति 'संन्यासद'-नाम विश्रुतः ॥

६६ स्वचित्तवृत्तिप्रतिरोधशिक्षया
सदेकतत्त्वं परिचिन्त्य संयमात् ।
जगत्पतिं तस्य च शक्तिसंहतीः
पृथक् पृथग् योगिजनो निरीक्षते ॥

६७. पतञ्जलिर्यस्य निदर्शको मतो
ददाति योगं किल योगदर्शनम् ।
अलौकिकीं दर्शनशक्तिमर्पयन्
स्तरस्तृतीयो भुवि 'योगदः' स्मृतः ॥

६८. विचित्रया वै प्रकृतेर्हि लीलया
निबध्यमानाः पुरुषा निरन्तरम् ।
न चात्मरूपं परिचिन्वते ततो
भ्रमन्ति चक्रेऽत्र गमागमात्मके ॥

६९. अशेषविज्ञान-महार्णवोऽस्ति यो
विचिन्त्य चेत्थं कपिलो महामुनिः ।
अरीरचद् यद् भुवि सांख्यदर्शनं
स्तरश्चतुर्थो 'गुणबन्ध - मोचकः' ॥

७०. अतीव चित्रा भुवि कर्मणो गति-
र्न शक्यते बोद्धुमहो बुधैरपि ।
अनन्तब्रह्माण्ड-विलासि चिज्जडं
नियन्त्रितं वेद्यमनादिकर्मणा ॥

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

७१. समस्तविश्वं प्रकृतेः परात्मनो
ह्यभेदरूपं परिचिन्तयन् दृशा ।
प्रधानता कर्मण एव विद्यते
जगत्प्रपञ्चेष्विति मन्यते बुधः ॥

७२. अनेकधा कर्मकलापलापकं
भवे भरद्वाजमुनि - प्रवर्तितम् ।
जगत्समग्रं परमात्मरूपभृत्
सुमन्यते तत्खलु धर्मदर्शनम् ॥

७३. अनन्तविश्वं हि सतः पदं स्मृतं
ततोऽस्ति तत् सत्यपरात्मरूपकम् ।
प्रदर्शयत्येष जनानतो मतः
स 'सत्पदाख्यो' भुवि पञ्चमः स्तरः ॥

७४. महर्षिणा जैमिनिना विनिर्मितं
सुदर्शनं श्रौतविधानसम्मतम् ।
तदप्यदो यत्र विधेः प्रवर्तकं
विबोध्यमास्ते किल पञ्चमे स्तरे ॥

७५. उपासना - दर्शनमेकमद्भुतं
जगत्सु यच्चाङ्गिरसं प्रचक्षते ।
स्तरो हि षष्ठः प्रतिपादितो बुधै-
र्यमाश्रितै - र्भक्तिरवाप्यते - ऽमला ॥

७६. दयामये प्रेमनिधानचिद्घने
परानुरक्तिर्हि परात्मनीश्वरे ।
बुधैस्तु भक्तिर्व्यपदिश्यते यया
समस्तकामा भुवि यान्ति चास्तताम् ॥

७७. विवेकिनो भागवतानुकम्पया
जडानि कर्माणि च चेतनो विभुः ।
अवाप्य सज्ज्ञानमिदं जगत्पते-
रुपासनायां निरता इहासते ॥

७८. अनन्तसौख्ये रससागरे विभौ
निमज्जनोन्मज्जनमाचरन्ति यत् ।
तदेव चाभ्यर्हितमामनन्ति ते
सुखं, तदन्यत् किल गर्हितं विदुः ॥

७९. स सात्त्विको दार्शनिकोऽतिदुर्लभः
परेशभक्तौ निरतात्मनां सताम् ।
करोति सानन्दपदे प्रतिष्ठितिं
स्तरोऽय'मानन्दपदो' निगद्यते ॥

८०. यदस्ति वेदान्तसमाख्यदर्शनं
विदस्तु तद्व्यासविनिर्मितं जगुः ।
यदास्थितो ब्रह्मणि लीयते परे
स सप्तमः सर्वसमुन्नतः स्तरः ॥

न तत्परं ज्ञानमिहास्ति किञ्चन न तद्गतो ना विनिवर्तते पुनः ।
परात्मविज्ञान - निदर्शनादयं बुधैः समाम्नायि 'परात्परा'भिधः ॥ ८१ ॥

(क्रमशः)

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

सम्पादकीयम्

रत्नं समागच्छतु काञ्चनेन !

कस्यापि राष्ट्रस्य स्वरूपं तदीयसंस्कृति-सभ्यतयोरेव निर्भरम्। तत्तत्सभ्यता-संस्कृतिभ्यामेव राष्ट्रविशेषस्य अनन्यसाधारणं व्यक्तित्वं प्रतितिष्ठति। ते च संस्कृति - सभ्यते एकान्ततः शिक्षाधीने इति शिक्षाया राष्ट्रनिर्माणे स्फुटं प्रयोजकत्वम्। अशिक्षितेन केनापि राष्ट्रेण विश्वस्मिन् स्वीय-राष्ट्रियसभ्यता-संस्कृत्योः प्रसारणमुखेन सांस्कृतिकदृष्ट्या सर्वेषां राष्ट्राणामात्मसात्करणं तु दूरे तिष्ठतु, स्वीयप्राचीन-राष्ट्रियसंस्कृतेः रक्षणमपि तेन तदा दुःशकं जायते। शब्दान्तरैः शिक्षानाम राष्ट्रिय-सभ्यता-संस्कृत्योर्वाहनम्। तत्र समारुह्य ते नूनमनन्ते पथि निरातङ्कमुन्मुक्तं च विहर्तुं प्रभवतः। अतो निर्विचिकित्सं प्रतिफलति यत्सर्वैः स्वतन्त्रराष्ट्रैः अनिवार्यतः स्वीयं शिक्षाविधानं सर्वतः सम्पन्नं सक्रियं सर्वाङ्गीणं स्वावलम्बि स्वदेश-भावनाभावितं च विधेयमिति।

दृशाऽनया विचार्यमाणे महता खेदेन वक्तव्यं भवति यत् स्वतन्त्र-भारतराष्ट्रेण विषयेऽत्र किमपि अतितरां प्रमदितम्। कामं देशस्य राज्यानाञ्च शिक्षामन्त्र्यालयैः शिक्षाविभागे विपुलं धनं व्ययीकृतं व्ययीक्रियते च, परं यावद्धि तत् परकीयशिक्षायां साक्षात्परम्परया वा विनियोज्यते विनियुज्यते वा, न तावत् स्वकीयशिक्षायाम्। तेन च यथा परकीये सभ्यता-संस्कृती परिपोष्येते, न तथा स्वकीये सभ्यता-संस्कृती। तटस्थदृष्ट्या दृश्यमाने प्राचीनभारतीया शिक्षा यावती, विश्वतोमुखी, सर्वाङ्गीणा सर्व-कामदुघा, ऐहिकामुष्मिकश्रेयःप्रेयप्रसवित्री, न तावती जगति काऽपि दृष्टचरा। 'सा विद्या या विमुक्तये' इति हि तस्याः मुख्यं सूत्रम्। अनादिकालीन-दृढतरा-ऽविद्याबन्धनतो जीवमात्रं मोचयन्ती भारतीया शिक्षा, विद्येयं जगति नूनं सर्वा विद्या अतिशेते। स्वर्णिमे-ऽतीते युगे भारतराष्ट्रेणेयं एकया निष्ठया समुपासिता, विश्वस्मिंश्च ततो जगद्गुरुत्वपदं समासादितम्। यवनशासनकालं यावत् प्रचण्डतमैः परकीयैराक्रमणै-रपि भारतीया निष्ठातोऽस्याः मनाग् विचलिता नाभूवन्। यतो हि तावत्कालं शिक्षाव्यवस्था पूर्णतः शासनाधीना नाभवत्। बहंशैः सा समाजधारकाणां मुनीनां विदुषाञ्चैव हस्ते स्थिता। किन्तु आंग्लशासकैः स्वीयकूटनीत्या भारतीयान् ततः प्रच्याव्य सर्वा शिक्षा-व्यवस्था शासनाधीना स्वात्मसात्कृता। 'लार्ड मेकाले' नामकस्य आंग्लशासकस्य भविष्यवाणीयमद्य सर्वांशतः सफलीभूता यत् 'कियता कालेन अचिरादेव अस्माक-मनया आंग्लशिक्षया सर्वे भारतीया वेषेण भारतीयाः सन्तोऽपि मनसा आंग्ला एव भविष्यन्ति, इत्थं शिक्षेयमस्माकं भारते आंग्लशासनं कीलितं करिष्यति' इति। अद्य तु वेष-भूषयाऽपि भारतीयाः कृष्णवर्णा आंग्लाः सम्भूता इत्यहो शिक्षायाः संस्कृति-विशेष-प्रस्थापनधुरीणत्वम्!

विवेचनेन एतावता इदमेवास्माकमुद्दिष्टं यत्स्वा-तन्त्र्यप्राप्तिकालतोऽद्यावधि भारतीयशासनेन भारती-यतानुगृहीतायाः तत्त्वतो राष्ट्रोत्थानकारिण्याः राष्ट्रिय-सभ्यतासंस्कृति - समुन्नतिविधायिकाया एक-रूपिण्या राष्ट्रियशिक्षायाः काऽपि सुनिश्चितैका

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

पद्धतिर्नाविष्कृता, तस्याः प्रवर्तनं प्रचारणं वा पुनर्दूरायातम् । प्रायो द्विशतवर्षैः पाश्चात्त्यैस्तत्कालीनैः अस्मत्प्रभुवरैः प्रचालितैव शिक्षाप्रणाली न्यूनाधिकसंशोधन-परिवर्धनेन स्वतन्त्रभारतशासकैरपि सञ्चाल्यते । तेन कामं जागतिकबाह्यविषयेभ्यो भारतीया विज्ञा भवन्तु नाम, स्वीयै राष्ट्रियज्ञान-विज्ञानैस्ते सर्वथा अपरिचिता एव संवृत्ताः । नैतदेव, स्वीयेषु बहुमूल्येषु विषयेष्वपि घृणा-तिरस्कारभाव-भरिताश्च समभवन् । पाश्चात्त्यशासकानां काले यादृश्या कठोरतमया व्यवस्थया सा शिक्ष्यते स्म, सा कठोरतमा व्यवस्था ततो विलुप्ता । रिक्तेऽपक्वभाजने तदीयशिक्षाया नैके दोषाश्च दृढं पदं चक्रुः । तस्यैव विषमयानि फलानि साम्प्रतिक्या अनुशासनहीनताद्या विकृतयो विद्यार्थिनाम्, यासु नियन्त्रणमद्य शासनस्य कृतेऽपि दुःशकमिव जायते ।

भारतीयशासनेन शिक्षाया इदं गौरवम् अनधिगत-पूर्वमिति विवशतोऽत्र कथनीयं भवति । अत एव तेन अद्यावधि भारतीयशिक्षात्मनः अपरोक्षबोधेन दूरायिताः शासका एव, भ्रामकेण साम्प्रदायिकता-सन्तुलनमोहेन, भारतीयशिक्षामन्त्रिपदे प्रतिष्ठापिताः । फलं तु तस्य उपरिष्टात् निरूपितमेव । अन्यच्च, उच्चतरः कश्चन प्राड्विवाकः सर्वोच्चचिकित्सकत्वेन नियोज्येत, तदा तत्र तस्य मतिः कियतीं समृद्धिं साधयेदिति पृथग् वक्तुं नावशिष्यते । अस्य या संभाव्या परिणतिः, सा किल भारतीयैर्विगते वर्षे स्फुटं परिलक्षिता ।

किन्तु सौभाग्यं भारतीयानां यत् तुरीय-महानिर्वाचनोत्तरं सङ्घटिते केन्द्रीय-मन्त्रिमण्डले शिक्षा-मन्त्रिपदमकस्मात् अकल्पितेन प्रकारेण सुयोग्यतमाय भारतीयताप्रतिकृतिने एकस्मै शिक्षाविशारदाय प्रहितम् । अनेनानुमीयते यत् भारतीयशासकैर्नूनमद्यावधिकं स्वीयं प्रमदितमवगतम्, तदुद्धारस्य च प्रामाणिकः प्रयासः समाचरितः । इत्थं दिवाभ्रान्तस्यापि सायं गृहागतवत् इव नव्यं भारतीयशासनं नूनमभिनन्दनीयतामर्हति ।

वङ्गप्रदेशीय - यादवपुर-विश्वविद्यालयस्य पूर्वोप-कुलपतयः डॉक्टर त्रिगुणसेन महाभागाः नवस्थापितस्य भारतीय-शिक्षायोगस्य अन्यतमसदस्यरूपेण राष्ट्रिय-शिक्षाक्षेत्रे नवेनाऽवतीर्णाः । ततः परं प्रायो विगत-षट्-सप्तभिर्वर्षैः समस्यासन्दोहसङ्कुलव्याकुलस्य काशी-हिन्दूविश्वविद्यालयस्य उपकुलपतिपदं समलङ्कृत्य समागमनेन सहैव तैर्येन कौशलेन उत्साहपराः साम्प्रतिका नवशिक्षाप्रविष्टाश्छात्रा नितरां स्ववशीकृताः, नूनं तद्दर्शनीयं वस्तु । छात्रा-विवादानां शमनाय छात्रन्यायालय-परिकल्पना तेषां तदितरशिक्षाविदैरननुगृहीतपूर्वा खलु । सर्वसाधारणानां निम्नकक्ष्याणां परिजनानामनन्यसुलभमवधानं कृत्वा स्वल्पीयसा कालेन यावान् तेषां हार्दिकोऽनुराग एभिः समर्जितः, सर्वथा विस्मयकरं तत् । उच्चोच्चतरपदासीनाश्च तथा कार्ये संयोजिता यथा तेषामुच्चपदता वर्गविशेषसङ्घटनेन निर्धारितकार्ये प्रमादा-ऽऽलस्य-पक्षपातादिकं सन्निवेश्य कार्यबाधिका न भवेत्, या च कस्या अपि संस्थायाः प्राणहरेव कल्प्यते । प्रत्येकनिर्णयं क्षणेकेन निर्णीय धातुरिव फलैस्तत्कार्यप्रकाशनं सेनमहोदयानां सविशेषं वस्तु । समासतस्तेषां कार्यकरणपद्धतेरयमेव मानदण्डः परिदृष्टोऽस्माभिर्यत् व्यक्तिविशेषे विभागविशेषे च निर्धारितं कार्यं तेन तेन प्रामाणिकया बुद्ध्या परमेण स्वातन्त्र्येण आत्मीयभावनया अनितरहस्तक्षेपेण सम्पादनीयमिति । यथा स्वर्गीय - प्रधानमन्त्रि-लालबहादुर-

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

शास्त्रिभिः स्वल्पीयसा कालेन अष्टादश-वर्षदेशीयो भारतीयशासनविधिः अष्टादश-मासीयेन स्वीयेन सरलोदात्तशासनेन विस्मारितः, तथैव सेनमहोदयैरपि अद्यावधिकः विश्वविद्यालयीयः पूर्वतनीयः सर्वोऽपि कार्यविधिर्विस्मारितः।

इत्थं सक्रियरूपेण आत्मनः शिक्षाविशारदत्वमभिव्यञ्जयन्तः श्रीसेनमहाभागाः भारतीयशासनमपि दृष्टिमात्मनि समावर्जयितुं बलात् प्रैरयन्। फलतस्तेऽकल्पितरीत्या इतः केन्द्रीयशिक्षामन्त्रिपदे नीताः। भारतीयशासनस्य उपक्रमेणानेन सुस्पष्टं भवति यत् केन्द्रशासनं गतवर्षीयेन अनुशासनहीनताकृतेन देशव्यापिना छात्रोपद्रवेण गृहीतशिक्षं जागर्तीति। विगते अक्तूबरमासे शिक्षायोगस्य प्रतिवेदनमपि प्राप्तम्, यत्र निखिलभारतीयदृष्ट्या शिक्षाव्यवस्थायाः विस्तरेण रूपरेखा समुपस्थापिता वर्तते। अत्रान्तरे नवनिर्वाचन-नवशासनसङ्घटनमपि संवृत्तम्। अतो विंशतिवर्षोत्तरं स्वतन्त्रभारते प्रथमतो राष्ट्रियशिक्षाव्यवस्थानिर्धारणस्य गुरुतरो भारः भारतकेन्द्रीयशिक्षामन्त्रिणां श्री त्रिगुण सेन महाभागानां शिरसि समापतितो यञ्च साफल्येन वोढुं ते सर्वथा समर्था इति देशस्य परमं सौभाग्यम्। तैरत्र विषये कथं सर्वथा विशुद्धभारतीयतानुगृहीतं भारतीय-जनसाधारणहिताधायकं शिक्षाप्रकारं परिकल्पयितुं स्वीयं कौशलं प्रदर्शयिष्यते इति तु भविष्यत्कालीनं वस्तु। तदैव तदुपरि स्वीयमतप्रकाशनमपि समुचितं भवेत्। अद्य तु 'रत्नं समागच्छतु काञ्चनेन' इत्यनेन सुभाषितेन तेषामभिनन्दनं व्याहरन्तो वयं भगवन्तं प्रार्थयामो यतसः श्री सेन महोदयेभ्यः स्वीये कार्ये पूर्णं साफल्यं प्रदाय भारतस्य उत्कर्षं विदध्यादिति।

नवशासकानामभिनन्दनानि

तुरीयेण भारतीय-महानिर्वाचनेन स्फुटं प्रकटीकृतं यत् साम्प्रतिकी भारतीयजनता परैः पाश्चात्त्यैरपि आविष्कृतामभिनवां लोकतन्त्रपद्धतिं कथङ्कारं परमेण अहिंसात्मकेन क्रमेण अतिक्रमितुं सविशेषं प्रभवति, देशहितसाधने प्रमदतां शासकानाञ्च परिवर्तने ताटस्थ्येन धृत्या च अभिमुखीभूय लोकतन्त्रस्य संरक्षणाय स्वस्थं शासनं प्रतिष्ठापयितुं क्षमते। तुलनात्मकदृष्ट्या समालोच्यमाने विंशतिवर्षैः भारतशासनसञ्चालिकायाः राष्ट्रियमहासभायाः (कांग्रेस-संस्थायाः) नीति-रीतिभिः अभीप्सितः स्वदेशोत्कर्षस्तथा साधितो नाभूदिति अकामेनापि वक्तव्यं भवति। काममत्र तात्कालिका भौतिका दैविकाश्च अन्तराया अपि अंशतः प्रयोजकाः स्युः; तथापि यथालब्धसौलभ्ये तावदनुपातेन करणीयं कार्यमपि दलविशेषशासनेनानेन न सम्पादितम्। अत्र परमो हेतुस्तस्य राष्ट्रियजनहितापेक्षया दलनिष्ठैव अतितरां जागर्ति। अत एव तद्दलवहिर्भूतानां योग्यतमानामपि जनानां शासनकर्मणि सहयोगो नासादितस्तेन, न वा वाञ्छितश्च। ये केचन दलीया एव कार्यकर्तार आसन्, तेष्वपि केषुचिदेव सुशासन-सञ्चालनक्षमताया जागरूकत्वेऽपि दीर्घकालिक - शासनसञ्चालनेन किमपि वैयक्तिकं स्वामित्वमिव प्रतिष्ठितम्। अयोग्यैः पुना राष्ट्रियस्वातन्त्र्य - महाभियाने गड्डलिकाप्रवाह इव प्रविष्टैस्तावन्मात्रक्षमताशीलैः कार्यकरैः शासकदलीयतारूपया शासक - व्रतया यथेच्छं स्वार्थसाधने प्रयतितम्। भ्रष्टाचार-दुराचारोत्कोचाऽनाचारादिभिश्च सर्वेऽपि शासनविभागा आविलीकृताः। स्वस्मिन् निर्धारिते कर्तव्ये बहु प्रमदितम्। तेन च

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

क्रमशो ह्रसमानं राष्ट्रियं चरित्रम्, राष्ट्रियमर्थतन्त्रं सम्प्रति परां शोचनीयां दशामुपगतम्। सर्वसाधारणस्य प्रजावर्गस्य भोजनाच्छादनादि-दैनन्दिनावश्यकता अपि पूरयितुमद्य शासनं वचनीयं सञ्जातम्। एतादृश्या स्वराष्ट्रियऽव्यवस्थया सहैव परराष्ट्रियव्यवस्थायामपि भारतस्याद्य अञ्जसा को नाम मित्रराष्ट्रम्? इति वक्तुं न पार्यते। सुरक्षाव्यवस्थाऽपि शोचनीया संवृत्ता। राष्ट्राधारभूतानां शासकीय-कर्मकराणां भाविराष्ट्रनिर्मातॄणां विद्यार्थिनाञ्च महाभियानानि समग्रां शासनव्यवस्थामेव समुद्धोतुं बद्धपरिकराणि दृश्यन्ते।

एवंस्थितौ भारतीयजनताया धैर्यसेतुः विश्रृङ्खलितोऽभवत्। फलतश्चतुर्थेऽस्मिन् निर्वाचने राष्ट्रियमहासभाया भूयांसः प्रत्याशिनो वैफल्यं गताः। उत्तरप्रदेश-बिहार-वङ्गोत्कल-हरियाना-पञ्चनद-केरलाऽऽन्ध्रप्रदेशेषु अकांग्रेसीय-शासनानि सङ्घट्टितानि। केन्द्रे शिष्टेषु च राज्येषु कांग्रेसदलीयशासनं पुनः प्रतिष्ठितम्। लोकतन्त्रस्य विकासदृष्ट्या दलीयपूर्वशासनदृष्ट्या च घटनेयं परं मङ्गलमयी वक्तुं शक्या यदि नाम नवागताः संयुक्तदलीय-शासकाः पूर्वतनाः केन्द्रशासकाश्च भविष्यति जनताजनार्दनस्य सर्वतोमुखं सर्वाङ्गीणञ्च निर्विशेषं हितमेव शासकस्य इतिकर्तव्यं स्वीकुर्युः, तदनुसारञ्च समनुतिष्ठेयुः। भारते राष्ट्रे न कस्यापि दलविशेषस्य अधिकारः। साम्प्रतिकानां दलानामुदयात् पूर्वं तस्य सद्भावात् तेषां तेषां दलानां विलयनोत्तरमपि तत्प्रतिष्ठायाश्च सुनिश्चयात्। विज्ञानस्य सार्वभौमिक-विकासेन सम्प्रति केनापि राष्ट्रविशेषेण कमपि राष्ट्रविशेषं स्वीयदासताश्रृङ्खलया चिरं निगडितुमशक्यत्वात्। परिशेषात् तत्तद्राष्ट्रियजनतैव तत्तद्राष्ट्रस्य स्वामिनीति सिद्ध्यति। तत्प्रतिनिधिभूतैः शासकैः सर्वप्रथमं दलनिरपेक्षैर्भूत्वा जनताया एव उत्तरदायिभिर्भाव्यम्। प्रतिनिधीनां योग्यता केवलं राष्ट्रनिष्ठा, सत्यनिष्ठा, विश्वहितकामना, सम्बद्धविषये वैचक्षण्यं चेत्येव भाव्या। तदैव तेषां शासने राष्ट्रस्य तात्त्विकं हितं समुत्कर्षो वा भवितुं शक्यः। केन्द्र-राज्यगतैः सर्वैः प्रतिनिधिभिरत्र सार्वहितैर्भूत्वा रागद्वेषेर्ष्याकपटानाचारादिकं परिहाय इमां घटनां वरदानरूपां मत्वा शासनं परिचाल्येत, तदा घटनेयं दलनिरपेक्ष-राष्ट्रियशासनस्य नान्दी चापि भवेत्। कियता कालेन च सम्भवतः पञ्चममहानिर्वाचनोत्तरं सुदृढा सुपुष्टा सर्वथा भारतीयतानुगृहीता आदर्शलोकतान्त्रिकी शासनपद्धतिरत्र सुस्थिरा भूत्वा अखिले विश्वस्मिन् लोकतन्त्रव्यवस्थास्थापनेन विश्वमानुपत्यत्य विकासाय नूनं प्रभवेत्। एभिरेव शब्दैर्वयं सर्वान् केन्द्र-राज्यीय-नवशासकान् अभिनन्दयामः।

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

भजनीयस्य शास्त्रैकसमधिगम्यत्वम्

— श्री पूज्य करपात्रस्वामिनः —

यद्यपि 'सर्वकारणत्व-सर्वाधारत्व-सर्वाधिष्ठानत्व-सर्वप्रकाशकत्वादिभिः भूत-भौतिकानि स्वोपादान-गोचरापरोक्षज्ञानवज्जन्यानि विलक्षणकार्यत्वात् शय्या-प्रासादादिवत्' इत्याद्यनुमानैरपि सर्वेश्वरस्य सिद्धि-र्भवति ; तथापि धर्मस्येव ब्रह्मणोऽपि वेदादिशास्त्रैक-समधिगम्यत्वमेव आचार्यैरङ्गीक्रियते । अनुमानादीनां वेदोक्तार्थस्य बुद्ध्यारोहाय असम्भावनादिदोपनिरा-करणाय चोपयोगः ।

> यतो वा इमानि भूतानि जायन्ते । येन जातानि जीवन्ति । यत्प्रयन्त्यभि संविशन्ति । सत्यं ज्ञान-मनन्तं ब्रह्म । विज्ञानमानन्दं ब्रह्म । जन्माद्यस्य यतः । प्रकृतिश्च प्रतिज्ञादृष्टान्तानुपरोधात् ।

इत्यादि - श्रुति - सूत्र - रामायण - भारत - पुराण - तन्त्रा-गमादिभिरेव प्राधान्येन परमेश्वरोऽवगम्यते । नानु-मानादीनां स्वातन्त्र्येण ब्रह्मणि प्रामाण्यम् , नानादोष-दूषितत्वात् । तदुक्तं न्यायकणिकाकृद्भिः—

"विमतं धीमत्कर्तृकं कार्यत्वादि'त्यनुमानात् नेश्वरसिद्धिः, जीवजत्वेन सिद्धसाधनत्वात् । उपकरणा-द्यभिज्ञकर्तृकत्वसाधने कतिपयतदभिज्ञतायां सर्वज्ञा-सिद्धेः । सर्वतदभिज्ञाकर्तृकत्वसाधने सपक्षस्य साध्य-हीनत्वात् कुम्भं निर्मितवतः कुलालस्य चैत्रकर्ण्योऽय-मित्याद्यनवबोधात् साधारणेऽपि सिद्धसाधनत्वात्, मनःसंयोगहीनस्य चोपलब्धेरभावाद् अमनस्कस्यापि ऐश्वर्यवशादुपलब्धिसम्भवे तत एव विनैवोपलब्ध्या जगन्निर्माणसम्भवेन 'उपलब्धिमत्कर्तृकस्यैव विलो-पापत्तेः" इति ।

शुद्धाद्वैतिभिश्च - 'यत्तु जीवादृष्टसम्पादितशरीरं भूतावेशन्यायेन ईश्वरे आविश्य कार्यं कृत्वाऽऽवेशं त्यजति, ज्ञानेच्छाप्रयत्नातिरिक्तविशेषधर्माभावादि'ति। तत्तूपेक्ष्यम् ; ईश्वरस्य अकर्तृत्वापादकत्वात् । तथा हि—तन्मते हि सावयवत्वेन अनुमितकार्यत्वक्षित्यादि-पक्षक - कर्तृपूर्वकत्वसाध्यक - कार्यत्वलिङ्गकानुमानेन जगत्कर्तृत्वेनैव ईश्वरसिद्धिः । कर्ता चोपादानगोचरा-परोक्षज्ञानचिकीर्षाकृतिमानेव लोके दृष्टः इति द्व्यणु-कादि-नगसागरान्तस्य च पक्षीकरणेन तत्कर्तृत्वेन सिद्धं तदुपादानगोचरापरोक्षज्ञानादिमान् नित्यः सर्वज्ञ एव भवतीति तादृक् तत्सिद्धिः । तथा च यथा लोके ज्ञानादिमत एव कर्तृत्वं दृष्टं तथेश्वरेऽपि शरीरित्व-सिद्धिर्निष्प्रत्यूहा, कर्तृत्वस्य शरीरित्वव्याप्यत्वात् ।

नन्वेवं कार्यत्वेन अनित्यत्वानुमाने घटादिषु रूपसाहचर्यं लिङ्गस्य दृष्टमिति तद्विशिष्टस्यैव तस्य व्याप्यत्वे रूपाभाववति वायौ तदसिद्धिः, तत्सिद्धौ वा रूपस्यापि सिद्धिः स्यात् । न त्वेवम् ; प्रत्यक्षबाधात् ।

ननु साहचर्यमात्रमप्रयोजकम् , व्याप्तिरेव प्रयो-जिका । सा च कार्यत्व-नित्यत्वयोरेवेति वायावपि तत्सिद्धौ रूपाऽसिद्धिश्चेत् तर्हि प्रकृतेऽपि कर्तृत्व-प्रयो-जकं ज्ञानेच्छाप्रयत्नवत्त्वमेवेति शरीरित्वस्य तत्साह-चर्यवत्त्वम् , अतो नेश्वरे तत्सिद्धिः । अन्यथा दृष्टा-न्तीयाशेषधर्मापत्तिः पक्षे स्यात् । तथा च घटदृष्टान्तेन जलेऽनित्यत्वसाधने पृथिवीत्वादिकमपि सिद्ध्येत् ।

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

किञ्च—चेष्टां विना प्रयत्नमात्रेण कुलालादेर्घटादिकरणे सामर्थ्याभावात् चेष्टाश्रयस्य शरीरस्य सहकारित्वमस्तु नाम। ईश्वरस्तु प्रयत्नमात्रेणैव सर्वकरणसमर्थ इति न तदपेक्षा। किञ्च शरीरस्य परिच्छिन्नत्वनियमेन युगपत् सकलदेशगत - कार्यानुत्पत्तिप्रसङ्ग इति चेत्?

नैतत् साधीयः; ज्ञानादिमत्त्वस्येव शरीरित्वस्यापि अन्वय-व्यतिरेकसिद्धत्वात्। तथा हि—यत्र कुलालादिषु कर्तृत्वं तत्र शरीरित्वम्। यत्र च मुक्तात्मसु अशरीरित्वं न तत्र कर्तृत्वम्। अत ईश्वरस्यापि कर्तृत्वात् शरीरित्वमवश्यमङ्गीकर्तव्यम्, लोके तथादर्शनात्। अन्यथा इच्छादिकमपि च सिद्ध्येत्, अविशेषात्।

अथ चेष्टां विनाऽपि प्रयत्नमात्रेण कार्यकरणे समर्थत्वादीश्वरस्य न तदाश्रयतत्सिद्धिरिति ब्रूषे; तदा इच्छाप्रयत्नौ विनाऽपि ज्ञानमात्रेणैव तथाकरणसमर्थत्वादीश्वरस्य नेच्छादिमत्त्वमपीत्यपि सुवचम्। न च शरीरस्य परिच्छिन्नत्वे नोक्तदोषापत्तिरिति वाच्यम्; अन्यथानुपपत्तिबलात् सिद्ध्यच्छरीरं यावताऽनुपपत्तिपरिहारस्तावद्रूपमेव सेत्स्यति। शरीरपरिच्छेदानित्यत्वनियमस्तु अनुपपन्नः। पक्षधर्मताबलाद् अपरिच्छिन्ननित्यस्यैव सिद्धेः।

वस्तुतस्तु—परिच्छेदा - ऽनित्यत्वाद्यनुपपत्त्युद्भावनस्य शरीरसिद्ध्यादिसिद्धिव्याहतत्वेन असंभव एव। अन्यथा ज्ञानस्याप्यनित्यत्वनियमेन ईश्वरज्ञानस्यापि अनित्यत्वप्रसङ्गः।

यत्तु—'ईश्वरस्य कर्तृत्वेन शरीरित्वसाधन ईश्वरासिद्धौ आश्रयासिद्धिः; तत्सिद्धौ च धर्मिग्राहकप्रमाणेन अशरीरस्येव सिद्धत्वेन तद्बाधः' इति। तत्तु अविचारितरमणीयम्; तथा हि—अत्र धर्मिग्राहकं प्रमाणं किमिति भवान् पृच्छ्यते? कार्यलिङ्गकमनुमानमिति चेद् ब्रवीति भवान्, तदा तेन कर्ता परं सिद्ध्यति, नान्यत्।

ननु सत्यमेतत्, परन्तु कर्ता स्वयं कर्तृत्वेन सिद्ध्यन् स्वकर्तृत्वनिर्वाहकमादायैव सेत्स्यतीति वदामः। अहो! किं तन्निर्वाहकम्? ज्ञानेच्छाप्रयत्ना एव। कुत एतत्? यतो लोके कार्यकर्तृत्वं तद्वतामेव दृष्टं न तद्रहितानाम्। तर्हि शरीरस्यापि तत्समान - योगक्षेमत्वात् ज्ञानेच्छाप्रयत्नशरीरवानेव सेत्स्यति, लोके दर्शनस्य समानत्वादिति बुद्ध्यस्व।

ननु शरीरस्य महत्त्वेन उद्भूतरूपत्वेन च चाक्षुषत्वं कथं न स्यात्? लौकिकप्रत्यक्षाविषयत्वादिति ब्रूमः। श्रूयते हि देवानामपि इन्द्रादीनामप्रत्यक्षत्वं विग्रहवताम्, किं पुनरखिलदेवस्य अप्रत्यक्षत्वे शङ्का नाम? किञ्च—शङ्कानां तत्सिद्ध्युत्तरकालीनत्वात् तत्सिद्ध्यनवसरपराहतत्वेनैव नोदयसंभव इति संक्षेपः।

एतेन—'कार्यस्य शरीरादिमत्कर्तृपूर्वकत्वनियमः प्रत्यग्रजायमानाङ्कुरादावेव शरीरिणः कर्तुरनुपलम्भान्निरस्त' इति निरस्तम्। उक्तयुक्तिभिस्तत्रापि शरीरकर्तृकत्वस्यैव सिद्धेः। अतो ज्ञानदुर्बलव्यामोहनमात्रपरं मतमेतत्, न तु सच्छास्त्रीयमिति विद्वद्भिरुपेक्ष्यम्। एतदपि त्वन्मतानुसारेणैवोक्तम्। अस्माकं तु प्रतिसत्कर्णजिह्वाप्रजागरूकोक्त - श्रुति-स्मृति - पुराण -वाक्यतत्त्वसूत्रभेरीघोषोद्घुष्टतया सर्वतः पाणि-पादान्तत्वेन अचिन्त्यानन्तशक्तिमत्त्वेनैव भगवान् सिद्ध इति नानुमानशङ्कापेक्षाऽपि इत्यलं प्रसक्तानुप्रसक्त्या।

तथैव श्रीरामानुजाचार्याश्च—क्षित्यादिषु सावयवत्वेन कार्यत्वमपि नानुमातुं शक्यम्। अकार्यम् अशक्य-

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

क्रियत्वात् अशक्योपादनविज्ञानत्वात्, महाभूतशब्दवाच्यत्वाच्च आकाशवदिति भट्टभास्करोक्तैः प्रत्यनुमानैस्तस्य सत्प्रतिपक्षितत्वात्। यदि चाकाशे निरवयवत्वस्य अनुकूलतर्कस्य सत्त्वेन क्षित्यादि-वायुपर्यन्तेषु च तदभावेन उक्तहेतूनामप्रयोजकत्वं विभाव्यते, तदापि कार्यत्वेन हेतुना बुद्धिमत्कर्तृपूर्वकत्वमात्रसिद्ध्या तादृशक्षेत्रज्ञानामेव कर्तृत्वेन सिद्धिरिति हेतोरर्थान्तरसाधकत्वान्नैते ईश्वरसाधकाः।

न च क्षित्यादिवायुपर्यन्तस्य पक्षीकरणेन तदुपादानगोचरापरोक्षज्ञानादिमत्त्वस्य क्षेत्रज्ञेष्वशक्यवचनतया पक्षधर्मताबलात् तत्सिद्धिः। 'विवादाध्यासितं क्षित्यादिकं स्वोपादानगोचरापरोक्षज्ञानादिमदनेककर्तृपूर्वकं कार्यत्वात् विचित्रसन्निवेश-सार्वभौमसदनवदि'ति दृष्टान्तेन अनेककर्तृसिद्ध्या पक्षधर्मताया दुर्बलत्वात्। मही-महार्णवादीनां कार्याणामनेकत्वात् तेषां सर्वेषामेकदा एकेन निर्मितत्वे प्रमाणभूतस्य हेतोरभावात् पृथग्भूतेषु कार्येषु कालभेद-कर्तृभेदयोः प्रत्यक्षसिद्धत्वेन प्रत्युत बाधाच्च। न च जीवानां तादृशनिर्माणशक्त्यदर्शनेन तन्निवृत्तौ कार्यत्वबलेनैव तत्सिद्धिरिति वाच्यम्; पूर्वमशक्तानामपि पश्चात् पुण्यविशेषोपचयेन शक्तिदर्शनात्। पुण्यविशेषोपचयेन अतिशयितादृष्टसंभावनया च तादृशविलक्षणकार्यकर्तृत्वस्यापि संभवात्।

इदमेवोक्तं कपिलाचार्यैः—मुक्तात्मनः प्रशंसावाक्यमुपासासिद्धस्य वा इति सूत्रे। इदं योगिनोऽप्युपलक्षणम्। किञ्च—युगपत्सर्वोत्पत्ति-स्थिती न प्रमाणपदवीं व्रजतः, लोके क्रमेणैव तयोर्दर्शनात्, युगपत्तत्कल्पकस्य हेतोरशक्यवचनत्वात्, क्रमेण तत्कल्पने विरोधाभावाच्च। अतः क्षित्यादिकं बुद्धिमदेककर्तृकं कार्यत्वाद् घटवदित्यत्र तत् नैककर्तृकं कार्यत्वात् घटस्तम्भादिसमूहवदिति दृष्टान्तेन हेतोः साधारणत्वम्। तथा भू-भूधरादिनिष्ठं कार्यत्वं न बुद्धिमदेक-कर्तृकत्वसाधकं समूहनिष्ठत्वात् घटपटस्तम्भादिसमूहनिष्ठकार्यत्ववदि[ति] अनुमानान्तरादपि तथा।

किञ्च—इदं क्षित्यादिगतं कार्यत्वं युगपदुत्पद्यमा[न]सर्वगतं वा क्रमिकोत्पद्यमानसर्वगतं वा? आ[द्ये] आश्रयासिद्धत्वम्, द्वितीये तु विरुद्धत्वम्। तस्मा[त्] कार्यत्वलिङ्गकानुमानेन ईश्वरसिद्धिः। नापि जग[त्] एकचेतनाधीनम्, अचेतनारब्धत्वात् नीरोगस्वशरी[र]वदित्यनुमानात् तत्सिद्धिः। तथा हि—किमिदमेक[?]चेतनाधीनत्वम्? एकचेतनायत्तोत्पत्तिस्थितिकत्वमि[ति] चेत्, न; नीरोगस्यापि शरीरस्य पितृपुत्राद्यनेकचेतन[ा]दृष्टजन्यत्वेन तदुत्पत्तिस्थित्योस्तदधीनत्वेन एकचेतना[]धीनत्वाभावाद् दृष्टान्ते साध्यवैकल्येन हेतोरसाधा[]रणत्वापत्तेः।

किञ्च—शरीरस्थितिरपि किं स्वावयवसमवेतता उत प्राणनम्? आद्ये अवयवाधीनत्वान्न चेतनापेक्ष[ा] घटादिवत्। द्वितीये क्षित्यादीनां शरीरत्वाभावे[न] पक्षेऽसंभव इति पक्ष-सपक्षानुगतस्थित्यनुपलम्भः। नापि एकचेतनाधीनप्रवृत्तिकत्वम्। पक्षान्तर्भूतेषु गुरु[]तर-रथ-शिला-महीरुहादिषु अनेकचेतनाधीनप्रवृत्ति[]कत्वदर्शनेन व्यभिचारात्। नापि चेतनमात्राधीन[]त्वम्; सिद्धसाधनत्वात् अर्थान्तरापत्तेश्च।

किञ्च—ईश्वरः कर्ता न भवति प्रयोजनशून्यत्वात् अशरीरत्वाच्च मुक्तात्मवदिति बाधकानुमानादपि नेश्वरकर्तृत्वसिद्धिः। किञ्च अत्यन्तापरिदृष्टेश्वराख्य[]पुरुषस्य तस्मिन् सामर्थ्यविशेषस्य च कल्पनेऽत्यन्त[]क्लृप्तानां गौरवात् जीवानामेव तपोयोगयागादिलब्ध[]सामर्थ्यानां कर्तृत्वेन कल्पनं लघीय इति अचेतना[]रब्धत्वलिङ्गकानुमानेनापि नेश्वरसिद्धिरित्याहुः।

तस्माद् भजनीयस्य ब्रह्मणः शास्त्रैकसमधिगम्य[]त्वेन वेदादिशास्त्राणामेव तत्र मुख्यं प्रामाण्यम्, अनुमानादयस्तु तत्सहकारितयैव उपयुज्यन्ते, [न] स्वातन्त्र्येणेति दिक्।

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

पूर्वतोऽनुवृत्तम्—३

सुप्त-प्रबुद्धम् : अभिनवं खण्डकाव्यम्

— स्वर्गीयाः महामहोपाध्यायाः श्रीलक्ष्मणशास्त्रितैलङ्गाः —

१७२. अस्तं गते च भगवति सवितरि रात्रावुपेतायाम् ।
रत्नप्रदीपरुचिभिर्विद्योतिनि सुन्दरे सौधे ॥

१७३. रमणीभिः सह ताभिः संलापैः सस्मितैर्मधुरैः ।
भोज्यैः पानविनोदैर्गीतैर्वाद्यप्रमोदैश्च ॥

१७४. आनन्द - मोह - विस्मय- कौतुक-संभेदमग्नस्य ।
क्षण इव किलास्य सहसा सा क्षणदाऽऽसीद्
गतप्राया ॥

१७५. अथ तस्मै निद्राकरचूर्णविमिश्रं ददौ-काचित् ।
रमणी सरसं पेयं पीयूषस्पर्धि सप्रणयम् ॥

१७६. मोहान्धीकृतचेता रागमयो निर्विशङ्कं तत् ।
अपिबद् येन मुहूर्तादभवन्निद्रापराधीनः ॥

१७७. विनिमीलितनयनयुगो विगलितमूर्धा सघर्घराराव:।
अभवत् प्रहास एषः शयने गतचेतनः सहसा ॥

१७८. ईदृगवस्थान्तरगं निभृतं वेश्मान्तरात् पश्यन् ।
हारीतभूमिपालः सहसा शयनालयं प्राप ॥

१७९. आसन्नपरिचरं स्वं भूयस्तस्यैव तत्सदनम् ।
परिधाप्य पूर्ववेषं तं नेतुमसौ समादिक्षत् ॥

१८०. सोऽयं तं स्कन्धगतं कृत्वा नीत्वा च तद्गृहं
निभृतम् ।
संवेश्य चैनमेतच्छयने सौधं समापेदे ॥

१८१. तत्र च चिरं प्रसुप्तः प्रातर्विमदः प्रहासोऽयम् ।
पश्यन् स्वं स्वकशयने संभ्रान्तमनाः क्षणादभवत् ॥

१८२. 'कमले ! लालय, लीले ! संलप, मदिरे !
प्रमोदय त्वं माम् ।
अयि वि[illegible] वीजय मामिति स प्रललाप संभ्रान्तः॥

१८३. तस्य प्रलापमेतं श्रुत्वा शङ्काशताकुलिता ।
अभ्यन्तरादवापत्तज्जननी तत्र सातङ्कम् ॥

१८४. 'वत्स प्रहास ! कोऽयं व्यामोहस्तेऽद्य सञ्जातः ? ।
नामग्राहं वद मे का एवं त्वं समाह्वयसि ?' ॥

१८५. एतत् किल मातृवचः शृण्वन् विस्फार्य नयने सः ।
परितः स्वं परिपश्यन् सोत्प्रासं तामुवाचैवम् ॥

१८६. 'अयि जरति ! कं पुनस्त्वं वत्सपदेनाह्वयन्त्येवम् ।
मौर्ख्यं प्रकटीकुरुषे ? नूनं विक्षिप्तचित्तासि ॥

१८७. नाहं प्रहासनामा, सोऽहं राजाधिराजोऽस्मि ।
नतनृपशत - मुकुटतट-प्रोद्यद्रत्नांशु-पूज्याङ्घ्रिः' ॥

१८८. 'किं त्वं प्रलपसि वत्स ! त्वं मे जीवावलम्बोऽसि ।
अपि विस्मृतवान् सदनं जननीमपि मां बताश्चर्यम्॥

१८९. यद्येवं प्रलपन्तं लोका आकर्णयिष्यन्ति ।
नूनं विक्षिप्तमतिं सद्यस्त्वां चिन्तयिष्यन्ति ॥

१९०. प्रकृतिस्थो भव, मैवं संविग्नमना भव प्रेष्ठ ! ।
स्वप्नस्य विलसितमिदं दृष्टचरस्येव मे भाति' ॥

१९१. एवं श्रुतमातृवचाः क्षणमिव किञ्चिद्विचार्यासौ ।
अवदत् 'सत्यं मातः ! प्रहास एवास्मि तव सूनुः'॥

१९२. एषा तद्वचनं पुनराकर्ण्य सुतस्य किञ्चिदुच्छ्वसिता।
स्वप्नानुभावदोषाद्विमुक्तमेनं क्षणं मेने ॥

१९३. अथ तेन सह सहासं चलिते वार्ताप्रसङ्गेऽसौ ।
देवालयाधिकारि - दण्डनवृत्तान्तमाचख्यौ ॥

१९४. सहसा व्युत्थितचेताः प्रहास एवं जगादैताम् ।
'नाहं त्वदीयसूनुर्नूनं राजाधिराजोऽस्मि ॥

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

१९५. ते खलु पापात्मानः पूर्णद्यवि मामकादेशात् ।
एवं दण्डमवापुर्जरठे ! किं मां प्रतारयसि ? ॥

१९६. उद्दण्डदण्ड्यदण्डनकर्मणि सक्तं प्रजैकशरणं माम् ।
राजाधिराजमेवं किमसम्बद्धं त्वमालपसि ?' ॥

१९७. भूयो विवक्षुमेतामवलोक्य समिद्धकोपोऽसौ ।
आदाय दण्डमेकं प्रहर्तुकामः प्रहासोऽभूत् ॥

१९८. एवं तस्योन्मादमतिभूमिगतं समवलोक्य ।
बाष्पाम्बुपूर्णनयना जननी भूयोऽब्रवीदेनम् ॥

१९९. 'राजाधिराज एको हारीतो वत्स ! नगरेशः ।
यः सूनुनिर्विशेषं निखिलं प्रकृतिव्रजं शास्ति ॥

२००. सोऽयं करुणासिन्धुर्दीनारायुतभृतं स्यूतम् ।
कोशाधिकारिणा ह्यो मह्यं प्रेष्यानुजग्राह ॥

२०१. नो वत्स ! समुचिता ते तस्यानुकृतिर्महीन्द्रस्य ।
एते वयं समस्तास्तत्सौराज्याश्रिता वत्स !' ॥

२०२. श्रुत्वैव तद्वचोऽसौ द्विगुणीकृतमानसोद्वेगः ।
तामभ्यधायैवं, 'जरठे ! किं न्वेवमालपसि ?

२०३. एषोऽहमेव तुभ्यं तत्स्यूतं प्रैषयं जरति ।
कोशाधिकारिणा ह्यः शंससि कथमित्थमन्यं त्वम् ॥

२०४. नेतः परं त्वदीयं धाष्टर्यं सोढव्यमस्माभिः" ।
एवं वदन् प्रहासस्तां मूर्धनि ताडयामास ॥

२०५. इत्थं प्रताडिता सा चक्रन्दोच्चैस्तरां, येन ।
सर्वः प्रतिवेशिगणः सहसा तत्रैव संन्यपतत् ॥

२०६. सहसा ताडनकार्याद्विरतः साटोपमवदत् सः ।
'राजाधिराजमेवं मा भूयः कोपयाऽनार्ये !' ॥

२०७. अथ तेषु प्रतिवेशिषु कश्चित्सद्यः समाच्छिद्य ।
दण्डं तद्धस्तगतमेवं परिभर्त्सयामास ॥

२०८. 'धिक् त्वा प्रहास ! स त्वं विगतविवेको निजां जननीम् ।
निर्दयताडनविषयं कुर्वन् कच्चिन्न जिह्रेषि ? ॥

२०९. एवं वादिनमेनं सावष्टम्भं समालोक्य ।
ऊचे–'कं पुनरेवं प्रहासनाम्ना समाह्वयसि ? ॥

२१०. नाहं प्रहासनामा, सत्यं राजाधिराजोऽस्मि ।
अविनीत मेवमालप, नोचेत्त्वां दण्डयिष्यामि' ॥

२११. एवमसङ्गतवचनं श्रुत्वा 'सोऽयं किलोन्मत्तः
सञ्जात' इति वदन्तः प्रतिवेशिजना व्यतिष्ठन्त ॥

२१२. अथ ते सर्वे मिलिताः सरभसमाबध्य रज्जुभिस्तमिमम् ।
उन्मत्तजनचिकित्सालयमनयन् शङ्कितस्वान्ताः ॥

२१३. अध्वनि चलन् प्रहासः सघृणं मात्सर्यदूषितैर्दृष्टः ।
निर्विण्णमानसः सन्नेवं स्वगतं विचिन्तयामास ॥

२१४. 'नियते! विलसति कश्चन दुर्वर्ण्यस्तावको महिमा ।
येनाविकलमना अपि सोऽहं सञ्जात उन्मत्तः' ॥

२१५. उन्मत्तालयमथ तं नीत्वा संयम्य चास्य चरणयुगम् ।
आयसपञ्जरमध्ये निचिक्षिपू रूक्षचित्तास्ते ॥

२१६. प्रत्यहमेनं प्रातस्ततो विनिष्कास्य निर्दयं कशया ।
अधिपृष्ठदेशमसकृत् तरसा सन्ताडयामासुः ॥

२१७. तस्यावस्थां वीक्षितुकामा जननी प्रहासस्य ।
उन्मत्तालयमनुदिनमायाता साश्रु विनिववृते ॥

२१८. काले गच्छति किञ्चिन्मन्दीभूतात्मचित्तविक्षेपः ।
एवं मनसि विचारमयमथ कर्तुं समारेभे ॥

२१९. 'यदि नरपतिरभविष्यं कथमिवं निद्रावगमकाले ।
परिधृतनिजनेपथ्यो भूयः शयने स्वकेऽस्थास्यम् ॥

२२०. कथमिव परितस्ताभिर्नीताभिः संवृतो नासम् ?
कथमिव समत्यजन्मां मच्छासनवर्तिनो विनताः ॥

२२१. सामन्ताः साधिकृताः? कुत्र गतास्ते सभास्ताराः ।
क्व च ते दासा दास्यो मत्परिचरणे रता याताः ।

२२२. आस्तामितरत् सर्वं स्वप्नगतं, किन्तु कथमिव ते
मच्छासनानुसारं पापा दण्डं समासेदुः ? ।

२२३. आज्ञानुसारमथ मे दीनारायुतभृतं स्यूतम्
कथमपि वस्तुतोऽम्बा नहि किञ्चिन्न समवगच्छामि ।

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

२२४. धेहि धियं भगवन् मयि, येन ज्ञातुं समर्थः स्याम्।
एतन्निखिलरहस्यं, मनसो मे नान्यथा शुद्धिः' ॥

२२५. एकस्मिन्नहनि पुनस्तमेनमेवं विचारशतमग्नम्।
वात्सल्यनोदिताऽम्बा चिन्ताकुलिता समागच्छत्।

२२६. तं दृष्ट्वा कृशवपुषं चिन्तासन्तानसंविग्नम्।
बाष्पाम्बुरुद्धकण्ठा सोत्कण्ठा सा जगादेत्थम् ॥

२२७. 'वत्स प्रहास ! वद मे कीदृक् ते मानसावस्था।
अपि मोहादुरुदर्कात्तस्मादधुना विमुक्तोऽसि' ॥

२२८. एवं तयाऽनुयुक्तः सबाष्पनेत्रः स उत्थाय।
सप्रश्रयं चरणयोः प्रणिपत्यैनां किलावोचत् ॥

२२९. 'मातः स्वप्नालोकनसंभ्रान्तमतेर्ममाविनयः।
सकलोऽपि मर्षणीयः पश्चात्तापेन दग्धोऽस्मि ॥

२३०. अत्यद्भुतः किलासीत् कश्चित् स्वप्नप्रभावोऽसौ।
यस्मिन् मिथ्यावस्तुनि परमार्थमतिः समुत्पेदे' ॥

२३१. एतत्प्रहासवचनं शृण्वत्याः शोकबाष्पौघः।
आनन्दबाष्पततिभिस्तत्क्षणमस्याः समनुसस्रे ॥

२३२. 'दिष्ट्या पुनः समाहितचित्तं वत्सं समुद्वीक्षे।
आयुष्मन् जीव चिरं, मा भूर्भूयो विमुग्धात्मा ॥

२३३. हालिकवेषातिथिना नूनं तेनानपावृतं द्वारम्।
येनाविशद् गृहं नः कश्चिद्भूतः पिशाचो वा ॥

२३४. तस्यैव चेष्टितमिदं यत्त्वद्बुद्धेर्विपर्यासः।
सेयं परेशकरुणा वत्स ! यदस्माद्विमुक्तोऽसि' ॥

२३५. एवं कथयन्तीं तामवददसौ मातरित्थमात्थ यथा।
नूनं पिशाचलीला सेयमभून्मोहसंजननी' ॥

२३६. एनं विगतोन्मादमवगत्याम्बाऽस्य मोदितस्वान्ता।
अधिकारिणोऽनुमत्या स्वं गेहं तूर्णमानयत ॥

२३७. सोऽयं कतिभिर्दिवसैः स्वस्थतनुर्नगरसीमान्ते !
अतिथिविशेषान्वेषणकार्ये भूयः प्रवृत्तोऽभूत् ॥

२३८. एकस्मिन्नहनि पुनस्तथाऽतिथिं संप्रतीक्षमाणोऽसौ।
भूपं तमेव भूयो हालिकवेषं समद्राक्षीत् ॥

२३९. दृष्ट्वेव तं ससाध्वस'मयमेव निदानमखिलस्य।
मद्दुःखस्ये'ति वदन् दृशं ततोऽसावपाकर्षत् ॥

२४०. चरविदितनिखिलतद्गृहवृत्तः कुतुकी महीपालः।
सहसैनं समुपेत्य सप्रणयं गाढमाश्लिक्षत् ॥

२४१. अपि कुशली प्रियमित्र प्रत्यभिजानासि मां कच्चित् ?।
अनुभूततावकातिथिसत्कारो हालिकः सोऽहम्' ॥

२४२. एवं वदन्तमेनं रूक्षं परिवीक्ष्य सोऽवदद् भूयः।
नाहं त्वन्मुखदर्शनमपि भूयो भद्र ! वाञ्छामि ॥

२४३. प्रथमं त्वदीयदर्शनमारभ्यैषोऽस्मि सञ्जातः।
आस्पदमसंख्यविपदां,स्मृतिरपि यासां भयं कुरुते।

२४४. आकर्ण्य तद्वचोऽसौ हारीतनृपः समब्रूत।
'मैवं सखेऽन्यथा मां गृहाण नाल्पं मयाऽपकृतम् ॥

२४५. एषोऽहं प्रतिदिवसं कामयमानोऽस्मि तव सौख्यम्।
भूयोऽपि रात्रिमेकामातिथ्येनोपकार्योऽहम् ॥

२४६. त्वद्दते नान्योऽत्र पुरे वयस्य ! मे संस्तुतः कश्चित्।
एतावतोऽर्थनां मे नार्हसि रूक्षं निराकर्तुम्' ॥

२४७. तद्वचनश्रवणाहितलज्जः सोऽयं क्षमां प्रार्थ्य।
सममात्मना प्रहासस्तं भूयः स्वं गृहं निन्ये ॥

२४८. एनं भोज्यविशेषैः सरसैः पानैश्च सन्तोष्य।
नानाकथाविनोदैर्भूयः समुपास्य सानन्दम् ॥

२४९ चलति च कथाप्रसङ्गे पप्रच्छैनं महीपालः।
'अपि जातु समनुभूतः कान्तास्नेहस्त्वया पूर्वम् ॥'

२५०. कान्तरागं दास्यमद्यावधि मित्र ! सन्वानः।
गीतादिभिर्विनोदैरात्मानं रञ्जयन्नासम् ॥

२५१. स्वप्नेऽवलोकितामिव यदि काचित्सुन्दरीकान्ताम्।
सम्प्राप्नुयां विलाससरसीं, पाणौ ग्रहीष्यामि ॥

२५२. लभ्या कथं नु तादृग् रमणी मादृग्जनैर्मित्र !।
विभ्रम - सौभगभूमि - भूपालजनैकसंप्राप्या ?' ॥

२५३. इत्येवं कथयन्तं तं हारीतोऽवदद् भूयः।
'अलमत्र चिन्तया ते, वयस्य स त्वं समाश्वसिहि ॥

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

२५४. त्वदभीप्सितां हि रमणीं रमणीयगुणैकसंवसतिम्।
अचिरादन्विष्य सखे सुखिनं त्वां संविधास्यामि'।
२५५. एवं वदन् स भूपो निद्राकरचूर्णसंमिश्रम्।
पेयं तस्मै व्यतरत्, सोऽपि विशङ्कं पपावेतत्॥
२५६. तं पूर्ववद्विचेष्टं दासेनानाय्य सौधगते।
परिधापितनिजवेषं पर्यङ्के शाययामास॥
२५७. अथ पूर्ववत् समस्तान् स्वानुचराँस्तान् समादिश्य।
हारीतभूपतिरसौ शयनालयमात्मनोऽविक्षत्॥
२५८. प्रत्यूषे शयनोत्थित एषोऽपि निविश्य तदीयशयनगृहम्।
निभृतं तत्प्रतिबोधनसमयं प्रतिपालयन्नास्त॥
२५९. अथ सुन्दरयुवतीजनसङ्गीतसङ्गीतनिनादपरिबुद्धः।
आत्मानं परितोऽयं साश्चर्यं लोकयामास॥
२६०. रम्यं तदेव हर्म्यं, तदेव शयनं महामूल्यम्।
ता एव पूर्वदृष्टा विजिताप्सरसो वरारोहाः॥
२६१. तं चापि भृत्यवर्गं, तं च नृपार्हं स्वनेपथ्यम्।
पश्यन्नसौ प्रहासो विस्मयसीमानमारोहत्॥
२६२. अथ विरते सङ्गीते, तन्मादेशं समुत्सुके श्रोतुम्।
तूष्णीं तिष्ठति तस्मिन्ननुचरवर्गे, निदध्यौ सः॥
२६३. भूयोऽपि हन्त सोऽहं मायास्वप्नेऽस्मि संपतितः।
उन्मत्तगृहनिवासादन्यत् फलमस्य किं नु स्यात्॥
२६४. नूनं हालिकवेष आसीत्कश्चित् स मायावी।
येनास्मि पातितोऽहं भूयो मायामये स्वप्ने !"॥
२६५. एवं विचिन्तयन्तं दृष्टचरी सुन्दरी काचित्।
मदिरा नाम सविभ्रमसेनमुपेत्य ब्रवीति स्म॥
२६६. 'राजाधिराज सन्त्यज शयनं, सूर्योदयो जातः।
पश्चाश्रितास्तवैते त्वां द्रष्टुं संप्रतीक्षन्ते'॥
२६७. 'अपसर पिशाचिके त्वं, नाहं, राजाधिराजोऽस्मि।
अयि संभ्रान्तमनास्त्वं कलयसि मामीदृशं न किमु?'
२६८. एवं वदन्तमेनं सप्रश्रयमब्रवीन्मदिरा।
'देव ! क्षमस्व, स त्वं नूनं राजाधिराजोऽसि॥
२६९. अहमपि देवपदाम्बुजसंसेवनतत्परा दासी।
मदिरा नाम, तदाज्ञादानेनैषाऽस्म्यनुग्राह्या॥
२७०. राजाधिराज ! किं त्वं दासीमेवं प्रतारयसि ?।
उत कश्चन दुःस्वप्नश्चिरं देवस्य तापयति ?॥
२७१. एवं चाटुवचोभिर्मदिरा सा तं तथाऽन्वनयत्।
सपदि यथाऽसौ तस्या वचने विश्वासमाबध्नात्॥
२७२. अत्रान्तरे किलान्याः सीमन्तिन्यः समागत्य।
सविनयसादरवचनैः शयनं हातुं तमन्वनयन्॥
२७३. भगवन् ! प्रसीद, मोचय मामस्माद् भूतसंक्रमणात्'।
एवं वदन्तमेनं श्रुत्वा भूपो जहासोच्चैः॥
२७४. भूयो मीलितलोचनमेनं ता भूतलाप्सरसः।
धृत्वोपवेश्य मञ्चे तारं गातुं समारब्धाः॥
२७५. पुनरपि स सन्दिहान एकां पाणावथाऽऽकृष्य।
समपृच्छद् वद सुन्दरि कोऽहं? भूपः प्रहासो वा?'
२७६. 'नूनं भवान् भवन्नपि भूमीतलवासवो देव !।
उपहसति नः किमित्थं नात्मानं देव ! चेतयसे?
२७७. देवस्यैव निदेशान्निकृतो देवालयाधिकृतः।
अथ सा प्रहासमाता दीनारस्यूतमभिपेदे॥
२७८. कथमिव देवः सर्वं विस्मृतवान् वृत्तमात्मीयम् ?।
राजाधिराज ! माऽस्मान् परिहासेनैवमाकुलय।
२७९. देवस्यैव पदाभ्यां शपामि नास्मिन् विशयलेशः।
राजाधिराजवर्यो नान्यः श्रीमान् जयत्यत्र'॥
२८०. इत्येवं प्रवदन्त्यां तस्यां, गाने पुनः प्रसृते।
अप्रतिपत्तिविमूढे विस्फारितलोचनाम्भोजे॥
२८१. क्षिप्तात्मराजवेषे नृत्यति ताभिः समं तस्मिन्।
प्रहसन् हारीतनृपः सहसा तत्राविशत् कुतुकात्॥
२८२. तस्मिन् प्रविष्टमात्रे सहसा विरराम गीतसंनादः।
सकलश्च भृत्यवर्गस्तूष्णीं तस्थौ क्षणं परितः॥

(क्रमशः)

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

पूर्वतोऽनुवृत्तम्—२

शाकुन्तलीयं जीवन-दर्शनम्

— श्री न० च० वे० नरसिंहाचार्यः —

[तिरुपति-निवासिना परिनिष्ठितविदुषा लेखकेन यद्यपि अभिज्ञानशाकुन्तलीयं जीवनदर्शनमेवात्र निरूपयितुं प्रतिज्ञातम् , तथापि शाकुन्तलीय - जीवनदर्शनविषय-निरूपणप्रसङ्गे महाकवेः कालिदासस्य सर्वास्वपि रचनासु तद्विषये कवेः कीदृशोऽभिप्राय इत्यपि तुलनात्मकदृष्ट्या प्रौढ्या परीक्षितम् , येन महाकवेः जीवनदर्शनविषयकः समग्रः आशयः एकपदे एवागम्यते। गताङ्के १. आमुखम् , २. दृश्य-महिमा, ३. समस्या - प्रस्तावः, ४. प्रयोजन-समुल्लेखः, ५. कण्ठकोद्धरणम् , ६. आजन्मशुद्धिः एते विषयाश्चर्चिताः। आजन्मशुद्धि- विषयकमेव अवशिष्टमंशमादाय द्वितीयोऽयं लेखाङ्कः प्रारभ्यतेऽत्र। सूर्योदयो लेखकमहोदयान् समभिनन्द्य अन्यानपि दाक्षिणात्यान् विदुष एवमेव सहयोगाय प्रार्थयते।

— सम्पादकः]

वस्तुतोऽत्र हेतुवाद एवाऽनावश्यकः। स खलु पौरवो जन्मशुद्धः। अश्नन् जिघ्रन् स्वपन गच्छन् तिष्ठन् भ्राम्यन्नपि प्रभुः अधर्म्यं यो नाऽऽचरति, तत्र काऽधर्म्यकामना ? क्षत्रियाणां तु गान्धर्वविवाहः शिष्टसम्मत एव। किञ्च प्रवासात् प्रतिनिवृत्तेन काश्यपेनैव "दिष्ट्या धूमावरुद्धदृष्टेरपि यजमानस्य पावक एवाऽऽहुतिः पतिता, सुशिष्यपरिदत्तेव विद्या अशोचनीयाऽसि मे संवृत्ता" इति श्लाघ्यमाने सम्बन्धे कुतोऽस्माकं शङ्का ?

अत्र राज्ञः पावकोपमानं चारित्र - शुद्धिं व्यञ्जयति। काश्यपवचनेन तृप्तिर्नाऽस्ति चेत् तत्कुलकूटस्थस्य कश्यपस्यैव वचनं मुदा ननु समुदाहरामि—

दिष्ट्या शकुन्तला साध्वी सदपत्यमिदं भवान्।
श्रद्धा वित्तं विधिश्चेति त्रितयं वः समागतम्॥ इति।

अत्र देवर्षिणा उपस्थापिता उपमा - सामग्री परमपवित्रा। अत्र विशिष्य दुष्यन्तस्य उपमानं विधिः। विधिश्च वेद एव। अतोऽपि पूततरं वस्तु न लोके किञ्चिद्वर्तते। विधातुः कश्यपस्याऽपि राजा धार्मिकत्वेन सम्मतः।

अशरीरीण्यपि वाणी अत्र साक्ष्यं प्रददाति—

दुष्यन्तेनाऽऽहितं तेजो दधानां भूतये भुवः।
अवेहि तनयां ब्रह्मन् अग्निगर्भां शमीमिव॥ इति।

गर्भस्थस्य तेजसः अतिपवित्रत्वम् , तद्वहन्त्या जनन्या अपि पावनत्वम् , जनिष्यमाणस्य पुत्रस्य च जगन्मङ्गलदायकत्वं सूचयन्ती दिव्या वाक् भरतस्य आजानपावनत्वं सम्यक् उद्बोधयति। आपन्नसत्त्वां सुदक्षिणां 'शमीमिवाभ्यन्तरलीनपावकाम्' इति वर्णयन् कविः गर्भस्थस्य शिशोः आजन्मपवित्रतामेवाऽभिप्रैति। तदिव अत्रापि आशीर्वादफलत्वेनैव पुत्रोत्पत्तिः। दुष्यन्तोऽपि आत्मनः पुत्रित्वमाशीःफलमिति विश्वसिति।

पञ्चमाङ्कावसाने उरीकर्तुं निराकर्तुं वा अचेतयमानेन राज्ञा उपदेशाय प्रार्थितः पुरोहितः 'त्वं साधुभिरादिष्टः प्रथममेव, चक्रवर्तिनं पुत्रं जनयिष्यसीति। स चेन् मुनिदौहित्रः तल्लक्षणोपपन्नः (सर्वाकारेण पितरमनु-

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

हरन्) भविष्यति, ततः प्रतिनन्द्य शुद्धान्तमेनां प्रवेशयिष्यसि। विपर्यये, पितुरस्याः समीपगमनमवस्थितमेव' इत्युपदिशति। एतदङ्गीकुर्वतो महीवल्लभस्य मुनिवचने आशिषि अतिदृढः प्रत्ययो विस्मयं जनयति।

किं पुत्रस्तादृशलक्षणोपपन्नः? इति जायमाना शङ्का सप्तमाङ्क-कथांशज्ञानेन परिह्रियते—'किन्तु खलु बालेऽस्मिन् औरस इव पुत्रे स्निह्यति मे मनः', 'अस्य बालकस्य रूपसंवादिनी ते आकृतिरिति विस्मापिताऽस्मि। अपरिचितस्याऽपि ते अप्रतिलोमः संवृत्तः', 'तथा भाविनमेनं चक्रवर्तिनमवगच्छतु भवान्' इति दुष्यन्त-तापसी-मारीचानां वचनानि, भरतस्य सदृशचेष्टितानि च शङ्कानिराकरिष्णूनि भवन्ति। अनेनोद्घातेन भरतस्य आजानपावनतां शकुन्तलायाः शुद्धान्तसदृशशुद्धस्वान्तताञ्च ध्वन्यध्वनीनः कालिदासो मधुरमुपचिक्षेप।

दारसङ्ग्रहोऽपत्याय

'वेदमनूच्य आचार्योऽन्तेवासिनमनुशास्ति' 'आचार्याय प्रियं धनमाहृत्य प्रजातन्तुं मा व्यवच्छेत्सीः' इति भगवती श्रुतिः निर्विवादमनुष्ठानपर्यवसाना। जातमात्रेण जन्तुना कुलस्य न तावत् काचिदुपकृतिः। प्रथमतो ब्रह्मचर्ये विद्या समधिगन्तव्या। तत आचार्यादनुज्ञामधिगत्य यौवने सदृशी जाया सन्तानार्थमेव वरणीया। पश्चादपत्यमाप्त्वा पितृणस्य अपाकरणाय प्रयतितव्यम्। अनन्तरं च वानप्रस्थधर्मम्, अन्ततो योगञ्च उपाश्रित्य तनूं परित्यज्य चतुर्थः पुरुषार्थः साधनीयः। पितृणविशुद्धस्यैव मोक्षाधिकारित्वमिति 'ऋणानि त्रीण्यपाकृत्य मनो मोक्षे निवेशयेत्' इति धार्मिका उपदिशन्ति। ऋषिऋणम्, देवऋणम् पितृणमिति त्रीणि ऋणानि शोधनीयानि। अध्ययनेन ऋषिऋणम्, इज्यया देवऋणम्, तनयोत्पादनमुखेन पितृणञ्च अपाकर्तुं शक्यते। एवं त्रीण्येतानि प्रत्यूहभूतान्यतीत्य मोक्षलक्ष्मीरासादनीया।

'प्रजया हि मनुष्यः पूर्णः', 'आत्मा वै पुत्रनामाऽसि' इति निगमोपदेशविवशेन मनुष्येण आत्मनो रूपान्तरमापन्नः पुत्रो जायायां जनयितव्यः—"जायायास्तद्धि जायात्वं यदस्यां जायते पुनः।' सम्प्रदायशुद्धं कुलव्रतम् अविच्छेदेन प्रवर्तयितुं आत्मनः प्रतिनिधिं यावन्न प्रतिष्ठापयति, न तावदस्य चतुर्थपुरुषार्थचिन्ताया-मधिकारो भवति। सार्वभौमेन सताऽत्र धर्मे द्विगुणतरा श्रद्धा विधेया। अत एव वंशप्रतिष्ठाकरं पुत्रमाप्तुं धर्मदाराः सङ्ग्राह्याः। तार्तीयीकपुरुषार्थसेवनं न पापाय, यदि तत्र नियमः परिपाल्यते। प्रजायै गृहमेधित्वं परमो धर्मः। अतो मोहाविष्टेन नष्टविवेकेन जनेन यथेच्छं न या काचित् कामतृप्तये काङ्क्षणीया। वंशविशुद्धां सदृशीं पत्नीमेवाऽऽप्नुयात्। स्वेच्छा प्रभवतीति न प्रवर्तेत। प्रजानामनुरञ्जने युक्तेन तु राज्ञा कौलीनाद् भेतव्यम्।

अयमेव सुपन्था गृहीतोऽत्र दुष्यन्तेन। अत्र नाटके शकुन्तला दुष्यन्तप्रणयवृत्तान्त एव दत्तप्राधान्य इव भायात्। परन्तु सूक्ष्मेक्षिकया विभाव्यमाने भरतोत्पत्तेरेव प्राधान्यं कविना विवक्षितमिति ज्ञायेत। अनेनैवाऽभिसन्धिना ग्रन्थारम्भे एव शकुन्तलोद्वाहात् प्रागेव, कुलोद्वहस्य सूनोर्जनिरेव 'जन्म यस्ये'त्याशिषं प्रयुञ्जता मुनिनाऽभिमानिता। तथा जायमानस्य जनेः प्राक्-परतोऽपि पवित्रता महता प्रयत्नेन न्यरूपि। प्राक्पवित्रताम् 'आजन्मशुद्धि'-प्रस्तावेऽहमुदाहृषि। अनन्तरपावनत्वं किञ्चिदिदानीमुदाजिहीर्षामि।

अन्तर्वत्न्याः शकुन्तलाया गर्भसंस्काराः केचन प्रायः कुलपतेः काश्यपस्य आश्रमे निर्व्यूढा इति

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

मन्तुं शक्यते। तावता न तृप्यति कालिदासः। तां पत्या प्रत्याख्यातां देवभूमिं नीत्वा, तत्र तां नियमव्यापृतां परिपूततरां च व्यधात्। तत्रैव अदित्याः सन्निधौ शकुन्तला सुतमसोष्ट। स च देवगुरुणा मुनिना कश्यपेनाऽऽहितसंस्कारः। 'रथेनानुत्खातस्तिमितगतिना तीर्णजलधिः··········पुनर्यास्यत्याख्यां भरत इति लोकस्य भरणात्' इति मङ्गलाशंसनेन परामृद्धिमुपगमितः। ततोऽस्मिन् कुलदीपके कुमारे संस्कारातिशयः संवृत्त इत्यवधार्यते। अयं भावः कविना दुष्यन्तमुखेन 'भगवताकृतसंस्कारे सर्वमस्मिन् वयमाशंसामहे' इत्युदीरितः। पवित्रा भरतस्य कथा कलिमल-क्षालनालङ्कर्मीण-महिमा सम्पद्यते।

दुष्यन्तस्य प्रजायै गृहमेधित्वं कविः कथङ्कारमसुसूचतेति किञ्चित् परिशीलयेयम्। अनुशयमुद्ग्रथितुमेव प्रबुद्धेन हतहृदयेन स्मारिताखिलपूर्ववृत्तान्तो राजा दारत्यागिनमात्मानमनिन्दत्। तथाविधस्य प्रेम्णः सदृशीमेव दुर्विषहां वेदनामविन्दत। प्रत्याख्यातां प्रियामनुस्मृत्य, धर्मभ्रंशञ्च सञ्चिन्त्य भृशमतप्यत। अस्य पश्चात्तापस्य 'स्वयमपत्नीकः संवृत्त' इति चिन्ता न प्रधानं कारणम्, किन्तु धर्मभङ्गभयम् विशिष्य सन्ततिविच्छेदः किल भविष्यतीति चिन्तैव मुख्यो हेतुरिति—

संरोपितेऽप्यात्मनि धर्मपत्नी
त्यक्ता मया नाम कुलप्रतिष्ठा।
कल्पिष्यमाणा महते फलाय
वसुन्धरा काल इवोप्तबीजा॥

इति पद्यं पठतां ननु प्रव्यक्तमेव।

प्रकृतिगम्भीरो दुष्यन्त आत्मानं महान्तं कालं पर्यवस्थापयन्नपि सार्थवाहधनमित्र-विपत्तिसमाकर्णनोद्बोधित - निजाऽनपत्यता - निवेदित - पिण्डसंशयारूढ-पितृदेवतादुःखदायित्वमात्मनो विचिन्त्य, हन्त! तत्क्षणममुह्यत्। अत्रैव, एकवारमेव—

अस्मात्परं बत यथाश्रुति सम्भृतानि
को नः कुले निवपनानि करिष्यतीति।
नूनं प्रसूतिविकलेन मया प्रसिक्तं
धौताश्रुशेषमुदकं पितरः पिबन्ति॥

इति पठन्नेव राजा मुमूर्छेति वर्णयतः कवेः, नायकस्य धर्मभ्रंशैकभीरुत्वव्यञ्जनं विना किं वा अन्यत्प्रयोजनमभिसंहितं भविष्यति? 'करगतामिव सिद्धिमन्तर्वर्त्नीं पत्नीं प्रत्याचक्षाणेन मया स्वयमेव निरयपातः समपाद्यत। उभयलोकविरुद्धमन्वस्थायि। 'अपुत्राणां किल न सन्ति लोकाः शुभाः।' न च पार्यते पितृणमपाकर्तुम्। सर्वथा व्यर्थजीवनोऽस्मी'ति चिन्तैव कारणं मूर्छाया इति पर्यालोचयतां धार्मिकाणां 'राज्ञः प्रजायै गृहमेधित्वं' प्रस्फुटं भवति।

न केवलम् अभिज्ञानशाकुन्तले, अपि तु विक्रमोर्वशीयेऽपि इयमेव दृष्टिः कविना निहिता। 'आयुषम्' आत्मनस्तनयमधिगम्य पुत्रवत्त्वज्ञानलम्भिताऽऽनन्दपरीवाहरूपमिदं पुरूरवा व्याहरति—"अद्याऽहं पुत्रिणामग्र्यः सुपुत्रेणामुना तव" इति, "ममोपपन्ने वंशस्थितेरधिगमात् महति प्रमोदे" इति वदन् तस्य [1]तनयस्य वंशविस्तारकत्वमेव तृप्तेः कारणमिति स्वाशयमाविष्करोति।

'मखांशभाजां प्रथमो महेन्द्रः' उर्वशीं कृतागसं मुनिना शप्तामनुगृह्णन्, रणसहायस्य राजर्षेः प्रियं चिकीर्षन्, 'सा त्वं यथाकामं पुरूरवसमुपतिष्ठस्व, यावत् स त्वयि दृष्ट-

१. तनोति = विस्तारयति कुलमिति तनयः। 'तनु विस्तारे' इति धातुपाठः। 'वलिमलितनिभ्यः कयन्'। उणादिषु ४—९९

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

सन्तानो भवेत्' इति शापस्य रमणीयमवधिं पर्यकल्पयत्। अतो वंशकरस्य पुत्रस्य प्राप्तौ परमतात्पर्यवान् आखण्डलः वचोभङ्ग्यन्तराश्रयेण सन्तत्यविच्छेदस्य प्रधानधर्मतां द्योतयति। अतो दारसङ्ग्रहस्य अपत्यार्थत्वे कालिदासस्य महानभिनिवेश इति निर्णेतुमस्त्यवकाशः।

सविनयमात्मपरीक्षणम्

विनयो नाम गुरुशिक्षादिभिर्जनितो निग्रहात्मा संस्कारविशेषः। तेन विना मनुष्यः समुन्नतिं प्राप्याऽपि नहुष इवाऽधः पतति। 'गर्भेश्वरत्वम्, अभिनवयौवनत्वम्, अप्रतिमरूपत्वम्, अमानुषशक्तित्वञ्चेति महतीयं खल्वनर्थपरम्परा सर्वा। अविनयानामेकैकमप्येषामायतनम्; किमुत समवायः!' दुष्यन्तेऽत्र कथितेषु चतुर्षूपाधिषु नैकस्याऽपि न्यूनता। परन्तु तत्र एकमपि तस्य अनर्थापादकं नाऽऽसीत् इत्यहो गुणिष्वग्रगणेयत्वमस्य भूमिभूषणस्य! विद्यया, तल्लब्धेन विनयेन, तदुद्भूतेन संयमेन चोपपन्नो दुष्यन्तः जात्वप्यस्खलितं वृत्तं ररक्ष। तस्मिन् विद्यमानोऽङ्कुतावहः संयमः पदे पदे आत्मनः परीक्षामपि विवेकित्वात् करोति।

अनेन शकुन्तलायामन्वरज्यत। ईशोऽस्मीति न तत्र बलात्कारः प्रयुक्तः। धर्म्या उत अधर्म्या इति सुष्ठु विचार्य उचितैव प्रवृत्तिरिति निश्चिकाय। अथ कदाचिन्मनोरथप्रियतमायां कोपादिव प्रतिष्ठमानायां भग्नमनोरथत्वं मा मे भूदिति तां ग्रहीतुमिच्छन्, आत्मानं व्यगृह्णात्, चेष्टाप्रतिरूपिकया कामिजनसहजया मनोवृत्त्या वात्ययेव प्रेरितोऽपि अहार्यस्येवाऽऽत्मनः अनपहार्यतां विषयैर्न्यरूपयत्, 'ननु प्रवातेऽपि निष्कम्पा गिरयः!' एवमात्मपरीक्षाप्रयुक्तो निग्रहो महदुपकरोति स्म।

अस्य राज्ञः आत्मविश्वासः धार्मिकाणां बहूनामिव दृढतरः। तथाऽपि स विनयं नोल्लङ्घते। भूयो भूयः परीक्षते। 'असंशयं……' इत्यादिभिः वचनैरात्मप्रत्ययं प्रत्याययन् आत्मनि विकत्थनतामाविष्करोतीव। परन्तु एतत्सर्वम् 'आत्मगतम्' एव, न बहिर्घोषणा क्रियते। किञ्च—समनन्तरमेव आत्मपरीक्षां विदधानः 'तथाऽपि तत्त्वत एनामुपलप्स्ये' इति ब्रुवन् गर्वं परिहरति। मातलिगृहीतस्य माढव्यस्य उच्चैराक्रन्दनमाकर्ण्य, 'भूताविष्टा मे गृहा' इति श्राम्यन् आत्मप्रत्ययबलेन प्रथमतः 'आः ममाऽपि खलु सत्त्वैरभिभूयन्ते गृहाः!' इति तस्य असम्भावितत्वं मत्वा, पुनः सविनयमेवं विमृशति—

> अहन्यहन्यात्मन एव तावद्
> ज्ञातुं प्रमादस्खलितं न शक्यम्।
> प्रजासु कः केन पथा प्रयाती-
> त्यशेषतो वेदितुमस्ति शक्तिः॥ इति।

अहो बत विनयेन शोभते महाराजः! अत्र उभयत्राऽपि राज्ञा विनयं रक्षता संशय आविष्कृतः। परन्तु द्वितयमपि यथार्थमेव; यतः शकुन्तला परिग्रहक्षमैव; तस्य गृहाश्च न सत्त्वैर्दूषिताः। 'सतां हि सन्देहपदेषु वस्तुषु प्रमाणमन्तःकरणप्रवृत्तयः!' पुनः कदाचित् 'न हि स्वाभिप्रायेण मे दर्शनम्' इति कथयन्नपि महीपतिरात्मनो दर्पराहित्यमेव सूचयति। अयं सर्वदा आत्मपरीक्षादत्तेक्षण इव बहुत्र प्रत्यक्षीभवति। कुत्रचित् स तथोच्यते, क्वचिद् व्यज्यते। अत्र पञ्चमाङ्कीयः कश्चित् श्लोकः स्मृतिपथमारोहति, तमलिखित्वाऽपसर्तुं न पारयामि—

> किं तावद् व्रतिनामुपोढतपसां विघ्नैस्तपो दूषितं
> धर्मारण्यचरेषु केनचिदुत प्राणिष्वसच्चेष्टितम्!

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

आहोस्वित् प्रसवो ममापचरितैर्विष्टम्भितो वीरुधाम्,
इत्यारूढ - बहुप्रतर्कमपरिच्छेदाकुलं मे मनः ॥

अयं श्लोको भावतुन्दिलः । 'किमुद्दिश्य भगवता काश्यपेन मत्सकाशमृषयः प्रेषिताः स्युः' इति चिन्ता-दोलान्दोलितचेतसो दुष्यन्तस्य इयमुक्तिः । अत्र निगूढं किञ्चित्तत्वमस्ति ।

तपोवनसंरक्षणं विश्वश्रेयोदृष्ट्या शासकस्य अवश्यकर्तव्यम् । श्रेयसां विघ्नवत्त्वेन रक्षांसि तपःप्रत्यूहानुत्पादयेयुः । तपोधनास्तु स्वशक्त्या तानपोहितुं प्रभूष्णवोऽपि न तथा कुर्वन्ति । तपोलुब्धास्ते शापदानादिना तपोव्ययं, कृपणा इव धनव्ययं न सहन्ते[1] । अतः शासित्रैवाऽयं भार उदुह्यते । ततस्ते रक्षोरक्षापेक्षया वीक्षितुमायाता भवेयुरिति ऊहते । तदनन्तरं स्वपाल्यजनेष्वन्यतमेनैव तेषु विप्रियमनुष्ठितं भवेद्वा इति चिन्तयति । अन्ततो गत्वा ममैवापचारेण लताप्रसूतिर्विष्टम्भिताऽभूद्वा इति परामृशति—
'इति तर्कयतस्तस्य चित्रं चिन्तावधिर्नहि' ।

अत्र दुष्यन्तस्य निजकर्तव्यव्यग्रता, 'उत्तरदायिता' च (Responsibility) स्फुटमभिव्यज्यते । तपोवनरक्षाभारमात्मनि समग्रमारोपयति सः । यः कोऽप्युपप्लवो भवन् राज्ञ एवाऽपचारमवगमयति । विप्रकुमारस्य मृतिं श्रुतवान् भगवान् रामचन्द्रः तत्र कारणत्वमात्मापचारे एव समारोपयति । राज्ञो धर्मभ्रंशं विना सत्वाभिभवः, विशिष्य आश्रमे न संभवति । अतो रन्ध्रोपनिपातिनो राक्षसास्तपोवनस्य उपरोधमकार्षुः किम् ? इति प्रथमतः तटस्थेष्वपचारं शङ्कते ।

१. 'त्राणाभावे हि शापास्त्राः कुर्वन्ति तपसो व्ययम्' इतीदं स्मर्यताम् । (रघुवंशः–१५. ३)

पश्चात्तु पाल्यप्रजामध्ये कश्चिदेवं किमु विप्रकरोति स्म इति विकल्पते । ततः तासु वत्सलतया अकाण्डे दोषारोपणमयुक्तमिति मत्वा, अन्ततो गत्वा, स्वकैरेवापचारैर्वीरुधः फलपुष्पादिना संयमधनान् किं नाऽनुजगृहुरिति आत्मन्येव दोषं निरूपयति । उत्तरदायित्वविमुखास्तु - अपचारमन्यदीयशिरसि निपात्य स्वयं निर्दोषा इव सावष्टम्भं लोकं प्रतारयन्ति । अयन्तु न तथा । तत्राऽयं क्रमोऽपि हृदयङ्गमः । रक्षांसि सुकृतैरपोहितुं शक्यन्ते । अपथे प्रवृत्ता अपि प्रजाः नियमयितुं प्रभुणा आत्तदण्डेन प्रभूयते । यदि राजा स्वयमेव अपराध्यति, कस्तत्र शासकः ? सः स्वयमेवाऽऽत्मानमनुशिष्यात् । 'राजा कालस्य कारणम्', 'दण्ड्यानदण्डयन् राजा' तद्दोषेण उपलिप्यते । 'राज्ञोऽपचारात् पृथिवी स्वल्पसस्या भवेत्किल' इत्यादिषु वचनेषु प्रामाण्यमुररीकृत्य सर्वस्य दोषस्य आत्मैव पात्रीकृतः ।

अत्र अवनीनाथस्य आत्मपरीक्षादृष्टिर्विनयश्च परां काष्ठां अधिरूढौ दृश्येते । यद्यपि 'अपरिच्छेदाकुलं मे मनः' इति वाक्येन निर्णयाभाव एव प्रतीयते, तथापि पूर्वं पूर्वं विकल्पम् उपमर्द्य उत्तरोत्तरो विकल्प एव लब्धप्रतिष्ठो भवन्निव भाति ।

वेषधारणेऽपि विनयम् अयमभिलष्यतीति 'विनीतवेषेण प्रवेश्यानि तपोवनानि नाम' इति ब्रुवता, सूतहस्ते धनुश्चाभरणानि च समर्पयता ननु प्रबोधितो लोकः ।

यद्यपि विनेतुरस्य विनयसुभगत्वं प्रतिपदं प्रस्फुटति, तथाऽपि सप्तमाङ्क-कथायां दत्तदृष्टिभिस्तत्र तदतिमात्रमास्वाद्यते । कालनेमिप्रसूतिं दुर्जयं नाम दानवगणं पराजित्य, तत्र नाऽऽत्मनो विक्रमो निदानमिति, आखण्डलस्य अखण्डोऽनुग्रह एव जयाय प्रगल्भेत इति,

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

जानकी-जानेः वन-प्रस्थानम्

—कविरत्नम् श्रीलक्ष्मीनारायण द्विवेदः—

●

इतः श्वशुर-मन्दिरादवनिकन्यया प्रेयसा, वनाय चरणौ दधेऽवनिधरैस्ततः स्वात्मना ।
नतं मृदुतया द्रुतं विपिनकण्टकैस्तूलता, वृता तरु-लतालिभिः सुरभिरम्यमापुष्पितम् ।। १ ।।

दिनकरकिरणैरनुष्णिमाप्तस्तदधो वारिधरैर्नभोऽपि लिप्तम् ।
अधिरजनि विचन्द्ररश्मि - पक्षे प्रचुरविभोडुभिरातता तदानीम् ।। २ ।।

आयाति कान्तेन महीतनूजा, मत्वेति शैत्यं शुचितालपताऽप्सु ।
उष्णे पयोदोपगमे हिमे तु कृतोष्णता वर्त्मनि निम्नगाभिः ।। ३ ।।

कान्तेन श्रम - शङ्कया स्मितदृशा व्यालोकि कान्ताननं
कान्ताराध्वनि कान्तयाऽपि नतया कान्ताननं वीक्षितम् ।
विश्राम-क्षणमाप्य पूज्यचरणं गृह्णाति यावत् प्रिया
तावत्प्रेम - निरीक्षणैः श्रमभरस्तेनापि तस्या हृतः ।। ४ ।।

एतन्नाथ ! पुरो विपाक-मधुरं हृद्यं फलं दृश्यते कान्तोक्त्येति धवेन भूरुह-लता यावत् समाकृष्यते ।
तावत्सुन्दरभूरि-पक्व-फलदा याता घनाद्रैर्द्रुमैः शाखाः स्वद्रुम-सन्निभैस्तमभितः प्रादुष्कृता भूरिशः ।। ५ ।।

सिद्ध्यन्ति कर्मसु महत्स्वपि यन्नियोज्याः
सम्भावनागुणमवेहि तमीश्वराणाम् ।'

इति महेन्द्रसारथिना सार्धं भाषमाणस्तं वाचोयुक्त्या निरुत्तरीकरोति ।

विक्रमोर्वशीयेऽपि कविनाऽयमेव सुपन्थाः समाद्रियत । नारायणोरु-भवाम् ऊर्वशीं बन्दिग्राहं गृहीतामसुरेण केशिना, ततो बलादाच्छिद्य ताम् असौ पुरुरवा आवीत् । तमाऽपि स प्रभुः प्रश्रयमेव पुरुषस्य असुवर्णरचनमाभरणं मन्वानः—

ननु वज्रिण एव वीर्यमेतत्
विजयन्ते द्विषतो यदस्य पक्ष्याः ।
वसुधाधरकन्दरा - द्विसर्पी
प्रतिशब्दोऽपि हरेर्भिनत्ति नागान् ॥

इति चित्ररथाय निवेदयन्, तेन च 'अनुत्सेकः खलु विक्रमालङ्कारः' इत्यश्लाध्यत । 'नमन्ति सन्त स्त्रैलोक्यादपि लब्धुं समुन्नतिम्' अयमन्यतमो लोकाय दीयमानोऽनर्घ उपदेशः कालिदासस्य ।

(क्रमशः)

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

मानस-भारती : देवगिरा गुम्फितं मानसम्

—श्री जनार्दन गङ्गाधर रटाटे, एम. ए. साहित्याचार्यः —

॥ अथ किष्किन्धाकाण्डम् ॥

किष्किन्धाकाण्डनिर्विघ्नपूर्णतायै नमाम्यहम् । रामं राजीवपत्राक्षं सीतान्वेषणगानुजम् ॥

शिवो यत्र सोमः स्थितः पापहन्त्री खनिर्ज्ञानहेम्नो जनिर्मुक्तिदेव्याः ।
सदानन्ददात्रीति विज्ञाय मान्या कथं सेवनीया ततः स्यान्न काशी ॥
सुरा येन सन्तापितास्तत् करालं स्वयं कालकूटं पपौ यो महेशः ।
कुतश्चित्त ! तं शङ्करं सेवसे न ततः को दयालुः परोऽस्ति त्रिलोक्याम् ॥

अग्रे रामो ययावृष्यमूकोऽद्रिर्निकषा स्थितः ।
दृष्ट्वा तं सानुजं तत्रस्थः सुग्रीवोऽतिभीर्युतः ॥
प्राह मारुतिमेतौ स्तो बललावण्ययोर्निधी ।
धृत्वा रूपं वटोर्गत्वा ज्ञात्वा सङ्केतयाऽऽशु माम् ॥
दुर्हृदा प्रेषितावेतौ वालिना यदि तर्ह्यहम् ।
पलायेऽद्रिं विहायैतमित्युक्तो मारुतिर्ययौ ॥
नत्वा पप्रच्छ तौ कौ स्थो गौरश्यामौ युवां प्रभू ।
क्षात्ररूपौ मृदुपदौ कस्माद् वनचरौ स्थितौ ॥
औष्ण्यं वातश्च दुःसह्यं सहथः कोमलाङ्गकैः ।
कौ चित् देवत्रिके किंवा नर-नारायणौ युवाम् ॥

किं वा युवां कारणमस्य मूलं
विश्वस्य संसारसमुद्रपारौ ।
नाथौ समेषां जगतां पृथिव्या
भारं निरोध्दुं मनुजावतारौ ॥ १ ॥

रामः प्राह—'सुतावावां कोशलेशस्य भू सुर !
पितुर्दशरथस्याज्ञामङ्गीकृत्याऽऽगतौ वनम् ॥
रामोऽहं लक्ष्मणो भ्राता पत्नी मे रक्षसा हृता ।
वैदेहीं तां मार्गयन्तावावामिति कथाऽऽवयोः ॥
कथां वद स्वा', श्रुत्वेत्थं प्रभुं विज्ञाय मारुतिः ।
ननाम भूमौ गिरिजे ! तत् सुखं वागगोचरम् ॥
पुलकाङ्गो भावमौनी वेषं रामस्य दृष्टवान् ।
आस्थाय धैर्यमस्तौच्च नाथ ! न्याय्यमिदं मम ॥
अपृच्छं यदहं, त्वं किं मनुष्य इव पृच्छसि ।
त्वन्मायावशगो भ्रान्तस्तस्मान्न ज्ञातवानहम् ॥

मन्दोऽस्मि मोहस्य वशेऽस्मि वक्र-
श्चित्तेन बोधेन विनाऽस्मि देव ।
हे दीनबन्धो पुनरस्मि नीत-
स्त्वयापि विस्मारणमद्य देव ! ॥ २ ॥

मयि दोषाः सन्ति नाना दासः स्याद् विस्मृतो न तु ।
जीवस्ते मायया मूढस्तवैव कृपया तरेत् ॥
वदामि शपथेनेश ! न जाने भजनादिकम् ।
नाथे दासः प्रसौ पुत्रो निश्चिन्तौ पोषकः प्रभुः ॥
इत्युक्त्वाऽऽकुलितो रामपादयोर्निपपात सः ।
प्राकाशयत् स्वकं रूपं प्रेमव्याप्तं तयोरसि ॥
आलिलिङ्गोत्थाप्य रामोऽश्रुभिः शीतयति स्म च ।
प्रोचे—'मा भूः कपे खिन्नस्त्वं मे द्विर्लक्ष्मणात् प्रियः ॥
समदर्शीति मां सर्वे कथयन्ति परन्तु मे ।
सेवकोऽतिप्रियो यस्मादनन्यगतिरस्ति सः ॥

चराचरं विश्वमिदं प्रभोर्मे
रूपं सदैवास्ति च सेवकोऽहम् ।
इत्थं मतिर्यस्य न वातपुत्र !
चलेत सोऽनन्यगतिः प्रसिद्धः ॥ ३ ॥

(क्रमशः)

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

निखिल-भारतीय-तीर्थानां पदयात्रा

—धर्मदूतः श्री गङ्गाप्रकाशो ब्रह्मचारी—

भारतीयसंस्कृतेरुद्योतकैः खगोलस्थितैः ऋषिदेवेश्वरावतारैः मर्त्यलोके पुण्यभूमौ भारते एव सर्वप्रथमं यज्ञसाधनसम्पन्नत्वात् सृष्टेरवतारः कृतः। तदर्थं केन केनांशेन सृष्टिनिर्माण-सञ्चालनकार्यं तैः कृतमिति प्राचीनग्रन्थेषु निरूपितम्। तत्रैव च तेषां लीलाक्षेत्राणां पुण्यतमानां भारतीय तीर्थादीनां विस्तृतं माहात्म्यं वर्णितम्। तच्च अहरहः पठन् श्रावं श्रावञ्चाहं तेषां दर्शनाय प्रेरितः। तेषु तेषु तीर्थेषु गत्वा मया यद्-धार्मिकं तत्त्वं दृष्टं तस्य समासतः परिचयोऽत्र पाठकानां तोषाय क्रियते।

श्वेतवाराहकल्पादारभ्य भगवता श्रीविष्णुना वाराहरूपं धृत्वा हिरण्याक्षम् असुरं हत्वा पृथ्वी समुद्धृता। तस्य मूलक्षेत्रं मत्स्यदेशः। मत्स्य-नाम्नो राज्ञः आख्याया स हि देशः प्रसिद्धिं गतः। तद्देशान्तर्गतं गढमुक्तेश्वरक्षेत्रम्, यत्र हि भगवतः शङ्करस्य गणानां मुक्तिर्जाता। तत्रैव मयराष्ट्रमण्डले (मेरठ इति ख्याते) बिल्वकेश्वरनामकः शिवः प्रतिष्ठितोऽस्ति। अस्य देशस्य सीमा गङ्गा-यमुनयोर्मध्ये वर्तते। अस्यैव परिसरे कुरुक्षेत्रान्तर्गते क्षेत्रे चयनयज्ञेन भगवतः शिवस्य प्रादुर्भावोऽभवत्। साम्प्रतमपि तत्र स्थाण्वीश्वरनामकं शिवलिङ्गं प्रतिष्ठितं दृश्यते।

१. कुरुक्षेत्रम्—तत्रैव राज्ञा कालान्तरेण कुरुक्षेत्रं निर्मितम्। सूर्यग्रहणसमये स्नानस्यात्र महत्फलं वर्णितम्। कुरुभूमिर्देशस्य नाभिरूपेण स्थिता। ब्राह्मण-ग्रन्थेष्वपि अस्य माहात्म्यमुक्तम्—'कुरुर्देवानां यजनभूमिरासीत्' इत्यादिना ग्रन्थसन्दर्भेण।

२. काश्मीरदेशः—नीलपुराणोक्त-वर्णनेन समाकृष्टोऽहं भूस्वर्गभूतस्य काश्मीरदेशस्य यात्रामकुर्वम्। तत्र अमरनाथगुहायां अमरनाथस्य भगवतो दर्शनं समाचरितम्। भगवतो हिममयी मूर्तिः प्रतिशुक्लपक्षे समग्रा साकारा जायते, कृष्णपक्षे च क्षयं याति। तथापि हिमेन मार्गाच्छादनात् श्रावणपूर्णिमायामेव प्रायो दर्शनार्थिनोऽत्र समायान्ति। तत्रास्ति वितस्ता नाम्नी नदी, क्षीरभवानी नाम्नी जलवापिका, शारदापीठनामा पर्वतः। अन्यान्यपि बहूनि पुण्यक्षेत्राण्यत्र सन्ति। श्रूयते, अत्रैव भगवता आद्यशङ्कराचार्येण सह संवृत्ते पण्डितमिश्र-शास्त्रार्थे सरस्वती माध्यस्थं चक्रे, अन्ते च नदीरूपेणात्र सा विराजते।

३. केकयदेशः—चन्द्रभागात आरभ्य पूर्वस्यां इरावतीनदीपर्यन्तः केकयदेशः। तत्र पर्वतशिखरे वैष्णवीदेव्याः प्रसिद्धं स्थानम्। तत्रैव सूर्यवंशीयानां पारम्परिकी जम्बू-नामिका राजधानी। नगरादधो जाम्बवतः ऋक्षराजस्य स्थानम्। साम्प्रतमपि जम्बूकेश्वरः शिवस्तत्र प्रतीकरूपेण प्रतिष्ठितः। केकयराज्ञ एव कन्या केकयी दशरथस्य प्रसिद्धा पत्नी, भगवतो रामभद्रस्य अन्वर्थ-सापत्नमाता च।

४. त्रिगर्तदेशः—इरावतीतः त्रिगर्तदेशसीमा। तत्र त्रीणि गर्तानि (सरांसि) वर्तन्ते। तेषु भागसर एकः, यश्च हिमाञ्चलप्रदेशस्य चंबानगरतो नातिदूरे वर्तते। भाद्रपदमासि तत्र यात्रा जायते। कथ्यते,

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

देशस्यास्य हिमाचलो राजा, यस्य दुहिता भगवती सती आसीत्।

द्वितीयं लोकसर इति। तत्र माण्डवीराजधानीतः अष्टक्रोशान्तरे शिखरोपरि स्थिते सरसि लोमशर्षेः आश्रम आसीत्।

तृतीयं सरो रेणुकासरः। परमं सुन्दरमेतत्। शतशोऽत्र जलस्रोतांसि पतन्ति। परशुराममातुः रेणुकाया अत्रैव तिरोधानं निगद्यते। सप्तशतीप्रामाण्येन निकटे एव जलन्धरपीठान्तर्गतं ज्योतीरूपाया जयन्तीदेव्याः निर्मूर्तिकं स्थानम्। सर्वेषां देवानां एकत्रीभूतया शक्त्या देवीयं प्रादुरभवत्। यथा च देवैः स्वस्वायुधैरियं भूषिता, प्रतिदिनं रात्रौ तथैव शृङ्गारोऽत्र समाचर्यते। यवनसम्राजा अवरङ्गजीवेन पात्रभञ्जनपूर्वकं ज्योतितिरोधानं काङ्क्षितमासीत्। तथापि पुनर्ज्योतीरूपेण, सा तत्र प्राकट्यं गता। अतस्तेनैव तत्र स्वर्णमयं मन्दिरं निर्मापितम्। तत्रैव सोमदत्ति-नृपतेः सुशर्मा-नाम्नी राजधानी चासीत्।

ततः षट्क्रोशे प्रकृतिराज्ञः 'धर्मशाला' नाम्नी राजधानी। ततः क्रोशद्वये भास्करशिखरोपरि गायत्रीनाम सरः। ततो विंशतिक्रोशपूर्वं परस्यां क्षीरगङ्गातटे ज्योतिर्लिङ्गस्य श्रीवैद्यनाथस्य पवित्रं स्थानम्। ततः पञ्चविंशतिक्रोशे कुन्तीनामधेयं प्रसिद्धं पीठम्। तत्रैव कुल्लूनामकनगरे चतुर्दशशताब्द्यारम्भे एकेन पूजकेन भगवतो रामस्य आदिमूर्तिः अयोध्यातः समानीता। राज्ञा १६० ग्रामेषु रघुनाथमन्दिरं निर्माय तत्र सा प्रतिष्ठापिता च। राजधान्यामद्यापि रघुनाथस्य प्रसिद्धं मन्दिरमस्ति, यत्र प्रतिवर्षं विजयादशमीपर्वावसरे प्रतिग्रामतः चलमूर्तयो देवाः पृष्ठे संस्थाप्य आनीयन्ते ग्रामीणैः, मन्दिरस्य निकटे च तान् गृहीत्वा नर्तनं क्रियन्ते।

ततः त्रयोदशक्रोशान्तरे उत्तरस्यां दिशि ऋषेर्वशिष्ठस्य आश्रमो यत्र भगवता रामेण बाल्ये शिक्षा प्राप्ता। तत्समीपे इन्द्रकीलो नाम पर्वतः, यत्र भगवता शङ्करेण सह अर्जुनस्य युद्धं सञ्जातम्। शबर-वेषः शङ्करः प्रसन्नो भूत्वा पार्थाय जयद्रथवधार्थं शस्त्रञ्च दत्तवान्। तत्र अर्जुनेन 'भिल्लकेश्वर'-महादेवस्य मूर्तिः स्थापिता। ततः सप्तक्रोशान्तरे व्यासशिखरोपरि व्यासगङ्गायारुत्पत्तिस्थानम्। ततश्चन्द्रभागातटे अवरोहण-नामदेशे हिडिम्बायाः पुत्रस्य घटोत्कचस्य वंशो निवसति। तत्र त्रिलोकनाथ-कामलिङ्गस्य दर्शनं जायते।

५. द्विगर्तदेशः—कुल्लूतः त्रिंशत-क्रोशदूरे पूर्वस्यां दिशि कीचकस्य राजधान्यां शतद्रुनदस्य स्रोतः आयाति। ततः पञ्चविंशतिक्रोशदक्षिणे शिव-शिखरं 'शिवाला'-नामधेयं वर्तते। पूर्वस्यां दिशि यमुनापारे द्विगर्तदेशान्तर्गतो टिहरी-गढवालदेशः। तत्र यमुनायाः उष्णः स्रोतः। पर्वतशिखरोपरि जमदग्नेः आश्रमः। तत्रैव हैहयराज्ञा जमदग्निमुनेर्वधः कृतः।

अग्रे तद् गङ्गास्थलं यत्र वामनावतारसमये त्रिविक्रमस्य ब्रह्मणा पादप्रक्षालनं कृतम्। गङ्गोत्रीस्थलेऽस्मिन् राज्ञा भगीरथेन कठिनं तपः कृत्वा महीतले गङ्गा अवतारिता। ततोऽग्रे मन्दाकिनीगङ्गातो भगवतो ज्योतिर्लिङ्गस्य केदारनाथस्य दर्शनं भवति। तदग्रे बदरिकारण्ये मुरुनामकदैत्यस्य वधार्थं भगवता विष्णुना आद्याशक्त्याः स्मरणं कृतं तथा मार्गशीर्षशुक्लैकादश्यां भगवन्नासिकातः कन्यारूपेण तदुत्पत्तिरभूत्, यया स रक्षो हतः। तत्रैव अलकनन्दा नदी

Digitized by Arya Samaj Foundation Chennai and eGangotri

वर्तते। अस्मिन् देशे गुप्तकाशी, उत्तरकाशी, गोपेश्वरः, भास्करप्रयागः, विष्णुप्रयागः, आनन्दप्रयागः, देवप्रयागः, रुद्रप्रयागः, कर्णप्रयागः—एवमादीनां तीर्थक्षेत्रानां पुण्यं दर्शनं जायते।

६ कूर्माञ्चलदेशः—कूर्माञ्चलदेशोऽपि अतितरां पवित्रः पार्वतो देशः। तत्र भद्रशीला नदी, भद्रेश्वरी भगवती, नैनी देवी (नैनी-सरोवरे, नैनीताले) जागेश्वरः, वेणीनागेश्वरः, पातालभुवनेश्वरः, बागेश्वरः, सोमेश्वरः, उत्तरवाराणसो, गरुडगङ्गा, कोशीगङ्गा एवमादितीर्थानां दर्शनं जायते।

७. प्राग्ज्योतिषम्—श्वेतगङ्गात आरभ्यप्राग्ज्योतिषस्य (नेपालस्य) आरंभो जायते। तत्र विजयवने रुद्राक्षारण्यं पिण्डेश्वरं नाम काम्यलिङ्गञ्च अस्ति। राजधान्यां पशुपतिनाथमहादेवस्य दर्शनं भवति। ततः उत्तरस्यां दिशि पञ्चाशत्-क्रोशदूरे हूणदेशस्य (भूटानस्य) स्थितिः। इयमेका कथा लोके प्रसिद्धा यत् जलन्धरवधार्थं भगवता विष्णुना लक्ष्मीः वञ्चिता। क्रुद्धायाः लक्ष्म्याः शापवशात् विष्णुः शालिग्रामशिलारूपो बभूव। अद्यापि गण्डकीनद्यां स्नानकाले शालग्रामशिलानां भूरि दर्शनं जायते।

८. अङ्गदेशः—अङ्गदेशे विष्णुमायया रावणेन शिवलिङ्गस्य स्थापना कृता। स च रावणेश्वर-महादेवः। वैद्यनाथधामनामापि तत् महत्पुण्यं स्थानं कथ्यते। तत्र रावणेन घोरं तपः कृतम्। वनं इति तत्प्रसिद्धम्। ततः ईशान्यदिशायां कामरूपक्षेत्रे भगवता शङ्करेण यदा ताण्डवं कृतं तदा कामाक्षपर्वते गुह्याङ्गं पतितं तेन कामाक्षा इति सिद्धपीठं गण्यते। तत्रैव भगवता कृष्णेन भौमासुरवधः कृतः। तत्र ब्रह्मपुत्रनामा नदः।

परशुरामक्षेत्रे लोहनदनाम' एकं स्रोतः। जामदग्न्येन अत्रैव हैहयक्षत्रियरक्तैः 'कुण्डं पूरितम्। अतः तत्प्रदेशस्य नाम लोहित इति प्रसिद्धम्। मध्ये मणिपुर-नामक-शिखरोपरि अर्जुनपुत्रस्य बभ्रुवाहनस्य वंशीयाः धार्मिकाः निवसन्ति। तत्रैव अधोभागे दीमापुरनामकस्थले दीमानामकदैत्यतः नागकन्यकायां पुत्रो जातः। तद्वंशीया नागा इति ख्यायन्ते।

९. वङ्गदेशः—वङ्गदेशे कृष्णागङ्गा, त्रिपुरभगवती, नवद्वीपः एवमादीनि प्रसिद्धतीर्थानि सन्ति। तत्रैव भगवतः कृष्णस्य अंशेन चैतन्यदेवः प्रादुरभूत्। विष्णोः अंशावतारस्य कपिलदेवस्य आश्रमोऽपि अत्रैव वर्तते, यत्र सीमान्ते गङ्गासागरसङ्गमे मकरसंक्रमणावसरे जनाः स्नानं कुर्वन्ति।

१०. उत्कलदेशः—उत्कलदेशयात्रायां ब्राह्मीनदीक्षेत्रतः नाभिगया, वैतरणीनदी, महानदः, भुवनेश्वरः, जगन्नाथपुरी, चक्रतीर्थम्, इन्द्रद्युम्नसरः, विमलपीठम्, लोकनाथः, काम्यलिङ्गम्, स्वर्गद्वारम्, एवमादीनि तीर्थस्थानानि मिलन्ति। समुद्रस्नानस्य आद्यशङ्कराचार्यस्थापितस्य गोवर्धनपीठस्य च दर्शनस्य लाभो जायते। तत्र यात्रायाः महत्फलं निरूपितम्।

११. कलिङ्गदेशः—कलिङ्गदेशान्तर्गत - यात्रायां नृसिंहपुरं नाम महत्तीर्थक्षेत्रं मिलति। पुराणकथानुसारेण नृसिंहावतारे हिरण्यकशिपुवधावसाने विश्रामार्थं तत्र उदुम्बरवृक्षे भगवान् विष्णुः समाविशदिति ज्ञायते।

१२. आन्ध्रदेशः—आन्ध्रदेशस्य सीमान्ते कृष्णागङ्गा प्रवहति। त्रिलिङ्गदेशे शेषनागस्य शेषाद्रिपर्वते व्यङ्कटेश्वरस्य च दर्शनं जायते। तदधोभागे चन्द्रिका नाम्नी नदी प्रवहति।

१३. कर्णाटकः—कर्णाटकदेशे तुङ्गभद्रा, पम्पासरोवरः, हनुमद्गुहा, स्फटिकशिला, श्वेतचन्दनवनप्रभृतीनि दर्शनीयानि।

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

१४. चोलदेशः—चोलदेशे भगवतो रङ्गनाथस्य दर्शनं भवति। कावेरीनदीसमीपे जटायोः भ्राता संपातिर्नामासीत्। तद्गुहायां ऊर्ध्वभागे द्वयोः पक्षिणोः दर्शनं जायते।

१५. पाण्ड्यदेशः—पाण्ड्यदेशे मीनाक्षीदेव्यः दर्शनं भवति। तत्र करमाला, गङ्गा, ताम्रपर्णीनदीनां स्नानस्य महत्फलम्। तदग्रे गन्धमादनपर्वतोपरि ज्योतिर्लिङ्गं रामेश्वराख्यं यस्य स्थापना स्वयं श्रीरामचन्द्रेण कृता। मन्दिरसमीपे चतुर्विंशति-सरोवराणि सन्ति। धनुष्कोटितीर्थमपि समीपे एवास्ति।

१६. केरलदेशः—केरलदेशस्यारम्भो ताम्रपर्णीतः जायते। तत्र महेन्द्रपर्वतस्य दक्षिणभागे नीलवनम्। तत्र नीलवर्णकाः वानराः निवसन्ति। समुद्रतटे कन्याकुमारिकायाः क्षेत्रमस्ति। देवकन्यायाः गणेशेन सह विवाहो न जातः, अतः सा कन्याकुमारीति प्रसिद्धिं गता। समीपे अन्नपूर्णानदीतटे आद्यशङ्कराचार्यस्य अवतारोऽभूत्।

१७. कोंकणदेशः—कोंकणदेशान्तर्गते समुद्रतटे महाबलेश्वर-गोकर्णस्य स्थानमस्ति। पौण्ड्रकक्षेत्रमपि तत्रैव।

१८. महाराष्ट्रदेशः—महाराष्ट्रदेशे रुक्मिण्याः जन्मस्थानं कुन्दनपुरनामकम्। दण्डकारण्यम्, पञ्चवटी, मातृगयादीनि प्रसिद्धानि तीर्थक्षेत्राण्यपि तत्र दृश्यन्ते। तत्पश्चिमे पारिजातनामा पर्वतः। पञ्चवटीतः पञ्चक्रोशदूरे ब्रह्मगिरिपर्वतात् गोदावर्याः उद्गमो जायते। तत्रैव ज्योतिर्लिङ्गस्य महादेवस्य दर्शनं भवति।

१९. विदर्भदेशः—विदर्भदेशे ताप्तीनाम्नी नदी वर्तते यस्यां स्नानस्य महत्फलं कथ्यते।

२०. सुराष्ट्र-गुर्जरदेशः—सुराष्ट्र-गुर्जरदेशान्तर्गतयात्रायां सोमेश्वरज्योतिर्लिङ्गस्य स्थानं प्रभासपट्टनस्य यात्रा च सर्वप्रमुखा। अत्रैव सरस्वत्याः सङ्गमे षट्पञ्चाशतकोटि-यदुवंशीयानां भगवत्प्रेरणया अन्तो जातः। समीपे दत्तात्रेयस्याश्रमो रैवतगिरिशिखरे। बलरामस्य पत्नी रेवती तत्रत्या कन्याऽऽसीत्। साम्प्रतिकं 'पोरबंदर'-नगरं प्राचीना सुदामनगरी किल। अग्रे द्वारवत्यां श्रीद्वारकाधीशस्य दर्शनं तथा गोमत्यां स्नानं मुख्यम्। समीप एव कालियनागस्य निवासस्थानम्, बेटद्वारिकापुरी च। मध्ये दारुकवने ज्योतिर्लिङ्गस्य नागेशस्य दर्शनं जायते। समुद्रे कटभुज (कच्छ-भुज) देशे सागरतटे नारायण-सरोवरस्य सङ्गमस्थलं मिलति।

२१. सिन्धु-सौवीरदेशः—तत उत्तरस्यां दिशि शुक्रक्षेत्रम्, सिन्धुनामको देशश्च। तदग्रे सौवीरदेशे भक्तवरस्य प्रह्लादस्य नगरी प्रह्लादपुरी आसीत् या च साम्प्रतं 'मुलतान'नगर इति कथ्यते। मध्ये सैन्धवस्य (लवणस्य) पर्वतो मिलति।

२२. पाञ्चालदेशः—पाञ्चालदेशान्तर्गतयात्रायाम् इरावती, शतद्रुप्रभृत्यो नद्यः सन्ति। मध्ये पृथिव्याः नेत्रमिव कटाक्षराज्यक्षेत्रमपि।

२३. सुरधणदेशः—सुरधणदेशे नैमिषारण्यं नाम ऋषीणां क्षेत्रम्। तत्समीपे गोकर्णमहादेवः स्थापितः। तत्र परशुरामेण रामगङ्गा समानीता।

२४. उत्तरकौशिकदेशः — उत्तरकौशिकदेशे लक्ष्मणपुर (लखनऊ) नामक नगरे गोमती नदी मिलति। अयोध्यानाम्नी पुरी अनादिकालतः सरयूतटे वर्तते। रामविवासितायाः सीताया भगवत्याः निवासो वाल्मीकेराश्रमोऽपि तत्रैव।

२५. अन्तर्वेददेशः—देशेऽस्मिन् उत्पलनामके अरण्ये भगवतो रामस्य लव-कुश-नामकौ द्वौ पुत्रौ जातौ। सर्वेषां तीर्थानां राजा प्रयागक्षेत्रम्। प्रयागमाहात्म्यं च सर्वैः ज्ञायत एव।

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

२६. पौण्ड्रकदेशः—पौण्ड्रकदेशे काशीनाम प्रसिद्धा नगरी। अस्मिन्नेव देशे तमसानद्याः तथा गुप्तेश्वर-महादेवस्य दर्शनं स्नानं च कुर्वन्ति भक्तजनाः। वाराणसीनगर्यां ज्योतिर्लिङ्गस्य भगवतो विश्वनाथस्य दर्शनं भवति। इयम् एका कथा प्रसिद्धाऽस्ति यत् दिवोदास-सम्राजः इतो गमनानन्तरं सूर्यादिदेवाः भगवतः शङ्करस्य दर्शनार्थमत्र समागताः। सर्वैस्तीर्थैः क्षेत्रैश्च समागत्य स्व-स्वहस्तेन स्व-स्वनाम्ना मूर्तीः स्थापिताः।

२७. मिथिलादेशः—मिथिलादेशस्य सीमा इत्थम्—हिमालयः शिरोभागे, पादयोः जाह्नवी गङ्गा, वामाङ्गे कौशिकी तथा दक्षिणाङ्गे गण्डकी। तत्रैव विदेहनाम जनको आसीत्। तस्यैव कन्या सीता। मिथिलामध्ये धनुष्खण्डस्य दर्शनं भवति। तत्रैव लक्ष्मणगङ्गाऽप्यस्ति।

२८. मगधदेशः—मगधदेशयात्रायां च्यवनर्षेः आश्रमः राजगृहम् (यत्र राज्ञो जरासन्धस्य राजधान्यासीत्), नदी पुनपुना, फल्गुनदी तथा गयाक्षेत्रञ्च वर्तते।

२९. बर्बरदेशः—बर्बरदेशे केवलं दामोदर-नद एव तीर्थं यत्र स्नानस्य महत्पुण्यं वर्ण्यते।

३०. मालवदेशः— मालवदेशे ओङ्कारेश्वरः ज्योतिर्लिङ्गम् अमलेश्वरे, अवन्तिकायां महाकालेश्वरः, क्षिप्रानदी, गुह्येश्वरी भगवती एवं माहिष्मतीप्रभृतीनि (यत्र सहस्रार्जुनस्य राजधान्यासीत्) प्रसिद्धानि तीर्थानि सन्ति। माहिष्मत्यामेव मण्डनमिश्रेण सह आद्य शङ्कराचार्यभगवतः शास्त्रार्थः सञ्जातः।

३१. मरुदेशः—मरुदेशस्य यात्रायां काम्यलिङ्ग-पिलायतनक्षेत्रं वर्तते। सह्याद्रिपर्वते पुष्करक्षेत्रमस्ति, यत्र सृष्टिकर्तुः ब्रह्मणः पूजनं भवति। समीपे सरस्वत्याः दर्शनं भवति। तत्रैव चर्मण्वतीनाम्नी नदी प्रवहति।

३२. विन्ध्यदेशः—विन्ध्यखण्डस्य यात्रायां प्रथमं मेकलपर्वतस्य सुता नर्मदा मिलति। तत्रैव शोणभद्रस्य स्रोतः निस्सरति। समीपे दुग्धधारानाम निर्झरः पतति। कलिञ्जरक्षेत्रमपि तत्रैव। मैहरे शारदादेव्याः दर्शनं भवति। अस्मिन्नेव देशे विन्ध्यवासिनीदेव्याः प्रसिद्धं मन्दिरं वर्तते। निकटे एव अष्टभुजीदेव्याः स्थानम्। चित्रकूटनाम प्रसिद्धवनमपि तत्रैव। तत्र पयस्विनी नदीः प्रवहति। तस्याः सङ्गमसमीपे भगवतः कान्तानाथस्य पर्वतो वर्तते।

३३. शौरसेनदेशः—शौरसेनदेशस्य यात्रायां काम्यवनम्, वृन्दावनम्, महावनम् (गोकुलं), मधुवनम्, मथुरापुरी, (यमुनातटे) कालियदहम् एवमादीनि प्रसिद्धतीर्थानि सन्ति। सांप्रतं भगवतः कृष्णस्य प्रसिद्धमूर्तेः अष्टसखी-नामकं मन्दिरमस्ति। केशवदेवस्य मन्दिरमपि प्रसिद्धम्। गोपेश्वर - महादेव-मन्दिरम्, राधारमणमन्दिरम्, गोविन्दमन्दिराण्यपि वृन्दावने सन्ति। मथुरायां यमुनातटे द्वारकाधीशस्य मन्दिरमस्ति। निकट एव विश्रामघट्टे भगवतः कान्तानाथस्य मन्दिरं वर्तते।

इत्थं प्रायो निखिलभारतस्य धार्मिकपदयात्राप्रसङ्गे यानि यानि तीर्थस्थानानि मया दृष्टानि तेषामत्र अतिसंक्षेपतो नामग्रहणमात्र एव परिचयः प्रदत्तः। बहूनि तीर्थनामानि विस्तरभयाद् नोल्लिखितानि। तीर्थानां नामाऽपि परं श्रेयसे जायते इति दृढमाशास्महे यत्पाठकानामनेन निबन्धेन किमपि भव्यम् अदृष्टं नूनं संगृहीतं भवेत्। लौकिकदृष्ट्या समग्रस्य देशस्य अखण्डतादर्शनन्तु आनुषङ्गिकम्, यच्च राष्ट्रियैकात्मता-पोषकमिति पृथक् वक्तुं नावशिष्यते।

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

पूर्वतोऽनुवृत्तम् : ३०

छत्रपति-महाकाव्यम्

—श्री उमाशङ्करशर्मा त्रिपाठी—
[आंग्लभाषा-प्राध्यापकः—काशीविद्यापीठम् , वाराणसी]

मद्भाग्यमेव लिखताऽब्जभुवा वराय
पृष्टे चिराय मयि भावनिरुद्धवाचि ।
दिष्ट्यैव गद्गदगलात् 'कु कु हूँ कु' युक्त्या
वाग्देवता मम मनोरथमुल्ललाप ॥८६॥

आह्लादपूरमधरीकृतसोमवक्त्रे
हाला द्दशोरमृतमोष्ठदलप्रवाले ।
लावण्यनिर्मिततनौ सुषमैकसीमा
कोऽन्यो हरोऽस्ति भुवि नैव हृतोऽधुनाऽपि ॥८७॥

स्वर्गेऽपि सर्गसुषमेऽप्सरसो रसार्द्राः
नित्यं प्रसादितसुरा विहरन्ति भोगैः ।
मर्त्या वयं तदवनौ विरलोपचारै-
रभ्यासपाटवकलां परिशीलयामः ॥८८॥

देवाजिरे परिषदि स्तवने प्रसह्य
चित्तं निरूपितवतो मम चित्तजन्मा ।
आकस्मिकं वितनुते विजयं परास्ता
धर्म्या मतिः सपदि नश्यति कांदिशीका ॥८९॥

कल्पप्रसूनमृदुतामुपकल्प्य यत्नाद्
वेधा दिदर्शयिषुरात्मकलाप्रकर्षम् ।
गात्रं निरस्थि सुषमावनतं विरच्य
मूढो न्यधान् मनसि तेऽश्मकठोरतां किम् ॥९०॥

दीक्षोत्सुकेन सततं जगदापणेऽस्मिन्
नूनं मनोऽभिलषितं निपुणं परीक्ष्य ।
लब्धं मया स्विदितमेव विनाऽर्थदर्पं
तन्मे गुणैकगणिकेव भवाऽतिथेयी ॥९१॥

वार्धक्यमेव नियतिं यदि यौवनस्य
मत्वाऽबुधो हसतु वीक्ष्य तवाद्विजास्यम् ।
बाह्यानुबन्धविरते - हृदयैकधाम्नः
प्रीतेर्मनो न तु वपुर्निकषः कदाचित् ॥९२॥

अभ्यासपाटवकला-व्यवहारशून्या
मुग्धा दधातु चपलेपुरतिं यथार्हाम् ।
नूनं सुपक्वसहकारनिभे त्वदास्ये
द्वित्रद्विजेऽपि नयनोत्सवमेति दृष्टिः ॥९३॥

देहे विकारिणि वयोऽनुचरे भवत्याः,
निर्लिप्तचित्तमनुलोच्य सतां विवेके ।
भूयो नवीक्रियत एव वचोऽच्युतस्य
कृत्वाऽपि यत् किमपि नैव करोति योगी ॥९४॥

वायुः शुभे ! तवदरस्फुटयौवनोष्म-
वक्षोविलोकनसमेधितसाहसः किम् ।
कुम्भद्वये हठचलाञ्चलरक्षितेऽस्मिन्
स्पर्शैर्जडोऽनुभवतीव रसस्वभावम् ॥९५॥

मध्यागमं नवनवस्पृहमस्तधैर्यं
नूनं न जन्मसहजं न तयोऽन्त्यगामि ।
एतत् तदेभिरुपभुक्तमनन्यदासैः
स्वास्थ्यं तवाऽऽदिशतु यौवनमुत्सुकाङ्गि ॥९६॥

भित्तित्रपानिपतिता जनविश्रुताऽसौ
धैर्यं बलं निहतमेव चरित्रचारु ।
भग्नं मदाश्रयमिदं ननु दुर्गचित्तं
किं क्षोभयस्यतनुजिष्णुमतो विलम्बैः ॥९७॥

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

भूयः श्रियो मुमुदिरे मुदिरेक्षणानां
घर्मानुतप्तमनसः सरितां घनतौ ।
संस्मृत्य किन्तु नवपल्लवपुष्पयष्टिं
भृङ्गा मुधाऽभिजरतीं व्रततिं विचेरुः ॥९८॥

शास्त्राणि विश्वसिमि नूनमतः पिबामि
नासक्तिरामृशति मां चषकाहृतौष्ठम् ।
दोषाविलेऽपि भगवान् किमसौ न सर्गे
लोकस्थितिं द्रढयति त्रिगुणानुपेतः ॥९९॥

चित्तेन शौण्डिकभुवं सततं व्रजन्तो
व्यक्तं निरुद्धगतयोऽपि तदेकभावा ।
यद् द्रष्टुमीशमपि सर्वदृशं क्षमन्ते
नास्माकमेकमनसामलभः स देवः ॥१००॥

स्रष्टुः कलावधिकृतौ त्वयि बद्धभावः
स्वप्नेऽपि यो मृगयते न परं शरीरी ।
तच्छिल्पमुग्धहृदयः प्रणयानुवर्ती
संसेवते न किमसौ तमुदारमीशम् ॥१०१॥

देशाग्रहः प्रकृतिधीर्धिषणाधिकारो
वासो वयो वसु कुलोपधिसम्प्रदायः ।
यस्यां मिथः स्थितिजुषां सहसा स्खलन्ति
साऽऽदर्शभूर्विजयतां मधुतीर्थपुण्या ॥१०२॥

अक्षस्पृहां कृतकमुद्रिकयाऽयमेषः
ताम्बूलरागमसकृत् करलाघवेन ।
पानोत्सवं ग्लहवतां स्तवनैर्निषेव्य
वन्ध्योद्यमां तव निशां सफलीकरोतु ॥१०३॥

साङ्ख्ये यमाप्तवचसः पुरुषेति नाम्ना
निष्कर्म - निर्गुण - निराशमुदाहरन्ति ।
पैत्र्यं वसु प्रकृतिजालमिवाऽपसार्य
सोऽयं विमुक्तरतिरप्यतिथिः पुरस्ते ॥१०४॥

धावन् पुरोऽपि यदवार्यनिदेशबद्धः
शब्दोऽनुनासिकमुरीकुरुते स्ववर्त्म ।
छद्मक्षपाच्छलित-लोकदृगर्थदृष्टिः
सोऽयं गुरूनपि तृणादगुरूनवैति ॥१०५॥

दुर्वाससं क्षिपति यः सहजाक्षिपातैः
स्वर्द्रुर्मुमूर्षति निरीक्ष्य यदीयलिप्साम् ।
वन्द्याऽङ्घ्रिपङ्कपरिचुम्बनपङ्किलास्यः
सैषो विवेकमपि किं सहतेऽरिमेकम् ॥१०६॥

लब्ध्वा यमेकमयि ! नीरवताऽपि दिष्ट्या
सौभाग्यमावहति वल्लभसत्कृतानाम् ।
सोऽसौ तटस्थमनसैव जगद्विकारं
सोढुं महार्णव इवार्हति तेऽभिशंसाम् ॥१०७॥

नत्वा गुरून् बुधकुलं वचनादरेण
भूपं स्तवेन परिदह्य रुषा प्रजाश्च ।
युक्त्या दुरापमपि भोगमुपासमानो
मन्त्री त्वदङ्घ्रिपतितां कुरुतात् स्वलक्ष्मीम् ॥१०८॥

एनं शरण्यमवलम्ब्य जनाधयोऽपि
दुर्वार्यदण्डमनिषेव्य कृतान्तकल्पाः ।
व्यक्तं समाजहृदयं परिताडयन्तः
साशीर्वचोभिरवशैः किल सत्क्रियन्ते ॥१०९॥

पुष्पेषुसंस्तवमगात् प्रपितामहस्ते
यस्याः पदे तदधिकं हि तदीयजातः ।
मोहं विसिद्य विदुषोऽपि भवत्पितुः सा
तीर्णार्णवेयमधुनाऽपि तवोत्सवाय ॥११०॥

विद्या गुणा वसुमती प्रमदोत्तमेव
निन्दन्ति वेधसमनिर्मितयोग्यपात्रम् ।
तत्तानसेनगुरुबन्धुमिमं दुरापं
कोणीकुरुष्व विधये ककुभायिताङ्गि ॥१११॥

सैषः सहेलमधरीकृतराजराजो
वागीशमप्यशरणं परितर्प्य हेम्ना ।
ज्ञानावलेपपरुषां मनसाऽपि वाणीं
श्रोतुं मनागपि न संसहते विवेकी ॥११२॥

शप्तोऽङ्गनाभिरपि निष्ठुरवञ्चिताभि-
र्गीतो द्विजैः श्रुतिवचोभिरपङ्कवर्त्मा ।
सर्वग्रसिष्णुरपि वाञ्छितकर्णकीर्ति-
राज्ञामपि क्षिपति बुद्धिमय विरोधैः ॥११३॥

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

संघुष्य नास्तिकधियां जगतीशसत्तां
युक्त्या तदस्थितिमपीशजुषां समाजे।
विद्यां विधातुमयमर्थवतीं प्रबन्धैः
स्प्रष्टुं गुरुर्नमति भीरु तवाङ्घ्रिमूले ॥११४॥

वात्स्यायने प्राथितशास्त्रिमदाद्रिवज्रः,
छात्रान्नियन्तुमुपदेशवचस्सु सिद्धः।
ज्यायानपि प्रवयसां नवचातकोऽयं
प्रोद्यत्पयोधरकृपां लभतां प्रतप्तः ॥११५॥

वार्ताऽपि सञ्चरति नाद्य मनोरमायाः
सा कौमुदी व्यपरता क्व सती न जाने।
लीलावती रजसि सान्तमिता वराकी
नाद्याऽपि विश्वसिसि नन्दिनि मामधन्यम् ॥११६॥

अर्थापरक्तिरयि ! निष्फलतां ममाऽद्य
त्वत्स्निग्धरात्रिरपि हन्तुमिमां प्रतीक्षाम्।
अन्योन्यमुत्सुकमना परिसेवमाना
शब्दार्थसङ्गतिमुपैतु विधौ गिरीव ॥११७॥

स्निग्धा द्विजाः स्मितरुचोऽमृतसूतिवाचः
पूर्णेन्दुरिष्टशकुनस्य पुरो ममाद्य।
हस्तो मधूत्सवरमस्तिथिरातिथेयी
तत्किं रुषा दहति शाकुनिकेव दासी ॥११८॥

नैवाऽऽसवे मम रुचिर्न च वेशमार्गे
मत्तो विदन्ति बहुधाऽनृजवोऽपि वर्त्म।
दूरं वियोगदहनादिह वाऽघपङ्कात्
मुक्त्यै तदस्तु हृदयं मम वासभूस्ते ॥११९॥

चित्रं चतुर्दशमितेष्वपि गोलकेषु
सृष्टानसंख्यवपुषो वपुषोऽतिधाम्नः।
वक्षःस्थगोलकयुगैकपदे नियम्य
पङ्के विडम्बयसि धातुरपि प्रतिष्ठाम् ॥१२०॥

(क्रमशः)

'सूर्योदय'स्य स्वामित्वादिविषयकं विवरणम्

प्रपत्रम् : ४ (द्रष्टव्यो नियमः ८)

१–प्रकाशनस्थलम्	:	वाराणसी
२–प्रकाशनावधिः	:	मासिकम्
३–मुद्रक-नाम	:	गोविन्द नरहरि वैजापुरकरः कृते मनोहरप्रेस, वाराणसी
राष्ट्रियता	:	भारतीयः
पत्र-सङ्केतः	:	के० ३०/४० घासीटोला वाराणसी—१
४–प्रकाशक-नाम	:	गो० न० वैजापुरकरः
राष्ट्रियता	:	भारतीयः
पत्र-सङ्केतः	:	वाराणसी
५–सम्पादक-नाम	:	गो० न० वैजापुरकरः
राष्ट्रियता	:	भारतीयः
पत्र-सङ्केतः	:	वाराणसी
६–तेषां व्यक्तीनामंश-भागीनां वा नामानि पत्र-सङ्केताश्च, येषां सविधे समग्रस्य मूलधनस्य एकप्रति-शततोऽधिको भागो वर्तते।	:	श्रीभारत-धर्म-महामण्डलम् जगत्‌गंज, वाराणसी कैण्ट, वाराणसी

अहं गोविन्द नरहरि वैजापुरकर एतद्द्वारा घोषयामि यदुपरिलिखितं विवरणं मदीयज्ञानविश्वासानुसारं सत्यमस्ति।

(ह०) गोविन्द नरहरि वैजापुरकरः

१-३-'६७. (प्रकाशकः)

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

पृथ्वीराजाख्यानकम्

— श्रीविश्वनाथ त्रिपाठी, साहित्याचार्यः —

[काशी-नागरीप्रचारिणी-सभायाः कोषविभागीया अन्यतमाः सम्पादकाः श्रीविश्वनाथ त्रिपाठी शास्त्रिणः हिन्दी-साहित्यक्षेत्रे ख्याता अपि मूलतः संस्कृतसाहित्यस्य मार्मिका विद्वांसः। तथापि संस्कृतक्षेत्रे तेषां लेखनं प्रायो दुर्लभमिवाऽऽसीत्। अस्माकमाग्रहेण इतः परं तैः स्वीयसरल-सरस-लेखन्याः प्रवाहः संस्कृतक्षेत्रेऽपि प्रवाहयितुं निर्ध्यातः। तस्यैव इदमादिमं फलं यच्च प्रत्यक्षं गृहरत्नेभ्य उपायनीकृतमपि स्वाद-लोलुपैः यूनैः प्रौढैरपि आस्वादयितुं शक्यते। नूनमत्र तेषामपि रोचनार्था बह्व्यः सामग्र्यो निहिताः। त्रिपाठिभिः राष्ट्रभाषा-प्रमुखग्रन्थस्य 'पृथ्वीराजरासो'-ग्रन्थस्य मथनसमुत्थं नवनीतमप्यत्र समालिम्पितम्। तेन काऽप्यभीख्या अनेन वितन्यते। क्रमशोऽस्माभिरिदं प्रकाश्यते।

—सम्पादकः]

'चौहान' - कुलप्रसूतः पृथ्वीराजः भारतवर्षस्य ख्यातनामा प्रतापशीलः नरपतिः आसीत्। तस्य जनकः सोमेश्वरः अजमेरस्य नरेशः आसीत्। जननी च कमला नामधेया। कमलादेवी इन्द्रप्रस्थेश्वरस्य 'तोमर'-वंशीयस्य अनङ्गपाल-नाम्नो राज्ञः दुहिता आसीत्। अनङ्गपालस्य ज्येष्ठतनयायाः विवाहः विजयपालेन सह जातः, यः कान्यकुब्जाधिपतिः आसीत्। एवम् दिल्लीनरेशः पृथ्वीराजः कान्यकुब्ज-नरेशः जयचन्दश्च सम्बन्धिनौ आस्ताम्। चौहानाः अग्निवंशीयाः क्षत्रियाः गीयन्ते। एतादृशी कथा आख्यायते यत् एकदा यज्ञविधौ दानवानाम् उत्पातं विलोक्य महर्षिः वशिष्ठः यज्ञकुण्डीयवह्नेः एकं वीरं पुरुषं उदपादयत्, यः तान् राक्षसान् अवधीत्। तस्य 'अनल' चौहान इति नाम जज्ञे। तस्यैव वंशे नैक-पुरुषानन्तरं 'वीसलदेव' - नामकः महान् वीरः समभूत्। तस्यैव वंशे अग्रे चौहान - 'पृथ्वीराज'स्य जन्म अभूत्।

जन्म शैशवं च

'भविष्णुनां वृक्षाणां पर्णानि चिक्कणानि जायन्ते' ('होनहार बिरवान के होत चीकने पात') इति लोकोक्त्यनुसारं शैशवादेव पृथ्वीराजः पठन-लेखन-घोटकारोहण-खड्ग-चालनादीनि अशिक्षत्। सप्तदशाऽष्टादशवर्षीयः सः अस्त्र-शस्त्रविद्यायां पूर्णं कौशलं प्राप्तवान्, द्विसप्तति-प्रकारासु कलासु च निपुणः समजनि। सहैव सः विनीतः, महतां समादरकर्ता, गुरूणाम् आज्ञापालकः, प्रजानां पालयिता चासीत्। समानवयसः अनेके राजकुमाराः तस्य सहचारिणः अभवन्, यैः सार्धं शिक्षां समधीत्य सः राजकार्याणि विलोकयन् आसीत्। तस्य सुहृत्सु चंद बरदाई, काका कन्ह, कैमास, चामण्डराय प्रभृतयः अभूवन्, यैः सार्धं सः चतुर्दिक्षु पर्यटन् राज्यकार्याणि च सम्पादयन् समये समये मृगयामपि समाचरन् आसीत्।

एकदा घनीभूते विपिने यदा पृथ्वीराजः तत्सहचारिणश्च आखेटकं कुर्वन्त आसन् तदा

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

चन्द्रकविः सार्थात् परिभ्रष्टः तस्मिन्नेव घनारण्ये इतस्ततः बभ्राम। एवं भ्राम्यन्नेव सः कञ्चिदेकं योगिनम् अद्राक्षीत्। श्रान्तः चन्द्रः क्षणं तत्रैव स्थित्वा योगिनं प्रार्थयामास। प्रसन्नः योगी तस्मै मन्त्रमेकं ददौ अकथयत् च यत् अनेन मन्त्रेण विस्मापकाः अघटित-घटना-पटीयसः परमपराक्रमिणः द्विपञ्चाशद्-वीराः ते वशिनः भविष्यन्ति। मन्त्रमिमं परिगृह्य चन्द्रः योगिनं प्रणनाम, मन्त्रस्य साफल्यं परीक्षितुं च योगिनिर्दिष्टपथा पृथ्वीराजस्य आखेटस्थाने प्रत्यावर्तत। अपरेद्युः सुसज्जायां राजसभायां प्रविश्य चन्द्रः वृत्तमिदं राज्ञे पृथ्वीराजाय निवेदयामास। द्विपञ्चाशद्वीरान् समाहूय स्वीयं मन्त्रसामर्थ्यं दर्शयामास, पृथ्वीराजं च विद्यामिमाम् अशिक्षयत्।

श्मश्रु-प्रतिष्ठा

अत्रान्तरे पृथ्वीराजस्य गुर्जरनरेश-भोलाराय-भीमदेवयोश्च संघर्षः प्रादुरभूत्। गुर्जरराजस्य भीमदेव-पितृव्यस्य सप्त पुत्राः गुर्जरेभ्यः प्रपलाय्य तत्र समागताः। पृथ्वीराजस्य वर्धमानां शक्तिमवलोक्य ते सर्वे पृथ्वीराजस्य सेवायां निवसनेच्छां प्रकटयामासुः, राजा च तां स्वीचकार।

एकस्मिन् दिने राजसभायां तेष्वन्यतमः स्वभावादेव स्वीयं श्मश्रु हस्तेन परामृशत, सहैव अकस्मात् तन्नयने कन्हराव नयनाभ्यां सङ्गते। कन्हरावेण घटनायाः अस्याः अयमाशयः गृहीतः यत् असौ माम् अपमानयतीति। सः शीघ्रं ततः समुत्थाय एकेनैव खड्गाघातेन तं विच्छेद।

तद्रक्षणाय प्रवृत्तान् शिष्टान् तदीयभ्रातरोऽपि सः सपदि तत्सहयात्रिणः अकरोत्। वृत्तमिदं श्रुत्वा तेषाम् अङ्गरक्षकाः सैनिकाः अपि तत्र सम्प्राप्ताः, किन्तु पृथ्वीराजसामन्ताः तानपि सर्वान् चिच्छिदुः।

अथ पृथ्वीराजेन ससम्मानं पृष्टः कन्हरावः अवदत्—को नाम वीरः मत्सम्मुखे श्मश्रूणि उत्तामयितुं प्रभवेत्? अनेन मत्पुरतः श्मश्रूणि उदञ्चितानि, अत एव मया स निहतः। वार्तामिमां श्रुत्वा पृथ्वीराजः चन्द्रकविद्वारा तस्य चक्षुषोः एका रत्नखचितां स्वर्णपट्टिकां निबबन्ध, या केवलं समराङ्गणे तदङ्गणे वा उद्घाट्यते स्म।

इतः मंडोवर-नरेशः नाहरराय-परिहारः पृथ्वीराजाय कन्यायाः दानं स्वीकृत्याऽपि वचनभङ्गम् अकरोत्। अतः तम् अभिषेणयितुं समुद्यमः प्रववृते। युद्धं प्रारब्धम्, परम् अन्ते नाहररायः पराजित्य परमेण विनयेन स्वां दुहितरं पृथ्वीराजाय ददौ। अयं पृथ्वीराजस्य प्रथमः उद्वाहः।

कियत्कालानन्तरं सा पत्नी मृता। अत्रान्तरे पृथ्वीराजः प्रतिवेशिनरेशं मुद्गलरायमपि युद्धे पराजित्य महतीं ख्यातिम् अर्जितवान्। सोमेश्वरः सुयोग्यं पुत्रमवाप्य राजकार्याद् विरतः बभूव। कतिपयैरेव दिवसैः निकटवर्तिनः नैकान् लघुलघून् राज्ञः विजित्य पृथ्वीराजः वृद्धानां समवयस्कानाञ्च विशालतरः समाजः सङ्घटितवान् यस्य सदस्येषु काका कन्हः, कैमासः, चामंडरायः, लङ्गलारायप्रभृतयः प्रमुखा वीराः आसन्।

गौराङ्गेभ्यः वैरस्य कारणम्

अस्मिन् काले गजनीदेशे शहाबुद्दीन गोरी-नामा यवनः राज्यं शासदभूत्। तस्य भ्राता हुसेनखाँ नामा परमसुन्दरः धैर्यवान् बुद्धिमान् पराक्रमी चासीत्। शहाबुद्दीनस्य एका भार्या हुसेनखानस्य गुणेष्वनुरक्ता तत्पार्श्वे गता, अतः रुष्टः शहाबुद्दीनः हुसेनं देशात्

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

निःसारयितुम् आज्ञापितवान्। हुसेनः स्वभार्यां परिवारं सैन्यं च समादाय ततः निस्ससार, हिन्दुस्थानं च समागत्य नागौर-स्थानस्य निकटे वनमुवास। तत्र तद्दूतैः संसूचितं यत् निकटे एव पृथ्वीराजोऽपि मृगया-विहाराय स्वशिविरे तिष्ठति इति। श्रुत्वैतत् सः बहुमूल्यानि उपायनानि तदन्तिके संप्रेष्य सर्वं निजं वृत्तान्तं च निवेद्य शरणं ययाचे। मन्त्रिणाम् गुरुजनानाम् च सम्मत्या पृथ्वीराजः तस्मै शरणदानम् अनुमत्य प्रमुदितेन मनसा आखेटात् निवृत्त्य स्वराज्यं प्रत्याजगाम। हुसेनखानः तदनुयायिनश्च योद्धारः गजन्यामपि पराक्रमिणः मन्यन्ते स्म। तत्सहयोगिताम् अवाप्य पृथ्वीराजचौहानस्य प्रभावः अधिकाधिकम् प्रावर्धत।

गोरी-पराजयः

हुसेनखानस्य सहयोगेन यत्र एकतः पृथ्वीराजस्य बलमवर्धत, अपरतश्च शत्रवोऽपि अवर्धन्त। अग्रे च ते घातकाः अभवत्। हुसेनखानस्य अन्वेषणाय प्रेषिताः दूताः परावृत्य शहाबुद्दीनम् अबोधयन् यत् हुसेनः पृथ्वीराजस्य शरणे वर्तते, तदा स भृशं चुक्रोध। पत्रमेकं संप्रेष्य तेन पृथ्वीराजः प्रतिबोधितः यत् 'हुसेनखानं निष्कासय, नो चेत् युद्धाय सन्नद्धो भव' इति। शहाबुद्दीन-सन्देशं श्रुत्वा सामन्ताः मन्त्रिणश्च सभामामन्त्र्य निश्चितवन्तः यत् हुसेनः रक्षणीय एव। तदर्थं ते युद्धाय सन्नद्धाश्च अभूवन्। दूतैः एतादृशं कटुतरं प्रतिसन्देशं समवाप्य गोरी क्रोधेन अग्निरिव जज्वाल, तम् अभिगन्तुं सेनाञ्च समज्ञापयत्। तस्य विशाला सेना नागौर-निकटं प्राप्यैव विशश्राम, युद्धाय व्यूढा चाभूत्। इतः पृथ्वीराजस्याऽपि सेना सन्नद्धा आसीत्। तुमुलं युद्धम् अभवत्। अन्ते पृथ्वीराजः तं जिगाय, शहाबुद्दीनञ्च पलाय्यमानं बन्दिनं कृतवान्।

परं दौर्भाग्यमेतत् यत् यदर्थं युद्धमिदम् अभवत् सः हुसेनखानः युद्ध्यन्नेव वीरगतिं गतः, तस्य परमानुरक्ता पत्नी च जीवन्त्येव तस्यैव खाते समाधिं जग्राह। कतिचिद्दिनानि शहाबुद्दीनं कारागारे निरोद्ध्य अन्ते च ततः प्रचुरम् अर्थदण्डं गृहीत्वा पृथ्वीराजः तमनेन पणेन व्यसृजत् यत् हुसेनस्य पुत्रान् पारिवारिकांश्च पालयेथाः, कदाचिदपि हिन्दुस्थाने आक्रमणं च मा कृथाः' इति।

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

श्रीभारतधर्म-महामण्डल-शास्त्रप्रकाश-विभागद्वारा प्रकाशितानि पुस्तकानि

१.	धर्म-कल्पद्रुम प्रथम खण्ड	२)
२.	,, द्वितीय खण्ड	१॥)
३.	,, तृतीय खण्ड	२)
४.	,, चतुर्थ खण्ड	२)
५	,, पंचम खण्ड	२)
६.	,, षष्ठ खण्ड	३॥)
७.	,, सप्तम खण्ड	२)
८.	,, अष्टम खण्ड	३॥)
९.	धर्म कल्पद्रुम द्वितीयखण्डसहित, रायल एडी०	५)
१०.	प्रवीण दृष्टि में नवीन भारत प्र० द्वि० खण्ड	२)
११.	नवीन दृष्टि में प्रवीण भारत	१)
१२.	साधन-चन्द्रिका	१॥।)
१३.	शास्त्र चन्द्रिका	१॥)
१४.	धर्म-चन्द्रिका	१।)
१५.	आर्य-गौरव	॥)
१६.	नीति-चन्द्रिका	॥)
१७.	धर्म-प्रश्नोत्तरी	।)
१८.	चतुर्दश-लोकरहस्य	।)
१९.	गीतार्थ-चन्द्रिका सजिल्द	३)
२०.	,, ,, अजिल्द	२॥)
२१.	सनातनधर्म-दीपिका	॥।)
२२.	धर्म-विज्ञान प्रथम खण्ड	५)
२३.	,, द्वितीय खण्ड	४)
२४.	,, तृतीय खण्ड	४)
२५.	सतीचरित्र-चन्द्रिका	२)
२६.	नित्यकर्म-चन्द्रिका	।)
२७.	धर्म-सोपान	।)
२८.	धर्मकर्म-दीपिका	।)
२९.	सदाचार-सोपान	−)
३०.	कन्याशिक्षा-सोपान	−)
३१.	ब्रह्मचर्य-सोपान	।)
३२.	साधन-सोपान	॥)
३३.	शास्त्र-सोपान	।)
३४.	उपदेश-पारिजात	॥)
३५.	कल्कि-पुराण	१॥)
३६.	पातञ्जल-योगदर्शन	३)
३७.	महामण्डल-रहस्य	१॥)
३८.	मन्त्रयोग-संहिता	१)
३९.	हठयोग-संहिता	॥)
४०.	तत्त्वबोध	=)
४१.	स्तोत्र-कुसुमाञ्जलि	।)
४२.	भगवद्गीता प्रथम खण्ड	१)
४३.	विष्णु-गीता	१)
४४.	सूर्य-गीता	॥)
४५.	शक्ति-गीता	१)
४६.	धीश-गीता	॥।)
४७.	शंभु-गीता	१)
४८.	संन्यास-गीता	१)
४९.	गुरुगीता	।)
५०.	कर्ममीमांसा-दर्शन प्रथम खण्ड	१॥)
५१.	,, द्वितीय खण्ड	२)
५२.	,, तृतीय खण्ड	५)
५३.	कर्ममीमांसा-दर्शनम् (संस्कृत)	२)
५४.	राम-गीता	२॥)
५५.	कहावत-रत्नाकर साधारण रायल	१०)
५६.	रामायण तुलसीकृत	१॥)
५७.	दैवीमीमांसा-दर्शन प्रथम भाग	३॥)
५८.	,, द्वितीय भाग	५)
५९.	त्रिवेदी सन्ध्या	।=)
६०.	गोव्रत-तीर्थमहिमा	॥)
६१.	मार्कण्डेय-पुराण प्रथम खण्ड	१)
६२	,, द्वितीय खण्ड	१)
६३.	,, तृतीय खण्ड	१)
६४.	ऋजु-पाणिनीयम्	॥।)
६५.	संगीत-सुधाकर	।)
६६.	पुराण-रहस्य	१॥)
६७.	संन्यासधर्म-पद्धति	१॥)
६८.	पातञ्जल-योगदर्शनम (संस्कृत)	४)

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

पञ्जीकृतसंख्या एल० १८५८

सूर्योदयस्य नियमाः

पत्र-संहिता

१. 'सूर्योदय'-मासिकपत्रस्य वार्षिकं शुल्कं रूप्यकपञ्चकं वर्तते। धनादेश (मनीआर्डर) द्वारा तत्प्रेषणीयम्। बी० पी० द्वारा प्रेषणे ५० पणाः पृथक् प्रदेयाः स्युः।

२. आवर्षं गम्भीरसाहित्यसमन्विताः १२ अङ्काः प्रकाश्यन्ते। नवीनग्राहकत्वं प्रथमाङ्कतः (जनवरी-अंकतः) एव स्वीक्रियते। माध्यमिकेन केनापि अङ्केन ग्राहकत्वं न स्वीक्रियेत।

३. आंग्लमासस्य २६ दिनाङ्के 'सूर्योदयः' प्रकाशितो भवति, वारद्वयं संशोध्य ग्राहकेभ्यः स प्रेष्यते। अतस्तदलाभे पूर्वं स्वकीय-पत्रालयस्तदनागमनस्य निश्चयं कृत्वैव १० दिनाङ्कानन्तरं वयं सूचनीयाः।

४. लेख-कवितादीनां भाषा संयता, सरला, शुद्धा च भाव्या। प्रकाशनीय लेखादीनां स्पष्टाक्षरैः कर्गजस्यैकपृष्ठे एव लेखनमावश्यकम्। अस्वीकृता लेखादयः पोस्टविभागीय-चिटिका (टिकट) प्राप्त्यनन्तरं परावर्तयितुं शक्ष्यन्ते।

५. सम्पादकीय-विषयसम्बद्धे पत्र-व्यवहारे 'सम्पादकः' इति, व्यवस्थाविभागीय पत्रव्यवहारे च 'व्यवस्थापकः' इति च स्पष्टं लेखनीयम्। तेन उत्तरलाभे मुधा विलम्बो न भवेत्।

विज्ञापन-शुल्कम्

सूर्योदये सुरुचिपूर्णं विज्ञापनं प्रकाश्यते। एकवारं तस्य प्रकाशनस्य शुल्कक्रमश्च अधोलिखितोऽस्ति। सार्वकालिकस्य दीर्घकालिकस्य च विज्ञापनस्य कृते विशेष-सौविध्याय पत्र-व्यवहारः कार्यः।

साधारणस्य प्रतिपृष्ठस्य	१००) रु०	साधारणस्य प्रत्यर्धपृष्ठस्य	६०) रु०
साधारणस्य चतुर्थांशपृष्ठस्य	३५) रु०	आवरण-चतुर्थपृष्ठस्य	२००) रु०
आवरण-द्वितीय-तृतीयपृष्ठयोः	१५०) रु०	प्रथमावरणपृष्ठे विज्ञापनं न स्वीक्रियेत।	

— सङ्केतः —

'सूर्योदय'-कार्यालयः, भारतधर्म-महामण्डलम्, जगत्गंज वाराणसी।

सम्पादकः, प्रकाशकः, मुद्रकश्च—गोविन्द नरहरि वैजापुरकरः,
श्रीभारतधर्ममहामण्डलम्, जगतगंज, वाराणसी कैण्ट।
मुद्रण-स्थलम्—मनोहर प्रेस, जतनबर वाराणसी।

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

सूर्योदयः

भारतधर्ममहामण्डलस्य
मासिकं मुखपत्रम्

वर्षम् ४३

अङ्कः ६

सम्पादकः
गो० न० वैजापुरकरः

जून
१९६७

वार्षिक-मूल्यम्
५) रूप्यकाणि

अस्याङ्कस्य मूल्यम्
अर्धरूप्यकम्

केऽधर्मपन्थानः त्याज्याः ?

परद्रव्येष्वभिध्यानं मनसाऽनिष्टचिन्तनम् ।
वितथाभिनिवेशश्च त्रिविधं कर्म मानसम् ॥ १ ॥
पारुष्यमनृतं चैव पैशुन्यं चापि सर्वशः ।
असम्वद्धप्रलापश्च वाङ्मयं स्याच्चतुर्विधम् ॥ २ ॥
अदत्तानामुपादानं हिंसा चैवाविधानतः ।
परदारोपसेवा च शारीरं त्रिविधं स्मृतम् ॥ ३ ॥
त्रिविधं च शरीरेण वाचा चैव चतुर्विधम् ।
मनसा त्रिविधं कर्म दशाऽधर्मपथांस्त्यजेत् ॥ ४ ॥

—महाराजो मनुः

(अ० १२. ५-८)

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

अनुक्रमः

प्रपानकम्	पत्रपुटम्	परिवेषकः
जाह्नवि कुर्महे नमः	१६१	श्री स्व० कुलचन्द्र गौतमः
श्री महर्षि-ज्ञानानन्दचरितम्	१६२	श्री विन्ध्येश्वरीप्रसादशास्त्री
संस्कृत-शिक्षा, शास्त्राभ्यासश्च	१६४	सम्पादकीयम्
क्षिप्रा-लहरी	१६८	श्री विनायक गणेश भागवतः
कृष्णस्य प्राधान्यम्, अपालासूक्त-तात्पर्यञ्च	१७१	श्री पूज्य करपात्रस्वामिनः
(३२) क्षत्रपति-महाकाव्यम्	१७५	श्री उमाशङ्करशर्मा त्रिपाठी
(३) शाकुन्तलीयं जीवनदर्शनम्	१७९	श्री न० च० वे० नरसिंहाचार्यः
मानस-भारती	१८५	श्री जनार्दन गङ्गाधर रटाटे
निदाघ-विलसितम्	१८६	श्री स्व० म० म० लक्ष्मणशास्त्रितैलङ्गाः
(१) मनस्तत्त्व-विमर्शः	१८८	श्री मुरलीधर मिश्रः
(३) पृथ्वीराजाख्यानम्	१९१	श्री विश्वनाथ त्रिपाठी

—०:❀:०—

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

सूर्योदयः

श्रीभारतधर्ममहामण्डलस्य मासिकं मुखपत्रम्

रागद्वेषनिशाटनं विधुरयन् मोहं तमो नाशयन्,
तामिस्रं जडवादकैरवकुलं ज्ञानत्विषा ग्लापयन्।
विद्वत्कोकमशोकयन् नयसुधीरोलम्बमुन्मीलयन्,
सञ्जातः सुमनोमनो मधुयरन् सर्वत्र सूर्योदयः॥

४३ वर्षे] वाराणसी, ज्येष्ठः २०२४ : जून १९६७ ई० [६ अङ्कः

जाह्नवि कुर्महे नमः

सुधांशुकृतशेखरां स्मितमुखीं तुषारप्रभां सकुम्भवरवारिजाभयकरां वलक्षाम्बराम्।
नदीनदनिषेवितां मकरवाहनारोहिणीं भये महति सोदये नतिमुपेत्य गङ्गां श्रये॥ १॥

शुभाभिर्धाराभिः सुरनरभुजङ्गान् हि बहुधा समुद्धर्तुं नारायणचरणतः प्रस्रुतवतीम्।
असन्देहज्ञेय - त्रिभुवनग - मन्देतरदयां जनित्रि त्वां वन्दे विनयनतमूर्धा त्रिपथगाम्॥ २॥

अभयवर - घटाम्भोजन्म - राजद्भुजायाः सुविशदवसनायाः स्मेरवक्त्राम्बुजायाः।
शशिमय - मुकुटाया नक्रपृष्ठस्थिताया वपुरधिमति मातुर्भातु धर्मद्रवायाः॥ ३॥

सुरनगर - विहारि स्वादु नैर्मल्यधारि द्विरसनपुरचारि क्ष्वेडतापा -ऽपहारि।
तव विपदपसारि क्षोणिभागावतारि त्रिभुवनसुखकारि त्रायतामम्ब वारि॥ ४॥

प्रवाहयन्त्यै स्मरणेन देहिनामघानि नानाकृतिकानि दूरतः।
प्रसह्य तुभ्यं निरवद्यकीर्तये मुहुर्मुहुर्जाह्नवि कुर्महे नमः॥ ५॥

— स्वर्गीयाः श्री कुलचन्द्र गौतमाः, नयपालाभिजनाः —

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

श्रीमहर्षि-ज्ञानानन्दचरितं महाकाव्यम्

— श्रीविन्ध्येश्वरीप्रसादशास्त्री —

॥ अथ द्वादशः सर्गः ॥

१. विनयैरमितैः किशन्गढेशः
स्वपुरं तं मुनिसत्तमं निनाय ।
उररीकृतवान् यतेर्निदेशं
समनुष्ठातुमियेष सोमयागम् ॥

२. अनुभावयुतो महोग्रतेजाः
विपुलद्रव्य - पराक्रमैक - साध्यम् ।
नृपतिर्हि विधातुमीश्वरस्तद्
यजनं सोमसमाह्वयं प्रसिद्धम् ॥

३. न कदापि च यत्र गोवधोऽस्ति-
स्थलमेतत् परिशुद्ध - यागयोग्यम् ।
गुरुवाचमिमां विचिन्त्य धीमान्
नृवरस्तस्य विमार्गणे रतोऽभूत् ॥

४. स हि भारत - पुण्यभूमि - भागो
यवनैर्भूपतिभिः कदर्यरूपैः ।
नरधर्म - पराङ्मुखैः कृतघ्नै-
रहहा -ऽनेकविधैरुपद्रुतो -ऽभूत् ॥

५. निजसप्तशताब्दशासनेऽस्मिन्
समये तैरतिनिर्दयं विधेयम् ।
विदधे यदतीव्र निन्दनीयं
तदहो कः कविरस्ति वक्तुमीशः ॥

६. प्रथमं रुचिरः किशन्गढोऽयं
नगरं रूपयुतं दधे स्वनाम ।
दधती नगरानुरूपरूपं
नरनाथस्य बभूव कन्यकैका ॥

७. अधरो यवनोऽवरङ्गजीवो
नृपपुत्री - रमणीय - रूपदीपे ।
शलभायितुमाययौ वराको
वररूपं परिगृह्य कामविद्धः ॥

८. यवनाधिपतिर्हि जम्बुकोऽसा-
वुपयुक्ताह्वय - राजसिंहनाम्ना ।
प्रथितोग्ररुषा महारणेन
प्रबलेनाशु पराजितो निरस्तः ॥

९. यवनाऽधम - भूमिपालपाशैः
कतिभिश्चिन्निजशासनस्य काले ।
सुरमन्दिर - विग्रहादिनाशो
विहितो यो भुवि स प्रसिद्ध आस्ते ॥

१०. इह लब्धुमतीव दुःशका या
रुधिरैः कर्दमिता गवां न भूमिः ।
अत एव हि कुत्र साधनीयः
परिपूतो महनीय - सोमभागः ॥

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

११. इति चिन्तयतो महीश्वरस्य
नितरां खेदमवाप तस्य चित्तम् ।
स च भूमिपतिः स्वकार्यसिद्ध्यै
गुरुवर्यस्य पदाम्बुजं प्रपन्नः ॥

१२. किशनाख्यगढस्य नातिदूरे
विमलः शुद्धसरोवरोऽचकास्त ।
स च यावनशासनस्य काला-
दपि पूर्वं स्थित आस पुण्यभूमिः ॥

१३. इतिवृत्तयुतैः प्रमाणपत्रै-
रवगत्य क्षितिपं जगाद योगी ।
ह्रद एष निरस्तगोवधत्वात्
सुतरां शुद्ध इतीह नास्ति शङ्का ॥

१४. परिवाहय तोयमेतदीयं
स्थलतां प्रापय भूपते द्रुतं तम् ॥
विरचय्य च तत्र पूतभूमौ
क्रतुयोग्यं शुचि मण्डपं प्रशस्तम् ॥

१५. सुयशस्करमस्ति भूभुजां यद्
यजनं पुण्यतमं च सोमनाम ।
त्वमये नरपाल मन्त्रिदेशाद्
विचिकित्सां त्यज शीघ्रमारभस्व ॥

१६. गुरुवाचमिमां सुयुक्तियुक्तां
मुमुदे धर्मपरो नृपो निशम्य ।
अपरोऽपि नृपानुयायिवर्गः
सकलः स्वीकृतवान् परं प्रसद्य ॥

१७. जलसारक - यन्त्रयोगतस्तत्
सरसो मध्यगतं जलं निरुह्य ।
परिशोध्य भुवस्तलं तदीयं
सवनीयं वरमण्डपं मनोज्ञम् ॥

१८. क्रतुशास्त्र - विधान - शुद्धरूपं
कुशलैः शिल्पकलाविदां वरेण्यैः ।
स्वयमेव नृपः स सावधानो
रचयामास समादृतप्रयत्नः ॥

१९. परितोऽपि च सोमयज्ञशाला-
मतिथीनां महतां निवासयोग्याः ।
पटवेश्य - गृहाश्च कौशपूता
रचितास्तत्र शताधिकं विचित्राः ॥

२०. नितरां कठिनः कलौ युगेऽस्मिन्
परमार्थ - श्रुतियाग - सम्प्रयोगः ।
इह वैदिक - कर्मकाण्ड - लोपा-
न्नहि साध्योऽन्यविधैः सुधीप्रकाण्डैः ॥

२१. समुपेक्षित एव विद्यतेऽसौ
क्षितिपालैरखिलैरहो धनाढ्यैः ।
रुचिरस्तु कथन्नु तत्र कार्ये
मनुजाना - मधनार्ति - पीडितानाम् ॥

२२. यदि धर्मपरायणो नृपः स्यात्
प्रभवत्येव हि धार्मिकी प्रजाऽपि ।
भुवने परिदृश्यते सदैतन्
महतां चानुसृतिं करोति लोकः ॥

(क्रमशः)

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

सम्पादकीयम्

संस्कृत-शिक्षा, शास्त्राभ्यासश्च

कामं शास्त्राभ्यासः संस्कृतशिक्षान्तर्गतः स्यात्, साम्प्रतं तु जनसाधारणैः 'संस्कृतशिक्षा'-पदेन संस्कृत-भाषाशिक्षैव गृह्यते। अधिकाधिकं साहित्यशिक्षा, नैतिकशिक्षा वा विवक्ष्यते। अत एवेदं साभिप्रायं संस्कृत-शिक्षा, शास्त्राभ्यासश्चेति विभजनम्। नूनं वृन्दारकाणां वाक् संस्कृतभाषा रससारसर्वस्वस्वरूपा, सर्वभारतीयभाषाजीवातुभूता, सकलभाषाप्रसवित्रीति भण्यते भाषातत्त्वविदां समाजे। सृष्टयादौ प्रणवमभि-व्याप्य तात्कालिक-जनव्याहारमाध्यमेन आविर्भूता अमरवाग्-वल्लीयं क्रमशः शतशत-शाखासदृक्षाभिः नैकाभिर्भाषाभिः परिवारवती परिणतकल्पवल्लीव विद्योतते स्म। तथापि मध्यतनीयेन वैदेशिकदासता-भिशापेन अभिशप्ता सा सपरिवारा वैदेशिक्या आंग्लभाषया बलादपदस्थीकृता। किन्तु सौभाग्यात् देशेनानेन विगतविंशतिवर्षेभ्यो भौगोलिके स्वातन्त्र्ये समधिगते सति पुनरपि देशभाषानां समुत्कर्षस्य सूत्रपातः समभवत्। तस्मिन्नेव प्रसङ्गे हिन्दीभाषया राष्ट्रभाषापदं समधिगतम्। वस्तुतः स्वतन्त्रभारतस्य राष्ट्रभाषापदे समभिषेकाय देववाणी एव सर्वथा प्रभ-वति स्वीयैर्विश्वतोमुखैर्गुणगणैः। तथापि संस्कृतभाषाया विरलतरप्रचारेण जनतान्त्रिकयुगानुगुण्येन हिन्दी-भाषयैव बहुलप्रचारया पदमिदं समलङ्कृतम्। सत्यप्येवं जातुचिदपि संस्कृतज्ञैः अनया ईर्ष्यान्वितैर्न भाव्यम्। यतो हि देववाण्या दुहितैव सा। दुहिता यथा मातुर्वंशीयतां सर्वांशतः प्रख्यापयितुं प्रभवेत्, तथा प्रयतनमन्यत्। तद्धि न जातु तदीर्ष्यापदं समा-लम्बते। अतोऽस्माकं संस्कृतज्ञानाम् इदमेव कर्तव्यं यत् राष्ट्रभाषेयं हिन्दी यथा संस्कृतनिष्ठा संस्कृतानु-प्राणिता च स्यात्तथा दृढं प्रयतनीयम्। संस्कृतनिष्ठाया हिन्दीभाषाया राष्ट्रभाषात्वेन गौरवो मातुरेव देव-वाण्या गौरव इति नास्माभिः कथमपि विस्मर्तव्यम्। सहैव संस्कृतप्रसार-परिपोषमन्तरा संस्कृतनिष्ठाया राष्ट्रभाषाया अभिवृद्धिरपि नितरामसम्भविनीति संस्कृतस्यापि व्यापकः प्रसारो, राष्ट्रभाषासमुन्नाय-कानामपि अनुपेक्षणीयं राष्ट्रियं कर्तव्यम्। तच्च कथमपि प्रमादपदे लग्नं चेत् समस्तस्यैव राष्ट्रस्य अश्रेयसेऽलं भवेत्। इत्थं देशभक्ति-राष्ट्रियताव्रत-निष्ठानां संस्कृत-संरक्षणे सहजत एव सर्वं बलं नियोजितं भवेत्।

सत्यमेवैतत् यत्सर्वमिदं विचार्य अस्माकं देशे शासकैर्नेतृभिश्च सम्प्रति संस्कृतभाषायाः प्रचार-प्रसा-रस्य नैकविधः कार्यक्रमो निर्ध्यायते समाचर्यते च। परमहो दौर्भाग्यं यत्तस्य मूलग्राही फलेग्राहि वा कोऽपि प्रभावो न परिलक्ष्यते। प्रत्युत प्रदर्शनात्मकतैव भूयसा तत्र परिदृश्यते। यत्र तत्र सम्मेलन-सभादिषु काले काले उच्चोच्चतरशासका अपि संस्कृतस्य गौरवगानैर्न तृप्यन्ति, परं क्रियायोगे, तदीये शिक्षा-योग-प्रतिवेदने संस्कृतस्य कीदृशी उपेक्षा समाचरिता, सा विदितैव 'सूर्योदय'-पाठकानाम्। कामं शासनेन त्रिभाषासूत्रतो द्विभाषासूत्रं क्रियतां नाम। संस्कृतस्य कृते पृथक् विशिष्टा व्यवस्था अत्यावश्यकी एव।

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

संस्कृतायोगेन स्वीये प्रतिवेदने हाईस्कूल परीक्षापर्यन्तम् अखिले भारते संस्कृतस्य अनिवार्य-विषयकरणस्याऽऽग्रहः शासनाय कृत आसीत्, परं स तु शासनेन निर्माल्यपेटिकायामेव निक्षिप्त इति संस्कृतज्ञाः कथमपि विस्मर्तुं न शक्नुवन्ति। न्यूनातिन्यूनं यासु यासु कक्षासु हिन्दीभाषाया अनिवार्यत्वं शासनेन कृतम्, तत्र सर्वत्र शताङ्कपत्रेषु संस्कृतस्य कृते त्रिंशदङ्काः सुरक्षिता एव भाव्याः, तेषु अनुत्तीर्णेन कथमपि परीक्षोत्तीर्णता नाधिगन्तव्या इत्यपि निर्बन्ध आवश्यकः। यदि नाम शासनमेतादृशीं घोषणां कर्तुं प्रस्तुतं भवेत्तदैव संस्कृतस्य किमपि प्रचारणं प्रसारणं वा तत्त्वत आशंसितं स्यात्, शासकानां संस्कृतप्रेम च वास्तविकः परिगण्येत। अद्य तु दौर्भाग्यात् स्थितिरीदृशी संवृत्ता यत् सुदीर्घदासताकुसंस्कारैः उत्तरप्रदेशे ऐच्छिकीं विहितामपि आंग्लभाषाम् अध्येतारस्त्यक्तुं न पारयन्ति। फलतः संस्कृतभाषाग्रहणलाभात्ते वञ्चिता एव जायन्ते। यतो हि अद्य त्रिभाषास्थाने द्विभाषासूत्रं प्रचलितमास्ते। नूनं स्थितिरियं महते परितापाय जायते संस्कृतज्ञानाम्!

इतोऽन्यत् संस्कृतविषयस्य यदध्यापनं पाठ्यक्रमो वा निर्धारितो वर्तते, तत्रापि शिक्षास्तरोन्नयनं परमावश्यकम्। अद्यावधि संस्कृतमिति कृत्वा भूयसी उपेक्षा दया वाऽत्र बहुत्र शिक्षा-संस्थासु व्यवह्रियमाणा दृश्यते। सेयं स्थितिरतिसत्वरं संशोधनीया। शासकैः शिक्षासञ्चालका अधिकारिणः सविशेषमवधातुं निर्देशनीया यत् शिक्षालयेषु संस्कृताध्यापनं कीदृशं जायते, तत्र काः का व्यावहारिक्योऽसुविधा अव्यवस्थाश्च लक्ष्यन्ते, किं प्रचलितेन पठन-पाठनस्तरेण वस्तुतश्छात्राः संस्कृतेन सुपरिचिता जायन्ते न वा? सर्वमेतत् मध्ये मध्ये परीक्ष्य न्यूनतापरिहारस्य समपेक्षितः प्रयासोऽपि भाव्यः। संस्कृतशिक्षकाश्च विविधैः प्रोत्साहनैः सविशेषं तदध्यापने उन्मुखीकरणीयाः। यदि नाम शासनमेतत्सर्वम्, अन्यच्च एतादृशमेव व्यावहारिकं संस्कृतप्रसारानुगुणं कार्यजातं स्वीयनिदेशने परिचालयितुं प्रयतेत, तदैव संस्कृतस्य अभीप्सितः प्रसारो भवेत्। तेन चास्माकं राष्ट्रभाषा सुपुष्टा सर्वविध-व्यावहारिकशब्द - न्याय - सालङ्कृत-वाक्यादि-शब्दसम्पत्तिसम्पन्ना भवितुं शक्नुयात्।

नेदं विस्मर्तव्यं यत्कस्यापि स्वतन्त्रदेशस्य स्वातन्त्र्यं स्वतन्त्रविचाराधीनम्। तेषां च स्वतन्त्रविचाराणां वाहनं सुदृढतमा परिष्कृता स्वदेशीया भाषैव। सौभाग्यादस्माभिस्तादृशी सकलभाषाजननी संस्कृतं परम्परया पूर्व-पूर्वदायरूपेण संप्राप्ता वर्तते। साम्प्रतं तस्या भाषायास्तादृशः सर्वसाधारणः प्रचारो नास्ति, अतो राष्ट्रभाषाया भूमिकां हिन्दीभाषा निर्वाहयति। तथापि सा 'खड़ी बोली'ति संज्ञिता हिन्दीभाषा अद्यापि सुबहु संस्कारमपेक्षते। विभिन्नक्षेत्रीय - बहुलव्यावहारिक - शब्दसंग्रहस्तु स्पष्टतस्तत्र करणीय एव वर्तते। आप्यायनमिदं तदीया जननी देववाणी एव कर्तुं प्रभवति। अतो भारतराष्ट्रभक्तैः प्रज्ञाजनैः शासकैश्च देववाणीप्रसारे निर्विचिकित्सं बद्धपरिकरैर्भाव्यम्। तदर्थञ्च ये उपायाः समपेक्षिताः, पाश्चात्त्यैर्वा स्वीयांग्लभाषाप्रचारणे ये फलेग्राहिण उपाया अनुसृतास्ते सर्वेऽस्माभिरपि देववाणी-हिन्दीभाषयोः प्रचाराय विनियोज्याः। तदैवास्माकं स्वातन्त्र्यमक्षुण्णं प्रवर्धमानञ्च भवेत्।

प्रसङ्गेऽस्मिन् संस्कृतशिक्षायाः सरलतमस्य विधेरनुग्रहो यथाऽतितरामावश्यकस्तथैव तदध्यापनाय

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

संस्कृतसेवायां चिरान्नियोजिताः पारस्परिकं सम्प्रदायानुसारं वा संस्कृतज्ञानमासादितवन्तः शास्त्रनिष्ठिताः शिक्षका एव प्रभविष्यन्तीत्यपि निर्विवादम्। एम. ए. प्रभृत्याङ्ग्लपरीक्षामुखेन संस्कृतस्य पल्लवग्राहिपाण्डित्येन मण्डिताः कुञ्जिकानिर्भरा अध्यापका अध्यापिकाश्च कथङ्कारं स्वीयान् विनेयान् तत्त्वतः संस्कृतेन परिचाययितुं प्रभवेयुः, यच्च साम्प्रतं प्रायो बहुत्र शिक्षालयेषु दृश्यते। संस्कृतशिक्षा-प्रचार-प्रसारविषये ये केचन व्यावहारिका उपाया अनुभवपथमागताः, तेषामेव निदर्शनरूपेणात्र समुल्लेखोऽस्माभिः कृतः।

सर्वस्यास्य वक्तव्यस्य इदमेव तात्पर्यं यत् केवलं नियमविधानेन किञ्चित्साहाय्यदानमात्रेण वा राष्ट्रस्य कृते समभीष्टः सत्वरं फलेग्राही अनुपेक्ष्यश्च संस्कृतभाषाप्रसारः कथमपि न भवेत्। तदर्थं शासनेन संस्कृतज्ञैः संस्कृतप्रणयिभिश्च प्रजाजनैः सुनियोजितः सक्रियः अभिक्रमोऽनुसर्तव्यः। उच्चारणादिविषये परमसदोषामपि आंग्लभाषां विश्वभाषाकल्पे पदे नयताम् आंग्लराष्ट्राणां स्पर्धायां मूलतः उच्चारण-लिप्यादिसर्वविषयेषु निर्दुष्टां देववाणीमाश्रित्य भारतेन हिन्दीभाषा यदि नाम विश्वभाषापदे प्रतिष्ठाप्येत तदा स राष्ट्रस्यास्य नैतिको विश्वविजयः स्यात्। अस्माभिरेतादृशो विश्वविजयः पूर्वकाले बहुधा कृतः। तेन विश्वं सभ्यता-संस्कृतिपथि अग्रे सारयितुं भूयिष्ठो यशोभागश्च समर्जितः। भारतीयसंस्कृतिर्भारतीयान् भारतराष्ट्रञ्च आह्वयति यत् क्षिप्रमेतत्कार्यं सम्पाद्य मे ऋणमंशतः शोधनीयमिति।

इदं तु संस्कृतभाषा प्रचारविषये। प्रसङ्गेऽस्मिन् शास्त्राभ्यासविषयेऽपि किञ्चिद् वक्तव्यमस्ति। संस्कृतभाषाप्रसार-प्रचारस्तु प्रथमं सोपानम्। लक्ष्यस्थानं पुनः शास्त्राभ्यास एव। भारतीयशास्त्राणामेवेयं विशेषता ये निराशावादं स्वप्नेऽपि न जानन्ति। तेषां दृष्टौ नानेन वर्तमानेन जीवनेन मनुष्यस्य कर्तव्यं परिसमाप्यते, नापि च तस्य व्यवहारक्षेत्रमेतद् भूमण्डलमात्रम्। अपि तु जन्म-जन्मान्तरव्यापि जीवनम्, स्वर्ग-ब्रह्मादिलोकव्यापि व्यवहारक्षेत्रञ्च। भारतं मानवजीवनञ्च पुनः मनुजस्य कृषिभूमिः। अत्र साधु कर्म कृत्वा स उत्तरोत्तरं प्रगतिं कुर्वन् सर्वोच्चं ब्रह्मपदमपि समासादयितुं पारयति, असाधु कर्म वा कृत्वा हीनातिहीने गर्तेऽपि गन्तुं शक्नोति, यतस्तस्य मोक्षो जन्मसहस्रेणापि दुःशकः। मानवीयाभिक्रमस्य सर्वोच्चकोटेरस्याः परिज्ञानं शास्त्रैकसमधिगम्यम्। अत एव शास्त्राभ्यासः, शास्त्रज्ञानमपि निरुपेक्ष्यं तस्य।

साम्प्रतं संस्कृतभाषा-शिक्षाप्रसारे राष्ट्रनायकानां यावत् औन्मुख्यं दृश्यते, शास्त्राभ्यास-शास्त्रप्रचारविषये तत्तोऽपि दुर्बलतरं परिलक्ष्यते। कामं वाराणसेय-संस्कृत-विश्वविद्यालय-तिरुपतिस्थ - संस्कृतविद्यापीठादि - परिगणित - संस्कृत - संस्थानमाध्यमेन शास्त्राभ्यासविधावस्मिन् शासनेन प्रयत्यते। तदर्थं धनसाहाय्यादिकमपि वितीर्यते। परं फलेग्रहिताविषये प्रयासोऽयं संस्कृतशिक्षाप्रसार-प्रयासतोऽपि अतितरां दुर्बलः। विचार्यतां क्षणमनेन प्रयासेन प्राचीनप्रौढशास्त्राभ्यासदिशि कियती प्रगतिः कृतेति। स्पष्टं वक्तव्यं भवति यत् यथा यथा चिकित्स्यते तथा तथा आमयो वर्धत इति। संस्कृत - शास्त्राणां तादृशं प्रौढपाण्डित्यं तु केवलं स्वप्नायितं भवितुं प्रवृत्तम्। छात्राणां संख्या दिने दिने ह्रासमुपयाति। यैरधीयते तेषामपि दृष्टिः परीक्षोत्तीर्णतामात्र-केन्द्रिता। तदभीष्टञ्च येन केनापि वैधेनावैधेन वा उपायेन साधयितुं ते प्रयतन्ते। दौर्भाग्याद् बहवोऽध्यापका अपि स्वीयवेतनमान-वर्धन-चिन्तायामेव मग्नाः। अन्ये उच्चपदमासाद्य तत्परिसरे स्वीयदलगत-राजनीतिमेव पोषयितुं प्रवृत्ताः। वराकाश्छात्राः कथं कथमपि कुतश्चन सम-

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

धीत्य तेषामध्यापनस्य कार्तार्थ्यं प्रदर्शयन्ति। समर्थाः व्युत्पन्नाः कृतविद्याश्च शान्ता दान्ता बहवोऽध्यापकाः पुनरेतत्सर्वं घटाटोपमजानन्तः कस्मिन्नपि कोणे सीदन्तः स्वां विद्याम्, स्वकीयमनुभवञ्चादाय क्रमशो लोकान्तरं प्रयान्ति। एवंस्थितौ कथङ्कारं शास्त्राभ्यासस्य समुन्नयनं भवेत्? कथं वा भारतीयसंस्कृतिः स्वीयं सुफलं प्रसविष्यतीति?

एतदर्थमपि शासनेन सम्बद्ध - संस्कृतविद्वद्भिश्च संयुज्य प्रामाणिकः प्रयासो विधेयः। शासनेन एतेषां जीवनयात्राविषये समयानुरूपं समुचितं साहाय्यं प्रदेयम्। न केवलं साहाय्यमेव प्रदेयम्, तत्साहाय्यं पात्राय मिलति न वा? तस्य समुचित उपयोगो जायते न वा, कोणे स्थिताः सर्वथा पात्रीभूता विद्वांसश्च अनेन लाभेन वञ्चिताः कष्टां दशामनुभूय जीवनं समापयितुं किन्तु विवशा न जायन्ते? एतत्सर्वं स्वीयसम्बद्धाधिकारिभिः परीक्षणीयम्। तेऽधिकारिणोऽपि रक्षकाः सन्तोऽपि भक्षका मा भूवन्नित्यत्रापि अवधानता परमावश्यकी। संस्कृताध्यापकैरपि विचारणीयं यत्तेषां जीवनं व्रतमिव वर्तते, न तु साधारणजनवत् भोगमयम्। ते हि विश्वं राष्ट्रं समाजं जातिञ्च समुन्नेतुमधिकृताः। गुरुतरस्यास्य अधिकारस्य निर्वाहाय तैः सदैव सर्वत्र सावहितैर्भाव्यम्। लोकयात्रानिर्वाहाय आवश्यकं वस्तुजातं तु तेभ्योऽपि आवश्यकमेव। तत्तु अनिवार्यतो भाव्यमेव। तथापि तेषां भावना त्वतितरामुच्चतरैव भाव्या। संस्कृतच्छात्रैरपि विचार्यमेतत् यत्ते सामान्यच्छात्रेभ्योऽतिरिच्यन्ते। लौकिकसमुन्नतिस्तु तैरपि काम्या, भाव्या च तेषां तादृशी व्यवस्था। तथापि विश्वोन्नयनविधौ ते दीक्षिताः। यथार्थतस्ते भाविनो राष्ट्रनिर्मातारः। प्रौढशास्त्राभ्यासेनैव ते तथा प्रभविष्यन्ति। संस्कृतविद्याया इदमेव वैशिष्ट्यम्।

जीवननिर्वाहसाधक-शिक्षाकरणाभियानेन संस्कृतस्यैतत् प्रौढपाण्डित्यरूपं भूषणन्तु बहुशोऽपहारितमेव। साम्प्रतं तुलनात्मक-समीक्षणाख्यया नूत्नया अध्ययनपद्धत्या शिष्टमपि तद्रसातले नीयते। नायमस्याशयो यद्वयं तादृशस्य अध्ययनस्य विरोधिनः। कस्यापि शास्त्रस्य तलस्पर्शिसम्यगभ्यासविधौ तदुपादेयमेव। परं साम्प्रतं पी. एच. डी., डी. लिट्. आदिरूपेण संस्कृतस्य यादृशं पाण्डित्यमासाद्यते, आसाद्य च तत् ते डाक्टराः प्राचीनान् तलस्पर्शि-पाण्डित्यभूषितान् केवल-नव्यभव्यांऽऽग्लभाषानिबद्धसङ्कलनेन तिरस्कर्तुं प्रयतन्ते, तत्सर्वथा परिहार्यमेव। संस्कृतग्रन्थानां विषयाणां वा तादृशगवेषणं परीक्षणं च प्रथमतः संस्कृतभाषायां राष्ट्रभाषायामेव वा भाव्यम्—कामं ततः परं तदांग्लभाषायामनूदितं क्रियेत। तत्रापि गवेषणविधौ भारतीय - गवेषण - पद्धतेरनुग्रहः परमावश्यकः। तं च नाममात्रं कृत्वा पल्लवगणनात्मकं व्यर्थं नव्यप्रथानुप्राणितं गवेषणं संस्कृतस्य कृते सर्वथा व्यर्थमेव।

अन्यच्च, एतादृशैर्गवेषकैः गवेषणात्पूर्वं प्रौढपाण्डित्यभूषितानां सङ्गतिं कृत्वा तेषां तद्विषयकाणि चिराभ्यासप्रसूतानि गवेषणानि सङ्कलितव्यानि। तदनन्तरमेव स्वीयः शोधनिबन्धो लेख्यः। इत्थं क्रियमाणे प्राचीनप्रौढपाण्डित्यरक्षणप्रथाऽपि चिरजीविनी भविष्यति, तेषां योगक्षेमश्च निर्वहेत्, तैरेतादृशकृतश्रमस्य गौरवोऽपि लभ्येत। शास्त्राभ्यासविषये यथावसरमन्यदपि अस्माभिर्विचारयिष्यते। बहुवक्तव्यमत्र अवशिष्यते। अद्य तु इदमेव सूच्यते यत्संस्कृतभाषा-शिक्षाप्रसारमात्रेण शास्त्रविद्यायां विपुलसंख्यया छात्राणां तथाकथितपरीक्षासमुत्तरणेन वा न संस्कृतभाषा-शास्त्रयोरुद्धारो भवेत्। तत्र प्रौढिरावश्यकी। तदर्थञ्च शासनेन विद्वद्भिश्छात्रैश्च मिलित्वा योजनापुरस्सरं प्रयतनीयमिति।

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

क्षिप्रा-लहरी

— श्री विनायक गणेश भागवताः, कीर्तनाचार्याः —

१. नमस्ते हे क्षिप्रे भगवति शिवे शाङ्करि सदा महाकालारण्ये विलससि भुजङ्गीव विशदा ।
न तेऽग्रे सर्पन्ति क्वचिदपि महाघप्लविगणाः सरिद्वर्ये तार्ये मयि समुदिताऽऽस्व प्रतिदिनम् ॥

२. कराले कालेऽस्मिन्त्वमसि शरणं नान्यदखिलं क्रियाजातं जातं मलिनमिति मन्ये सुरनुते ।
त्वदीयो वार्बिन्दुर्भवति सुखसिन्धुः श्रमहरो हरप्रेष्ठे स्वेष्टार्पणवितरणे सिद्धहृदया ॥

३॰ नहि त्राता तातः प्रभवति न माता नहि गुरुर्न राजाऽजावृत्ताः परित इह सर्वे हतबलाः ।
कृतान्तेनाक्रान्ता मम भयहरास्ते कथमिह त्वमेवैका मेऽसि प्रसभमयि भद्रे सुचरिते ॥

४. अवन्त्यास्त्वं वासो विलससि सितं पूतमधिकं सुधाधाराधारस्त्वमसि परमे तर्पणकरी ।
पयोरूपे ख्यातं जगति सुयशस्तावकमये भये न स्थातव्यं नहि भवति ते चान्तिकगते ॥

५. त्वदुत्पत्तिर्विष्णोः करकमलदिव्याङ्गुलिगता मता त्रैलोक्येऽस्मिन् त्वमसि शिवशीले सुविमले ।
रतोऽहं सेवायां सततमधिकारं च वहसि महान्तं हे शान्ते निखिलजनसन्तारणविधौ ॥

६. विधौ दृष्टिक्षेपे प्रभवति कलङ्कीति मनसि क्षयी सूर्यस्तापप्रद इति मयीत्थं प्रभवति ।
क्षितिभ्रष्टास्तारा: प्रतिपदमिति प्रेक्षितमहो त्वमेवैकाऽऽनन्दं वितरसि दृशोश्चाथ मनसः ॥

७. ज्वरघ्नी त्व बाह्यज्वरहरणदीक्षां प्रवहसि न चेत्थं योऽन्तस्थो बहुजनिगतो जीवितहरः ।
ज्वरः सर्वेषां तं हरसि तटिनि क्षेमसहिते हिते तेऽस्ति कृत्यं त्विह तनुभृतां नित्यमनिशम् ॥

८. अहं ग्रीष्माऽऽक्रान्तस्तव सविध एवास्मि निहितो ध्रुवं काशीशेन क्षपयितुमशेषं कलभभरम् ।
महे ते, ते कीर्तिं प्रथयितुमिदानीं सुनिरतः स्मरामि त्वां भद्रे भगवति दयस्वाऽतिविनते ॥

९. तरन्ति त्वत्तोये परमविमले पूर्णमुदिता नरा नार्यो बाला नवकमलशोभां हि परितः ।
दिशन्त्येतादृग्भ्यस्त्वहिपतिरमण्यः किमु जले रमन्ते भातीत्थं खलु नगरभूषे स्फुटतरम् ॥

१०. सदा सन्तः स्नातुं त्वयि सुमनसो यान्ति धवले तदा ते भ्राजन्ते पशुपतिसदृक्षाक्षित्रिषयाः ।
नरान् पङ्गूनन्धानथ च मतिमन्दानपि वरे परं पासि प्रेम्णा भुवि निजगरिम्णा सुकुशले ॥

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

[श्री भागवत - महाभागा यथानाम परमभागवताः सन्तोऽपि प्रवाहिसारस्वतधाराप्रवर्तने दत्तचित्ताः। नैकानि 'रागरङ्ग'-प्रभृतीनि ग्रन्थानि संस्कृतभाषया तैरुपनिबद्धानि, येषु कीर्तन-गायनादि-विषयिणीनां प्राचीनकलानां सव्युत्पत्ति रहस्यं निरूपितम्। तत्र भवन्तः प्रतिदिनं स्वीयेष्टदेवस्य श्री पाण्डुरङ्गस्य पुरतः प्रस्तरपिष्टेन श्लोकद्वयं श्लोकत्रयं वा नव्यं विविधवृत्तविचित्रितं भावभरितं विलिख्यैव जलग्रहणं कुर्वन्ति। भारते नारदीयसङ्कीर्तन-सम्प्रदायस्य अङ्गुलिगण्या आचार्या एव ते। प्राय एते गङ्गादशहरापर्वणि क्षिप्रामनु महाकालान्तिके प्रतिवर्षं निवसन्ति। तत्रैव सहृदय-हृदय-निश्च्यूतमिदं तेषां रससारसर्वस्वं क्षिप्राभक्तिभावपरम् अभिनव-खण्डकाव्यं पाठकेभ्य उपायनीकुर्वतो ऽस्माकं परो मोदो जायते। पाठका अप्यनेन तोषमधिगमिष्यन्तीत्याशास्यते। —सम्पादकेन]

★ ★ ★

११. विशाले ते तीरे शमनशमनं त्वं रचयसि न यो दृष्टिक्षेपं वसति मनुजे च प्रकुरुते।
वने माहाकाले सततभवनं तावकवनं करोति श्रीक्षिप्रे भपदवहरे जीवनकरि॥

१२. ममास्त्वन्तश्शुद्धिस्तव सलिलपानेन विमले तथा स्नानेनाऽस्तु प्रकटशुचिता गात्रनिचये।
सुधाशीले नेत्रे विमलतरता ते जलबलाद् वदान्ये वन्ये हे कमलकरकन्ये निवसतु॥

१३. त्वदीयं दुग्धाङ्गं मलहरणकार्ये समुचितं विदित्वा ता नद्यः परकलुषनाशेन मलिनाः।
विशन्ति त्वय्येव प्रणतसदये मङ्गलमयि निरन्तं मां पाहि प्रकृतसमये विश्वजननि॥

१४. सुचिन्त्ये तोयं ते प्रभवति च नारायणमयं महाशान्तिप्राप्त्यै मम हृदि सुपूर्णे सुचरिते।
ऋते ते मे कोऽस्ति त्रिभुवनतलेऽस्मिन् सुवरदे रदं धृत्वा कामं तृणमिदमहं त्वामुपगतः॥

१५. स्थितोऽहं ते कूले सततमनुकूले जलजुषां वराकः को मत्तो भुवि परममत्तो ह्यघपटुः।
कटुस्वान्तोऽत्यन्तो चलितचरितस्तुच्छगतिको गतिः का नो वेद्मि द्रुमललितकूले भगवति॥

१६. असह्यं मे मन्तुं जननि सहसे शान्तिमनसा पदाघातं मौर्ख्यादुभयकरसन्ताडनमपि।
स्वमातृत्वं कृत्वा निजहृदि महास्नेहसहिते हिते वृत्तिं धत्से सपदि सुहिते तस्य यतसे॥

१७. यदा स्नातुं सिद्धस्त्वदुदरगतः स्यामविकलस्तदा भावश्चित्ते प्रभवति जले ते जलचरः।
प्लविः कूर्मो मत्स्यो विरहणपरः स्यां हरिसुते सदाऽऽनन्दापन्नो नहि नरपतिर्वा सुरपतिः॥

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

१८. मृदस्तु स्वे भाले तवतिलकिता दुर्लिपिहरा विधातुस्त्वं चाक्ष्णोर्मदुदरगतं ते शिवजलम्।
शुभंरोधश्चाङ्घ्र्योर्वदनकुहरे ते गुणगणः सदा हस्तो हस्ते मम भवतु ते काङ्क्षितमिदम्॥

१९. प्रबुद्धं वैराग्यं प्रभवति च तीरङ्गतवतः तवैवाङ्गे श्रीले विमलकमले देवि सरले-।
ऽबले त्वं यष्टीव प्रभवसि सुधादृष्टिरनघे मयि प्रीते चास्तु प्रणयमयि याचे तव पुरः॥

२०. अधोगा निःश्रेणिस्तव नयति गीर्वाणपदवीं जलं निम्नं नित्यं नयति खलु वैकुण्ठनगरीम्।
अयेऽपूर्वा रीतिस्तव लसति लोकोत्तरकृते शिवे पङ्कः पङ्कं त्वपहरति कारुण्यरचिते॥

२१. अवन्त्याऽऽहूतोऽहं वितरितसदन्नेन जलतः सदा संवृद्धोऽस्मि प्रचुरयशया च द्रविणतः।
कथं ते सत्कृत्यं जननि नहि जाने ह्युपकृतं शिशुस्ते हे दिव्ये सुविशदसुभव्येन सहितः॥

२२. यथा बालं माता प्रथयति महालोहलमपि स्ववाचा वाचालं त्वमिह कुरुषे मामपि तथा।
अयि क्षिप्रे मातर्भगवति न मे बुद्धिविभवो भवस्य त्वं प्रेयस्यसि भुवि समर्था सुरनुता॥

२३. मम स्वान्ते क्षिप्रे वसति भवती पूतसलिला न वाङ् मे ते सेयं विशदलहरी काव्यसुलभा।
प्रसूता मे तुण्डादमृतरसकुण्डाद्धि सुरसा न सा मे गर्वोक्त्या भगवति वदामि स्फुटतरम्॥

२४. समत्वप्रख्यातिं त्वमिह कुरुषे लोकनिचये सदा तृष्णां हंसि स्वगतसमवृत्त्या त्वसुमताम्।
जने क्रूराणां वा मृदुलहृदयानामपि सदा न माता त्वत्तुल्या नयनपथगाऽन्याऽस्ति वरदा॥

२५. त्वमेषा भूषाऽसि प्रथितविपलायाश्च विपुलाऽमला लोलालीलारचितसुजलौघा गतिपरा।
वरा लोके लभ्या भवसि बहुभाग्येन तटिनी महाकालः कूले तव वसति सिद्धाधिपपतिः॥

२६. त्वमत्राष्टार्विशत्यमलशुभतीर्थैः परिवृता वृताऽसि प्राक्पुण्य - प्रचुरबलवद्भिर्नरवरैः।
न काङ्क्षन्ते हित्वा क्षणमपि किलान्यत्र वसतिं शुभाऽऽभासे स्वस्य प्रभवतु सुखेनैव मरणम्॥

२७. सुपद्याऽसि क्षिप्रे पशुपति गृहस्याप्यथ हरेः पुरस्यापि स्पष्टं किमलमिह मोक्षस्य सुरसा।
रसायां ते कीर्तेः प्रसरति पताका कविमुखोद्भवत्पद्येभ्यः शङ्करगुणपूर्णा शुभधुनी॥

२८. महाकालारण्ये फलसि किल कल्पद्रुमलता प्रकामं प्रोत्फुल्ला परिचरणतः सन्ततमलम्।
नृणां नद्युतुङ्गे हृदयहरभङ्गेऽक्षिसुखदे द्रुतं क्षिप्रे देहि त्वदनुसरणं मे प्रणमते॥

२९. त्वदाहूते मातर्वसति हरसिद्धे मयि कृपा महाकालेशस्य प्रचुरकरुणा भूसुमनसाम्।
शुभाशी प्रोद्भूता मम वदनतस्ते सुलहरी मुदे या सर्वेषां प्रभवतु च सा देवि हृदये॥

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

कृष्णस्य प्राधान्यम्, अपालासूक्ततात्पर्यञ्च

— श्री पूज्य करपात्रस्वामिनः —

यदपि—"अपालायाः कथामाश्रित्य कुमारीणां पतिद्वेषाणां देवकामात्वम्, देवेषु चेन्द्रस्य प्राधान्येन तत्कामात्वम्, कालान्तरे यदा सूर्ये विष्णौ च प्राधान्यं सञ्जातं तदा तत्कामात्वमुपगतमि"ति। तदपि न सम्यक्; कृष्णस्य सर्वथैव प्राधान्यात्, सायणादिरीत्या तत्सूक्तव्याख्यानेन तदसिद्धेश्च।

तथा हि—'कन्या वारि'ति सप्तर्चमेकादशं सूक्तम्। अत्रेः पुत्री अपालाख्या त्वग्दोषपरिहाराय सूक्तेनानेन इन्द्रं स्तुतवती, अतः सैव ऋषिः। प्रथमा-द्वितीये पङ्क्ती। शिष्टाः पञ्चानुष्टुभः। इन्द्रो देवता। तथा चानुक्रान्तम्—कन्या वाः सप्तात्रेय्यपालेतिहास ऐन्द्र आनुष्टुभं द्विपङ्क्त्यादीति। विनियोगो लैङ्गिकः। अत्रेतिहासमाचक्षते—

पुरा किल अत्रिसुता अपाला ब्रह्मवादिनी केनचित्कारणेन त्वग्दोषदुष्टा, अत एव दुर्भगेति भर्त्रा परित्यक्ता पितुराश्रमे दोषपरिहाराय चिरं देवेन्द्रमधिकृत्य तपस्तेपे। सा कदाचिदिन्द्रस्य सोमः प्रियकरो भवति, अतस्तमिन्द्राय दास्यामीति बुद्ध्या नदीतीरं प्रत्यागमत्। तत्र स्नात्वा पथि सोममप्यलभत। तमादाय गृहं प्रत्यागच्छन्ती सा मार्ग एव तं चखाद। तद्भक्षणकाले दन्तघर्षणजं शब्दं ग्राव्णां सोमाभिषवध्वनिमिति मत्वा क्षिप्रमेव इन्द्रस्तत्र समुपस्थाय तामुवाच—'किमत्र ग्रावाणोऽभिषुण्वति' इति। सा प्रत्यूचे—'अत्रिकन्याऽत्र स्नानार्थमागत्य सोमं दृष्ट्वा तं भक्षयति। तद्भक्षणज एवायं ध्वनिः; न तु ग्राव्णां सोमाभिषवध्वनिरि'ति। तथा प्रत्युक्त इन्द्रः पराङावर्तत। गच्छन्तमिन्द्रं सा पुनरब्रवीत्—'किमर्थं निवर्तसे? त्वं तु सोमपानाय गृहं गृहं प्रतिगच्छसि। तदिदानीमत्रापि मम दंष्ट्राभ्यामभिषुतं सोमं पिब, धानादींश्च भक्षये'ति। एवम् इन्द्रमनाद्रियमाणा सा पुनरप्याह—'अत्रागतं त्वामिन्द्रमिति न जानामि। त्वयि गृहम् आगते बहुमानं करिष्यामि' इति। इत्थम् इन्द्रमुक्त्वा अत्र समागतः इन्द्र एव, नान्य इति निश्चित्य सा स्वास्ये निहितं सोममाह—'हे सोम, त्वमागताय इन्द्राय पूर्वं शनैः, ततः शनकैः क्षिप्रं परिस्रवे'ति।

तत इन्द्रस्तां कामयित्वा तस्या आस्य एव दंष्ट्राभिषुतं सोममपात्। इन्द्रेण सोमे पीते सति त्वग्दोषादहं भर्त्रा परित्यक्ता सती इदानीमिन्द्रेण सङ्गता इति अपालायामुक्तायाम् इन्द्रस्तां व्याजहार—'किं कामयसे? तदहं करिष्यामी'ति। सा वरमचीकमत्—'मम पितुः शिरो रोमवर्जितम्। तस्योपरं क्षेत्रं फलादिरहितम्, मम गुह्यस्थानमप्यरोमशम्। एतानि रोमफलादियुक्तानि कुर्वि'ति। तत इन्द्रस्तत्पितृशिरःस्थितां खलितिमपहाय क्षेत्रं च फलादियुक्तं कृत्वा त्वग्दोषपरिहाराय च स्वकीयरथेच्छिद्रे शकटस्य युगस्य च

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

च्छिद्रे एतां त्रिवारं निश्चकर्ष । तस्याः पूर्वाभिहितायाः त्वक् शल्यको द्वितीया गोधा तृतीया कृकलासोऽभूत् । तत इन्द्रस्तामपि अपालां सूर्यसदृशत्वचमकरोदिति ।

एतच्च शाट्यायन-ब्राह्मणे स्पष्टमुक्तम् । तद्ब्राह्मणं तद्व्याख्यानसमये दर्शयिष्यते । एषोऽर्थः 'कन्या वारि'त्यादिषु ऋक्षु प्रतिपाद्यते ।

कन्या३ वारायती सोममपि स्रुताविदत् ।
अस्तं भरन्त्यब्रवीदिन्द्राय सुनवै त्वा शक्राय सुनवै त्वा ॥

(ऋग्वेदसंहिता ८.९१.१०)

अर्थः—वा उदकं प्रति अवायती स्नानार्थमभ्यवगच्छन्ती कन्या अपालानामा अत्रिसुता स्रुतौ मार्गे सोममप्यविदत् अलभत । तं सोमम् अस्तं गृहं प्रति-भरन्ती आहरन्ती सा सोममब्रवीत्—हे सोम त्वा त्वामिन्द्राय सुनवै मम दन्तैरेवाभिषुणवै । पुनर्हे सोम त्वा त्वां शक्राय समर्थायेन्द्राय सुनवै इदानीमेवाभिषवं करवै । सोमभक्षणकाले दन्ते दन्तध्वनिं ग्रावध्वनिमिति मत्त्वा इन्द्रस्तामगमत् ।

एषोऽर्थः शाट्यायनब्राह्मणे स्पष्टमभिहितः—'सा तीर्थमभ्यवयन्ती सोमांशुमविन्दत्, तं समखादत् तस्यैह ग्रावाण इव दन्ता अदुः । स इन्द्रः आद्रवत् । ग्रावाणौ वै वदन्तीति । सा तमभिव्याजहार कन्या वारवायती सोममपि स्रुताविददित्यस्यैव इदं ग्रावाण इव दन्ता वदन्तीति विदित्वेन्द्रः पराङावर्तत । तमब्रवीत्—'असौ य एषि वीरक' इत्यादिनेति ॥ १ ॥

असौ य एषि वीरको गृहंगृहं विचाकशत् ।
इमं जम्भसुतं पिब धानावन्तं करम्भिणमपूपवन्तमुक्थिनम् ॥

(८.९१.२)

अर्थः—सा शक्रमब्रवीत् । हे इन्द्र वीरको वीरः समर्थस्त्वं योऽसौ त्वं विचाकशत्, काश दीप्त्यै, अत्यर्थं दीप्यमानः सन् गृहंगृहं यजमानगृहं प्रति सोमपानाय त्वमेषि गच्छसि । अतस्त्वमत्रापि जम्भसुतं मम दन्तैरभिसुतमिमं सोमं पिब । कीदृशम् ? धानावन्तं धाना भृष्टयवास्तद्वन्तम् । करम्भिणं सक्तुमन्तम् । अपूपवन्तं पुरोडाशादिसहितम् । उक्थिनं स्तोत्रादियुक्तम् । एतादृशं सोममत्रैव पिबेति । सा सोमेन सह धानादीन् वेदयत् स्तोत्रञ्चाकार्षीदित्यर्थः ॥ २ ॥

आ चन त्वा चिकित्सामो ऽधि चन त्वा नेमसि ।
शनैरिव शनकैरिवेन्द्रायेन्दो परि स्रव ॥

(८.९१.३)

अर्थः –पुनरपि सा तमनादृत्याह । हे इन्द्र! चनेति निपातसमुदायोऽवधारणार्थे । त्वा त्वामाचित्सामो ज्ञातुमिच्छाम एव । मम गृहमागच्छं तं त्वामिन्द्र इति जानीम एव । इह मार्गे एवाऽऽगतं त्वा त्वां नाधीमसि नाधिगच्छामः । अत्रापि च नेत्यवधारणे । इह त्वामिन्द्र इति न जानीमः । इत्यपाला तमिन्द्रमुक्त्वा स्वास्ये स्थितं सोमं प्रत्याह—हे इन्दो क्षरणशील सोम अस्मा आगतायेन्द्राय तदर्थं पूर्वं शनैः मन्दं मन्दं ततः शनकैरिव कुत्सितं शनैः क्षिप्रमित्यर्थः । क्षिप्रमेव त्वं परिस्रव मदीयदंष्ट्राभिरभिपूयमाणः सन् परितः क्षरेति । तथा यज्ञेष्वपि ग्रावभिरभिपूयमाणः सोमः प्रथमं शनैः परिस्रवति, ततः शनकैः क्षिप्रमिति तदभिप्रायेणोक्तम् । तत इन्द्र एतद्वाक्यं श्रुत्वा तदानीमेवाभिषुतं सोमं यज्ञस्थानीयाद् अपालामुखाद्देवाधासीत् ।

उक्तोऽर्थः शाट्यायनकब्राह्मणे स्पष्टमभ्यधायि—अनाद्रियमाणैव तमब्रवीदाचन त्वा चिकित्सामोधि चन त्वा नेमसीति । पुरा मां सर्वयर्चा अपाला स्तौतीत्युपपर्यावर्तत शनैरिव शनकैरिव इन्द्रायेन्दो परिस्रवेति हे

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

वा अस्यै मुखात् सोमं निरधयत् सोमपीथ इह वा अस्य भवति य एवं विद्वान् स्त्रीमुपजिघ्रतीति ॥ ३ ॥

कुविच्छकत् कुवित्करत् कुविन्नो वस्यसस्करत् ।
कुवित् पतिद्विषो यतीरिन्द्रेण सङ्गमामहै ॥
(८.९१.४)

अर्थः—सोमं पीतवानिन्द्रोऽस्मानेवं करोत्वित्याह । स इन्द्रः कुविद् बहुवारमस्मान् शकत् शक्तान् करोतु । किञ्च कुवित् बहु चास्मभ्यं करत् करोतु । किञ्च स एवेन्द्रो नोऽस्मान् कुवित् बहुकृत्वा वस्यसः वसीयसः अतिशयेन वसुमतः करोतु । इदानीमात्रेयी अहमेवं करिष्यामीति वदति । पूर्वं कुवित् बहुपतिद्विषः त्वग्दोषात् पतिभिर्भर्तृभिः बहुवारं द्विष्टाः, अत एव यतीः पतिभ्यः सकाशादितो गच्छन्त्यो वयं कैश्चित् अप्यनूह्यमानाः सत्यः सम्प्रतीन्द्रेण सह सङ्गमामहै सङ्गच्छामहै । सर्वत्र पूजार्थे बहुवचनम् । सङ्गमशब्देन इन्द्रोऽपालामचकमतेति ॥ ४ ॥

इमानि त्रीणि विष्टपा तानीन्द्र वि रोहय ।
शिरस्ततस्योर्वरामादिदं म उपोदरे ॥
(८.९१.५)

अर्थः—इन्द्रेण किं कामयसे तद्दास्यामीत्युक्ता सा वरमनया प्रार्थयते । हे इन्द्र इमानि त्रीणि विष्टपा विष्टपानि स्थानानि सन्ति तानि त्रीणि स्थानानि विरोहय उत्पादय । कानि तानि ? तस्य मम पितुः रोमवर्जितं शिरः खलतिमित्यर्थः, तच्चापगमय रोमशं कुर्वित्यर्थः । उर्वरां तस्य ऊषरं क्षेत्रं सर्वसस्याढ्यं कुरु । आत अनन्तरं मे मम उपोदरे उप उदरस्य समीपे यदिदं स्थानं गुह्यमित्यर्थः । तच्च त्वग्दोषे सति असञ्जातरोमकम्, तदपि त्वग्दोषपरिहारेण रोमयुक्तं कुरु । एतानि त्रीणि स्थानानि ।

एषोऽर्थः शाट्यायनके प्रपञ्चेनोक्तः तामब्रवीद् अपाले किं कामयसीति । साऽब्रवीत्—इमानि त्रीणि विष्टपेति खलतिर्हास्यै पिता । स तं हा खलतिं चकारोर्वरा हास्य न जज्ञे सो जज्ञ । उपस्थे हास्यै रोमाणि नासु तान्युह जज्ञिर इत्यस्योत्तराभूयसे निर्वचनायासौ च यान इति ॥ ५ ॥

असौ च या न उर्वरादिमां तन्वं१ मम ।
अथो ततस्य यच्छिरः सर्वा ता रोमशा कृधि ॥
(८.९१.६)

अर्थः—उक्तमेवार्थमनया विवृणोति । नोऽस्माकं पितुर्या सा उर्वरा यदिदमूषरं क्षेत्रमस्ति, आदन्तरं मम इमां तन्वं त्वग्दोषदुष्टं गुह्यस्थानं अथो अथापि च ततस्य तातस्य यच्छिरो रोमवर्जितमस्ति, एतानि सर्वा सर्वाणि तानीमानि त्रीणि स्थानानि रोमणा रोमशानि कृधि कुरु ॥ ६ ॥

खे रथस्य खेऽनसः खे युगस्य शतक्रतो ।
अपालामिन्द्र त्रिष्पूत्व्यकृणोः सूर्यत्वचम् ॥
(८.९१.७)

अर्थः—अनया अपालां सूर्यसदृशप्रभामकरोदित्याह । हे शतक्रतो शतसंख्याकयज्ञ बहुविधप्रज्ञ वा हे इन्द्र रथस्य स्वीयस्य खे पृथुतरे छिद्रे रथ-शकट-युगानां छिद्रेषु त्वग्दोषपरिहाराय त्रिः त्रिवारं निष्कर्षेण पूत्वी पूत्वा शोधयित्वा ततः अपालामेतन्नामिकामत्रिसुतां ब्रह्मवादिनीं सूर्यसदृशत्वचं सूर्यसमानत्वचम्, अकृणोः अकरोः, कल्याणतमरूपभाजनमकरोदित्यर्थः ।

शाट्यायनब्राह्मणे स्पष्टमभिहितम्—तां खे रथस्याध्यबृहत्सा गोधाऽभवत् । तां खेनसोत्य बृहत्सा संश्लिष्टकाऽभवत् । तदेषाऽभ्यनूच्यते—खे रथस्य खेनस

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

इति। तस्यैह यत्कल्याणतमं रूपाणां तद्रूपमासेति। त्वग्दोषापनयनाय अक्षादिद्वारेष्वतिकर्षणमिति। यस्त्वग्दोषदूषितः सन् एतत्सूक्तं पठति तस्य त्वग्दोषमपगमय्य सूर्यसदृशकान्तिमिन्द्रः करोतीति सूक्तं प्रशस्यते ॥ ७ ॥

अनेन प्रपञ्चेन तत्रस्थं सर्वं तात्पर्यं स्फुटीभवति।

यदुक्तम्—"कन्याशब्देन अनूढा कुमार्येव अपाला आसीत्, न विवाहिता सती पतिद्विष्टा। तस्मात् सायणानुसारि व्याख्यानमसङ्गतमि"ति। तन्न; 'कुवित् पतिद्विषो यतीरि'ती विरोधात्, सत्येव पत्यौ तद्द्वेषस्य सङ्गतत्वाच्च। त्वग्दोषोऽपि 'उपस्थे हास्यै रोमाणि वासु' इति शाट्यायन-ब्राह्मणेन 'यदिदं म उपोदरे' इति मन्त्रेण च तस्या विज्ञायते। तेन त्वग्दोषकारणात् पतिभिः बहुवारं द्विष्टा यतीः पतिभ्यः सकाशादागता इत्यपि तज्ज्ञापकम्। तेन सायणीयं व्याख्यानमेव युक्तम्।

यदप्युक्तम्—"पूर्वकाले बह्व्यः कुमार्यो देवमेव पतिभावेन भजन्ति स्म। तदेतत् इन्द्रेण सङ्गमामहै' इति बहुवचननिर्देशाद् ज्ञायते। ता एव पश्चात् गोप्यः सञ्जाताः" इति। तदपि यत्किञ्चित्; बहुवचनप्रयोगमात्रबलात् तत्कल्पनस्य दुर्बलत्वात्, आत्मनि बहुवचनप्रयोगोपपत्तेश्च। याः सूर्यस्य प्रभेव चन्द्रस्य चन्द्रिकेव गङ्गाजलस्य शैतल्य-माधुर्य-पावित्र्याणीव सिन्धोस्तरङ्गाणीव अमृतस्य माधुर्यमिव पूर्णानुरागरससारसिन्धोः माधुर्यसारसर्वस्वमिव कृष्णस्य अभिन्नस्वरूपा नित्याश्च अभ्युपेयन्ते, ताः कदाचिदिन्द्रादिसम्बन्धिन्य आसन्निति कल्पनाऽप्यलमश्रेयसे।

यदप्युक्तम्—"कुमारीत्वादेव पित्रे वरयाचनं सङ्गच्छते" इति। तदपि न किञ्चित्; परित्यक्तायाः पितृगृहनिवासिन्या अपि पित्रे वरयाच्ञासंभवात्, पतिमत्याः पतिगृहे निवसन्त्या अपि सावित्र्याः पितृकृते वरयाच्ञादर्शनाच्च।

यदप्युक्तम्—"यदा इन्द्रो देवानां श्रेष्ठ आसीत्तदा कुमार्य इन्द्रं कामयन्ते स्म। विष्णोः श्रेष्ठत्वे तं भजन्ति स्म। वैदिकयुगे या इन्द्राद्रिकामिन्य आसंस्ता एव गोप्यो भूत्वा कृष्णप्रियतमाः सम्पन्ना" इति। तदपि न; विप्रतिषेधात्। तथा हि—तथात्वे ततोऽपि सुन्दरमुपलभ्य तत्प्रेयस्योऽपि प्रसज्येरन्। न चैवं कल्पयितुं शक्यते, कृष्णाभिन्नस्वरूपासु तासु तत्कल्पनाया असामञ्जस्यादिति दिक्।

(क्रमशः)

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

पूर्वतोऽनुवृत्तम् : ३२

छत्रपति-महाकाव्यम्

—श्री उमाशङ्करशर्मा त्रिपाठी—

[आंग्लभाषा-प्राध्यापकः—काशीविद्यापीठम्, वाराणसी]

★

॥ अथ चतुर्दशः सर्गः ॥

[सभाभवनान्निष्क्रम्य सगणः शिवराजो निवासभुवमाजगाम। प्रातः समुत्थितः स स्वावासभवनं दिल्लीपतिसैनिकैः सायुधैः परिवृतं समवेक्ष्य सचिन्तः दिल्लीप्रस्थानरूपमात्मनिर्णयं बहुशो निनिन्द। आचिग्लपित-कलेवरः ज्वराक्रान्तश्च जातः। छद्माचारो दिल्लीपतिः लोकपरितोषाय चिकित्सकान् शिवसमीपं प्रैषयत्। एवमेव बालसखः शिवभूपतेः तानाजि मालुसरे वैद्यलिङ्गी भवनमागतः। तदनन्तरं रचितोपायः ससुतः शिवराजः कारावासात् मिष्टान्नभाण्डरक्षितवपुः निष्क्रम्य स्वैरं दक्षिणापथपथिको बभूव—इतीतिहासः।]

अथैकचक्रेऽपि रथैर्धृतस्थिति-
स्तमस्तदुत्पादितसंशयैः सह।
सहस्ररश्मिर्विनिकृत्य तेजसा
न्ययोजयच्छ्लाघ्यसमुद्यमे भुवम् ॥ १ ॥

स बन्धुजीवोऽप्यतिवाहितक्षपो
नवप्रभातोदित - कौतुकातिथिः।
न वारुणस्निग्धसवितृवैभवं
शुभाम्बर - क्लृप्तवपुर्न्यसेवत ॥ २ ॥

तमद्भुतारम्भनिमित्तमध्वनि
हठश्रुतोदन्त - रसायनामृतम्।
स्पृहां दृशां पूरयितुं चिरोत्सुकां
ददर्श पौरश्चिरदुर्लभातिथिम् ॥ ३ ॥

स्वसदृशाकारधरं निरीक्ष्य तं
नितान्तविस्मापितचेतसोऽपि ते।
जनाः प्रतीयुः सहसा न तत्कृतं
क्षतानुरक्ताऽऽजिनटीप्रसाधनम् ॥ ४ ॥

[1]अपज्जलोत्साहहविर्हुताशनः
पुरः पुरो गच्छति यः स एव सः।
अयं चमत्कृत्य निशि व्यवाधत
ससैनिकं तं शयिताश्वमेकलः[2] ॥ ५ ॥

अकृत्रिमोदारपरिच्छदोऽप्ययं
बिभर्ति सिद्धामिव गौरवश्रियम्।
व्यपेतरक्षापरिखोऽपि निर्भयं
सुखं प्रयातीति नवायुषोऽवदन् ॥ ६ ॥

युवा सुशीलो नवराष्ट्रपद्मभू-
रजस्रवर्धिष्णु - महत्त्वमण्डितः।
स्वदारनिर्व्याजमनास्तथाऽप्ययं
सुविस्मिताः पौरमृगीदृशो जगुः ॥ ७ ॥

---

१. अफ़जलखानः बीजापुरचमूपतिः निहतः शिवराजेन।

२. शायिस्ताखानो मातुलोऽवरङ्गजीवस्य निशि सहसाऽऽक्रान्तः शिवराजेन छिन्नकरद्वयाङ्गुलिः पलायितः।

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

निरीक्षमाणोऽध्वनि रोचितश्रियं
प्रसाधितक्ष्मापतिजन्मवासराम्[1] ।
पुरीं रविस्यन्दनचक्रचुम्बिनीं
नवातिथी राजसभं व्यलोकयन् ॥ ८ ॥

गृहीभवत् - स्फाटिकशैलमुत्तमं
शरीरिणीं त्वाष्ट्रकलामिवोदिताम् ।
अनन्वयोत्पत्तिनिमित्तमुज्ज्वलं
यशो हि सौन्दर्यनिसर्गवेधसाम् ॥ ९ ॥

महार्हनिस्स्यूत - सुरत्नरञ्जित-
प्रभांशुभासत्-परिधानवर्ष्मभिः ।
प्रकल्पिताचार - नियन्त्रितक्रमै-
र्महीपपुत्रैः परितो निषेवितम् ॥१०॥

अलक्षितामोघनिदेशसाध्वस-
स्थिरप्रवृत्तानपि राजपूरुषान् ।
प्रतिक्षणं स्मारयदिष्टपद्धतिं-
स्वभावसिद्धेन विकाशितेजसा ॥११॥

मनोज्ञसम्भारपरिच्छदच्छति
प्रकाशसङ्क्रान्त-नृपासनस्थिरम् ।
नृपो नृपं कौतुकदृष्टिरैक्षत
शताध्वरो गूढचरौ बलिं यथा ॥१२॥

मनोरथोपासित - कल्पनोद्भवं
वसेदिहैन्द्रं यदि धाम सप्रभु ।
तुरुष्कभूपाधिकृतासनं तदा
तुलामुपेयान्नियतं सभागृहम् ॥१३॥

नमन्महाराष्ट्र - बलाहकस्ततः
सुवर्णवृष्ट्याऽभरदागराजिरम्[1] ।
तथापि न स्निग्धनवाङ्कुरोद्भवा
नभोमुखं दृष्टिरुदैदनार्जवा ॥१४॥

यथानिदिष्टेन ततः पथाऽतिथिं
जनो नयन् पञ्चसहस्रकासने[2] ।
अमोघगूढस्मित - लक्ष्यलक्षितं
तदुत्तरोत्कर्ष - जुषामकल्पयत् ॥१५॥

यदीयशूराभिधयाऽपि नायकाः
स्वपृष्टदेशेन सिषेविरे युधम् ।
त एव यश्वन्तमुखाः[3] सभासदो
दधुः सभायां शिवपूर्वमासनम् ॥१६॥

महीश्वरोपायनसत्क्रियाऽपि[4] सा
प्रसादकल्पा शिववर्जमाददतान् ।
निषेवमानाऽऽत्मवते न्यवेदयत्
प्रतीक्ष्यमातिथ्यमिवार्यभूभृते ॥१७॥

गृहं विदूरं वसतिर्द्विषत्पुरे
व्यपेतरक्षा स्थितिरत्रपो रिपुः ।
असत्फलाऽसौ[5] जयसिंहवागपि
हठाददृष्टव्यसनेऽपतन् नृपः ॥१८॥

---

१. नृपं दिदृक्षुः शिवः तज्जन्मदिनावसरे राजसभायां तं दृष्टवान् । इतः एकादशश्लोकपर्यन्तं (८–११) राजसभावर्णनम् ।

१. आगरा, राजधानी तुरुष्कशासनस्य ।

२. पञ्चसहस्रपद्धतौ 'पंचहजारी' ति । अस्यामासीनाः पङ्क्तौ सभासदः पञ्चसहस्रसैन्यं स्वाधिकारे नियोक्तुमाज्ञापिताः ।

३. महाराज-यशवन्तसिंहो मित्रं तुरुष्कभूपस्य ।

४. उपायनं वस्त्रादि, तच्च विशेषावसरे राजपुरुषेभ्यः विशिष्टसेवापारितोषिकमिव दीयते स्म नृपेण ।

५. महाराष्ट्रे चमूपतिः जयसिंहः सन्धिमुखेन शिवराजं सन्तोष्य तं सशपथं सम्मानार्थे अवरङ्गजीवसमीपं प्राहिणोत् ।

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

तथापि तद्धाम विधूय संशयं
स्वरूपमादर्शयदेव जिह्मगान् ।
युगान्तरौद्रामवलोक्य तद्दृशं
शशङ्किरे स्वायुषि पार्श्वभाजिनः ॥१९॥

ततो ज्वलत्तारकनिश्चलत्विषा
दृशाऽऽतिथेयस्य दृशं समीक्ष्य सः ।
हुताशनेऽसह्य - निकारकश्मले
ज्वलन्नवोचद् जयसिंहपुत्रकम् ॥२०॥

अये त्वया त्वज्जनकेन वाऽपरै-
रदृष्टपूर्वा न ममार्यसम्पदः ।
यदीदृशीमर्हति किं मम स्थिति-
र्विडम्बनां त्वन्नरपालदर्शिताम् ॥२१॥

विचित्रमातिथ्यमिदं स्वधामनि
तदातिथेयस्य तनोतु गौरवम् ।
इयं क्षणं सोढुमपीह मे धृतिः
अशीलिताभ्यासजडा विमुह्यति ॥२२॥

स्वलक्षसिद्धानतिलक्षसैनिकान्
चमूपतिः पाति यदाज्ञयाऽनिशम् ।
इहावसीदामि दुराधिकर्दमे
स पञ्चसाहस्रपदार्थमर्थितुम् ॥२३॥

अलं प्रसादीकृतकञ्चुकेन तत्
स्वविक्रमोपार्जितसत्क्रिया वयम् ।
इयं न मे पङ्क्तिरुपस्थितिं पुनो
निकारगर्ह्यामवलोकितुं क्षमा ॥२४॥

अतः सुखं गच्छतु मामकं शिरः
प्रणन्दितुं त्वन्नृपतेर्मनोरथम् ।
ध्रुवं ममापुण्यसमीरितापदो
बलादिहाकृष्य कदर्थयन्ति माम् ॥२५॥

तमित्थमाभाष्य विशन्निवात्मनि
भिया भरन् शङ्कि सभासदान्मनः ।
दधौ स्थितिं दूरमधिक्षिपन् विधिं
स्वबिम्बसक्तस्फटिकानुसेवितः ॥२६॥

बबन्ध याऽऽकर्णितपौरुषोत्सुका
मनोरथैः कैरभिनन्दितुं न यम् ।
तमर्च्यमेवातिथिमात्ममन्दिरे
खलीकृतं वीक्ष्य मुमोह साधुता ॥२७॥

द्विपेन्द्रकुम्भक्षतजाऽऽसवस्पृहं
हरिं करालायसजालयन्त्रितम् ।
भियाऽभिभूतोऽपि जनोऽस्तसंशयं
विलङ्घितुं संयतते स्वतर्जितैः ॥२८॥

स्वकल्पितादर्शनियन्त्रितौजसो
विषेहिरे का विपदो न पाण्डवाः ।
विखण्डितोरुः परमेकलः क्षितौ
सुयोधनः स्वार्थकृतं किमस्मरत् ॥२९॥

प्रतीपमप्यार्जवसाधुपौरुषं
नृपोचितातिथ्यवरेण्यभाजनम् ।
महीभृताऽधिक्षिपताऽऽत्मविद्विषा
स्वराज्यलक्ष्मीरपि चिक्षिपे हठात् ॥३०॥

स्वकीर्तिमित्थं प्रणयान्निमन्त्रितां
द्विषा सभायां छलभाजनोरसा ।
विलुण्ठितां वीक्ष्य स पार्थविक्रमो
दधौ प्रतीकारधियैव जीवितम् ॥३१॥

तदीयवंश्यान् व्यसने विषीदतो
हठात् प्रतिष्ठाप्य नृपासने नृपान्[1] ।
न के महाराष्ट्रबलाधिपा बलाद्
विवस्त्रदिल्ली विकृतिं न्यवारयन् ॥३२॥

१. ध्वंसमाने तुरुष्कशासने हतवीर्यान् शत्रुकदर्थितान् आलमगीर-द्वितीयप्रभृतीन् नृपान् पेशवा-सेनापतिः बहुवारं नृपासने प्रतिष्ठापयामास । महाराष्ट्रतुरगाश्च सिन्धुपयसि स्वतर्षं प्रशमयामासुरिति इतिहासः ।

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

तदेवमुद्यच्छिखसंक्षयानलो
विषाददीर्घामतिवाह्य यामिनीम्।
प्रगेऽभितो वा समपश्यदुन्नतां
स कुन्तपङ्क्तिं क्षितिसम्भवामिव ॥३३॥

अये समाज्ञापयिता जयश्रिया-
मकम्पितात्मा व्यसनाजिरेष्वपि।
स एव दैवच्छलपिच्छिले पथि
प्रतीतिवर्त्माऽरिगृहे विपद्यते ॥३४॥

अहस्करोऽप्यस्त - महीध्रगह्वरे
प्रभाकरं धाम नयन्निवात्मनि।
तमोवितानैरिव चण्डसैनिकै-
र्निलीयमानः समयं न्यसेवत ॥३५॥

दवाग्निकल्पः सहसा द्विषां क्रमो
ददाह चेतः परितः शरीरिणाम्।
घनान्तरायाकुलवेपितोरसः
शशङ्किरे ते विषमं शिवाशिवम् ॥३६॥

दिशां मुखे व्योम्नि गिरौ वनेऽवनौ
गृहे पुरे संसदि चत्वरे पथि।
धियां गिराञ्चाद्यपदे प्रतिष्ठिता
चचार वार्ता शिवबन्धनोदिता ॥३७॥

क्रुधा युवानो ललना भिया शुचा
जरार्दिता सत्पुरुषा हठाद्ध्रिया।
अताडयन्नुच्चलदाधिनिर्भरं
निरस्तधैर्यं हृदयं मुहुर्मुहुः ॥३८॥

स नन्दयन् शात्रवकामनाकृषिं
विपादयन्नार्यविकासिसम्पदम्।
विवेश सौधं सुघनोदरं शिवः
प्रतीक्षमाणः समयं रविर्यथा ॥३९॥

नृपातिथिर्दुर्णयकूटयन्त्रितः
सहानुगैर्दुर्गमसौधसंस्थितिः।
हरिर्यथोपेक्षितलुब्धकोद्यमो
निनिन्द विश्रम्भधियं निजामरौ ॥४०॥

ज्वलत्कृशानुर्न शशाक वीक्षितुं
स रामसिंहं परिवादतापितम्।
तथापि युक्ताशयगर्भितं वच-
स्तदीयतातस्य कृते दिदेश तम् ॥४१॥

अलं विषादेन कृतं समीहितं
कथं सुधाऽवाग्वदनो विदूयसे।
सखित्वलभ्यं निखिलं भवत्कृतं
शरीरिमृग्यं किमतः परं वद ॥४२॥

महेन्द्रहर्म्योपमधाम सुप्रभं
महार्हभोगाः सुरलोभिसत्क्रियाः।
निषेवितुं यत्नपरा भवादृशाः
सतां हि सख्यं सततं महीयते ॥४३॥

व्यलीकवाचो बहुशः शुभद्विषो
न्यवारयन् मामिह सख्यबन्धनात्।
परन्तु दिष्ट्याऽर्जितपुण्यसञ्चयः
करग्रहं द्राक् पथि मां न्ययोजयत् ॥४४॥

तुरुष्कराजः स्वपितूज्झितारति-
स्तिरस्क्रियामेतु रणोत्सवाग्रहः।
भटस्त्रियः प्रोषितभर्तृका मुदा
स्तनोपपीडं रमयन्तु शर्वरीम् ॥४५॥

भवत्पितुः क्लान्तवपुर्निषेवतां
प्रसूनशय्या - मृदुलावमर्दनम्।
न यत कृतं दुर्मदवाहिनीशतै-
स्तदीयसाचिव्यफलेन तत्कृतम् ॥४६॥

(क्रमशः)

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

शाकुन्तलीयं जीवन-दर्शनम्

— श्री न० च० वे० नरसिंहाचार्यः —

★

[अनेन अङ्केन धारावाहिकोऽयं लेखः परिसमाप्यते। निबन्धेऽस्मिन् विज्ञेन आचार्यवर्येण कालिदासीयसमग्रवाङ्मयतो निर्मथ्य यत् जीवनदर्शन-नवनीतं नूतनमुपायनीकृतम्, तदुपभोगेन नूनं मानवजीवनं सार्थकं भवेदिति अस्माकं दृढो विश्वासः। अत एव विषयेऽत्र प्रयतितुं पाठकाः प्रार्थ्यन्ते इति। —सम्पादकः]

गुणाः पूजास्थानम्

अस्मिन् प्रकरणे तत्र तत्र प्रतिभाताः कालिदास-सम्मतत्वेन ज्ञाताः केचन गुणविशेषाः प्रस्तूयन्ते।

दया—परदुःखदुःखित्वं दयेति केचन मन्यन्ते। तावता अतृप्ता अन्ये परदुःखप्रहाणेच्छापर्यन्तमधुधावन्ति। केवलाया इच्छाया अपर्याप्तत्वात् विद्वांसश्चेष्टापर्यवसायिनीं तामनुसन्दधते। दया नाम 'करुणा' इति सामान्यतः कथ्यते, यस्यां खलु सत्यां गुणा गुणा भवेयुः, असत्याञ्च बोध-बलैश्वर्यादयो निखिला गुणा दोषा एव भवेयुः[१]। सा हि नाम दया सर्वगुणानामधिराज्ञी। ईदृश्या दयायाः अत्र नाटके आमूलचूलमधिकारः।

प्रथमाङ्के एव मृगवधं निषेधतो वैखानसेन गुणस्यैतस्य बीजन्यासो विहितः। क्रमशस्तस्य सर्वाकारा विस्तृतिः आग्रन्थसमाप्तेः साधिता। आप्तबान्धवा इव तरुलतादयः व्यवह्रियन्ते। नवमालिका-बालसहकारयोः विवाहः कृतः। कस्यचित् मृगस्य मुखे कुशसूचिविद्धे सति पुनस्तस्य सा व्यथा मा भूदिति वात्सल्येन स नीवारमुष्टिभिरभिवर्धितः।

दुष्यन्ते दयालुतां द्वित्रैरुदाहरणैर्निरूप्यते। सार्थवाह-धनमित्रस्य नौव्यसनविपन्नस्य उदन्तमाकर्ण्य प्रभुरयम् अत्यर्थं सन्तप्यते स्म। बन्धुविनाशेन पीड्यमानान् गृहिणः समाश्वासयितुं येन येन वियुज्यन्ते इति श्लोकरूपां घोषणां कारयामास। प्रजाः प्रजाः स्वा इव पालनीया इति तस्य सङ्कल्पः। प्रियाविप्रयोग-पारावारे दुस्तरे शिरोदघ्नं मग्नोऽपि आत्मनः पितृकृत्यं[२] न विसस्मार। मूर्छितोऽप्ययं माढव्यस्याऽऽर्तस्वरमाकर्ण्य तत्क्षणमात्मक्लेशं विस्मृत्य तद्रक्षणपर उत्साहं प्रादीदृशत्।

राज्ञा सता प्रजा विनेया। शिक्षणमसाधारणमायुधम्। सर्वदा उपयुज्य तन्न दूषयेद्विवेकी। यावच्छक्यं दया दर्शनीया। नयमर्यासि विमार्गप्रस्थितानात्तदण्डः इति पद्यांशे कश्चन सूक्ष्मांशो व्यज्यते। अपथे पदं न्यस्यत एव, न तु न्यस्तवतो जनान्नियमयतीति कवि-

---

१. वृषगिरिगृहमेधि गुणा बोधबलैश्वर्यवीर्यशक्तिमुखाः।
दोषा भवेयुरेते यदि नाम दये त्वया विनाभूताः॥
[निगमान्तदेशिकस्य दयाशतके, १५ श्लोकः]

२. प्रजानां विनयाधानात् रक्षणाद्भरणादपि।
स पिता पितरस्तासां केवलं जन्महेतवः॥
[रघुवंशे, १.२४]

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

निर्दिशति। इत्थं कथनेन को लाभः'? किञ्चिदुपेक्ष्यते चेत् अपथि पदं निदध्युरेव। ततस्ते धर्ममनुवर्तमानेन दण्ड्या भवेयुः। ते चारचक्षुषा राज्ञा दुश्चरिताद् आदावेव निवारिताश्चेत् तेषु कुतो दण्डः? अये कीदृशी दयालुता!

अथाऽपि दण्ड्येषु दण्डो नोपेक्षणीयः। अमुं भावं कालिदासः कथामुखेन सूचयति। विक्रमोर्वशीये कञ्चन घट्टः। ऊर्वशी जायमानमेव तनयं च्यवनाश्रमे न्यवेशयत्। संस्कृतोऽधीतविद्यश्च स बालो धनुर्वेदेऽभिविनीतः। अथ कदाचित्तेन गृहीतामिषः किन्न गृध्रः इति मन्यमानेन तं शरपातस्य शरव्यं कुर्वता आश्रमविरुद्धमनुष्ठितम्। तदहसहमानो महर्षिस्तं मात्रे निवेद्य न्यासनिर्यातनं कर्तुं तापसीमादिदेश। आश्रमविरुद्धाचारास्ततो निर्दयं निष्कासनीया इत्ययमंशः कण्ठरवेण विक्रमोर्वशीये कथितः। शाकुन्तलेऽपि स सूच्यते इति भाति। बालो भरतः प्रक्रीडितुं सिंहशिशुं कर्षन्नेव रङ्गभूमौ प्रवेश्यते। अविनीत, किं नोऽपत्यनिर्विशेषाणि सत्त्वानि विप्रकरोषि? इति तापस्या निवार्यमाणोऽपि न तूष्णीकः संववृते। इत्थमाश्रमप्रतीपमाचरन् आश्रमनिवासाधिकारात् च्यवते स्म। एवमाश्रमविरुद्धवर्तिना·········इति पदेनाऽपि आचारविरोधः प्रकटीकृतः। ततश्चाऽयं क्षत्रियधर्ममनुवर्तमानः पित्रैव अविनयात् निवार्यमाणः तदीये हस्ते समर्पितः। अत्राऽपि न्यासस्येव स्थितस्य भरतस्य निर्यातने आश्रमविरुद्धताहेतुरिति असूचि। अत्र धर्मानिष्ठानिष्ठुरता बुध्यते।

क्षान्तिः—अनपायि विपन्निवारकं न तितिक्षासममस्ति साधनम्। क्षान्तिश्चेत् कवचेन किम्? एतादृशी शान्तिः राज्ञि सर्वत्र प्रत्यक्षीभवति।। अवश्यमनुभोक्तव्यं कृतं कर्म शुभाशुभम् इति धैर्येण सर्वं क्लेशं क्षमयाऽनुबभूव। शकुन्तला तु मूर्तिमति क्षमैव। मौनेन सर्वं दुःखं स्वीचकार।

अनसूया—परोत्कर्षासहिष्णुत्वम्, गुणेषु दोषारोपो वा असूया, तदभाव एव अनसूया। अत्र नैकस्मिन्नपि पात्रे असूयास्पर्शोऽपि वर्तते। अस्मिन् गुणे कविः बद्धपक्षपातः। लोके दयिताविरहविधुरा नराः संयुक्तेभ्योऽसूयन्ति। किन्तु पुरूरवाः यूथपतिमीक्षित्वा अहमिव प्रियाविरहजां त्वं तु व्यथां माऽनुभूः इत्याशास्ते। यक्षोऽपि सन्देशहरे जलधरेऽप्येतादृशीमेवाऽऽशंसां माभूदेवं क्षणमपि च ते विद्युता विप्रयोगः इति करोति। शकुन्तलावयस्याया अपि 'अनसूये'ति कृतं नाम न विस्मरणीयम्।

अस्पृहा—अलोभ एव। अयञ्च आत्मगुणः षष्ठाङ्के सुष्ठु उपदर्शितः। निरपत्यस्य द्रव्यं राजगामीति, यदाऽमुं विषयममात्यः पत्रारूढं प्रेषयति, तदा विह्वलोऽपि दुष्यन्तो विवेकं प्रदर्शयति। स्नेहः पापशङ्की इत्येव न, क्वचित् कार्यदर्शी अपि भवति। गर्भः पित्र्यं रिक्थमर्हतीति अनुशास्ति। अतोऽप्यलोभस्य समीचीनमुदाहरणं किं वा भविष्यति?

कविकमलासनः कालिदासः जीवता जन्तुना जन्मसाफल्याय अनुष्ठेयान् श्रुतिस्मृत्यादिबोधितान् धर्मान् लोकहिताय उपदिशति। कीर्तिरार्जनीयेष्वग्रेसरी। कीर्तिं स्वर्गफलामाहुरासंसारं विपश्चितः। अकीर्तिं तु निरालोकनिरयोद्देशदूतिकान् इत्थं सदा मनस्याकलयति। यशश्शरीरे भव मे दयालुः, एकान्तविध्वंसिषु मद्विधानां पिण्डेष्वनास्था खलु भौतिकेषु इति दिलीपमुखेन स्वाशयमाविष्करोति। शरीरं शरीरमेव। तथाऽपि तन्न सर्वात्मना जुगुप्सया तिरस्करोति। अयं गत्वरेण

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

शरीरेण यशः स्थास्नु चिचीषति। शरीरमाद्यं खलु धर्मसाधनम् इत्यपि न विस्मरति। एवं परिशील्यमाने कालिदासः आत्मगुणा एव प्रधानतमाः, न तथा वेदविहिता अपि संस्काराः, संस्कारलोपेऽपि आत्मगुणवान्नरः मोक्षमधिगच्छत्येव[1] इति विश्वसितीति भाति।

अतः परं काचित् तादात्विकी जीवनसरणिरुदाह्रियते। नगरान् विप्रकृष्टेषु विपिनान्तःपातिषु आश्रमपदेषु मुनयोऽवसन्। अध्यात्मविद्यामधीमानाः इष्टीश्चानुतिष्ठन्तः तपस्तपस्यन्तश्च ते लोककल्याणमेवाऽऽशंसमानाः वीतरागा अवर्तिषत। कश्चित्कुलपतिः मुनीनां दशसाहस्रम् अन्नदानादिपोषणात् अध्यापयत्। विप्रर्षिः पर्यवेक्षकोऽप्यासीत्। तत्र कन्यकानामनुप्रवेशोऽन्वमन्यत। अत एव तत्र वृद्धास्तापस्योऽप्यवात्सुः। ऋष्यशृङ्गो महर्षिः स्त्रीजातिमपश्यन् सुखेन वञ्चितोऽभवत्। तत्सन्निधानपरिहारापेक्षया सन्निधावेव साधित संयमः समीचीनतर इत्यस्य कवेरभिप्रायो भवेदिति ऊह्यते। हेमकूटेऽपि विबुधस्त्रीसन्निधौ संयम इति ब्रुवाणोऽमुं भावं द्रढयति।

तपोवनरक्षणं राज्ञा कर्तव्यमासीत्। तपस्विनां योगक्षेमनिर्वाहे शासको दत्तदृष्टिरभवत्। ऋषयः शान्ता अपि विप्रकृताः पन्नगा इव दुर्दमक्रोधा एव। पार्थिवाद्भयं ते नाऽज्ञासिषुः। नगरप्रवेशात् प्रायोऽमी उद्विजन्ते स्म। कारणवशात् प्रविष्टाश्च ते शासकैः सभक्तिश्रद्धमपूज्यन्त। तत्राऽपि राज्ञि धर्मभ्रंशमाकलयन्तः परातिसन्धानमधीयते वैधिरेति ते सन्तु किलाऽऽप्तवाचः इति निष्ठुरमनिन्दिषुः। तथा निर्भर्त्स्यमानोऽपि भुवो भर्ता सप्रश्रयमेव प्रत्यब्रवीत्। अतिथिसत्कारः आश्रमधर्मेषु अत्यर्थं प्रधानमासीत्। अतिथयो न याचका इव तिरश्चक्रिरे, अपि तु दैवतानीव समाराधिताः कदाऽप्यर्हणायामनवधानमालोकमानास्तेऽक्रुद्ध्यन्, शेपुश्च। 'पूज्यपूजाव्यतिक्रमः श्रेयः प्रतिबध्नाती'ति ते विशश्वसुः। अतिथिविशेषलाभेन तपो वर्धत इति तेषां सम्प्रत्ययः। वनौकसो मुनयः प्रजाभिः सार्वभौमादप्यधिकतरं सम्भाविता अभूवन्।

राजानः प्रकृतिरञ्जने जागरूका आसन्। आत्मीयं क्लेशमनादृत्य प्रजाकार्याण्येव पर्यवैक्षन्त। ते आत्तदण्डाः 'अयं निजः परो वे'ति विकल्परहिताः उन्नतशिरसश्चाऽवर्तन्त। क्षतात् त्राणं कुलधर्मं बह्वमन्यन्त। ब्राह्मणकन्यां वह्निमिवाऽद्राक्षुः। सर्वथा आश्रमोपरोधस्तैः परिहृतः। तपोवनावनेन महद्भागधेयं सम्पद्यत इति प्रतीयुः। आश्रमरक्षणार्थक-मुनिप्रार्थनासु, व्रतार्थकास्वासमाह्वानेषु च समामेव प्रतिपत्तिमवहन्। 'भवनेषु सुधासितेषु पूर्वं क्षितिरक्षार्थमुशन्ति' स्म ये निवासम्, ते प्राप्ते वार्धके असंस्तुतमिवाऽनुत्कण्ठयितृ परकीयमिव भारभूतं निस्सारमिव परिहार्यं मत्त्वा सकलमैश्वर्यमुज्झित्वा वन एवाऽवात्सुः। आत्मनः प्रतिनिधिं पुत्रं आधिपत्ये न्ययूयुजन्। विभवानुगुणान् भोगान् शास्त्रसम्मतानन्वबभूवुः। कालिदासो भोगेषु व्यसनितामेव दूषयति। असक्तः सुखान्यनु-

---

१. "दया सर्वभूतेषु क्षान्तिरनसूया शौचमनायासोऽमङ्गलमकार्पण्यमस्पृहेति" आत्मगुणाः।

"यस्यैते चत्वारिंशत्संस्कारा, न चाष्टावात्मगुणा, न स ब्रह्मणः सायुज्यं सालोक्यञ्च गच्छति।

"यस्य खलु संस्काराणामेकदेशोऽपि, अष्टावात्मगुणाः, अथ स ब्रह्मणः सायुज्यं सालोक्यञ्च गच्छति गच्छति।"

[गौतमधर्मसूत्रे, १ खण्डे, सू० २२–२४]

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

भवतु जन इति अस्य परम उद्देशः। इदञ्चेदस्ति, बह्व्यो विपदः परिहर्तुं शक्यन्ते। यदि कदाचित् मन्त्रिणि राज्यभार आरोप्येत, तं व्यवहारं पश्चात् पत्रारूढं ददृशुरेव। महादेव्यादयः कार्यज्ञाः कार्योपरोधं परिहृत्यैवाऽऽचरन्। प्रजा अपि प्रशमिताशेषोपसर्गाः प्रभावानुरक्ताः सुखेन कालं यापयन्ति स्म, परस्परप्रेमशालिन्य एवाऽभवन्। स्निग्धजनसंविभक्तं दुःखं सह्यवेदनमासीत् तासाम्। अवसरोपसर्पणीयाः प्रभवोऽभूवन्। नगररक्षायै चौरशिक्षायै च रक्षिणो न्ययुज्यन्त। इत्थं सर्वतोमुखसुखं जीवनं तदात्वेऽवर्तिष्टेति ज्ञायते। सहजं कर्म कौन्तेय सदोषमपि न त्यजेत्, श्रेयान् स्वधर्मो विगुणः परधर्मात् स्वनुष्ठितात्, स्वधर्मे निधनं श्रेयः, परधर्मो भयावहः इत्यादीन् धर्मान् धीवरोऽप्यवेदीत्। स्त्रीणामुचितमेव स्थानं दत्तम्। स्त्रीधर्मे स्त्रियः प्रमाणमिति, प्रायेण गृहिणीनेत्राः कन्यार्थेषु कुटुम्बिनः इति च तासु विश्वासः प्रादर्शि। शुश्रूषस्वेत्यादिना वधूपदेशं विशिष्टं विधाय, काश्यपोऽपि कथं वा गौतमी मन्यते? इत्यनुयुञ्जानः तस्या आशयं जिज्ञासते। स्त्री पुमानित्यनास्थैषा ; वृत्तं हि महितं सताम्, क्रियाणां खलु धर्म्याणां सत्पत्न्यो मूलकारणम्, प्रायेणैवंविधे (विवाहादिरूपे) कार्ये पुरन्ध्रीणां प्रगल्भता इत्येवमादि वदन् कालिदासः पुरन्ध्रीषु प्रतीक्ष्यबुद्धिं प्रत्याययति।

'प्रजासु न कोऽपि दोषो लब्धपद' इति न मन्तव्यम्। निसर्गसिद्धो दोषः सर्वात्मना विनाशं गमयितुं न शक्यते। अकारणेन वा अल्पकारणेन वा गृहीतान् स्तेनान् रक्षिणोऽतिमात्रमपीपिडन्त। यदि लभ्यते, उत्कोचग्रहणे ते नैव समकुचन्। कादम्बरीसाक्षिकः स्नेहः प्रवर्तितः। राजाश्रयेण राष्ट्रियाः (राजश्यालाः) अखर्वं गर्वं दधुः। एतादृशानि धर्मातिक्रमणानि अल्पसङ्ख्याकान्येव; अतश्च अभूतकल्पानीति उपेक्षितुं शक्यन्ते।

दोषा अपि अनुकम्पास्पृष्ट्या दृष्ट्यैव द्रष्टव्या इति कालिदासस्याऽऽशयः। रघुवंशे अग्निवर्णवृत्तान्तवर्णने इदं स्पष्टीभवति। तस्मिन्नपि अग्निवर्णे स्त्रीविधेयनवयौवने निर्बन्धवशात् प्रजाभ्यः आत्मदर्शनसमुत्सुकाभ्यः गवाक्षमार्गेण चरणमेकं दर्शयति, भिषजामनाश्रवे, सर्वदा प्रमत्ते सर्वथा भ्रष्टेऽपि कविरनुकम्पापूर्णामेव वाणीं व्याहरति—दुःखमिन्द्रियगणो निवार्यते इत्यादि। एवं लिखता कविना पठितृराजविषयकानादरः शिथिलीक्रियते।

कालिदासो भूतहितमेव सत्यं मन्यते। सन्तमर्थम् आययति प्रत्याययति इति सत्यशब्दो निरुच्यते, यथावस्थितं वस्तुबोधनमिति तदर्थः। तत्तु सर्वत्र न कर्तव्यम्। सत्यवचनेन कदाचिदापत्तिः काचिदापतेदिति शङ्का जायते यदि, तत्र सत्यं निगूहनीयम्। जानामीति प्रकाशयति यदि कश्चिज्जनो यथाश्रुतग्राही, तस्य पापमेव फलं भवेत्। कमठमासाद्य कठोरे पृष्ठे ताडयन्तः केचन मूर्खाः तस्य वधायाऽपारयन्तः तेन पथा गच्छन्तं कञ्चन तद्वधोपायमपृच्छन्। स च सत्यव्रतः सत्यमेव वक्तव्यमिति मन्वानः 'कमठ उत्तानीकृतस्ताड्यमानः क्षणेन म्रियेत' इति मारणरहस्यं प्रकटीकरोत्। हन्त, महदुपकृतम् अनेन सत्यवचनेन !

अतो यदि कस्यचिद् बाधाकरं सत्यं भवति, तर्हि तद्गोपने, तदर्थम् असत्यवचनाश्रयेऽपि न महद्दूषणम्। अतोऽनया दृष्ट्या अवरोधकामिनीनामकाण्डे दुःखं परिहर्तुकामो दुष्यन्तः परिहासविजल्पितं सखे, परमार्थेन न गृह्यतां वचः' इति असत्यमुदैरिरत्। सङ्कल्पदोषा-

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

भावात्, असत्यवादे न दोष इति दुष्यन्तमुखेन कविर्द्योतयतीव। न ब्रूयात् सत्यमप्रियम् इति वचनमपि स्मरणीयम्।

एवं बहुविधाभिरुपदेशवाग्भिः या जीवनपद्धतिः नाटके प्रौढिमाश्रित्य व्यञ्जिता, यच्च जीवनतत्त्वमुपदिष्टम्, तदनुसरणे ऐहिकामुष्मिकफलसिद्धिर्भवतीति स्वर्गप्राप्तिरनेनैव देहेन भवेदिति धर्मरहस्यमुपदिशतीव कविकुञ्जरः।

उपसंहारः—प्रथितयशाः कालिदासः द्वैताद्वैतविशिष्टाद्वैतेषु कतमस्मिन् मतेऽभिनिविष्ट इति चर्चा नाऽत्र प्रधानमिति मन्ये। कालिदासकाले अद्यत्वे इव तेषां मतानां परिष्कृतं रूपं नाऽऽसीत्। वीरशैव इव नाऽयं नारायणद्वेषी, न वा वैष्णव इव शिवपूजापराङ्मुखः। किन्तु उभयत्र समानप्रतिपत्तिमानिति ज्ञायते। तथाऽपि भक्तिस्तरुणेन्दुशेखरे समधिकमात्रा। अत एव आरम्भे सर्वत्र असाधारण्या भक्त्या शशाङ्कशकलमौलिः भगवांस्तूयते। मालविकाग्निमित्रे, विक्रमोर्वशीये, अभिज्ञानशाकुन्तले, किं बहुना, रामावतारविभूषित-रघुकुलवर्णनपरेऽपि रघुवंशे चन्द्रचूड एवाऽऽदौ समाराधितः। मेघदूत-कुमारसम्भवयोः वस्तुनिर्देशेनाऽऽरब्धयोः आशीर्नमस्क्रियाप्रसक्तिरेव नाऽस्ति। मेघदूतं महाकालभक्तिसुरभितम्। कुमारसम्भवश्च केवलमिष्टदेवताराधनपर इति ननु प्रव्यक्तमेव। तथाऽपि तदीयेषु ग्रन्थेषु तेषु तेषु प्रस्तावेषु ब्रह्मा, विष्णुश्च शुद्धया श्रद्धया वर्ण्यमानौ कवेस्तयोः भक्तिभावमवगमयतः। अतोऽयमद्वैतपक्षपाती इत्यस्ति मन्तुमवकाशः।

केचित्तु—अमुं तत्राऽपि प्रत्यभिज्ञाद्वैतमतानुयायिनमाहुः। तत्र हेतुत्वेन कालिदासेन शकुन्तलोपाख्यानस्य 'अभिज्ञानशाकुन्तलमि'ति नामकरणम्, तथाऽस्मिन् नाटके 'अभिज्ञान'शब्दस्य मुद्रालङ्काररीत्या पौनःपुन्येन कृतं प्रयोगञ्च निर्दिशन्ति।[1] विक्रमोर्वशीये [2]विक्रमशब्दो बहुवारं प्रायोजीति, ग्रन्थनाम्न्येव 'विक्रमः' निवेशित इति च प्रदर्श्य 'कविरयं स्वस्य विक्रमादित्यसम्भावितत्वं सूचयतीति सिद्धान्तकरणमिव इयं वाचोयुक्तिररमणीया।

विक्रमोर्वशीये पुरूरवाः नायकः; ऊर्वशी च नायिका। ग्रन्थनाम्नि ऊर्वशी प्रवेशमविन्दत। पुरूरवसाऽपि तत्र प्रवेष्टव्यम्। परन्तु तन्न चक्रे। विक्रमस्तु प्रवेशितः। तथा कुर्वता कविना पुरूरवा वपुष्मान् विक्रम एवेति निरदेशि। अत एव ऊर्वशीमपि विक्रमजितामेव कल्पयामास। एवं रूपकमिदं विक्रमाङ्कितं विधाय आश्रयदातरि कृतज्ञतामसुसूचत्। एवम् इष्टतमस्याऽपि मतस्य व्यञ्जनाय शाकुन्तलं अभिज्ञानाङ्कितमकारीत्यपि क्रियमाणः ऊहः यथाचमत्कारं न तथा विश्वासं जनयितुमलम्।

'वर्षेषु यद्भारतमार्यधुर्याः स्तुवन्ति गार्हस्थ्यमिवाऽऽश्रमेषु'! तस्मिन् भारते वर्षे स्वयमुत्पद्य देशभक्तेष्वग्रणीः कालिदासः मातृभूमेः समाराधनेन आत्मानं कृतिनं चिकीर्षति। यस्य महितस्य भरतस्य महिम्ना, तन्नाम्ना च भारतमहीयमहीनविभवा महीयते, तस्य दौष्यन्तेः पवित्रचरित्रचित्रण - चरितार्थजनिता - जनित ममान्त-

---

१. 'अहिण्णाण सउन्दलं', 'अभिज्ञानमङ्गुलीयकमस्य विसर्जयामि', 'प्रत्यभिज्ञानमन्थरः', 'अहिण्णाणेण इमिणा', 'अभिज्ञानमपेक्षते ?' इत्यादीनि वाक्यानि परामृश्यन्ताम्।

२. त्रोटकस्य नामैव विक्रमाङ्कितम्। 'अनुत्सेकः विक्रमालङ्कारः', 'दिष्ट्या महेन्द्रोपकारपर्याप्तेन महिम्ना वर्धते भवान्' एवमादिस्थलेष्वनेकवारं विक्रमशब्द उपात्तः।

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

मानन्दं विन्दते कविपुरन्दरोऽयम्। 'चिक्रीडभक्त्या' जनिमता जननीभूमिराराधनीया यथाशक्ति। तत्राऽऽराधनं नानाप्रकारम्। अयं तु कविः लोकोत्तर-नाटकमुखेन तामाराध्य, देशभक्तिमतुलां प्रदर्श्य धन्यम्मन्यमनाः जीवनकृत्यं निर्वर्तितमिति निश्चि-न्वानः, तृष्णाक्षयसुखं निर्विशन् संसारादस्मात् मोक्ष-मभियाचते—ममाऽपि च क्षपयतु नीललोहितः पुनर्भवं परिगतशक्तिरात्मभूः इति। एतादृशी मोक्षार्थिनी प्रार्थना नाऽन्यत्र लब्धास्पदेति पश्यन्नेवं लिख्यते। देशभक्तिप्रबोधायाऽयमुचितः काल इत्येव समन्वयः।

कविवअणं महुरत्थं भावुअहिअअं करेदुणं सरसम्।
चन्दस्य चन्दिमा जह सरसाइँ कुणइ मिअङ्करअणाइम्॥
[कविवचनं मधुरार्थं भावुकहृदयं करोतु ननु सरसम्।
चन्द्रस्य चन्द्रिका यथा सरसानि करोति मृगाङ्करत्नानि॥]
पायम्पायमहं त्वदीयकवितां पीयूषपायं मुहु-
श्चैतन्याप्ययमाप्य किञ्चिदलिखं चापल्यवात्येरितः।
भक्तिं वीक्ष्य, रसानुभावपरतां श्रद्धाञ्च भावार्द्रतां,
कालीदास! ममापराधमवशस्येत्यञ्जसा मर्षय॥
पावित्र्यं लभते नदीविमलवास्सङ्गेन कुल्याजलं,
योगात् स्पर्शमणेः सुवर्णसुषमां कालायसं गच्छति।
आकृष्टुं प्रभवत्ययोऽपि यदयस्कान्तेन सङ्घर्षणात्
कालीदाससमाश्रिता च मम वाक् संस्तुत्यतां विन्दतात्॥

[Merchant of Venice ग्रन्थात् 'The quality of mercy······इत्यारब्धस्य Seasours justice' पर्यन्तस्य भागस्य श्लोकात्मको निबन्धकृतोऽस्य अनुवादोऽयं कालिदासीय-दयानिरूपणेन (१७८ पृष्ठे) तुलनीयः। सम्पादकः]

१. दयायास्तत्त्वं तद्यदुत न बलात्सा हि सुलभा;
शनैर्वृष्टिर्येयं निपतति दिवोऽधो महितले।
ददानस्याऽऽदातुर्वितरति च सा श्रेय उभयो-
रियं सत्त्वाढ्येषु प्रगुणमहिमोर्जस्विनितमा॥

२. अलङ्कुर्याद्राज्ञां कनकमुकुन्मस्तमधिकं;
प्रभूणां दण्डोऽसौ पिशुनयति भौमं ननु बलम्।
प्रभुत्वं माहात्म्यं वसत इह तस्माच्च महिपा
भृशं बिभ्यत्येषा त्वधिकमहिमा दण्डबलतः॥

प्रभूणां प्रभ्वीयं हृदयमधिरूढेति करुणा गुणो दिव्यस्तस्माल्ललितकरुणादृष्टिकलिता।
प्रशास्तॄणां शिष्टिर्यदि भवति भौमोऽपि महिमा दधानो दिव्यत्वं बहुलमिह भव्यं प्रकुरुते॥ ३॥

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

मानस-भारती : देवगिरा गुम्फितं मानसम्

—श्री जनार्दन गङ्गाधर रटाटे, एम. ए. साहित्याचार्यः —

श्रुत्वाऽतिकोमलां वाणीं रामः परपर्श तच्छिरः ।
ऊचे च देहं ते कुर्वे स्थिरं प्राणान् स्थिरान् कुरु ॥
वाली प्राह कृपाम्भोधे मुनयो यतनं बहु ।
प्रतिजन्म विधायान्ते वक्तुं रामेति नो शकाः ॥
यस्य नामबलाच्छम्भुः काश्यां दत्ते समां गतिम् ।
स मे साक्षं समायातो किं स्यादित्थं पुनः प्रभो ॥

त्रयी यमत्र गायति सदैव नेति नेति वै ।
विजित्य वातमिन्द्रियं विधाय नीरसं तथा ॥
विचारणे मुनिव्रताः कचिद् विलोकयन्ति यम् ।
स नेत्रगोऽद्य मे प्रभुर्विचार्य साभिमानिनम् ॥
दिदेश देहरक्षणं भवेद्धि कोऽत्र वालिशः ।
निकृत्य कल्पपादपं सकण्टकं द्रुमन्नयेत ॥
तदद्य नाथ पश्य मां कृपात ईहितं कुरु ।
जनुर्भवेत् क्वचित्परं त्वदङ्घ्रिभक्तिमाप्नुयाम् ॥
अयं सुतः समो मयाऽङ्गदो गुणैर्बलेन च ।
शिवप्रद स्वसेवकं विधेहि बाहुसङ्ग्रहात् ॥

वाली ततो रामपदाब्जयुग्मे
प्रीत्या तथा स्वं विजहौ शरीरम् ।
कण्ठप्रदेशात् पतितां सुमानां
मालां न जानाति यथा करीन्द्रः ॥१०॥

स्वधाम वालिने रामो ददौ पौराश्च धाविताः ।
सर्वेऽतिव्याकुलास्तारा विविधं व्यलपत् तदा ॥
तां मुक्तकेशां विकलां विलोक्य रघुनायकः ।
उपादिशद् यदत्यन्तं शरीरमधमं स्मृतम् ॥
भूतैः पञ्चभिरारब्धं तदग्रे पतितं तव ।
इति रामोऽहरद् मायां ज्ञानिनी साऽऽनमत् प्रभुम् ॥
वव्रे च परमां भक्तिमुमे ! स्त्रीदारवीरिव ।
नर्तयत्यनिशं रामः सकलान् ईश्वरो हरिः ॥
रामो दिदेश सुग्रीवं ततः सोऽपि मृतक्रियाम् ।
भ्रातुश्चक्रे ततो रामः सौमित्रिं समबोधयत् ॥
गत्वा प्रयच्छ राज्यं त्वं सुग्रीवाय ततः समे ।
प्रेरिता रघुनाथेन ययुर्नत्वा यथागतम् ॥

सौमित्रिराहूय समांस्तदानीं
पौरान् द्विजांश्चाग्रत एव तेषाम् ।
राज्यं ददौ वाल्यनुजाय वालि-
सुताङ्गदायाऽथ च यौवराज्यम् ॥११॥

उमे हितो रामसमो नास्ति गुर्वादिषु क्षितौ ।
रीतिः सुरनरर्षीणां यदेते स्वार्थतः प्रियाः ॥
वालित्रासादहोरात्रं विकलोऽतिव्रणी तनौ ।
चिन्तया हृदि दग्धश्च सुग्रीवः कपिराट् कृतः ॥
येन रामेण तस्यातिकृपालुः प्रकृतिः स्मृता ।
त्यजन्तीत्थं प्रभुं ज्ञात्वाऽऽपि ते स्युर्न किमापदि ॥
पुनः सुग्रीवमाहूय राजनीतिमुपादिशत् ।
तमूचे च प्रभुर्यन्न यास्यामि नगरं क्वचित् ॥
चतुर्दशाब्दपर्यन्तं ग्रीष्मो यातोऽस्ति कीशराट् ।
वर्षर्तुरागतः शैले वत्स्यामि निकटेऽधुना ॥
अङ्गदेन समं राज्यं कुरु कार्यञ्च मे स्मर ।
यदा निवृत्तः सुग्रीवोऽवसद् रामः प्रवर्षणे ॥

विचार्य देवैर्विहिता गुहैका
पुरैव तस्मिन् सुचिरा महीध्रे ।
यद् रामचन्द्रः कतिचिद् दिनानि
कृपानिधिर्वत्स्यति पर्वतेऽस्मिन् ॥१२॥

(क्रमशः)

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

निदाघ-विलसितम्

— स्वर्गीयाः महामहोपाध्यायाः श्रीलक्ष्मणशास्त्रितैलङ्गाः —

– १ –

ग्रीष्मं कदाचित् प्रविलोक्य भीष्ममुपागतं तापितलोकजातम् ।
अवोचदित्थं कुतुकेन कश्चित् सुहृद्वरं स्नेहनिबद्धचित्तम् ॥

– २ –

'सखे सहालोकमयूखपुङ्खखगं शिखालीनशिखावलौघम् ।
घोरातपोच्छोषितजानुदघ्नजलापगं पश्य निदाघकालम् ॥

– ३ –

विनिःश्वसत्पक्षिगणं विशुष्यत्सरोवरं तापितमार्गहट्टम् ।
प्रपाकुटी - वाटयताध्वनीन - प्रवर्तितानेक - कथाविनोदम् ॥

– ४ –

असीमसन्ताप - समाकुलालिसमुज्झितोच्छुष्क - करीन्द्रगण्डम् ।
उद्धूतपांसुप्रकरान्धदृष्टि - शकुन्तलोकार्तरुतप्रकीर्णम् ॥

– ५ –

अदभ्रविभ्राजितदाववह्नि - स्फुलिङ्ग - संप्लुष्ट - लताद्रुमौघम् ।
विदूयमान - द्विरदेन्द्रसेव्य - पङ्कावशेषाखिल - पल्वलालिम् ॥

– ६ –

सार्धं सरिद्भिः कृशितत्रियामं सुमैः समं शान्तमनोभवाज्ञम् ।
सन्तापजालेन सहैव दीर्घदिनं निरुत्साह - समस्तलोकम् ॥

– ७ –

विकासिमल्ली - प्रसवाच्छकीर्ति - प्रतानशोभा - ललितस्वराज्यम् ।
दिनावसानोत्क - मनोविलासिजनं सखे पश्य निदाघकालम्' ॥

– ८ –

आकर्ण्य तेनाऽथ कृतां निदाघकालस्वभावोक्ति - समन्वितोक्तिम् ।
उवाच निर्दिश्य तमेव कालं स्वयं तमन्योऽपि विचार्य वाचम् ॥

– ९ –

'प्रचण्डवाताहतिघृष्ट - तालीवनोन्नतालीभव - मर्मरेद्धः ।
तपर्तुरेषोऽवतरत्यनन्त - जनौघनिःश्वास - मरातिघोरम् ॥

– १० –

कराग्रसञ्चालित - तालवृन्ताः प्रस्वेदसिक्तालस - सर्वगात्राः ।
विनिःश्वसन्तश्च जनाः समन्तादुन्मत्तवत् स्वं परिदर्शयन्ति ॥

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

स्वर्गीयैः पूज्यपादैः श्री तैलङ्गशास्त्रिभिः सामान्यमनोविनोदप्रसङ्गेष्वपि नैके श्लोका अपूर्णवर्णनास्तत्र तत्र पृष्ठेष्वङ्किताः। तेऽपि तेषामसाधारणं सारस्वतसम्प्रदायाचार्यत्वं स्वभावसिद्धं सहृदयत्वं लोकवृत्तावेक्षणसूक्ष्मेक्षिकत्वं क्रान्तदर्शित्वञ्च अभिव्यञ्जयन्ति। अतस्तेभ्यः कतिपयप्रमुखरचनाः अद्याप्यप्रकाशिताः पाठकेभ्य उपायनीकर्तुमस्माभिरिह प्रयत्यते। तेषां सुपुत्रवरैः साहित्याचार्य श्री जगन्नाथशास्त्रि तैलङ्गैरेतासां रचनानां प्रदानेन वयं सुबहु उपकृता इति ते नूनं धन्यवादार्हाः। तत्र स्फुटसङ्ग्रह-प्रकाशनक्रमे प्रथमोऽयं वाग्विलासो विजृम्भते।

—सम्पादकः

● ● ●

– ११ –

अत्रापि वित्रासित - लोकजाते सन्तप्तवाते-ऽल्पितसर्वशाते।
निदाघकाले किल केचिदिभ्या मध्याह्नकालेऽनुभवन्ति सौख्यम्॥

– १२ –

उशीरशीत - प्रतिसीरिकाभिर्जलार्द्रवातै - र्जलशीकरौघैः।
कर्पूरसंमिश्रित - चन्दनैश्च धन्यास्तपर्तोः शमयन्ति तापम्॥

– १३ –

विलासिनी - मानलता - कुठारे प्रवाति हैमन्तिकशीतवाते।
जलार्द्र - शीत - स्तनमण्डलाभिर्वराङ्गनाभिर्विहरन्ति धन्याः॥

– १४ –

आर्द्रार्द्र - पाथोरुहपर्णपूर्णे मृणालिकाभिर्मसृणान्तराले।
स्रवज्जलासेकज - शैत्यरम्ये स्वपन्ति हर्म्ये कृतपूर्वपुण्याः॥

– १५ –

दिनावसानागमने विकालिमल्लीमतल्ली - सुरभिर्नभस्वान्।
सन्तापतान्ताङ्गतया प्रसुप्तं प्रबोधयत्यत्र च पुष्पबाणम्॥

– १६ –

क्रमेण सन्तापित - लोकजात - मनःप्रमोदोद्यम - बद्धदीक्षे।
पीयूषपूर - प्लुतसर्वलोके कुमुद्वती - प्रेमणि शीतभानौ॥

– १७ –

उदेति, सूर्यप्रिय - विप्रयोगखिन्नान्तर - प्राक्श्वसितानुकारे।
प्रवाति मन्दं नवपाटलौघसौरभ्यहृद्ये शिशिरे च वाते॥

– १८ –

निदाघकाले रमणीसनाथा धन्या निशायां बहुशः कृशायाम्।
अतृप्तचित्ता बहुभिर्विनोदैः समं विलासैरिह निर्विशन्ति॥

– १९ –

क्वचित् सुहृल्लोककथा-प्रसङ्गाः क्वचिद् विपञ्ची-कलनिःस्वनानि।
क्वचिच्च पूर्णेन्दुविकासिबिम्ब - संमिश्र - शीतासव - पीतिमोदाः।

★

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

मनस्तत्त्व-विमर्शः

—श्री मुरलीधर मिश्रः—

[व्याकरणविभागाध्यक्षः—वाराणसेय-संस्कृत-विश्वविद्यालयस्य, वाराणसी]

इह जगति निखिलब्रह्माण्डनायकस्य परात्परस्य ब्रह्मणः क्रीडाप्राङ्गणे आसूक्ष्माद् आ च स्थूलात् सर्वेषां वस्तूनां लोकेषु शास्त्रेषु च व्यवहारादेव संसिद्धिर्ज्ञानञ्च जायते इति नास्त्यविदितं केषाञ्चित्। क्वचिच्च व्यवहारातीतेष्वपि वस्तुषु शास्त्रे असकृदभिधानेन विचारकोटिमाटीकमाना प्रतीतिर्जायते। तत्र शास्त्रेषु निखिलसंभाविदोषविरहिताद् अनाद्यपौरुषेयात् सर्वतः सर्वेषाञ्च परमकल्याणं विदधतः श्रीमद्भगवतो वेदादारभ्य सर्वत्र श्रुतिस्मृतिपुराणेतिहासादिषु प्रचरत्सु दार्शनिकग्रन्थेषु च मनस उल्लेखः प्राचुर्येण प्रधानतया च दृष्टिपथमवतरति।

तथा च वेदस्य मन्त्रभागे—चन्द्रमा मनसो जातश्चक्षोः सूर्योऽजायत इत्यादिना। ब्राह्मणभागे—यदा वै पुरुषः स्वपिति प्राणं तर्हि वागप्येति प्राणं चक्षुः प्राणं श्रोत्रं प्राण मनः इत्यादिना। उपनिषत्सु सृष्टिप्रकरणे—तन्मनोऽकुरुत इत्यादिना मनसः सृष्टिरप्युक्ता। बृहदारण्यकोपनिषदि—अवागमनाः इति। छान्दोग्योपनिषदि—मनोमयः प्राणशरीरोमारूप इति। कठोपनिषदि—इन्द्रियाणि हयानाहुः मनः प्रग्रहमेव च इत्यादीनि। भगवद्गीतायाम्—चञ्चलं हि मनः कृष्ण प्रमाथि बलवद् दृढम् इति, मन एव मनुष्याणां कारणं बन्धमोक्षयोः इति च। वाल्मीकीयरामायणेऽपि—

मनो हि हेतुः सर्वेषाम्, इन्द्रियाणां प्रवर्तने।
शुभाशुभास्ववस्थासु तच्च मे सुव्यवस्थितम्॥ इति।

लोकेऽपि 'मदीयं मनोऽत्र न प्रवर्तते, मनसा वाचा कर्मणा भवतः साहाय्यमाचरामि, सत्यामपीच्छायामत्र वस्तुनि मनो न प्रवर्तते' इत्यादिव्यवहारेण मनोऽनुकूलमेव वस्तु सर्वैरिष्यते निष्पाद्यते च। एवं लौकिकालौकिकव्यवहारेषु मनसः सहस्रश उपादानेन मनोविषये महती जिज्ञासा समुदेति यत् किं तावत् मन इति? ततश्च क्रमशः एकैकं दर्शनमाश्रित्य संक्षेपेण तद्विषये विचार्यते।

जैनमतम्

प्रथमं जैनदर्शनमाश्रित्य किञ्चित् प्रक्रम्यते। तत्र हि चक्षुरादीन्द्रियवत् मनसोऽपि ज्ञाने निमित्तत्वमङ्गीकृतम्। तदुक्तम् उमास्वामिभिर्मोक्षशास्त्रे—तदिन्द्रियानिन्द्रियनिमित्तम् इति। तत् मन इन्द्रियजन्यज्ञाने अनिन्द्रियजन्यज्ञाने च निमित्तमित्यर्थः। परीक्षामुखनामके ग्रन्थे माणिक्यनन्दिभिरप्युक्तम्—इन्द्रियानिन्द्रियनिमित्तं देशतः सांव्यावहारिकम् इति। एतेषां मते अन्तःकरणम्, अनिन्द्रियम्, नो इन्द्रियम्, विशिखम्, मन एते पर्यायाः।

तत्र अन्तःकरणं नाम चक्षुरादिवद् बहिरनुपलब्धत्वे सति ज्ञानजनकमन्तःस्थितम्। अनिन्द्रियमित्यत्र ईषदर्थे नञः प्रयोगात् किञ्चित् न्यूनमिन्द्रियमित्यर्थः, चक्षुरादिवत् प्रतिनियतदेशविषयत्वाभावात्। नो इन्द्रियमिति शाकटायनप्रक्रियासङ्ग्रहकरोऽभयचन्द्रः। गोम्मटसार - जीवकाण्डप्रणेत्रा नेमिचन्द्रेणाप्युक्तम्—

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

नो इन्द्रियत्ति स एणा तस्सहवेसेस इन्द्रियाणं वा ।
वत्तत्ता भावादोमणमण पञ्च च तत्थहवे ॥ इति ।

नाममालाकर्त्रा धनञ्जयेनाप्युक्तम्—'विशिखमिति । अधोमुख-पुण्डरीकाकारत्वात्, विपरीता शिखा यस्य तद् विशिखम्' इति ।

तच्च मनः द्विविधम्—द्रव्यमनः भावमनश्च । तत्र द्रव्यमनो विकसिताष्टदलारविन्दसदृशं सर्वेषां कर्मणां निमित्तम् । तदेव मनो वर्गणास्कन्धः । तथा चोक्तं गोम्मटसार-जीवकाण्डे नेमिचन्द्रेण—

हिदि होदि हुद्व्वमणम् विकसिय अट्ठच्छदारविन्दं वा ।
अमोवं गुढपादो मणवग्गणखं धदोणियमा ॥

शरीरेऽस्मिन् पद्मद्वयं वर्तते । तत्र हृत्पद्ममधोमुखम्, नाभिपद्मञ्च ऊर्ध्वमुखम् । तत्र द्रव्यमनः पौद्गलिकम्, भौतिकञ्च । भावमनो ज्ञानरूपम् । तदुक्तं सर्वार्थसिद्धौ—"मनोऽपि द्विविधं भावमनो ज्ञानमनश्च । तत्र भावमनो ज्ञानम् । तस्य जीवगुणत्वात् आत्मन्यन्तर्भावः । द्रव्यमनो रूपादियोगात् पुद्गलविकारः । तच्च द्रव्यं मनो रूपवत्, अत एव पुद्गलं द्रव्यम् ।"

जैनमते वायुमनसोरुभयोरपि रूपवत्त्वम् । तथा च सर्वार्थसिद्धौ—'वायुः रूपवान् स्पर्शवत्त्वात् घटादिवत्, मनो रूपवत् ज्ञानोपयोगकरणत्वात् चक्षुरादिवत्' इत्यनुमानद्वयं प्रदर्शितम् । एतेषां मते मध्यमपरिमाणं मनः । अणुपरिमाणत्वे सर्वत्र शरीरेषु क्रियाप्रवृत्तिर्न स्यात् । अथ अदृष्टवशात् झटिति अलातचक्रवत् सर्वत्र क्रियोपलब्धिरिति चेत्? अमूर्तस्य निष्क्रियस्य अदृष्टमपि क्रियामुत्पादयितुं न क्षमम् ।

तच्च मनो द्रव्यत्वदृष्ट्या नित्यम्, पर्यायदृष्ट्या तु अनित्यम् । तदुक्तम् अकलङ्कमहाभागैः तत्त्वार्थवार्तिके—अवस्थायीति चेत्, न समनन्तरसमयप्रच्युतेः इति । अर्थात् मनस्त्वेन परिणताः पुद्गलाः गुणदोषस्मरणादिकार्यं कृत्वा तदनन्तरं समय एव मनस्त्वात् प्रच्यवन्ते । आदेशवचनाच्च—नायमेकान्ततोऽवस्थायि एव मनः । कुतः ? आदेशवचनात् । द्रव्यार्थादेशात् मनः स्यादवस्थायि, पर्यायादेशात् स्यादनवस्थायि च ।

जैनदर्शनदृष्ट्या मनस आत्मनश्चैक्यम्, कथञ्चिद् अनैक्यमपि । तथा हि—यथा "वीर्यान्तरायज्ञानावरणक्षयोपशमापेक्षस्य आत्मन एवेन्द्रियपरिणामादेशात् आत्मनो नान्यदिन्द्रियम् । इन्द्रियनिवृत्तावप्यात्मनोऽवस्थानात् स्यादन्यत् । एवमेव आत्मन एव तत्क्षयोपशमापेक्षस्य मनःपरिणामादेशात् स्यादनन्यत्, मनोनिवृत्तावप्यात्मनोऽवस्थानात् स्यादन्यदिति ।

तत्र मनः सर्वेषामिन्द्रियाणां साहाय्येन ज्ञानजनकं स्वतश्च । तत्र यदि बाह्यवस्तुज्ञाने मनः इन्द्रियसाहाय्यं विदधाति । आन्तरसुखादिज्ञाने तु स्वत एव जनकम् । तत्र दिगम्बराणां मते सर्वेषां जीवानामुभयविधं मनो भवति—द्रव्यमनो भावमनश्च । श्वेताम्बराणां मते वृक्षादीनां द्रव्यमनसोऽभावेऽपि भावमनो भवत्येव ।

बौद्धमतम्

बौद्धास्तावत् एकस्यैव भगवतो बुद्धस्य परमकारुणिकस्य आदेशेन स्थिता अपि विनयभेदेन आदेशनाभेदान् वैभाषिक-सौत्रान्तिक-माध्यमिक-योगाचारभेदेन चत्वारः संपन्नाः । बाह्यार्थमन्तरा विज्ञानाकारो न सम्भवतीति विज्ञानाकारेण बाह्यार्थाः नानुमेयाः, अपितु प्रत्यक्षसिद्धा इति विभाषया ये वदन्ति, ते वैभाषिकाः । तत्र सूत्रस्यान्तं पृष्टवन्तोऽतः सौत्रान्तिकाः अनुमानसिद्ध-बाह्यार्थास्तित्ववादिनः । सर्वं शून्यमिति

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

वदतो बुद्धस्य शून्यमिति गुरूक्तग्रहणरूपयोगस्य भवतु नाम बाह्यं शून्यम्, आन्तरं कथं शून्यं भवितुमर्हतीति पर्यनुयोगकरणरूपाचारस्यापि करणात् योगाचाराः विज्ञानमात्रवदिनः। योगस्य करणेन आचारस्य करणेन मध्यमवृत्तिभाजो माध्यमिकाः सर्वशून्यवादिनः।

बौद्धानां मते 'सर्वं दुःखम्, सर्वं क्षणिकम्, सर्वं स्वलक्षणम्, सर्वं शून्यम्' इति भावनाचतुष्टयं तिष्ठति। तत्र क्षणिकमिति भावयतां विज्ञानवादिनां मते कस्यचित् स्थिरस्य आत्मनोऽभावात् मन एव विज्ञानपदवाच्यम् आत्मत्वेन स्वीकृतमस्ति। तस्यैव अयं प्रपञ्चः सर्वो विश्वः, नान्यत् किञ्चन अस्ति। तत्र विज्ञानं द्विविधम्—आलयविज्ञानम् प्रवृत्तिविज्ञानञ्च। आलयविज्ञानम् अहमाकारम्, नीलपीताद्याकारञ्च प्रवृत्तिविज्ञानम्। यथोक्तं बौद्धैः—

तत् स्यादालयविज्ञानं यद्भवेदहमास्पदम्।
तत् स्यात् प्रवृत्तिविज्ञानं यन्नीलादिकमुल्लिखेत्॥ इति।

एतेषां मते प्रतिक्षणं विपरिणामिनो भावा इति विज्ञानमपि क्षणिकमेव। तत्र पूर्वपूर्वविज्ञानम् उत्तरोत्तरविज्ञाने वासनावशात् संक्रमते। अतः पूर्वानुभूतस्य न स्मरणानुपपत्तिः। तच्च विज्ञानं मनोरूपमेव, ततोऽन्यत् किञ्चित् स्थिरन्न वर्तते। यद्यपि बाह्या घटादयः प्रत्यक्षं भासन्ते, तथापि विज्ञानात् भेदेन अन्येषां प्रतिभासस्तैमिरिक-चन्द्रयुगवदसत्य एव।

न च असत्यत्वे अर्थानां योऽयं देशकालादिनियमः स नोपपद्यते, असता देशकालादीनामसम्बन्धादिति वाच्यम्; स्वप्नादिवत् असत्यप्यर्थे देशकालादिनियमस्य अप्रतिहततयाः उपपत्तेः। न च घटादिवत् चन्द्रादिद्वयमपि सत्यमेवेति वाच्यम्; तैमिरिकाणामिव सर्वेषां चन्द्रद्वयमानापत्तेः।

अथ न स्वप्नेषु भासमाने रथैः काचित् क्रिया भवति। घटाद्यर्थैस्तु तत्तत्-क्रिया विधीयते। अतो नास्ति विज्ञानमात्रत्वमर्थानामिति चेद्? अत्रोच्यते—यथा तुल्यकर्मविपाकैरेव प्रेतैः पूयपूर्णा नदी दृश्यते, न सर्वैः एवं तैमिरिकैरेव चन्द्रद्वयं दृश्यते, न घटादिवत् सर्वैः। अतो न किञ्चिदनुपपन्नम्। स्वप्नमिथ्याभूतैरेव कामिन्यादिसमागमैः वीर्यादिस्खलरूपायः क्रियायाः दर्शनात् विनाप्यर्थैः जलाहरणादिक्रिया नानुपपन्ना।

किञ्च—प्रेतानां नरकादिषु नारकीयैः यमदूतादिभिः दण्डो विधीयते, तथैव पक्ष्यादिभिस्ताडनमपि। किं नरके यमदूतादीनां संभवोऽस्ति तेषां तादृशपापानाचरणात्। अपि च—तेषां तत्र स्थितौ नारकीययातनानामनुभवोऽपि स्यात्। यातनानुभवे च कथमन्येषां यातनाकर्तारस्ते स्युः, तुल्यफलभोगित्वात्। अतस्ते मिथ्याभूता एव केवलं विज्ञानवासनावशात् प्रतीयन्ते।

अथ प्राणिनां तत्तत्कर्मवशात् यमदूतादिकाः प्रजायन्ते इति कल्पनापेक्षया तत्तत्कर्मवशात् विज्ञानमेव तेन रूपेण परिणमते इत्येव कल्पना ज्यायसी। अत एव फल-वासनयोः संविदि सामानाधिकरण्यमप्युपपद्यते। रूपाद्यायतनत्वेन कायस्स्प्रष्टव्यायतनत्वेन द्विविधायतनकथनन्तु विनैव जनानुरोधेन, न वस्तुतः। तथा चोक्तं लङ्कावतारे बुद्धेन—

बुद्ध्या विविच्यमानानां स्वभावो नावधार्यते।
अतो निरभिलप्यास्ते निःस्वभावाश्च देशिताः॥ इति।
नान्योऽनुभाव्यो बुद्ध्यास्ति तथा नानुभवोऽपरः।
ग्राह्यग्राहकवैधुर्यात् स्वयं सैव प्रकाशते॥ इति च।

(क्रमशः)

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

पृथ्वीराजाख्यानकम्

— श्रीविश्वनाथ त्रिपाठी, साहित्याचार्यः —

(३)

प्रधानमन्त्रिणः कैमासस्य वधः

अस्याः घटनायाः कियत्सु एव दिवसेषु अतीतेषु राज्ञा अपरम् आत्मघातकं कार्यं कृतम्। कार्णाटकी राज्यमन्त्रिणि कैमासे मुग्धा आसीत्। कैमासश्च गुप्तः तदवरोधगृहम् गच्छति स्म। पट्टराज्ञ्या इच्छिन्या वृत्तमेतत् व्यज्ञायि। तया एकस्मिन् दिवसे यदा कैमासः कार्णाटिक्याः केलिमन्दिराभ्यन्तरं गतः, तदैव दासीं संप्रेष्य आखेटकस्थलात् पृथ्वीराजं समाहूय तत् दर्शितम्। कार्णाटक्याः भवने कैमासं विलोक्य क्रोधान्धेन पृथ्वीराजेन शब्दवेधिना बाणेन सः हतः, तत्रैव च तं निचखान। दासी कार्णाटकी च अवसरं प्राप्य पलायिष्ट। राजा च निगूढ एव कृत्यमेतत् विधाय पुनराखेटकस्थलमगात्। केनापि वृत्तमेतत् न ज्ञातम्।

द्वितीयदिने राजनि सभायां समागते कैमासस्य अन्वेषणं प्रारब्धम्। किन्तु अद्य कैमासः क्वास्ति यतो मिलेत्? राज्ञः पुनः पुनः कथनेन चंदबरदायिना सर्वा घटना यथावृत्ता समुद्घाटिता। श्रुत्वेदं सर्वे स्तब्धा अभूवन्। राजा पृथ्वीराजोऽपि न किमपि वक्तुमशकत्। अन्ततः इदमाश्वासनं प्राप्य यत् चंदबरदाई जयचंदस्य राजधानीं दर्शयिष्यतीति, पृथ्वीराजेन कैमासस्य शवो दत्तः, यमादाय तत्पत्नी सतीत्वं भेजे।

कान्यकुब्जस्य गूढं दर्शनम्

अनया घटनया सामन्तानां मनांसि क्षुब्धानि अभूवन्। तेषु विलक्षणा रिक्तता आविवेश। कैमासस्याभावे तेषाम् ऐकमत्यं दुर्घटमजायत। अन्ततः पृथ्वीराजोऽपि प्रतिक्षणं स्वस्य दुष्कार्यस्य कृते पश्चात्तपन् स्वप्राणदानेन मित्रहत्यां प्रतिशोधयितुम् इयेष। अतः सः चंदबरदायिना साकम् अनुक्षणं कान्यकुब्ज-गमनाय चर्चां कुर्वन् आसीत्। राज्ञः दृढं निर्बन्धं विलोक्य चंदबरदायी अपि सन्नद्धोऽभवत्। एकस्मिन् दिवसे परिगणितान सामन्तान् सैनिकांश्च दिल्लीरक्षायै नियुज्य चन्देन स पृथ्वीराजः तत्सामन्ताश्च कान्यकुब्जाभिमुखम् प्रतस्थिरे। स्वीयं राज्यमतिलङ्घ्य यदा एते कान्यकुब्जसीमनि संविष्टाः, तदा स्वगन्तव्यं निरधारयन्। जयचन्दस्य राजधानीम् व्रजताम् एषां नेतृत्वं चन्दबरदायी अकरोत्, पृथ्वीराजश्च तत्सेवकः अभवत्।

पृथ्वीराजस्य प्राकट्यम्

एकस्मिन् आरामे स्थित्वा सामन्तानां वृन्दं पृथक् पृथक् भूत्वा इतस्ततो जयचन्दनगरस्य शोभां व्यलोकयत्। चन्दबरदायी पृथ्वीराजेन सह जयचन्दस्य राजसभाम् आजगाम। तत्र राज्ञा साकं तस्य नैकविधाः वार्ता अजायन्त। अत्रान्तरे जयचन्देन बरदायिने ताम्बूलदानाय दास्यः समाहूताः। आसु कार्णाटकी अपि आसीत्। चन्दबरदायिना साकं सेवकरूपधरं पृथ्वीराजं विलोक्य सा उत्तरीयकेन मुखं प्रावृणोत्। किन्तु पुनः क्षणेन मुखमुद्घाट्य तया कवये ताम्बूलमदायि। कार्णाटकी केवलं पृथ्वीराजमेव पुरुषं मन्यते स्म, तत्सम्मुखमेव च मुखावगुण्ठनं करोति

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

स्म— एतत् सर्वविश्रुतम् आसीत्। अकस्माद्य तया तथाकरणेन समुपस्थिताः सर्वे परं विस्मयमापन्नाः। परं प्रत्युत्पन्नमतिमत्या कार्णाटक्या स्थितिरियं महता कौशलेन गोपायिता। सा समादधे यत् 'कविरयं पृथ्वीराजस्य ज्येष्ठभ्रातेव दृश्यते, अत एव आदर-सूचनाय लज्जया मयाऽस्य संमुखे मुखममवगुण्ठितम्' इति। इत्थं संगोप्य वस्तुस्थितिं ताम्बूलं च प्रदाय प्रतिनिवृत्तायां कार्णाटिक्यां किञ्चित् प्रासङ्गिकाऽप्रासङ्गिकम् आलप्य चन्दबरदायिनं विसर्जयामास। परं राज्ञा चंदबरदायिनि गुप्तचरोऽपि नियोजितः। अनेन गुप्तचरेण चन्दबरदायिनः तदावासगतं च सर्वं वृत्तं सङ्कलय्य राज्ञे निवेदितम्। प्रतिदिनं यद्यत् जायते स्म, तदपि सर्वम् अप्रमादेन निवेदयन् आसीत्। इत्थं सर्वं रहस्यं विज्ञाय राज्ञः विश्वासोऽयं दार्ढ्यमुपगतः यत् चन्दबरदायिना साकं नूनं छद्मवेषेण पृथ्वीराजो वर्तते इति।

अन्येद्युः चन्दबरदायिनः सौप्रास्थानिकमिषेण जयचंदः तद्वासस्थानम् आजगाम। तत्रत्यां सर्वां स्थितिं विलोक्य तदीयः सन्देहोऽधिकं दृढः समभवत्। पृथ्वीराजः कीदृशोऽस्तीति पृष्टः चंदः स्वसेवकं लक्ष्यीकृत्य 'एतादृश एवास्ती'ति जगाद। ततः चंदबरदायिनो निदेशेन छद्मवेषधारिणा सेवकीभूतेन पृथ्वीराजेन जयचन्दाय ताम्बूलं दत्तम्। अनेन ताम्बूलादान-प्रदानेन उभौ शत्रू प्रत्यक्षतः परस्परं परिचितौ अभूताम्। ताम्बूलमादाय जयचन्दः स्वावासे गतः। गत्वा च सपदि तेन चतुर्दिक्षु स्वसैन्यं तथा सन्नद्धं कृतम्, यथा पृथ्वीराजः ततः निःसृत्य पदमेकमपि न गच्छेत्।

संयोगितया सह उद्वाहः

जयचंदस्य गमनानन्तरम् अग्रिम-कार्यक्रमनिर्धारणाय सामन्तानां गोष्ठी समायोजिताऽभवत्। इतश्च पृथ्वीराजः नगरनिरीक्षणाय निरगात्। अभितो भ्राम्यन् असौ गङ्गातटं प्राप्य तत्र कञ्चित्कालं स्थित्वा स्वीयां मौक्तिकमालिकां संत्रोट्य एकैका मौक्तिकगुलिका मत्स्यान् आशयन् आसीत्। पार्श्वे एव तत् सदनमासीत् यत्र संयोगिता निवसति स्म। पृथ्वीराजं परिचित्य तत्सख्यस्तं तस्याः भवने नीत्वा तत्रैव तयोः गान्धर्वविवाहं रचयामासुः।

अस्मिन्नन्तरे पृथ्वीराजम् अन्वेषमाणो गुणरायः तत्र समागतः। गुणरायतः पृथ्वीराजेन ज्ञातं यत् जयचंदेन वयं सर्वतः तथा निरुद्धाः यथा पदमेकमपि अग्रे प्रसरणम् असम्भवीति। लंगरीरायेण जयचन्द-सेनायाः कलकलं श्रुत्वा एकाकिनैव प्रतियोद्धुम् आरेभे। तत्क्षणे योद्धॄन् निघ्नतः प्रतिभटांश्च अपसारयतोऽस्य शरीरं जयचंद-द्वारं प्राप्य निश्चेष्टमजायत। शिविरं चतुर्दिक् रुद्धमासीत्। युद्धं च घोरं निर्णायकमभवत्। गुणरायतः वृत्तमिदम् अधिगत्य पृथ्वीराजः त्वरितं ततो निश्चक्राम, शत्रूंश्च छिन्दन् आगत्य स्वकीयदलेन सङ्गतः। सकुशलं तमभिवीक्ष्य सर्वे स्वीया भटाः समुल्लासिताः। अथ तैः गहना युद्धमन्त्रणा प्रारब्धा।

(क्रमशः)

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

श्रीभारतधर्म-महामण्डल-शास्त्रप्रकाश-विभागद्वारा प्रकाशितानि पुस्तकानि

१.	धर्म-कल्पद्रुम प्रथम खण्ड	२)
२.	,, द्वितीय खण्ड	१।।)
३.	,, तृतीय खण्ड	२)
४.	,, चतुर्थ खण्ड	२)
५.	,, पंचम खण्ड	२)
६.	,, षष्ठ खण्ड	३।।)
७.	,, सप्तम खण्ड	२)
८.	,, अष्टम खण्ड	३।।)
९.	धर्म-कल्पद्रुम द्वितीयखण्डसहित, रायल एडी०	५)
१०.	प्रवीण दृष्टि में नवीन भारत प्र० द्वि० खण्ड	२)
११.	नवीन दृष्टि में प्रवीण भारत	१)
१२.	साधन-चन्द्रिका	१।।।)
१३.	शास्त्र-चन्द्रिका	१।।)
१४.	धर्म-चन्द्रिका	१।)
१५.	आर्य-गौरव	।।)
१६.	नीति-चन्द्रिका	।।)
१७.	धर्म-प्रश्नोत्तरी	।)
१८.	चतुर्दश-लोकरहस्य	।)
१९.	गीतार्थ-चन्द्रिका सजिल्द	३)
२०.	,, ,, अजिल्द	२।।)
२१.	सनातनधर्म-दीपिका	।।।)
२२.	धर्म-विज्ञान प्रथम खण्ड	५)
२३.	,, द्वितीय खण्ड	४)
२४.	,, तृतीय खण्ड	४)
२५.	सतीचरित्र-चन्द्रिका	२)
२६.	नित्यकर्म-चन्द्रिका	।)
२७.	धर्म-सोपान	।)
२८.	धर्मकर्म-दीपिका	।)
२९.	सदाचार-सोपान	—)
३०.	कन्याशिक्षा-सोपान	—)
३१.	ब्रह्मचर्य-सोपान	।)
३२.	साधन-सोपान	।।)
३३.	शास्त्र-सोपान	।)
३४.	उपदेश-पारिजात	।।)
३५.	कल्कि-पुराण	१।।)
३६.	पातञ्जल-योगदर्शन	३)
३७.	महामण्डल-रहस्य	१।।)
३८.	मन्त्रयोग-संहिता	१)
३९.	हठयोग-संहिता	।।)
४०.	तत्त्वबोध	=)
४१.	स्तोत्र-कुसुमाञ्जलि	।)
४२.	भगवद्गीता प्रथम खण्ड	१)
४३.	विष्णु-गीता	१)
४४.	सूर्य-गीता	।।)
४५.	शक्ति-गीता	१)
४६.	धीश-गीता	।।।)
४७.	शंभु-गीता	१)
४८.	संन्यास-गीता	१)
४९.	गुरुगीता	।)
५०.	कर्ममीमांसा-दर्शन प्रथम खण्ड	१।।)
५१.	,, द्वितीय खण्ड	२)
५२.	,, तृतीय खण्ड	५)
५३.	कर्ममीमांसा-दर्शनम् (संस्कृत)	२)
५४.	राम-गीता	२।।)
५५.	कहावत-रत्नाकर साधारण रायल	१०)
५६.	रामायण तुलसीकृत	१।।)
५७.	दैवीमीमांसा-दर्शन प्रथम भाग	३।।)
५८.	,, द्वितीय भाग	५)
५९.	त्रिवेदी सन्ध्या	।=)
६०.	गोव्रत-तीर्थमहिमा	।।)
६१.	मार्कण्डेय-पुराण प्रथम खण्ड	१)
६२	,, द्वितीय खण्ड	१)
६३.	,, तृतीय खण्ड	१)
६४.	ऋजु-पाणिनीयम्	।।।)
६५.	संगीत-सुधाकर	।)
६६.	पुराण-रहस्य	१।।)
६७.	संन्यासधर्म-पद्धति	१।।)
६८.	पातञ्जल-योगदर्शनम् (संस्कृत)	[illegible]

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

पञ्जीकृतसंख्या एल० १८९७

सूर्योदयस्य नियमाः

पत्र-संहिता

१. 'सूर्योदय'-मासिकपत्रस्य वार्षिकं शुल्कं रूप्यकपञ्चकं वर्तते। धनादेश (मनीआर्डर) द्वारा तत्प्रेषणीयम्। वी० पी० द्वारा प्रेषणे ५० पणाः पृथक् प्रदेयाः स्युः।

२. आवर्षं गम्भीरसाहित्यसमन्विताः १२ अङ्काः प्रकाश्यन्ते। नवीनग्राहकत्वं प्रथमाङ्कतः (जनवरी-अंकतः) एव स्वीक्रियते। माध्यमिकेन केनापि अङ्केन ग्राहकत्वं न स्वीक्रियेत।

३. आंग्लमासस्य २६ दिनाङ्के 'सूर्योदयः' प्रकाशितो भवति, वारद्वयं संशोध्य ग्राहकेभ्यः स प्रेष्यते। अतस्तदलाभे पूर्वं स्वकीय-पत्रालयतस्तदनागमनस्य निश्चयं कृत्वैव १० दिनाङ्कानन्तरं वयं सूचनीयाः।

४. लेख-कवितादीनां भाषा संयता, सरला, शुद्धा च भाव्या। प्रकाशनीय-लेखादीनां स्पष्टाक्षरैः कर्गजस्यैकपृष्ठे एव लेखनमावश्यकम्। अस्वीकृता लेखादयः पोस्टविभागीय-चिटिका (टिकट) प्राप्त्यनन्तरं परावर्तयितुं शक्ष्यन्ते।

५. सम्पादकीय-विषयसम्बद्धे पत्र-व्यवहारे 'सम्पादकः' इति, व्यवस्थाविभागीय-पत्रव्यवहारे च 'व्यवस्थापकः' इति च स्पष्टं लेखनीयम्। तेन उत्तरलाभे मुधा विलम्बो न भवेत्।

विज्ञापन-शुल्कम्

सूर्योदये सुरुचिपूर्णं विज्ञापनं प्रकाश्यते। एकवारं तस्य प्रकाशनस्य शुल्कक्रमश्च अधोलिखितोऽस्ति। सार्वकालिकस्य दीर्घकालिकस्य च विज्ञापनस्य कृते विशेष-सौविध्याय पत्र-व्यवहारः कार्यः।

साधारणस्य प्रतिपृष्ठस्य	१००) रु०	साधारणस्य प्रत्यर्धपृष्ठस्य	६०) रु०
साधारणस्य चतुर्थांशपृष्ठस्य	३५) रु०	आवरण-चतुर्थपृष्ठस्य	२००) रु०
आवरण-द्वितीय-तृतीयपृष्ठयोः	१५०) रु०	प्रथमावरणपृष्ठे विज्ञापनं न स्वीक्रियेत।	

— सङ्केतः —

'सूर्योदय'-कार्यालयः, भारतधर्म-महामण्डलम्, जगत्गंज वाराणसी।

सम्पादकः, प्रकाशकः, मुद्रकश्च—गोविन्द नरहरि वैजापुरकरः,
श्रीभारतधर्ममहामण्डलम्, जगतगंज, वाराणसी कैण्ट।
मुद्रण-स्थलम्—मनोहर प्रेस, जतनबर वाराणसी।

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

सूर्योदयः

भारतधर्ममहामण्डलस्य
मासिकं मुखपत्रम

वर्षम् ४३

अङ्कः ७

सम्पादकः
गो० न० वैजापुरकरः

जुलाई
१९६७

वार्षिक-मूल्यम्
५) रूप्यकाणि

अस्याङ्कस्य मूल्यम्
अर्धरूप्यकम्

वृन्दावनम्

चेतश्चल वृन्दावनकुञ्जम् !

नन्दकुमारचरणकमलाभ्यां, परिपूतं छविपुञ्जम् ॥ १ ॥

विविधविहगकुल - कलरवयुत-मृदुतरुवर-राजितगुञ्जम् ।

निर्मलकालिन्दी-श्यामल- जलविलसित - लोलतरङ्गम् ॥ २ ॥

भाति यत्र गोकुलसंयुक्तं, गोवर्धनगिरिश्रृङ्गम् ।

शरदुत्फुल्लमल्लिकामोदः, कर्षति सहृदयभृङ्गम् ॥ ३ ॥

परमानन्दो निवसति, भक्तिर्नृत्यति, यत्र सलीलम् ।

कर्मयोगिकेलिस्थलमेतत्, कृन्तति कश्मलकीलम् ॥ ४ ॥

—डॉ० शिवकुमार शर्मा

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

गुरुपूर्णिमा-महोत्सवः—पूजनं विदुषां भाषणानि च

वाराणसी । विगत-जुलाईमासस्य २१ दिनाङ्के श्री भारतधर्म-महामण्डलस्थे ब्रह्ममय्याः श्री गायत्रीदेव्या भव्ये मन्दिरे महामण्डलसंस्थापकानां महर्षिवर्याणां पूज्यपाद श्री स्वामि ज्ञानानन्द-महाराजानां गुरुदेवानां गुरुपूर्णिमा-महोत्सवो महता समारोहेण समायोजितोऽभवत् । काशिकप्रमुखवैदिकविदुषामुपस्थितौ वेदोक्तविधानेन गुरुदेवानां मूर्तेः, तैलचित्रस्य च षोडशोपचारपूजनं गुरुपादानां परमभक्ताभिः महामण्डलसञ्चालिकाभिः श्री पूज्य विद्यादेवी-महोदयाभिः कृतम् । तत्रैव सहैव अपरत्र गुरुगीताया अखण्डपाठोऽपि प्रचलित आसीत् । गुरुपादानामावासवेश्मापि समलङ्कृतं किमप्यलौकिकं भावं तदा जनयदासीत् । वेदमन्त्रोच्चारैः समग्रं वातावरणं दिव्यमिवाभवत् । मध्याह्ने ब्राह्मणातिथ्यादिसन्तर्पणं भूयसाऽभवत् । सायङ्काले सभामण्डपे श्री केदारनाथ अग्निहोत्रि-महोदयानामाध्यक्ष्ये श्रद्धाञ्जलिसमर्पणसभाऽभवत् , यत्र सर्वश्री रामनाथ शास्त्री ज्योतिषी, श्यामविहारी पाण्डेय, लक्ष्मीप्रपन्नाचार्य, परमहंस मिश्र-प्रभृतिभिः गुरुदेव-गुरूपास्तिविषयमधिकृत्य सारगर्भाणि व्याख्यानानि कृतानि । पूज्यश्री विद्यादेवी मदोदयाभिरुपसंहारे गुरुवर्याणां नैकानि आदर्शमयानि चरित्राणि श्रावयित्वा उक्तं यत् 'वैदिकधर्मरक्षणविधौ तेषां महनीयो दायः । तेषामियमेव समीहा आसीत् यद् भारतीया विनीता अनुशासिताः स्वधर्मनिष्ठाश्च भूत्वा देशममुं समुन्नयन्तु यच्च गुर्वीशकृपयैव सहजसाध्यम् । अतः सर्वैर्दृढा गुरुनिष्ठा विधेयेति ।

अनुक्रमः

प्रपानकम्	पत्रपुटम्	परिवेषकः
व्यासं महान्तं मुनिमानतोऽस्मि	१९३	श्री रा० ब० खाडिलकर
श्री महर्षि-ज्ञानानन्दचरितम्	१९४	श्रीविन्ध्येश्वरीप्रसादशास्त्री
गोवध-निरोध महाभियानस्य अन्तिमं निर्णायकं पर्व :		
तिहाड़-काराकाण्डम्	१९६	सम्पादकीयम्
गोरक्षा-महाभियान-समितेः प्रस्तावत्रयम्	१९९	श्री डॉ० सेठ गोविन्ददासः
(५) राधा-कृष्णयोः वेदादि-शास्त्रप्रतिपाद्यत्वम्	२०१	श्री पूज्य करपात्रस्वामिनः
गुरु-स्मरणम्	२०२	श्री सरयूप्रसादशास्त्री
विकला भवन्ति	२०३	श्री प्रशस्यमित्रशास्त्री
मानस-भारती	२०५	श्री जनार्दन गङ्गाधर रटाटे
विवाह-वयोमर्यादा, प्रकल्पश्च	२०६	श्री अनन्त पिंगळे
मुक्तकानि	२०९	श्री न० चि० वे० नरसिंहाचार्यः
(२) मनस्तत्त्व-विमर्शः	२१०	श्री मुरलीधर मिश्रः
(३३) क्षत्रपति-महाकाव्यम्	२१२	श्री उमाशङ्करशर्मा त्रिपाठी
(३) पृथ्वीराजाख्यानम्	२१७	श्री विश्वनाथ त्रिपाठी
१९६७ वर्षीयं परीक्षा-फलम्	२२०	श्री परीक्षामन्त्री

★

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

सूर्योदयः

श्रीभारतधर्ममहामण्डलस्य मासिकं मुखपत्रम्

रागद्वेषनिशाटनं विधुरयन् मोहं तमो नाशयन्,
तामिस्रं जडवादकैरवकुलं ज्ञानत्विषा ग्लापयन्।
विद्वत्कोकमशोकयन् नयसुधीरोलम्बमुन्मीलयन्,
सञ्जातः सुमनोमनो मधुरयन् सर्वत्र सूर्योदयः॥

४३ वर्षे] वाराणसी, आषाढः २०२४ : जुलाई १९६७ ई० [७ अङ्कः

व्यासं महान्तं मुनिमानतोऽस्मि !

पाराशरं सत्यवतीसुपुत्रं साक्षात्परब्रह्म च विष्णुरूपम्।
यः श्रीशुकाचार्यमुनेः पिता तं व्यासं महान्तं मुनिमानतोऽस्मि॥ १॥
नानापुराणानि कृतानि येन वेदान्तसूत्राणि तथा बहूनि।
तं लोककल्याणकरं कवीशं व्यासं महान्तं मुनिमानतोऽस्मि॥ २॥
ब्रह्मात्मकं विश्वमिदं च सर्वं नेहाऽस्ति नाना, न च भेदलेशः।
मनश्च शुद्ध्येदिति यस्य बोधस्तं व्यासमाद्यं मुनिमानतोऽस्मि॥ ३॥
सङ्कीर्तयेदीशगुणाननर्घ्यान् ध्यायेत् सदा श्रीहरिपादपद्मम्।
सत्कर्म कुर्यादिति संदिशन्तं व्यासं महान्तं मुनिमानतोऽस्मि॥ ४॥
श्रीवासुदेवस्य कथा सुगेया तेनैव शान्तिः परमा सुलभ्या।
एवं मतं चानुभवोऽपि यस्य तं व्यासमाद्यं मुनिमानतोऽस्मि॥ ५॥
दृष्टिः समा यस्य कृपाप्लुता च वाणी पवित्राऽमृतनिर्झरीव।
राकाशशी यो मुनितारकेषु तं व्यासमाद्यं मुनिमानतोऽस्मि॥ ६॥
यस्याऽस्ति दिव्यं चरितं पवित्रं स्मर्यं सदा साधकसिद्धवृन्दैः।
येनोपदिष्टं श्रुतिवेदसारं तं व्यासमाद्यं मुनिमानतोऽस्मि॥ ७॥
भो व्यास! योगेश्वर! पुण्यकीर्ते! त्वं सत्य एवाऽसि सुमार्गदीपः।
धृत्वाऽवतारं हर लोकदुःखं रामेऽस्तु भक्तिः परमा विशुद्धा॥ ८॥
मन्ये महार्णवः साक्षान्मधुरो ह्यमृतोपमः। अपारोऽत्यन्तगम्भीरो विद्यानां बादरायणः॥ ९॥

— श्री रा० ब० खाडिलकर वकील, नाशिक —

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

श्रीमहर्षि-ज्ञानानन्दचरितं महाकाव्यम्

— श्रीविन्ध्येश्वरीप्रसादशास्त्री —

२३. श्रुतिदृष्टिमतीव दुर्लभां तां
क्षितिदेवेषु विवर्धयेत् क्षितीशः।
अचला विबुधोऽपि वेदकृत्यैः
परिरक्षां विदधीत भूपतीनाम् ॥

२४. नृपतीन् विरहय्य भूतलेऽस्मिन्
न च ऋध्नोति कदापि भूसुरत्वम्।
प्रविहाय तथैव भूमिदेवान्
नहि वृद्धिं परियन्ति भूमिपालाः ॥

२५. स्मृति-वेदविधान-साध्यमानैः
ऋतुभिस्तुष्यति तैः सपर्वसङ्घः।
परिरक्षति सोऽपि तुष्टिमाप्तो
निखिलं स्थावरजङ्गमं नृलोकम् ॥

२६. यजनं सुरवृन्दतृप्तिमूलं
भुवि लोकद्वय - मङ्गलैक - हेतुः।
ध्रुवमेव महीश्वरैरजस्रं
जनकल्याणपरायणैः प्रकल्प्यम् ॥

२७. सुलभं जगतीदमस्त्यवश्यं
कुरुते यस्य समादरं हि लोकः।
अतिदुर्लभतां कथं न गच्छे-
न्मनुजा यन्न कदापि चाद्रियन्ते ॥

२८. श्रुतिसाधित-सोमयागयोग्या
अधिगम्या न च ऋत्विजो बभूवुः।
सति योगिवरेण्य - कल्पवृक्षे
सुकृतिः का नहि साध्यतामुपेयात् ॥

२९. दश सप्तमहर्त्विजः प्रशस्तान्
लिखित-श्रौत-सदिष्टिमर्म-विज्ञान्।
अपरानपि चाऽऽजुहाव यत्नात्,
यतिराट् नासिक-काशिकादिधाम्नः ॥

३०. सुखदे सुदिनान्विते मुहूर्ते
ह्यनुकूल - ग्रह - ऋक्ष - योगयुक्ते।
गुरुवर्य-यतीश्वराज्ञया प्राक्
शम-पञ्चाङ्ग-विधिः प्रवर्तितोऽभूत् ॥

३१. अखिलादपि राजपुत्रदेशात्
समवेता द्रुतमाययुर्नरेन्द्राः।
जनतौघ - पयोधिपूर - मध्ये
यजनारब्धि - रभूदभूतपूर्वा ॥

३२. मखजातसुधारसस्य पाने
निरतास्ते ऋतुभोजिनः सदेहाः।
इह हन्त विलोकिताः समस्तै-
र्मनुजैर्धार्मिक - भावना - सनाथैः ॥

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

३३. विधिना श्रुतिनोदितेन यागो
दिवसान् कांश्चन सञ्चचार पूतः ।
प्रतिवासरमेव सज्जनाना-
मतिसम्मर्द इहाऽवतिष्ठते स्म ॥

३४. यजनान्तदिने यतीश्वराङ्घ्रि
समुपस्थाय नृपाल - विज्ञवर्गाः ।
विनयावनता मुनीन्द्रमेनं
निजधर्मं ह्युपदेष्टुमार्थयन्त ॥

३५. यतिवर्य उवाच सावधानैः
श्रवणीयं वचनं मदीयमास्ते ।
मधुरो हितकारकोऽगदोऽस्मिन्
भुवनेऽसावतिदुर्लभो मतोऽस्ति ॥

३६. रवि-सोम-कुलेषु जायमाना
नरनाथा अपि पुष्कलर्धिमन्तः ।
यदि यज्ञपराङ्मुखा भवेयुः
कथमास्तामिह वेद - धर्म - रक्षा ॥

३७. बहवो निजधर्म - रक्षणार्थं
बलिवेद्यां जुहुवुः स्वमस्तकानि ।
अधुना तु तदीय - वंशजातै-
र्निजधर्मः समुपेक्षितोऽस्ति दृष्टः ॥

३८. भुवि यत्र हि हन्त चैकनार्या
अपमानेन सहस्र - रक्तनद्यः ।
परितः परिसुस्रुवुः कराला
बत राजन्य - कबन्ध - मस्तकोत्थाः ॥

३९. भुवि यत्र धरासुताऽपहृत्या
नृवरो दाशरथिर्वनस्थितोऽपि ।
कपिभिः सहजेन चैव साकं
दशकण्ठं सकुलं जघान वीरः ॥

४०. भुवि यत्र महीभृदेकधेनोः
परिरक्षार्थमहो दिलीपनामा ।
निज - राष्ट्रजना -ऽवनैकहेतुं
रुचिरं देहमसूंस्तृणाय मेने ॥

४१. भुवि यत्र ससैनिका नरेन्द्रा
महिलानां शतशः शुचि स्मितानाम् ।
विगणय्य निजानसूननेके
परिरक्षां विदधुर्महाहवेषु ॥

४२. अहहा भुवि तत्र शान्तसाध्व्यो
लुठिता धर्महता स्त्रियो भवन्ति ।
शतशोऽथ महस्रशोऽपि गावो-
ऽनुदिनं सन्ति परैर्निहन्यमानाः ॥

४३. नृपनामधराः परस्सहस्राः
परदेशेषु वसन्त्यतृप्तकामाः ।
परिभोग-विमुक्त-चेतसो हा
वद भो धर्म कथं तवोन्नतिः स्यात् ॥

४४. यदनर्थकमस्ति वस्तुजातं
नियतिस्तस्य सदा लयं विधत्ते ।
यदि सैव दशाऽस्ति, भूपतीनां
भविता नैव मुनीह राजसत्ता ॥

(क्रमशः)

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

सम्पादकीयम्

गोवध-निरोध-महाभियानस्य अन्तिमं निर्णायकं पर्व :

तिहाड-काराकाण्डम्

विगत-नवम्बरमासस्य सप्तमदिनाङ्कतः प्रारब्धस्य नव्यस्य गोरक्षामहाभियानस्य प्रसङ्गोऽद्यापि प्रचलत्येव। महाभियान-विषयकं पूर्वतनीयं सर्वं वृत्तमस्माभिः पाठकेभ्यः पूर्वाङ्केषु उपायनीकृतम्। स्वतन्त्रे भारते महाभियानस्यास्य श्रीगणेश एव 'सप्तम-नवम्बर-काण्डा'ख्येन दुर्भाग्यपूर्णेन काण्डेन समभवत्। तस्मिन्नेके धर्मनिष्ठाः सन्त - महात्मानः शिष्टजनाश्च यथा समुत्पीडिताः, तन्नूनमद्वितीयम्, कस्यापि सभ्य-स्वतन्त्रदेशस्य कृते परं लज्जास्पदम्। काण्डस्य तस्य निष्पक्ष-परीक्षणाय भृशं व्यापकरूपेण प्राथितेऽपि स्वदेशीयशासनेन अद्यावधि नहि किञ्चित् श्वसितमपि। सर्वथा समुपेक्षिता सा समुचिता याच्ञा, यदा किल जयपुर-गुलिकाकाण्ड-सदृशस्य सामान्यतमस्यापि काण्डस्य कृते शासनेन महती तत्परता प्रदर्शिता। यदि नाम तस्य काण्डस्य निष्पक्षं न्यायिकं परीक्षणमभविष्यत् तदा नूनं शासनस्य घोरः सुरक्षाप्रमादः, शान्तिपूर्णां न्याय्ययाच्ञामपि घृणितदुरभिसन्धिना अवमन्तुं समाचरिता कूटनीतिश्च सर्वथा अनावृता अभविष्यत्। कदाचिदिदमेव विचार्य शासनेन तादृशं साहसं न कृतं स्यात्। तथापि तेन पूर्णतोऽवगतं यदत्र आन्दोलनकारिणः सर्वथा निर्दुष्टा अहिंसाव्रतधारिणश्चेति। अत एव परस्परमौनावलम्बनेन स प्रसङ्गस्तत्रैव तेन समापितः।

ततः परं जगद्गुरु-शङ्कराचार्याणां पुरीपीठाधीश्वराणां श्री निरञ्जनदेव-तीर्थपादानां सन्तश्री प्रभुदत्त-ब्रह्मचारिणां श्री रामचन्द्र 'वीर' महात्मप्रभृतीनां च सुदीर्घम् अनशनपर्व प्रचलितम्। तस्यापि सिंहावलोकनेन सुस्पष्टं जायते यत्तत्र कांग्रेसीय-केन्द्रशासनेन स्वीयं न्याय्यं कर्तव्यं न समाचरितम्, विषयेऽत्र समपेक्षितमौदार्यं न प्रदर्शितम्। प्रश्नममुं राजनैतिक-प्रश्नरूपेण समुपस्थाप्य जनान् ततो विमुखीकर्तुमपि नाल्पं प्रयतितम्। तथापि व्यापकजनमतेन विवशीभूय तेन अन्ततः सर्वाधिकारसम्पन्नाया गोरक्षासमितेः सङ्घटनस्य घोषणा कृता, यस्यां सेवानिवृत्ताः न्यायाधीशाः, विभिन्न-राज्यशासनाधिकारिणः गोरक्षा-महाभियान-समितिप्रतिनिधयश्च सदस्यत्वेन वृताः। समितेरस्याः प्रतिवेदनमादाय शासनमग्रे विषयेऽत्र प्रयतिष्यते इत्यपि समाश्वासनं दत्तं शासनेन। गोरक्षा - महाभियानसमित्याऽपि दीर्घतमाऽनशनस्य धार्मिकं मूल्यं धर्मशास्त्रदृष्ट्या परीक्ष्य,तादृशाऽनशनानिवार्य-दुर्घटनाकृतां राष्ट्रियाव्यवस्थाकरीं प्रतिक्रान्तिञ्च आशङ्क्य अनशनपर्व परिसमाप्य तस्य कटुकोऽन्तः सर्वथा निरोधितः। तथापि शान्तिमयस्य व्यक्तिगतस्य च सत्याग्रहस्य च क्रमः प्रचलत्येव। देशेऽस्मिन् पूर्णतो गोवधनिरोधं यावत् तं परिचालयितुं महाभियानसमित्या निर्धारितमास्ते।

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

अस्मिन्नेव सन्दर्भे विगतदिवसेषु नैके गोभक्ताः पुरुषाः स्त्रियः सन्त-महात्मानः प्रतिष्ठिताः सामान्य-जनाश्च सत्याग्रहं कृत्वा कारागारे बद्धाः। प्रभूतया संख्यया नैकैः गोभक्तैः सह पूज्य श्रीकरपात्रस्वामिनः सत्याग्रहकरणात् सपरिकरं राजधानीस्थे आदर्शाख्यायिते 'तिहाड'-कारागारे बद्धा अभवन्। तत्र ते स्वानुयायिनः एकत्रीकृत्य कथा-प्रवचन-कीर्तनादिमुखेन कारादण्डमतिवाहयन्त आसन्। बह्व्यो महिला-गोभक्ता अपि कारावासेन गोवधनिरोधाभियानं पुष्णन्त्य आसन्।

अत्रान्तरे विगत-जूनमासस्य २९ दिनाङ्के सायं सार्धसप्तवादनसमये, यदा किल तत्र पूज्य-श्री करपात्रस्वामिनः सर्वान् बद्धान् गोभक्तान् एकत्रीकृत्य प्रवचनं कुर्वन्त आसन्, तदैव अकस्मात् उग्रतरा जाल्माः क्रूराश्च बद्धा अपराधिनः स्व-स्वावासेभ्यो निर्गत्य लोहदण्डान् इष्टिकाः प्रस्तरखण्डानि चादाय नवशतमितानां गोभक्तानामुपरि आक्रमणं चक्रुः। क्षणेकेन सर्वेषु बन्द्यावासेषु करुणक्रन्दनस्य तुमुलो नादः प्रसृतः। सार्धघण्टामितकालं यावत् समग्रे कारागारे उत्पातकारिणां साम्राज्यमिव अभवत्। पूज्य स्वामिपादानां नेत्रयोः घातकः प्रहारः कृतस्तैः, येन नेत्रयो रक्ताभिसरणेन दृष्टिर्दूषिता, याऽद्यापि पूर्णतः पूर्ववत् निर्दोषा निरामया च न संवृत्ता। तेषां कट्यां पृष्ठे च लोहदण्डानां लगुडानां च नीलवर्णानि चिह्नानि अङ्कितानि दृश्यन्ते। आर्यसमाजसंस्थायाः प्रमुखकार्यकर्तॄणां डॉ० रघुवीरसिंह-महोदयानां हस्तद्वयमेतदर्थं खण्डितमुत्पातिभिर्यत् ते द्वादशवारं सत्याग्रहं कृत्वा तत्र समागता इति। अद्य तु ते नामशेषतामेव नेया इत्यासीत् उपद्रवकारिणां दुरभिसन्धिः। परं तान् विचेष्टितान् दृष्ट्वा विगतासूंश्च मत्वा ते तत्रैव परित्यज्य अग्रे प्रस्थिताः। बहूनां साधूनां श्मश्रुजटाः गृहीत्वा निर्ममं भूमौ ते कृष्टाः। पूज्यस्वामिपादानां शब्देषु 'प्रलयकालीनं दृश्यं तदा समुपस्थितमासीत्।'

जाल्मा उपद्रविबन्दिनस्ततो महिलानां बन्द्यावासेषु प्रस्थिताः। किन्तु अद्यावधि स्थितिस्थापकतया स्थिताः एकपक्षीयप्रहारं मौनं सहन्तः साधवो महात्मानो महिलानां बन्द्यावासेषु गत्वा तेषां द्वारमेव निरुद्ध्य उपद्रविणामवशिष्टान् प्रहारानपि सोढ्वा आत्मनः अद्भुतां सहनशीलतां प्रकटीकृतवन्तः, स्त्रीणां च शीलं प्राणपणेन तै रक्षितम्। षष्ठिघटिकां यावत् सर्वेषां बन्दीनां स्व-स्वावासेषु प्रवेशकरणसूचकं वाद्ययन्त्रं (विसिल) निनादितम्, परं कोऽपि तत्रागत्य नग्नताण्डवमिदं निरोद्धुं नाशकत्। मन्ये, तदा भारतराजधानीस्थाः सर्वे एव जनाः सर्वाः सेनाः केन्द्रीयशासनञ्च निष्प्राणमिव समभवत्। काण्डस्यास्य प्रत्यक्षमनुभूतो विषयो यदा संक्षेपेणास्मभ्यं श्री स्वामिपादानां सचिवैः श्री मार्कण्डेयब्रह्मचारिभिः श्रावितस्तदा श्रुत्वैव अस्माकं रोमहर्षो जातः। जगद्गुरुशङ्कराचार्यैः पुरीपीठाधीश्वरैः सेठ-गोविन्ददास-प्रकाशवीरशास्त्रि-प्रभृतिभिः नैकैः मान्यैर्महानुभावैस्ततः परम् अन्येद्युरेव तत्र गत्वा विध्वंसलीला दृष्टा। तैश्च यानि वक्तव्यानि दत्तानि, तैरेव स्थितेस्तस्या भीषणतमता स्फुटीभवति। एतेषु वक्तव्येषु कांग्रेससंस्थायाः प्रसिद्धप्राचीननेतॄणां श्री सेठ-गोविन्ददासमहोदयानां भारतीय-संसदि प्रदत्तं वक्तव्यमत्राङ्केऽन्यत्र प्रकाशितमस्ति। स्थानाभावादन्येषां वक्तव्यानि न दीयन्ते।

सर्वमेतत् विचार्य निष्कर्षोऽयं समायाति यदिदं काण्डं सुनियोजितस्य गूढतमस्य कस्यचन दुरभिसन्धेः प्रेरितमासीत्। शक्यमेतत् यत् गोवधनिरोधमहा-

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

भियान - प्रतिपक्षिणां निम्नतम - कूटनीतेर्दुष्फलमेतत् स्यात्। अथवा कारागारीय-कतिपयाधिकारिणां कासाञ्चन अव्यवस्थानामनाचाराणाञ्च प्रकाशनेन तेषाम-दूरदृष्टिसमनुगृहीता प्रतिक्रियेयं स्यात्। किमप्यस्तु, इदन्तु स्पष्टमेव यत्काण्डस्यास्य प्रेरकैरपि एतत्कल्पितं न स्यात् यदिदमेतादृशं दारुणं रूपं धारयिष्यतीति। केन्द्रीयशासनन्तु काण्डेनानेन अतितरां खिन्नमभवदिति तु स्वराष्ट्रमन्त्रिणां श्री चह्वाण-महोदयानां लोकसभोक्त-वक्तव्येनैव सुस्पष्टं भवति। ते तिहाड - कारावासं गताः, तानि तानि च अमानवीयात्याचारचिह्नानि दृष्ट्वा तेषां चेतोऽपि द्रवितमभवत्। अत एव तैस्तत्र उक्तम्—'अनया दुर्घटनाया नितरां खिन्नोऽहम्, कारा-स्थान् आहतान् दृष्ट्वा मे चेतः अतिततरां द्रवितम्' इति। स्वामिपादैर्मिलित्वा तैरतीव दुःखं प्रकटीकृतम्। संसदि तैरुक्तम्—'कामं सन्तु स्वामिकरपात्रमहाभागै-रस्माकं राजनैतिका मतभेदाः,तथापि तेऽस्माकं सम्मान-नीयाः, तेषु विहितेनाक्रमणेन नितरामाहतोऽस्मि।' तैरस्य काण्डस्य न्यायिकपरीक्षणस्यापि तत्र लोकसभा-सदस्येभ्य आश्वासनं प्रदत्तम्। प्रधानमन्त्रिभिः श्री इन्दिरा गांधी महोदयाभिरपि पूज्य - स्वामिपादानां सविधे पत्रं संप्रेष्य काण्डस्यास्य कृते खेदः प्रकटीकृतः, न्यायिकपरीक्षणस्य आश्वासनञ्च प्रदत्तम्।

सत्यप्येवं एतत्तु वक्तव्यमेव भवेत् यत् यदि वास्तवमेतत्, अर्थात् केन्द्रीय-स्वायत्तशासनाधि-कारिणां कृते सर्वथाऽकल्पितमेतत् समभवत्, तदा नूनं कारागृहाधिकारिणः सर्वथा अनुत्तरदायिन एव। सहैव तेषामेतादृशी स्थितिः कस्यापि शासनस्य कृते शोभाधायिका तु नास्त्येव, राष्ट्रस्यापि कृते घोरा घातिका स्यात्। शासनतन्त्रस्य एतादृशा उच्छृङ्खलाः अनुत्तरदायिनोऽधिकारिणः, तांश्च एतादृशं काण्डं कर्तुं विवशकर्तारो राष्ट्रद्रोहिणः, तात्त्विकं परीक्षणं कृत्वा, सत्यपराधे कठोरतमेन दण्डेन दण्डनीयाः, येन पुन-स्तादृशकाण्डस्य पुनरावृत्तिर्न भवेत्। पूज्यस्वामिपादैः प्रधानमन्त्रिणाम् उत्तरे इदमेव लिखितं यद् 'अस्या घट-नायाः पुनरावृत्तिं निरोद्धुमावश्यकमेतत्, वयञ्च दृढ-माशास्महे, यद् भवन्तोऽस्या घटनायाः सम्पूर्णं निष्पक्षं न्यायिकञ्च परीक्षणं कारयिष्यन्ति, ये तत्रापराधिनः सिद्ध्येयुस्ते समुचितदण्डेन दण्डयिष्यन्ति च। अन्ततो-ऽस्माकं सर्वेषां पूर्णः सन्तोषस्तु तदैव सम्भवी यदा भवतां प्रयासेन गोमातुः प्राणसङ्कटं निवारितं स्यात्' इति।

विश्वसिमो वयं यत् स्वीयप्राणमूल्येन राष्ट्रश्रद्धा-केन्द्ररक्षणस्य महात्मनो याच्ञेयं अन्तिमा याच्ञेव मन्येत। भारतशासनं यदिमां पूरयितुं कथमपि अस-फलं भवेत्तदा इतिहासे तस्य शिरसि सार्वकालिकोऽयं कलङ्कतिलकः स्यात्। अत आशास्महे यत् शासन-मस्या घटनाया गाम्भीर्यं कदापि न विस्मरिष्यति। स्वामिपादसदृशानां महात्मनामुपरि येयं भीषणा आधिभौतिकी विपत्तिः समागता, तया च ते यथा पीडिताः, तदर्थं निर्बला वयं बलवतां बलं भगवन्तमेव प्रार्थयामो यतस सत्वरं तेभ्यः स्वास्थ्यं वितीर्य देश-राष्ट्रसेवायै तात् नीरोगान् करोत्विति। काण्डमिदम् अनशनपर्वतोऽतितरां गम्भीरम्। अतो राष्ट्रेन, शास-नेन चास्य गभीरतया लेशतोऽपि न प्रमदितव्य-मित्येव वयं साग्रहं सूचयामः।

—:❀:—

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

गोरक्षा-महाभियान-समितेः प्रस्ताव-त्रयम्

— डॉ० श्री सेठ गोविन्ददास महोदयाः —

[लोकसभायां तिहाड-कारावासे श्रीकरपात्र-स्वामिप्रभृति - साधूनामुपरि सञ्जातस्य बन्दीनामाक्रमणस्य उग्रा चर्चा समभवत् । चर्चायामस्यां श्री प्रकाशवीरशास्त्रि-सेठ गोविन्ददास-प्रभृतिभिः विभिन्नदलीय-संसत्सदस्यैः काण्डस्यास्य तीव्रतरा निन्दा कृता । कार्यस्थगनप्रस्तावे तेषां रोषपूर्णानि च भाषणानि समभवन् । अत्र कांग्रेस-संस्थायाः सुप्रसिद्ध-प्रतिष्ठिततम-प्राचीननेतॄणां राष्ट्रभाषा-हिन्दी-समुद्धरणैकव्रतीनां श्री सेठ गोविन्ददास महाभागानां वक्तव्यं प्रकाश्यते ।

—सम्पादकः]

विषयेऽस्मिन् सदनेऽत्र प्रस्तावद्वारा विचारो जायताम्, अन्येन वा प्रकारेणेत्यत्र न मे कश्चन सम्बन्धः । एतादृशा विषया राजनैतिका विधेया इत्यनेन सर्वथाऽहं विरुद्धः । मन्ये, कतिपये विषया एतादृशा भवन्ति, येषां राजनीत्या कथमपि सम्पर्को न विधेयः, तेषु केवलं मानवतादृष्ट्यैव विचारणीयम् ।

जूनमासस्य २९ दिनाङ्के तिहाड - कारावासे या घटना घटिता, ३० दिनाङ्के मया सा श्रुता । जुलाईमासस्य १ दिनाङ्के स्वयं तत्र गत्वा मया तत्रस्था समग्रा स्थितिरवलोकिता । सर्वप्रथमसहं पूज्यश्री करपात्रस्वामिनां सविधे गतः । सर्वे जानन्त्येव यदहं कांग्रेसदलीयः । आरंभत एव कांग्रेसदलीयोऽस्मि, भगवन्तं च प्रार्थये यज्जीवनस्य अवशिष्टानि दिनान्यपि कांग्रेसदलीयत्वेनैव यापितानि स्युरिति, अस्तु ।

श्री करपात्रस्वामि-महाराजतो मे राजनैतिको मतभेदः, तथाप्यहं तान् पूज्यदृष्ट्या पश्यामि । प्रवचनं कुर्वतां तेषामुपरि यादृशम् आक्रमणमभूत्, तमहं केवलं श्री करपात्रमहोदयानामुपर्येव नहि, प्रत्यक्षं हिन्दू - धर्म-संस्कृतौ आक्रमणं मन्ये । श्री करपात्र-महाराजैर्मिलित्वाऽहं तत्र बन्द्यावासेषु गतो यत्र एता घटना घटिता आसन् । स्वयं मया नैके साधवो दृष्टाः ये निर्ममतया आहताः । दिनद्वयानन्तरमपि तत्र तेषां रक्तं सञ्चितमासीत् । मन्ये, घटनेयमेतादृशी आसीत् यां दृष्ट्वा कस्यापि सहृदयस्य नेत्रेभ्य नहि अश्रवो न प्रवहेयुः । अष्टवर्षाणि मया कारागारे यापितानि – स्वीये मध्यप्रदेशे ततो बहिश्च । किन्तु गृहमन्त्रीनहं कथयामि यदेतादृशी घटना मया कस्मिन्नपि कारागारे न दृष्टा ।

कथमियं घटना घटिता, इत्येव मे बुद्धौ नारोहति । यदा मया उपगृहमन्त्रिणा श्री विद्याचरणमहोदयेन सह दूरध्वनियन्त्रतो वार्ता कृता, यतस्तदा गृहमन्त्रिणः श्री चह्वाणमहोदया राजधान्यां नासन्, तदा तत उत्तरितं यदयं बन्दीनां पारस्परिकः कलहोऽस्तीति । नूनं मे बुद्धौ न प्रतिभाति यदयं बन्दीनां पारस्परिकः कलहः कथं भवेदिति । पारस्परिके कलहे उभावपि पक्षौ आहतौ भवतः । परं मया तु आक्रमण-कर्तृषु बन्दिषु कोऽपि कथमपि आहतो न दृष्टः । ततः कथमयं पारस्परिकः कलहो भवितुं शक्नुयात् ?

इदमपि मया तत्र श्रुतं यत् नवतिघटिकापर्यन्तं सावधानता-सूचिका घटिकाः निनादिता । स्वयं मया कारागारे तादृश्यो घटिकाः श्रुतपूर्वाः । एतादृश-घटिकानामाशयोऽयं यत् ये केचन बहिर्निवसन्ति,

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

ते सत्वरमन्तः प्रविशन्तु। कोऽपि वन्द्यावासतो बहिर्न निर्गच्छेत्। किन्त्वत्र किं सञ्जातम्? घटिकाया निनादे सत्यपि बन्दिनो बहिरागच्छन्तः आक्रमणञ्च कुर्वन्त आसन्। पावनेषु साधुषु एतादृशः प्रहारो न जातु आकस्मिकी घटना सम्भाव्या। यावत् पूर्वतः किमपि नियोजितं वस्तु न भवति, तावत् एतादृशी घटना कथमपि घटितुं न शक्नोति।

नाहं वच्मि यदत्र शासनस्य काऽपि प्रेरणाऽस्तीति। अत्र शासकीयसम्बन्धस्य प्रश्न एव नास्ति। किन्तु अवश्यमेतत् विवक्षुरस्मि यत् उच्चतमाः कारागाराधिकारिणो ये तत्र समुपस्थिता आसन्, सार्धघण्टापर्यन्तं सावधानता - घटिकायाः निनदनेऽपि तैः सर्वथा अकर्मण्यता प्रकटीकृता। यदि नाम ते किमपि कर्तुं नाशक्नुवन्, तदा न्यूनातिन्यूनं दूरध्वनियन्त्रं प्रयुज्य राजपुरुषाणामाह्वानन्तु तेषां शक्तिपरीतं नासीदेव। वस्तुतस्ते सर्वमपि कर्तुं क्षमा आसन्, तथापि तैः किमपि न कृतम्। हस्तोपरि हस्तं संस्थाप्य चित्रवत् स्थिताः। चक्षुर्भ्यां तद्दृश्यं पश्यन्तः कर्णाभ्याम् आहतानां साधूनां करुणक्रन्दनानि च शृण्वन्त आसन्। तैः कोऽप्यस्य प्रतीकारो न कृतः। नाहमिदं कथयामि यदियं घटना शासनद्वारा नियोजिताऽऽसीत्। किन्तु इदमवश्यं कथयामि यत्तत्र समुपस्थितैः शासकीयाधिकारिभिः लेशतोऽपि स्वकर्तव्यं न पालितम्। नात्र मे अणीयानपि सन्देहः।

गोरक्षा - महाभियानसमितेः कार्यकारिणीपरिषदः सदस्योऽहमस्मि। तदनन्तरमहं तस्याः परिषद् अधिवेशनं गतो यस्याध्यक्ष्यं पूज्यस्वामिनः शङ्कराचार्य-पुरीपीठाधीश्वराः कुर्वन्त आसन्। तत्र या चर्चा समभवत्, तासु त्रयः प्रस्तावाः पारिताः। प्रथमोऽयं यदस्य काण्डस्य परीक्षणं उच्चन्यायालयस्य न्यायाधीशतः करणीयम्। अहं भवद्भ्यो विवक्षुरस्मि यत् परीक्षणमेतादृशं भाव्यं यत्र जना विश्वसेयुः। यदि ते वाञ्छन्ति यद् उच्चन्यायालय-न्यायाधीशतः परीक्षणं भाव्यमिति, तदा केनापि उपमण्डलाधीश (मजिस्ट्रेट) द्वारा परीक्षणस्य काऽऽवश्यकता? अन्ततो यदा उच्चन्यायालयाधीशतः परीक्षणेन लोकतोषो जायते, न ज्ञायते तदा शासनस्य काऽत्र आपत्तिः स्यात्? अतः कार्यकारिणीपरिषदोऽयं प्रस्तावः सर्वथा समुचित एव।

द्वितीयः प्रस्तावोऽयमासीत् यत् तदा समुपस्थिताः कारागाराधिकारिणः स्व - स्वपदतो निलम्बनीयाः। यावत्ते तत्र स्थास्यन्ति तावत् अपराधः प्रमाणितो न भवेत्। यदि शासनस्य कृते इदमशक्यं भवेत्तदा न्यूनातिन्यूनं तेषां स्थानान्तरणं तु आवश्यकमेव। परीक्षण - काले तेषामुपस्थितौ परीक्षणस्य न किमपि महत्त्वम्। अतस्तेषां स्थानान्तरणमत्यावश्यकमेव।

तृतीयः प्रस्तावो यत् वन्दीनां सुरक्षाभारः शासनोपरि आसीत्। यदा शासनं स्वकर्तव्यपालनेऽक्षममभवत् तदैव बन्दिन एतादृशैराघातैः आहता यैस्ते यावज्जीवं निरर्थकाः संवृत्ताः। अतः शासनस्य कर्तव्यमेतत् यत्तेभ्यः प्रतिकरः प्रदेय इति। एतादृशाः प्रतिकराः विभिन्नप्रसङ्गेषु दत्तपूर्वाः।

याचूयात्रयं गोरक्षामहाभियान-समित्या कृतम्। अहं तत्र समुपस्थित आसमिति तु उक्तपूर्वम्। मम दृढं मतं यत्समितेः एतत् याचूयात्रयं सर्वथा उचितमेव। शासनेन तदवश्यं स्वीकार्यम्।

इदमपि विवक्षुरस्मि यदस्य प्रश्नस्य न गोरक्षाप्रश्नेन सह सम्बन्धः। अयमस्ति मानवतायाः प्रश्नः। प्रश्नोऽयं राजनैतिकदल-विशेषेणापि न सम्बद्धः। अतः सार्वजनिकहिताय शासनस्य कर्तव्यमेतत् यत्तत् याचूयात्रयमेतद् स्वीकृत्य जनतायास्तोषमासादयेदिति। *

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

राधाकृष्णयोः वेदादि-शास्त्रप्रतिपाद्यत्वम्

— श्री पूज्य करपात्रस्वामिनः —

कैश्चिदुच्यते—राधायाः प्रथममाविर्भावः साहित्य-क्षेत्रे समभवत्। तदनन्तरं धर्मक्षेत्रे साऽऽनीता! सहजयाने 'सहजिया-वैष्णव'-सम्प्रदाये च परकीया-भावः प्रतिष्ठित आसीत्। तस्य प्रभावश्चैतन्यमते प्रति-फलितः। अस्मिन्नेवार्थे कैश्चिदुक्तम्—

रागेण बध्यते लोको रागेणैव विमुच्यते, । इति।

जयति सुखराज एकः कारणरहितः सदोदितो जगताम्।
यस्य च निगदनसमये वचनदरिद्रो बभूव सर्वज्ञः॥
(एकोदेश-टीका, पृ० ६३)

अनल्पसङ्कल्पतमोऽभिभूतं प्रभञ्जनोन्मत्ततडिच्चलञ्च।
रागादिदुर्वारमलावलिप्तं चित्तं विसंसारमुवाच वज्री॥
प्रभास्वरं कल्पनया विमुक्तं प्रहीणरागादिमलप्रलेपम्।
ग्राह्यं न च ग्राहकमग्रसत्त्वं तदेव निर्वाणपदं जगाद॥
(प्रज्ञोपाय-विनिश्चयसिद्धिः)

द्वयोरेकीकरणं सामरस्यम्। तदेव अद्वयशून्यत्वम्। तत्रैव परमानन्दलाभः। तत्र च सहजं प्रेमैव सर्वोत्कृष्टं सार्वत्रिकं साधनम्। तथापि सत्त्वप्रधानो मनुष्य एव सहजाख्यो भवति। तत्रैव सहजप्रेम-प्राखर्यं व्यज्यते। तेन वस्तुभूतं मनुष्यत्वं व्यज्यते।

मनुष्यत्वस्य तादृक् सत्त्वमेव स्वरूपम्। तदेव कृष्णः। बहिर्मुखं जीवनं बाह्यरूपम्। स्वरूपमाध्या-त्मिकम्। रूपं भौतिकम्। योषित्स्वपि स्वरूपं राधा। रूपं बाह्यं जीवनम्। तेन सार्वत्रिकः प्रेमलीलाविकासो राधाकृ[illegible]सविकास एव। रूपमपहाय स्वरूपेऽवस्थानं मोक्षः। रूपेऽवस्थानं बन्धः।

मेघदूतस्यापि अत्रैव तात्पर्यम्। जीवयक्षस्य अलका-निवासः स्वरूपनिवासः। शापवशात् ततोऽन्यत्र निवासः, ततः प्रत्यागमनम्। स्वरूपनिवासो मोक्षः। राधाकृष्णावत्र प्रकृति-पुरुषरूपौ। महाभावरूपः प्रेमा सहजः, तत्र स्वरूपद्वयम्। आस्वाद्यमेकमास्वादि अपरम्। आस्वाद्येन सामरस्यापत्तिरेव आस्वादितुः पूर्णतमता। स एकाकी न रेमे, स द्वितीयमैच्छत्, तेन तदेव जाया-पत्यादियुग्मरूपेण विकसति। तेन सहज-प्रेमधारायां विकासमुपगतायामन्यत्र नर - नार्यादिष्वपि तदेव व्यज्यते।

राधाकृष्णप्रेम्णोरेकं पिण्डितं रूपं सामरस्यमुपगतं सत् पूर्णतमं भवति। कृष्णो रसः, राधा रतिः; कृष्णः कामः, राधा मादनः। सौन्दर्यघनः कृष्णः वंशीस्वनेन सर्वान् मोहयति। विशोधितो रागोऽपवर्गाय कल्पते

स हैतावानास, यथा स्त्रीपुमांसौ संपरिष्वक्तौ। स स्वयमेवा-त्मानं द्वेधा अपातयत्, ततः पतिश्च पत्नी चाभवताम्

इति श्रुतेरेकमेव वस्तु द्विधा भूत्वा विलसति।

वस्तुतस्तु—श्रुतिस्मृतिपुराणतन्त्रादि - महातात्पर्य-विषयीभूतं सर्वप्राणिपरप्रेमास्पदं ब्रह्म आत्मतत्त्वमेव अनिर्वचनीयया मायाशक्त्या गौरश्यामज्योतिरात्मना वस्तुभूतमेव विलसति। तत्रैव अविरुद्धाः सर्वा अपि कल्पनाः सामञ्जस्यं भजन्ते।

किञ्च—एवम् "अपरिनिष्ठतत्त्वमेव तासामायाति। विकाशक्रमेण कृष्णादपि कस्यचिद्देवस्य श्रेष्ठत्वे तं परि-त्यज्य तास्तत्रानुरक्ता भविष्यन्ति" इति। तदपि न युक्तम्;

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

गुरु-स्मरणम्

सम्प्राप्य यस्य करुणार्द्रकृपाकटाक्षान्
कुर्वन्ति काव्यरचनां कवयो विचित्राम्।
तस्य प्रसन्नहृदयस्य गुरोः सदैव
पादाम्बुजद्वयमलं विमलं व्रजामि ॥ १ ॥
वाग्देवता वसति यस्य मुखारविन्दे
शक्तिः समुल्लसति यस्य करारविन्दे।
पद्मा स्वयं पतति यस्य पदारविन्दे
तं सद्गुरुं सकलमङ्गलदं नमामि ॥ २ ॥
यत्पाद - पद्म - परिसेवनया सुशिष्याः
स्वान्तस्थमात्मगुरुदर्शनमेत्य तृप्ताः।
यस्याखिलं जगदिदं वशवर्ति नित्यं
तं सद्गुरुं सुरनुतं सततं स्मरामि ॥ ३ ॥

— श्री सरयूप्रसादशास्त्री 'द्विजेन्द्रः'

असुन्दरः सुन्दरशेखरो वा गुणैर्विहीनो गुणिनां वरो वा।
द्वेषी मयि स्यात् करुणाम्बुधिर्वा कृष्णः स एवाद्य गतिर्ममायम् ॥
—इत्यादि तन्निष्ठाविरोधात्।

यदप्युक्तम्—"अपालासूक्त - वृषाकपिसूक्तयोरध्ययनेन यत्सूत्रं समुपलभ्यते, तदेव अनेकशक्त्यनन्तरं राधाकृष्णलीलारूपेण पल्लवितम्। तेन मन्त्रेषु न केवलं राधानामैव उपलभ्यते, किन्तु तल्लीलानामपि सङ्केत उपलभ्यते" इति। तदपि न; अन्यनिष्ठभावेन अन्यभावकल्पनायोगात्। राधाकृष्णादीनां तु स्वातन्त्र्येण श्रुति - स्मृति - पुराणादि - तात्पर्यविषयत्वेन अपालादिभावानां तत्राऽऽरोपयितुमशक्यत्वात्। निघण्टुरीत्या राधाशब्दस्य अन्यपरत्वेऽपि राधापरत्वोपगमस्तु न दोषाय। यत्र त्विन्द्रस्य राधापतित्वं श्रूयते, तत्र इन्द्रो मायाभिः पुरुरूप ईयते इत्यादाविव परमैश्वर्ययोगाद् विष्णुरूप-कृष्णपरत्वमेव इन्द्रशब्दस्य। परन्तु अपाला-पर्श्वादिरूपेण गोपीनां राधायाश्च कल्पना प्रमाणशून्यैव।

यदप्युक्तम्—"प्रथमस्तरे पूर्वं कृष्णप्रेयसी सर्वातिशायिनी काचिद् गोपी सर्वाभिधानशून्यैवाऽऽसीत्। द्वितीयस्तरे राधानाम्ना तत्परिचयः। सैव च विक्रमस्य प्रथमशतीमारभ्य त्रयोदशीं चतुर्दशीं यावत् कमनीयाभिः शृङ्गारलीलाभिः सम्वध्यते। ततः परब्रह्मह्लादिनीशक्तिरूपेण स्वीयेन परमोत्कृष्टरूपेण प्रतिष्ठिता। प्राकृतकाव्यरूपायां गाथा-सप्तशत्यां प्रथमं राधाया नामोल्लेखो दृश्यते। ततः परं निम्बार्क-वल्लभादिभिः संस्कृतकाव्ये वर्णिताऽपि राधा द्वितीयस्तरीया। जीवगोस्वाम्यादिभिः चैतन्यपार्षदैरेव तस्याः परमोत्कृष्टरूपमुपवर्णितम्। जयदेवेन वर्णिता राधाऽपि द्वितीयस्तरीयैव" इत्यादि। तदपि न सङ्गतम्; विप्रतिषिद्धत्वादेव। तथात्वे राधा न वस्तुभूता, किन्तु कल्पनाप्रसूतैव स्यात्।

पूर्वोक्त्या आधुनिकविकाशपद्धत्या तु विचार्यमाणे कल्पनाप्रसूतमेव राधातत्त्वं साहित्यिकक्षेत्रे धर्मक्षेत्रे च प्रसिद्धिमुपगतं सिद्ध्यति। मार्क्सीयैः—पुरा किल तमिस्रायां शर्वर्यां हिमवर्षादिसमुपद्रुतेष्वरण्येषु भीरुभिः प्रेत-पिशाचादयो विविधात्मनः स्वपरिपार्श्ववर्तिनः परिकल्प्यन्ते स्म। भावनोपचितसंस्कारातिशयैश्च अनुभूयन्ते स्म। सैव कल्पना सभ्ययुगे परिष्कृता सती देवादिकल्पनारूपेण निरूढा। सैव च वैज्ञानिकेऽस्मिन् युगे दर्शन-विज्ञानादिचमत्कृता सती निर्विकारब्रह्मादिभावमुपगता। तेन वस्तुतत्त्वान्वेषिणामुक्तकल्पनाया निःसारत्ववद् राधातत्त्वस्यापि तथात्वे तदुपासकानां महानपकार एव स्यात्।

किञ्च—गाथासप्तशत्यामपि कथमकस्माद् राधानामोल्लेखः? कथञ्च निर्मूलं कल्पनामात्रप्रसूतमुत्कृष्ट-

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

मपि रूपं भक्तैरुपास्येत ? तेन श्रुति-स्मृति-पुराणानां प्रामाण्याश्रयेणैव राधा-कृष्णयोः स्वरूपं निर्णेतव्यम् । तथा सत्येव तत्राऽऽस्थासंभवात् । 'गुणोपसंहार'न्यायेन केषुचित् पुराणेषु तन्नामानुल्लेखेऽपि पुराणान्तरोपदिष्टनामयोगात् एकवाक्यतैव सम्पद्यते, मीमांसापद्धत्या तथैव निर्णयात् ।

[भारतीयानां प्रसिद्ध-शङ्करप्रभृतीनामाचार्याणां श्रुतिस्मृतीतिहासपुराणतन्त्रादिकासु प्रामाण्यबुद्धिरव्याहता । अथर्ववेदमन्त्रेषु बृहदारण्यकादिषु उपनिषत्सु न्यायभाष्यादिषु चेतिहासपुराणानामपि प्रमाणत्वेन वर्णनदर्शनात् । श्रुतिस्मृत्योर्विप्राणां नेत्ररूपत्वं पुराणानाञ्च हृदयरूपत्वं पुराणेपूक्तम् । हृदयस्य सत्त्वे नेत्रयोरभावेऽपि कार्यं चलति । हृदयाभावे ते नेत्रे निरर्थके भवतः इति चोक्तम्—पुराणहीनाद् धृच्छून्यात् काणान्धावपि यौ वरौ इति । बौद्धानां जातकेषु अश्वघोषनिर्मिते बुद्धचरिते च पुराणवर्णितानां व्यक्तिविशेषाणां तच्चरित्राणाञ्च वाहुल्येन वर्णनमुपलभ्यते, पुराणाभावे निर्मूलत्वमेव तेषां भवेत् ।

वस्तुतः वेदव्याख्यानभूतानि इतिहासपुराणानि तदनुसारीण्येव,

> इतिहासपुराणाभ्यां वेदार्थमुपबृंहयेत् ।
> बिभेत्यल्पश्रुताद्वेदो मामयं प्रहरिष्यति ॥

—इत्यादिस्मरणात् ।

तस्मात् श्रुतिस्मृतीतिहासपुराणतन्त्राणां समन्वयेनैव धर्मब्रह्मस्वरूपं निर्णीयते । तेन यथा मन्त्रब्राह्मणात्मकस्य वेदस्यानादित्वेन तेषां तेषां व्यक्तिविशेषाणां देशग्रामादितद्घटनानाञ्च प्रतिपादकत्वेऽपि न तैस्तस्य कालविशेषनिर्धारणं शक्यम्, वैदिकशब्दानां नित्यत्वेन घटनापूर्वकत्वाभावात् ।

विकला भवन्ति

युक्ताः सदा-स्मर-मदादि-मनोविकारैः
हीनास्तथैव मतिमुक्ति - प्रवाहयोगैः ।
कुर्वन्ति नाऽध्ययनमध्वरमर्चनं च
ये पूरुषाः, जगति ते विकला भवन्ति ॥ १ ॥

ये वै ददुर्न द्रविणं त्विह दुर्विधेभ्यः,
सच्चक्रिरे न विदुषो न च धर्मनिष्ठान् ।
दृष्ट्वा कृतान्तमतिनिष्ठुरमन्तकाले-
ऽनुत्तीर्णछात्र इव ते विकला भवन्ति ॥ २ ॥

शास्त्रार्थसंसदि विलोक्य विचक्षणाना-
मावाहनं समरदुर्जयपण्डितानाम् ।
हृष्टा भवन्ति सुधियो मनुजा नितान्तं
मूढा जनाः कुमतयो विकला भवन्ति ॥ ३ ॥

शीलस्वभावविरता खलदुश्चरित्राः
ये स्वार्थिनश्च भुवि राष्ट्रद्विषो मनुष्याः ।
ते प्रत्यहं कविसनिन्दवचःप्रपत्कैः
विद्धा भवन्ति सततं विकला भवन्ति ॥ ४ ॥

प्रेमानुभूति-करुणा - ममता - वियुक्ताः
काव्यप्रभावरहिता रसरागशून्याः ।
येषां हृदश्च कवितावनिता-विहीनाः,
धिग् ! ते हि शून्यहृदया विकला भवन्ति ॥ ५ ॥

कार्यार्थिनस्त्वनुभवन्ति न नाममात्रं
कष्टं रवेरतिखरैः किरणैर्निदाघे ।
मन्दास्तु चन्द्रकिरणैरपि तप्यमाना
म्लाना भवन्त्यपि च ते विकला भवन्ति ॥ ६ ॥

— श्री प्रशस्यमित्र शास्त्री —

लौकिकानि पुस्तकानि घटनापूर्वकाणि भवन्ति । वेदस्तु घटनापूर्वको न भवति, घटनानामेव वैदिकशब्दपूर्वकत्वात् । तदुक्तमेव—

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

शब्द इति चेन्नातः प्रभवात् प्रत्यक्षानुमानाभ्याम्।

इति ब्रह्मसूत्र-तद्भाष्यादौ (१.३.२८),

'स भूरिति व्याहरत् ततो भुवमसृजत्। असृग्रमिति मनुष्यान्···।'

सर्वेषां तु स नामानि कर्माणि च पृथक् पृथक्।
वेदशब्देभ्य एवादौ पृथक्संस्थाश्च निर्ममे॥

(मनु० १.२१)

इति श्रुतिस्मृतिषु शब्दपूर्वकत्वं सृष्टेरुक्तम्। श्लिष्यते चैतत्। यथा कुलालादिस्तैस्तैः शब्दैस्तान् तान् घटादीन् मनसाऽऽलोच्यैव दण्डचक्रादिभिस्तान् निर्माति, तथैव ईश्वरोऽपि कैश्चिच्छब्दैः तांस्तानर्थान् विचिन्त्यैव निर्माति, जानाति, इच्छति, अथ करोतीति नियमात्। ज्ञानञ्च शब्दानुविद्धमेव जायते। न सोऽस्ति प्रत्ययो लोके यः शब्दानुगमादृते इति प्रसिद्धेः। तेन इतिहासपुराणादिषु केषाञ्चिद् व्यक्ति-नगर-नद्यादीनां नामवर्णनादेव पुराणादिनिर्माणकालनिर्धारणं भ्रान्तिमूलकमेव। वेदमूलकत्वेन आर्षज्ञानमूलकत्वेन वा तद्वर्णनसंभवात्। वाल्मीकीये रामायणे भाविरामचरितस्य वर्णनवद् अनादावेव वेद-पुराणादौ तद्वर्णनसंभवस्योक्तत्वात्।

यथा ब्रह्मसूत्र-तद्भाष्यादिषु श्रुतिस्मृत्यादिसमन्वयेनैव ब्रह्मस्वरूपमुपवर्ण्यते, तथैव मिताक्षरा-व्यवहारमयूख-दायभाग-हेमाद्रि-पराशरमाधव-निर्णयसिन्ध्वादिषु धर्मव्रतादिस्वरूपमपि समन्वयेनैव वर्ण्यते। न ह्येकैकं ग्रन्थमाश्रित्य तद्रूपं वर्णयितुं शक्यते। तथैव राधाकृष्णस्वरूपनिरूपणमप्युचितम्, सर्वेश्वरस्यैव अवतारभूतौ तौ इति श्रुत्यादिभिर्निर्णीतत्वात्। अत एव सकलसच्छास्त्रतात्पर्यविषयौ तौ, सर्वे वेदा यत्पदमामनन्ति इति श्रवणात्। अत एव श्रुतिस्मृतिपुराणैस्तन्त्रैश्च राधाकृष्णयोः स्वरूपं विस्तरेणोपवर्णितम्। तदाश्रयैणैव काव्यैर्नाटकैश्च तदुपवर्णितम्, पुराणाद्याश्रयेणैव काव्यं लेख्यमिति कविसम्प्रदायनियमात्। अत एव 'साहित्यिकल्पनाप्रसूतं राधातत्त्वम्, पश्चात् पुराणेषु तदुल्लेखः, तदनन्तरमेव वैदिकैर्मन्त्रैस्तत्सम्बन्धस्थापनम्' सर्वमेतदपास्तम्।

यदपि प्रक्षिप्तत्वादिसम्बन्धे निगदिकम्। तदपि न; यतः पुराणेष्वेव पुराणानां श्लोकसंख्याऽनुक्रमणिकाश्च निरूपिताः। ताभ्यः प्रसङ्गेन च सम्प्रदायपारम्पर्येण च तन्निर्णयः सुशकः। विरोधे त्वनपेक्षं स्यादसति ह्यनुमानम् (मीमांसासूत्रम् १.३.३.) इति जैमिनिसूत्रप्रामाण्यात्। तेन यथा श्रुतिविरोधे स्मृतेः प्रामाण्यहानं तथैवाऽपरिहरणीये श्रुतिविरोधे पुराणांशानामपि प्रामाण्यहानेन प्रक्षिप्तत्वादिकल्पनासंभवः। न त्वापातरमणीयविरोधाद् द्वेषाद्वा पुराणांशानां प्रक्षेपादिकल्पना युज्यते। प्रामाण्यस्वतस्त्वेन कारण-दोष-बाधज्ञानेनैव प्रामाण्यमपोद्यते। तदभावे तु प्रामाण्यस्वतस्त्वमनपोदितं सत्तिष्ठत्येव। ततो यावद् बलवद्बाध-कारणदोषज्ञानं न स्यात्, तावत् समेषामध्यायानां प्रामाण्यमप्रक्षिप्तत्वञ्च अभ्युपेयमेव, पूर्वे पूर्वेभ्यस्तत्र एतदूचुः, इति शुश्रुम धीराणां ये नस्तद्विचचक्षिरे इत्यादिश्रुतिभ्यः।

नहि सर्वेषां वस्तूनां सर्वत्र वर्णनं संभवति, तथात्वे एकेनैव गतार्थत्वे अन्येषां वैयर्थ्यापातात्। यथा गुणोपसंहारानुपसंहारादिभिर्मीमांसायां सर्वशाखासमन्वयेन अर्थो निर्धार्यते, तथैव तन्न्यायेनैव पुराणादिसमन्वयोऽपि युक्तः कर्तुम्।

(क्रमशः)

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

मानस-भारती : देवगिरा गुम्फितं मानसम्

—श्री जनार्दन गङ्गाधर रटाटे, बी. ए. साहित्याचार्यः —

पुष्पितं वनमत्यन्तं शुशुभे मधुपा-रवम् ।
कन्दमूलफलाधिक्यं रामस्यागमनाद् वने ॥
दृष्ट्वाऽसमं गिरिं रम्यं सुरराट् सानुजोऽवसत् ।
देवसिद्धर्षयो रामं पशुपक्ष्यादिरूपिणः ॥
असेवन्त वनं रामवासान्माङ्गलिकं तदा ।
भ्रातरौ सुखमासीनौ कदाचिदतिभास्वरे ॥
स्फाटिके प्रस्तरे रामोऽनुजं नानाकथा वदन् ॥
राजनीति-ज्ञान-भक्ति-विरागाताः स्थितोऽभवत् ।
वर्षतौ खे घना व्याप्ता गर्जन्तोऽतिमुदावहाः ॥

रामोऽवदत् पश्य मयूरवृन्दं
विलोक्य मेघानतिनृत्यमानम् ।
भ्रातर्यथा प्रेक्ष्य गृही विरागी
मुकुन्दभक्तं भवतीह हृष्टः ॥१३॥

घना गर्जन्ति तीव्रं खे प्रियाहीनं भयं मनः ।
दुष्टप्रीतिर्यथा विद्युत्कान्तिर्मेघेषु न स्थिरा ॥
विद्यां प्राप्येव विद्वांसो वर्षन्ति विनता घनः ।
बिन्द्वाघातं यथा सन्तः सहन्ते दुर्वचोऽदयः ॥
सीमाहीनाः क्षुद्रनद्योऽप्यल्पाद् द्रव्याद्यथा खलाः ।
जीवो यथा मययाक्तो भूलग्नं मलिनं जलम् ॥
गुणाः सतीव सलिलं सरस्यायाति सर्वतः ।
जीवः स्थिरो हरिं प्राप्य तथाब्धि सरितां जलम् ॥

तृणैर्हरिद्वर्णयुताऽस्ति भूमि-
स्तस्मान्न मार्गा विदिता भवन्ति ।
यथा हि पाखण्डमतप्रचाराद्
ग्रन्थाः सुतत्त्वा अपि लुप्तरूपाः ॥१४॥

नूनं बटूनां पठतां भेकानां भासते ध्वनिः ।
शोभन्ते नूत्नपर्णानां लाभाद् विटपिनस्तथा ॥
यथा लाभाद् विवेकस्य साधकस्य मनो भवेत् ।
विना पलाशमभवन् मन्दारा यवसानि च ॥
यथा सुराज्ये दुष्टानामुद्यमाः फलवर्जिताः ।
धूलिर्नाशा यत्नतोऽपि नष्टो धर्मो रुषा यथा ॥
शशियुक्ता शोभते भूर्यथा श्रीरुपकारिणः ।
पाखण्डिनो यथा रात्रौ खद्योतास्तमसि स्थिताः ॥
नष्टान्यावालानि वृष्ट्या स्वातन्त्र्येण यथा स्त्रियः ।
क्षेत्राणि शस्यसन्त्यागात् कृषकाः शोधयन्ति च ॥
यथा बुधा मदं मोहं त्यजन्त्यहमपि क्षणात् ।
यथा धर्मः कलेर्योगाच्चक्रवाको न दृश्यते ॥
भक्तचित्ते यथा कामो वृष्टितो नोषरेऽङ्कुरम् ।
राजते भूर्जन्तुयुक्ता सुराज्यादिव सत्प्रजाः ।
श्रान्ताः सर्वत्र पथिका इन्द्रियाणीव बोधतः ॥

वातः क्वचित्तीव्रतरः प्रयाति
तस्माद् विलीना जलदा भवन्ति ।
जाते कुपुत्रे शुभरूपिणोऽपि
यथा विनश्यन्ति कुलस्य धर्माः ॥१५॥क

तमः कदाचिद् दिवसेऽतिघोरं
भानुः कदाचिद् भवति प्रकाशः ।
बोधो यथा नश्यति भोगिसङ्गाद्
उत्पत्तिमायाति च साधुसङ्गात् ॥१५॥ख

(क्रमशः)

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

विवाह-वयोमर्यादा, प्रकल्पश्च

— श्री अनंत पिंगळे —

[सीनियर शास्त्री, डेक्कन-कॉलेज, पूना]

[सर्वथा वचनकृत-प्रवृत्ति-निवृत्तिपरकः शास्त्रीयोऽप्ययं विषयः श्रीपिंगलेशास्त्रिभिः आधुनिकबुद्धियुक्तिवादप्रकाशे प्राचीनमर्यादासंरक्षणमपि श्रद्धद्भिरत्र विवृतः। विचारस्वातन्त्र्यदृष्ट्याऽयमत्र प्रकाश्यते। नैतावताऽस्माकमनेन सम्मतिरनिवार्या भवति। अत्र विषये अन्यैरपि विद्वद्भिः कोऽपि नव्यो विचारः प्रस्तूयेत, तदा सोऽप्यस्माभिः प्रकाश्येत। अन्ते च स्वीयं मतमपि प्रकटयिष्यामः। —सम्पादकः]

सेयं वयोमर्यादा हनुमत्पुच्छवद् दीर्घदीर्घायमाणा वधूपितॄणां वधूनां च मनसि चिरं धूमायते। तेन च सामाजिकं वातावरणं चिन्तामेघाच्छादितं सत् दुर्दिनायते। विचारविषयश्चायमधुना प्रचलितो लोकसभायाम्। अतो जनहितदृष्ट्या शास्त्रेतिहासज्ञ-मताद्यनुसारेण विचारयितुं प्रयत्यते। तत्र बाल-प्रौढविवाहयोः कृत-क्रियमाणयोः अनुभवं मनसिकृत्य विचारकैः चिन्तयितुं सिंहावलोकनसमयः संप्राप्तः।

बालिकोद्वाहः

विषयेऽस्मिन् समाजहितचिन्तकैः मन्वादिस्मृतिकारैः सुनिश्चित्योपदिष्टं रजोदर्शनात्पूर्वं कन्यायाविवाहः कर्तव्य इति। रजोदर्शनसमयोऽपि च समर्थितो यथा—

अष्टवर्षा भवेत्कन्या नववर्षा तु रोहिणी।
दशवर्षा भवेद् गौरी अत ऊर्ध्वं रजस्वला॥ (मनुः)

तदा खलु कोमललता-तुल्या बालिकामतिः यं कमप्याश्रयति, शीघ्रं तन्मयीभवति। क्रमेण एकवर्षानन्तरमेव तद्रूपा पातिव्रत्यप्रवणा च स्वभावेन सञ्जायते। तदुक्तं विवेकिभिः—

कृतान्तः कान्तो वा समजनि न भेदः प्रथमतः,
ततो द्वित्रैर्मासैर्मनुज इति जग्राह हृदयम्।
ततोऽसौ मत्प्रेयानहमपि तदीया प्रियतमा
क्रमात्प्राप्ते वर्षे प्रियतममयं विश्वमखिलम्॥ इति,

तथा वेणीसंहारेऽपि—

स्त्रीणां हि साहचर्याद्भवन्ति चेतांसि भर्तृसदृशानि। इति।

इत्थञ्च अस्मदीय-धर्मशास्त्रकारादिभिः कन्यकाविषये बालिकाविवाह एव श्रेयस्कर इति प्रत्यपादि।

पाश्चात्त्य-समाजशास्त्राभ्यासकैरपि गणितागतपद्धत्या भूयोदर्शनजन्य-व्याप्तिनियमानुसारेण चैतदेव सिद्धान्तितं यत्, कन्यकानां विवाहाः यदृच्छया यासां षोडशवर्षदेशीयानां सञ्जाताः, ता एव पुरंध्र्यः इतराभ्यः अधिकसुखेन नन्दन्त्यः विराजन्ते। तासु घटस्फोटप्रवृत्तिरपि न्यूनतराऽवलोक्यते। यथा यथा वयो वृद्धिङ्गतं भवति, तथा तथा प्रतिशतं घटस्फोटाधिक्यं संसारसुखनीरसत्वं च भवतीति भूयशोऽनुभूयते इति।

वरविषये विवाहयोग्यसमयश्च अध्ययनसमाप्त्यनन्तरिकः मन्वादिभिर्निर्दिष्टः। यथा—

अधीत्य वेदं वेदौ वा वेदान्वापि यथाक्रमम्।
अविप्लुतब्रह्मचर्यो गृहस्थाश्रममाविशेत्॥ इति।

तेन च स्नातकेन विंशतिवर्षादारभ्य पञ्चाशद्वर्षपर्यन्तं

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

कदापि अनुरूपा यवीयसी अजातरजोदर्शना वोढव्येति प्रतीयते ।

प्रौढ-परिणयः

प्रौढयोस्तु परिणयः वयोधिक्यजनित-बुद्धिकाठिन्य-जननाद्वा अन्यान्यसंस्कारैः धृताननुरूपाकारवशेन वा परिणतवल्लीवत् नाद्वैतभावं भजते । विना चोभयो-रैकरूप्यं बहुलेषु मत-रुचिभेदेषु न सुखलेशोऽपि अनुभूयते । अन्ततश्च निर्विण्णयोः वैषयिकापेक्षारूप-प्रयोजनपूर्तिपूर्वमेव घटः स्फुटयते । प्रौढप्रेमविवाहः अधिकाधिकं नववर्षपर्यन्तं जीवति । बालोद्वाहश्च दृढ-प्रेमनिबद्धतया न्यूनान्न्यूनः पञ्चविंशतिसंवत्सरात्मकः । तत्र परस्परार्थं दुःखसंमर्षणाय मानसिकशक्तिः प्रवर्धते इति संशोधकसमाजशास्त्रिणां सम्मतम् ।

प्रौढयोः प्रेमविवाहः ज्वालामुखि-पर्वतोद्गत-लाक्षा-रसोद्गारवत् अतीव वेगेन बहुशश्च प्रधावति । खान-पानयोः, बहिर्गमनागमनयोः, क्रयविक्रययोः तथा क्षुद्रातिक्षुद्रकार्येष्वपि (कपोतयुगलवत्) प्रीतिप्रकर्षः प्रथमं प्रवृद्धोऽपि क्रमेण अतिपरिचयादवज्ञा-न्यायेन ह्रसति । अपत्यजनने तत्संवर्धनादौ दृश्यमाना तत्परता क्षीणा क्षीणतरा च भूत्वाऽन्ते तौ परस्परमुखावलोकन-मपि परिहरत इति सार्वत्रिकमधुना । बालविवाहे च तद्विपरीतमनुभूयते । त्र्यम्बकेश्वरस्था गोदावरी ब्रह्म-गिरौ बिन्दुरूपेण, ततो गङ्गाद्वारे धारारूपेण, ततोऽध-स्तात् प्रवाहरूपेण धावमाना दृश्यते । तथा आबाल्यात् भयेन खण्डिताः प्रीतिविप्रुषः विवाहसमयादारभ्योद्-गच्छन्ति । अथ संवत्सरान्तर्गत-नैकोत्सवप्रसङ्गेन भीति-नाशेन परिचयवृद्ध्या ते धारारूपं धारयन्ति । अग्रे च विस्तृतगौतमीप्रवाहः तीरस्थानिव स प्रेमप्रवाहः सम्बन्धिजनान् आनन्दयति । तेन तत्र अवर्षणादि-समयवत् संसारे संकटसमयोऽपि न गण्यते । अन्ते च सप्तप्रवाहैः सागरैक्यवत् अखिलं विश्वं प्रियतममयं भवति । अशिक्षिताऽपि मतिः स्वभावतः पतिव्रत-परायणा भूत्वा सुखमग्ना सञ्जायते इति कवीनाम-भिप्रायः ।

उभयोः परीक्षणम्

यद्यपि बालविवाहोऽयं परिणते वयसि सुखलाभ-प्रदस्तथापि 'श्रेयांसि बहुविघ्नानी'ति न्यायेन बहु-विघ्नाक्रान्तत्वात् तत्सुखं दुर्लभं भाति बहुशः ।

(१) कदाचिद्विवाहोत्तरं कतिपयसंवत्सरादन-न्तरमेव पतिः स्वर्वासी भवति । एतादृशापत्तौ सति शरीरपीडके तारुण्ये, प्रवर्धमानायां चाप्तजनावधीर-णायां, शिक्षणाभावेन चाऽऽपन्ने स्वजीविकादौर्लभ्ये, वपनाचारेण वैरूप्यसंप्राप्तौ अगतिकतया प्रतिबद्धायां समाजद्वारि किं नु कर्तव्यं वराक्या बालिकया ? कथं वा जीवितव्यम् ? कथं च वैधव्यधर्माचरणं, कया वा शक्यमधुना पत्यनुगमनम् ?

(२) यत्र नेयमापत्तिः, तत्र श्वश्रूः बाहुल्येन स्नुषया सह न सौहार्देनाचरति । वस्तुतः पुत्रीनिर्विशेषं श्वश्र्वा तस्यां वर्तितव्यम् । परं बहुशो दृश्यमानपक्ष-पातेन कलहाग्निः क्रमशो गृहे प्रज्वलति, यावज्जीवं च धूमायते ।

(३) निर्धनकुमारीणां अगत्या द्वि-त्रि-चतुर्विवा-हितेन जरठेन सह परिणयोऽनिवार्यो भवति । तेन च तासां वैधव्यदुःखमप्यनिवार्यमेव ।

(४) स्त्रीणां शिक्षणायाऽवकाशो न भवति । आ-बाल्यात् प्रसूतिश्चानपेक्षिताऽपि भवत्येव । शिक्षणा-भावेन व्यवहारे मुग्धता, परावलम्बिता, जीविका-साधनापहस्तिता चापद्यते । अनपेक्षितबहुसन्ततिभिः

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

लोकसंख्याप्रवृद्ध्या दारिद्र्यं देशोन्नतिप्रतिबन्धश्च जायते। एवं च समाजस्थैर्यानुरोधेन हितावहोऽपि बालोद्वाहो निर्दिष्टानुपपत्तिभिरव्यवहार्य इति शारदानुशासनं सम्मतम्।

प्रौढयोश्च विवाहोऽनिवार्योऽभवत्। तत्राधुना चाग्रिमदोषाः समाजे आपन्नाः किंकर्तव्यमूढतामापादयन्ति—१. स्त्रीणामपि शिक्षणेनार्थिकप्रश्नः तीव्रतां धारयति। २. उभयोरपि प्रौढत्वाद्विभिन्नरुच्या विवाहमेलनं दुर्घटमिव सञ्जातम्। ३. घटितेऽपि घटस्फोटप्रसङ्गभीतिः शिरसि वर्तत एव। ४. कदाचित् पूर्वं स्वैरपरिचयेन विलासप्रवृत्तिर्दृश्यते। ५. प्रौढानां सोभाग्यकाङ्क्षिणीनां गृहे गृहे स्थितिः। ६. अन्यवर्णीयैः अनियन्त्रितसम्बन्धेन वर्णसङ्करप्रसङ्गः। ७. विवाहोत्तरं च वृद्धमातापित्रोरुपेक्षया पृथक्निवासरूढ्या एकत्रकुटुम्बपद्धति-विध्वंसेन गृहशान्ति-मर्यादा-सौख्यहानिश्च, परम्परागतधर्माचरणनाशश्च शल्यायन्ते। लोकसंख्याप्रवृद्धिप्रतिरोधाय वधूनां वयोमर्यादावर्धनेन उपर्युक्तदोषाः तीव्रतराः भवेयुः। अस्तंगत-बाबिलोन-मिश्रादिसंस्कृतिवत् भारतीयसंस्कृतेरपि सामाजिकस्थैर्यविनाशप्रसक्त्या विलोपप्रसङ्गोऽप्यापद्येत। पर्युषितमिव रसहीनं सर्वं जीवनं भवेत्। अतो यावच्छक्यं स नियमः 'अहितकर' इति कृत्वा प्रतिरोद्धव्यः। प्रकल्पश्चायमनुसर्तव्यः।

प्रकल्पः

अत्र सर्वाङ्गीणविचारं कृत्वा समाजहितार्थं विवेकिनां पुरतः मयाऽयं विचारः संसूच्यते, येनोभयविधविवाहयोः दोषाः न प्रसज्येरन्, व्यावहारिकलाभः धर्मानुसरणमपि भवेत्। विवाहविधिकलापे विभागद्वयं कर्तव्यम् - वाङ्निश्चय-पाणिग्रहण-सप्तपदीपर्यन्तो भागः प्रथमः; कन्यादान - वररात्रिमहः वरगृहे वधूप्रवेशे लक्ष्मीपूजनं, नामकरणम्, ऋतुशान्तिश्च इत्यपरो विभागः। औत्तरीयाः विशेषतो मरु-सिन्धुदेशीयाः विवाहात्पूर्वं दश-पञ्चसंवत्सरेभ्यः प्राक् दृढं वाङ्निश्चयं कृत्वा वरवध्वोः शिक्षा-सामर्थ्यप्राप्त्यनन्तरं विवाहोत्सवं कुर्वते। तथैव सकलैरपि भारतीयैः वाङ्निश्चयादारभ्य पूर्वो भागः वधूगृहेऽनुष्ठातव्यः। मनुना अमन्त्रको विधिः स्त्रीणाम् इत्याद्युपनयविषयम् उपदिष्टम्, तदनुसारमस्माभिरयं संस्कारः समन्त्रकः कर्तव्यः। यावच्छक्यं रजोदर्शनात् पूर्वमेवानुष्ठाने शास्त्रमनुमतं भवेत्। तस्य 'वाङ्निश्चय' इत्येवास्तु अभिधानम्।

वरवधू-समागम एवाधुना विवाहपदेन रूढः, राजकीयैरपि तदनुसृत्यैव नियमाः क्रियन्ते। अस्माभिस्तदविरोधेन मध्यममार्गानुसरणे न स्याद्दोषलेशः, व्यावहारिकसुविधाश्च संपद्येरन्। अतोऽपरः विवाहाख्यविधिभागः अनन्तरं कर्तव्यः। मनुना अष्टवर्षा भवेत् कन्या इत्यारभ्य रजोदर्शनात्पूर्वं पाणिग्रहणविधिमुक्त्वा—

त्रिंशद्वर्षो वहेत्कन्यां हृद्यां षोडशवार्षिकीम्।

इति समागमकालः अनन्तरमेव उपदिष्टः। निषेकाख्यसंस्कारस्य तदैव सुयोग्योऽवसरः।

प्रकल्प-फलम्

एतदनुसरणे न स्यात् स्त्रीशिक्षणस्य अन्तरायः, न स्याच्च शासित - नियमभङ्गः। उभयोः कुलयोः प्रत्यक्षाप्रत्यक्षरीत्या वधौ दृष्टिः स्यात्, तेन सा रक्षिततरा भवेत्। वधूपिता चिन्तामुक्तो भवेत्। वधूश्च स्वयं मनोव्यथानिर्मुक्ता आनन्देन शिक्षा - सामर्थ्यसंपन्ना

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

भूत्वा उभयोः न भारभूता, प्रत्युत सहायिका भवेत्। अग्रे च सीतावत् उभयकुलनन्दिनी भूत्वा सम्मानार्हा संपद्येत। न चात्र बालवैधव्य-शङ्का कर्तव्या—

सा चेदक्षतयोनिः स्यात्पुनः संस्कारमर्हति।

इति याज्ञवल्क्याज्ञया कुमार्याः स्वगृहे स्थितायाः एव तस्याः पुनर्मण्डनविधानात्। न च श्वश्रूः स्नुषया कलहं कर्तुं शक्नोति, बालिकायाः स्वगृहे एव वर्तमानत्वात्, तादृक्परिचयविरहाच्च। एवमेवान्येऽपि दोषाः शक्यपरिहाराः।

उपसंहारः

प्रकल्पोऽयं सर्वथा निर्दुष्टः, उत्कृष्टश्च। अतः सर्वैः व्यावहारिकैः काममाचरितुं योग्यः, शासकीयविचारकैः प्रदेयानुमतिकः, धर्माधिकारिभिः, जगद्गुरुभिश्च प्रचारयितुमुचितः। विना चैतादृशविवेकं सांप्रतिकी कष्टमयी दशा तीव्रतरतामापद्येत। अतः संप्राप्तसमयेऽस्मिन् कविश्रेष्ठ-भवभूत्युक्तप्रकारेण "यत्सुखदुःखयोः अद्वैतं, सर्वास्ववस्थासु अनुगतं, यत्र हृदयस्य विश्रामः, यस्मिन् जरसाऽप्यहार्यो रसः, आवरणात्ययात् कालेन परिणते स्नेहसारे यत् स्थितम्; तस्य सुमानुषस्य" समाजगतैतत्प्रकल्पेन भाग्यशालिदाम्पत्यस्य एकं भद्रमहं प्रार्थये। तदुक्तम्—

अद्वैतं सुखदुःखयोरनुगतं सर्वास्ववस्थासु यत्,
विश्रामो हृदयस्य यत्र जरसा यस्मिन्नहार्यो रसः।
कालेनावरणात्ययात् परिणते यत्स्नेहसारे स्थितं,
भद्रं तस्य सुमानुषस्य कथमप्येकं हि तत्प्रार्थ्यते॥

★

सूचना—अत्रत्यपाश्चात्याभिप्रायः कै० गो० म० जोशीकृतात् 'हिन्दूनां समाजरचनाशास्त्र'-ग्रन्थात् परामृष्टः।

मुक्तकानि

★

गुरु-निर्वेदः

ब्रह्मन्, पातय मां मृगेन्द्रवदने
शार्दूल - दंष्ट्रान्तरे
दावाग्नावपि भृज्ज मूर्ध्नि नितरां
दम्भोलिना वा जहि।
कामं पायय मां हलाहलमथो
सज्जोऽस्मि किन्तु प्रभो
शिष्यस्यारसिकस्य पाठन-विधि
मां फालके मे लिख॥ १॥

पाठने विमुखधीरतिमूर्खो
वीक्षते - ऽन्यविषयेरितदृष्टिः।
मन्यते च निखिलं विदितं यो
वञ्चितं स्वमयमत्र करोति॥ २॥

छात्र-वेदना

सिंहस्योग्रमुखे पतेयमथवा
वह्नौ समुद्रान्तरे
कुम्भीपाकमथापि वा वरमिति
प्रत्येमि भीतिर्न मे।
भण्डस्यारसिकस्य नित्यमलस-
स्याचार्यवर्यस्य स-
च्छात्र - प्रश्न-समाधिदानसरुषो
हस्ते तु मां मा निधाः॥ ३॥

— श्री न० चि० वे० नरसिंहाचार्यः —

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

मनस्तत्त्व-विमर्शः

—श्री मुरलीधर मिश्रः—

[व्याकरणविभागाध्यक्षः—वाराणसेय-संस्कृत-विश्वविद्यालयस्य, वाराणसी]

(२)

तथा हि—रूपाद्यायतनं यद् भवति तदेकमनेकं वा ? नाद्यः ; अवयवादतिरिक्तस्य कस्यचिदपि अवयविनोऽनुपलम्भात् । नान्त्यः ; अवयवरूपस्य परमाणोरतीन्द्रियत्वेन सर्वेषामतीन्द्रियत्वप्रसङ्गात् ।

'अवयवाः संहता एव अवयविनः' इति पक्षोऽपि न युक्तिसहः ; यतो हि परमाणोरेव असंभवात् । तथा हि—षट्कैः परमाणुभिः परस्परसंयोगात् त्र्यणुकस्य सिद्धिः । संयोगश्च षट्सु अपि दिक्षु स्वीकर्तव्यः । तथा च परमाणूनां षडंशता जाता । तेषाञ्च समानदेशत्वात् सत्यपि संयोगे अणुमात्रमेव निष्पन्नं स्यात् ।

ततश्च परमाणोरसंयोगसिद्धौ तत्संहतानां त्र्यणुकानां कुतः संयोगः ?

किञ्च—पूर्वादि-दिग्भागभेदात् तस्यैकत्वं न संभवति । अत एव तेषां वस्तूनां सूर्योदये सत्यपि कस्मिंश्चिद्भागे छाया कस्मिंश्चित् भागे आतपो भवति । सा चैषा व्यवस्था न संभवति, सर्वेषां वस्तूनां परमाणुरूपत्वात् ।

अपि च–इन्द्रियविषयाणां पदार्थानामेकत्वे पृथिव्यां क्रमेणागमनं न स्यात्, सकृत् पादप्रक्षेपेणैव सर्वस्याः पृथिव्या गमनसंभवात् । अत एव एकस्यैव वस्तुनो युगपत् कस्मिंश्चिदंशे ग्रहणम्, अन्यत्राऽग्रहणञ्च उपपद्यते । अनेकत्वे तु विच्छिन्नानामेकत्र स्थितिरेव दुर्लभा । अतः एकत्वमनेकत्वं वा न स्वीकर्तव्यम् । तथा चोक्तम्—

> एकत्वेन क्रमेणेति युगपन्न ग्रहाग्रहौ ।
> विच्छिन्नानेकवृत्तिश्च सूक्ष्मानीच्छा च नो भवेत् ॥ इति।

अतः स्वप्नादिवद् विज्ञानमेव तत्तदाकारेण अवभासते इत्यगत्या स्वीकर्तव्यम् । यतो विज्ञानमर्थाकारेण भासते, अतोऽर्थाकारस्य अनुभूतत्वात् विज्ञानसन्तानेन तत्स्मरणमप्युपपद्यते ।

स्वप्ने भातस्याप्यर्थस्य प्रबोधेऽनवभासवत् मिथ्याऽवभातोऽप्यर्थः तत्प्रतिपक्षीभूत - लोकोत्तरनिर्विकल्पज्ञानलाभाद् अज्ञानविनिवृत्तौ स्वाकारं विहाय शुद्धविज्ञानरूपेण अवतिष्ठते ।

नन्वेवं शरीरादीनामपि विज्ञप्तिमात्रत्वात् तेषां नाशरूपं मरणं न स्यादिति चेन्न । पिशाचादिमनोवशात् मानवानां स्मृतिलोपादिवत् परेषां विज्ञप्तेरेव मरणाकारेण अवभासनादुपपत्तेः । वस्तुतो मरणं नाम न किञ्चिदस्ति । श्रूयते हि पूर्वं ऋषीणां कोपात् दण्डकारण्यस्थ - राक्षसानां मरणं जातम् । अतो यद्यत् कारणं परेषां मरणादौ प्रतीयते, तत्सर्वं परेषां जीवानां संवेदनमेव । तदपि स्वसंवेदनवत् मिथ्याभूतम् । तेन विज्ञप्तिमात्रमेव सर्वः प्रपञ्च इति सिद्धम् । तदुक्तम् आचार्यवसुबन्धुना—

> विज्ञप्तिमात्रतासिद्धिः स्वशक्तिसदृशी मया ।
> कृतेयं सर्वथा सा तु न चिन्त्या बुद्धगोचरः ॥ इति।

अत्र बुद्धगोचर इत्यस्य भगवता बुद्धेनैव ज्ञायते, अन्येन तु चिन्तयितुमप्यशक्या इत्यर्थः ।

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

लोकशास्त्रयोरात्मधर्मोपचारो विविधः प्रवर्तते। जीवः, आत्मा, मनुष्य इत्यादिक आत्मोपचारः। 'इदं नीलमिदं पीतम्' इत्यादयो धर्मोपचाराः। स्कन्धाः धातव आयतनानि रूपं वेदना संज्ञा संस्कारः विज्ञान-मित्येवमादयः, ते सर्वेऽपि विज्ञानस्यैव परिणामाः। तत्र परिणामस्त्रिविधः—विपाकः, मननाख्यः, विषयस्य विज्ञप्तिश्च। तत्र विपाकाख्यः परिणामः आलयविज्ञानं सर्वेषां बीजभूतम्। आलयविज्ञामालम्ब्य मननात्मकं मनोनाम द्वितीयः परिणामः। विषयस्य रूपरसशब्द-गन्धस्प्रष्टव्यधर्मात्मकस्य षड्विधस्य य उपलब्धिरूपः तृतीयः परिणामः। तस्मिन् परिणामे आलयविज्ञानं असंविदितकोपादिस्थानविज्ञप्तिकं भवति। उपादि-रूपादानमात्मादिविकल्पवासना धर्मादिविकल्पवासना च। स्थानविज्ञप्तिः परिच्छिन्नत्वेन ज्ञानमेतद्द्वयमसंवि-दितकं यत्रैवंभूतं भवति तच्चालयविज्ञानं स्रोतसोप्य-तदविच्छिन्नरूपेण वर्तते।

द्वितीयपरिणामो मननाख्यम्। अत्रैव सर्वं क्लेशा-दिकं वर्तते। अयं परिणामोऽर्हतो बुद्धस्य न भवति।

तृतीयः परिणामः विषयस्योपलब्धिः। सा च त्रिविधा कुशला, अकुशला, कुशलाकुशला च। कुशलै-श्चतसैः समन्विताः कुशलाः। क्लेशैरुपक्लेशैः सम-न्विता अकुशलाः। कुशला अहिंसा-निर्लोभादयः। अकुशलाः कुशलाश्चोभयान्विताः। एवञ्च सर्वस्त्रिविधो विज्ञानपरिणामः विकल्परूप एव। विकल्पनात् विकल्प इत्युच्यते, न वस्तुभूतम्। अतः सर्वं विज्ञप्तिमात्रमेव। अत एतन्मते निखिलं जगत् मन एव, नान्यत् किञ्चि-दिति सिद्धम्।

न्याय-वैशेषिकमते

न्याय-वैशेषिकमते मन इन्द्रियम्। इन्द्रः = आत्मा तस्य लिङ्गं साधकं हेतुरित्यर्थः। इन्द्रशब्दात् लिङ्ग-मित्यर्थे घच्-प्रत्यये कृते 'इन्द्रियम्' इति सिद्ध्यति। इन्द्रियादिकरणेनैव कर्तुरात्मनोऽनुमानं भवति। सर्वेषां प्राणिनां घटपटादिसाक्षात्कारवत् सुख-दुःखादीनामात्मनश्च साक्षात्कारो जायते। स च साक्षात्कारोऽन्यसाक्षात्कारवत् इन्द्रियकरणक एव संभवति। तत्र बाह्यानां चक्षुरादीनामिन्द्रियाणामान्तरे सुखादौ सन्निकर्षाभावादगत्या मन आन्तरमिन्द्रिय-मिति मन्तव्यम्। अनुमानप्रयोगश्च इत्थम्—'सुखादि-साक्षात्कारः सकरणकः जन्यसाक्षात्कारत्वात् चक्षुरा-दिसाक्षात्कारवत्।' तथा च न्यायभाष्ये—स्मृत्यनुमा-नागमसंशयप्रतिभास्वप्नज्ञानोहाः सुखादिप्रत्यक्षमिच्छादयश्च मनसो लिङ्गानि इति।

एवं सुखं समवायसम्बन्धेन आत्मनि उत्पद्यते। तत्र समवायिकारणमात्मा, असमवायिकारणमात्मनिष्ठः संयोगः। तस्यैक आश्रय आत्मा। अपरोऽपि कश्चिदाश्रयो वाच्यः। स च मन एव, नान्योऽसंभवात्। गौतमेन—युगपज्-ज्ञानानुत्पत्तिर्मनसो लिङ्गम् इति सूत्रं कण्ठत एव उक्तम्। तस्यायं भावः—चक्षुरादिबाह्येन्द्रियाणां विषयैः सह सन्निकर्षे सत्यपि ज्ञानमेकमेव एकदा जायते। तत्र कारणेऽन्विष्यमाणे यत् कारणं तदेव मनः।

तच्च मनोऽणुपरिमाणम्। तत्रापि पूर्वोक्तगौतम-सूत्रमेव मानम्। महत्-परिमाणत्वे सर्वैरिन्द्रियैः साकं संयोगस्य विद्यमानत्वे युगपदेव अनेकेन्द्रियैः ज्ञानाना-मुत्पत्तिः प्रसज्येत। अणुपरिमाणत्वे तु यदा येनेन्द्रियेण मनसा संयोगो भवति, तदिन्द्रियजन्यं ज्ञानमिति व्यवस्थोपपन्ना। तथा चोक्तं सिद्धान्तमुक्तावल्याम्—अयौगपद्याज् ज्ञानानां तस्याणुत्वमिहेष्यते इति।

ननु अयुगपज्ज्ञानोपत्त्या मनसोऽनुमानं न संभ-वति, ज्ञानोत्पत्तेर्ज्ञानधर्मत्वेन मनसि पक्षे हेतोरवर्त-

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

नात्। असम्बद्धस्यापि हेतोर्लिङ्गत्वेऽविशेषाद् 'अस्ति आत्मा काकस्य कार्ष्ण्यात्' इति अनुमानमपि प्रसज्येत। न चैवं प्रत्यग्रशरावदर्शनेन, भ्रान्तिमच्चक्रदर्शनेन च कुलालादिसत्तायाः अनुमितिर्न स्यात्, पूर्वोक्तहेतुद्वयस्य कुलालासम्बद्धत्वादिति वाच्यम्; अविदूरकुलालवत्त्वेन तद्देशस्यैव अनुमित्या साधनादिति चेन्न। युगपज्ज्ञानोत्पत्तिः चक्षुरादिव्यतिरेकेण अधिष्ठापकान्तरापेक्षा, अयुगपदुत्पत्तेः युगपदनेकरथक्रियादिवत्।

अथवा 'चक्षुरादीन्द्रियम् आत्मप्रवृत्तावधिष्ठापकान्तरापेक्षम् अयुगपदुत्पत्तेः वास्यादिवत्' इत्येवमनुमानाकारस्वीकारेणादोषात्। तत्र यथा वास्यादिव्यतिरेकेण हस्ताद्यधिष्ठापकापेक्षा, तथाऽत्रापि मनोरूपाधिष्ठापकान्तरापेक्षेत्यनुमाने उदाहरणं सङ्गमनीयम्।

भवतु नाम अनेकेन्द्रिय-मनःसन्निधानापेक्षमयुगपद्ग्रहणम्, एकेन्द्रियग्राह्येषु विभिन्नेषु विषयेषु 'शुक्लो गौर्गच्छति' इत्यादिषु कथमयुगपद्ग्रहणमिति? करणधर्मत्वादिति ब्रूमः। तथा हि—करणानामयं स्वभावो यदनधिष्ठितं करणं न प्रवर्तते। एवमयमपि स्वभावः यद् युगपदनेकक्रियाकारित्वाभावः। एवञ्च आत्मनोऽधिष्ठापकत्वे तस्य सर्वेन्द्रियसम्बद्धत्वेऽपि मनःसम्बन्धस्वीकारमन्तरेण अयुगपज्ज्ञानोत्पत्तिर्न संभवतीति मनोऽणुपरिमाणं च अवश्यमभ्युपेयमिति।

मीमांसक-मतम्

मीमांसकानां कुमारिलभट्टानां मते सुखाद्यपरोक्षसाधनत्वेन स्वीकृतं मन इन्द्रियं विभुः स्पन्दरहितञ्च स्वीक्रियते। तत्र प्रमाणमनुमानम्—'मनो विभु स्पर्शानर्हद्रव्यत्वात् अनारभ्यारम्भकद्रव्यत्वात् ज्ञानासमवायिकारणसंयोगाधारत्वाद्वा आत्मवत्। अनुमानेनानेन विभुत्वसिद्धौ अस्पन्दात्मकत्वमपि स्वतः सिद्धम्।

नन्विदमनुमानं धर्मिकग्राहकप्रमाणबाधितम्। तथा हि—सुखादिसाक्षात्कारहेतुर्मनः उपहितमनुपहितं वा? अन्त्ये इन्द्रियत्वायोगः, सर्वदा वर्तमानत्वेन सुखादिसाक्षात्कारस्य कादाचित्कत्वानुपपत्तेः। अपि च—यथा विभु सत् आकाशं नेन्द्रियम्, एवं मनोऽपि नेन्द्रियं भवितुमर्हति। आद्ये शरीरैकदेशोपहितत्वं सर्वशरीरदेशोपहितत्वं वा? आद्ये तद्देशनिरोधे मनसोऽपि निरोधप्रसङ्गः। अन्त्ये शरीरैकदेशशिरआद्यवच्छेदेन वेदनाननुभवप्रसङ्गः इति चेन्न। सकलशरीरदेशोपहितत्वस्वीकारेण अदोषात्। स्वभाववशादेव एकदेशस्थित-पीडादिवेदनस्योपपत्तेः। अन्यथा अणुत्वपक्षे सकलशरीरगतस्य चन्दनादिजनितस्य सुखस्य अनुभवापलापप्रसङ्गः।

नन्वेवं संयोगस्य अन्यतरकर्मजन्यत्वात् आत्ममनसोरुभयोरप्यक्रियत्वात् संयोग एव आत्ममनसोर्न स्यादिति चेन्न। विभुद्वयसंयोगस्य सर्वैरकर्मजत्वस्वीकारात्। अत एव आकाशकालदिशात्मनां संयोगः सर्वेषां सम्मत उपपद्यते।

ननु सुखादिसाधनेन्द्रियत्वेन दिगादीनामेव ग्रहणमस्तु, किमर्थमतिरिक्तं मनः स्वीक्रियते इति चेन्न। दिगादिप्रत्यक्षसाधकत्वेन मनसः पार्थक्येन स्वीकारस्यावश्यकत्वात्। एवञ्च एतेषां मते सुखादिसाधनमिन्द्रियं विभु मनः स्पन्दरहितमिति सिद्धम्।

(क्रमशः)

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

पूर्वतोऽनुवृत्तम् : ३२

छत्रपति-महाकाव्यम्

—श्री उमाशङ्करशर्मा त्रिपाठी—

[आंग्लभाषा-प्राध्यापकः—काशी-विद्यापीठम्, वाराणसी]

निसर्गलालित्यकला क्व देहली
क्व दक्षिणा भूर्वनपर्वतोत्करा ।
इमां विहातुं सुरलोकहासिनीं
न मानसं मे सहते मनागपि ॥४७॥

व्यपेतचिन्तोऽनृजुराज्यपद्धतौ
निकामरक्षावरणः स्वगुप्तये ।
अनन्तभोगाः फणिलोकदुर्लभाः
तथापि पश्यामि न किं कृतं शुभम् ॥४८॥

उपोढमोहेन जगत्पतिर्मया
धृतायुधेनैव मुधा तिरस्कृतः ।
महानुभावो महतां तथाप्ययं
स्वभावमेवानुकरोति मय्यपि ॥४९॥

न चार्यधर्मः समयोचितोऽधुना
विशीर्णतेजा इह वा परत्र वा ।
अनल्पपुण्याः खलु ते नृपाभिधा
विविच्य सर्वं विशिखीभवन्ति[1] ये ॥५०॥

सुतामलङ्कृत्य रमामिव स्वयं
प्रदाय दिल्लीपतयेऽखिलात्मने ।
जगाम यः श्लाघ्यनवोपदेशतां
समुद्रचेताः सुकृतैः स वर्धते ॥५१॥

ममानुगानामिह शस्त्रजीविनां
मुदे निकामं निखिलैव सत्क्रिया ।
परं त्रपन्ते हि वनौकसो भृशं
विलोभ्यवस्तुव्यवहारकुण्ठिताः ॥५२॥

वधूजनानामवधूय मण्डनं
निपात्य यूनो द्विपदायुधानले ।
पितॄन् शिशून् भैक्ष्यपथे विमुञ्चता
मुधाऽऽधिधूर्भिर्ग्लपिता जनिर्मया ॥५३॥

मदीयमुद्राङ्कित - लेखपत्रकं
भवद्रता वायुरयेण सादिनः ।
प्रदर्शयन्तूद्धतनायकान् मम
मुधा महाराष्ट्रजनो न सीदतु ॥५४॥

तदेकभावा ज्वलदग्नयोऽनुगाः
मनोऽन्तरोत्तापशमाफला इव ।
स्रवच्छ्रमस्वेदजलस्नुता हठात्
निपत्य भूमौ नृपतिं न्यवारयन् ॥५५॥

बलान्निषिद्धोक्तिपथोऽपि निस्सहो
व्यथाऽनुभावोऽनवकाशभैरवः ।
ददाह तीक्ष्णं हृदयं धियं स्मृतिं
विषान्नकल्पः सगणस्य भूपतेः ॥५६॥

तथापि कर्तव्यधियाऽऽधियाजकः
धुरं दधौ सः समयोपपादिताम् ।
घनान्तरायोन्मथितोऽपि भूरिशः
स्वभावपद्यां न जहाति युक्तधीः ॥५७॥

---

१. विशिखीभवनम् = इस्लामग्रहणम्, विशिखत्वात्, न शिरसि शिखां धारयन्ते तुरुष्का इति भावः ।

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

क्रियाकलापेषु निवेशितात्मनो
न विक्रियां कामपि वीक्षितुं क्षमाः ।
तदिङ्गितज्ञान - निदानकुण्ठिता
निगूढचारा व्यचरन् हतोद्यमाः ॥५८॥

निहन्तुमाकारविचार-सान्त्वनैः
शुचः सयत्नः स सदानुजीविनाम् ।
ततान तेषां हृदये कुतूहलं
विनोदमिश्रै - र्वचनैर्गतव्यथः ॥५९॥

गृहीतशय्येषु जनेषु जाग्रतः
क्षपाऽग्रतस्तस्य परास्तकौशला ।
ननाश गन्धर्वपुरीव खण्डिता
विभातशीतानिलकम्पिताऽऽकृतिः ॥६०॥

असौ प्रतीहारपदक्षमध्वनौ
वनौकसां भीतगतिं समस्मरत् ।
सदार्जवा ये कुटिलारिभीषिता
विहाय गेहान् विलपन्ति कानने ॥६१॥

प्रतिक्षणं तं क्षणनिद्रितं बलात्
स्वदेशभूरित्थ - मसत्फलायतिः ।
घनाश्रुभिन्ना-ऽऽननमण्डनच्छवि-
र्विदूयमाना करुणं व्यलोकयत् ॥६२॥

अराति - नानाशिविर - प्रकल्पनैः
परिष्कृतापेक्ष्यबलैः परिस्थिता ।
अयूथनाथेव गजावली भिया
सुविक्रमाऽप्याहितसंशयोन्मनाः ॥६३॥

गृहे बहिर्वर्त्मनि वा दिवानिशं
व्यपेतशङ्कैरपि शङ्किताग्रहैः ।
विधेयबुद्धै - र्हठरोपितप्रणैः
स्वदेशगुप्त्यै परितो निनादिता ॥६४॥

सुगुप्तरक्षाच्छुरिकैरतन्द्रिलैः
सपत्नजीवावधिबन्धपातिभिः ।
स्वतन्त्रतारक्षणमात्रजीवितैः
समेधिता निर्भयकन्यकाजनैः ॥६५॥

विशालदोर्भिः शिवनिर्मिताध्वनि
विधातुमिष्टं वपुरेव वाऽर्पितुम् ।
कुमारकल्पै - रनुशासनस्थिरैः
किशोरलोकैरवलोकिताऽभितः ॥६६॥

स्वशस्त्र - संस्काररमैरनारतं
भटैर्महाकालभटैरिवोन्मदैः ।
स्वविक्रमाभ्यासकथा - सहायिनः
प्रसादयद्भिस्तुरगान् निषेविता ॥६७॥

स्वसाधनैकान्त - समाधिदूषकं
सदध्वसम्बाधमवेक्ष्य सत्वरम् ।
विहाय भावैकरसं तपोवनं
जनैक्यमन्त्रैर्यतिभिः प्रबोधिता ॥६८॥

सपत्नचारै - रभिचारकौशलै
रशङ्क्यवर्षावरणैः समन्ततः ।
विभेदनिर्बन्धकथा - परिच्छदैः,
प्रवेपिताङ्गीव समाकुलप्रजा ॥६९॥

क्रियासु रक्ताऽपि विरूढसंशया
प्रसह्य मध्ये पथमात्मविस्मृता ।
शुचा महाराष्ट्रधराऽतिकश्मले
व्यलोकि गर्ते करिणीव भूभुजा ॥७०॥

निरस्तकामा परलोकदृष्टयो
जनैरुपास्या चरमायुषोऽपि ते ।
अतापयन् तं ददतस्तिलाञ्जलीन्
हतात्मजेभ्यः करुणां निराश्रयाः ॥७१॥

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

विमुग्धहासाः विरलद्विजाननाः
भविष्यमूलाः स्वपरार्थनिस्स्पृहाः ।
अकालकालातिथयोऽरिपोथिता-
स्तमार्तबन्धुं शिशवो व्यमोहयन् ॥७२॥

निरीक्ष्य शत्रुक्रतुहव्यतामितान्
पतीन् तनूजानपि वेश्मभिः सह ।
ददाह तं दग्धमनोरथाङ्कुरो
घनाऽऽधिभूतो विषमं वधूजनः ॥७३॥

अनुप्तबीजोषरनिर्विशेषतां
धराऽपभिक्षा दधती भृशारतिम् ।
तदीयचित्तेऽफलरोपनिर्भरे
ततान निर्वेदनिवेदितां शुचम् ॥७४॥

क्षतप्रसूतस्यदसिञ्चितो नु किं
स्वतन्त्रता-कल्पतरुः समेधितः ।
अनाप्तपुष्पर्द्धि - वसन्तवैभवो
द्विषद्दवप्लुष्टकथो भविष्यति ॥७५॥

किमल्पपुण्याः पितरो दिवङ्गता
उतावधिर्नास्तमितो दुरापदाम् ।
अशङ्कितार्था निगमा नु किं मुधा
यदुग्रदैवोऽयमुदेत्यनागसाम् ॥७६॥

निसर्गलावण्यवरः पुनो नु किं
हिनस्तु नारीजनशीलजीवितम् ।
विभर्तु किं निर्दयलुण्ठिता प्रजा
विवेकवर्जं पशुवर्त्मवर्तनम् ॥७७॥

सपत्नसंदर्शितमार्गसंस्तवं
विवर्तलीनः किमु सेवतां जनः ।
दिवानिशं जीवितसंशयाब्धि को
जडोऽपि नाङ्गीकुरुते स्वरक्षणम् ॥७८॥

कथन्नु देवायतनानि सर्वतो
विलुप्तघण्टारणितानि साध्वसात् ।
निबद्धमौनानि भजन्तु वन्ध्यतां
विनष्टभाग्यानि यथाऽऽर्यसंस्कृतेः ॥७९॥

स्तवाय किं लब्धयथार्थसंस्तवो
जनो यतात्माऽपि निगृह्य चेतनाम् ।
श्रुतद्विषामासुर-वर्त्मवर्तिनां
यतेत यन्त्रोपमशब्दडम्बरैः ॥८०॥

अतोऽधिका का भुवनेषु दासता
यदार्यवाचोऽपि निरस्तकल्मषाः ।
सकल्मषानां शतजाल्मपद्धतिं
क्षमा विरोद्धुं न भिया मनागपि ॥८१॥

द्विषत्कशाघात - नियोजितात्मनां
स सूर्यचन्द्राग्निकुलाभिधाजुषाम् ।
जुगुप्सिता - ऽनार्यपदीयपद्धतिं
तुरङ्गमानामिव वीक्ष्य विव्यथे ॥८२॥

हतश्रियस्ते तमुपोढतेजसं
विसोढुमीशा न कुतोऽभिनन्दितुम् ।
तमीचराश्चारुमरीचि-मालिनं
द्विषन्ति घूकाः सहजं वियन्मणिम् ॥८३॥

विलोभिवेषाम्बरमण्डिताऽऽकृति-
र्वरेण्यचारित्र्यरुचं नृपस्य ताम् ।
निरीक्ष्य सामन्ततति: कुलस्त्रियं
हतत्रपा वारवधूरिवातपत् ॥८४॥

युगायितैकान्तनिशोऽनिशं हठा-
न्निराश्रय - स्तब्धजन-व्यथातुरः ।
प्रमाथि सन्धित्सु मनोऽरिमन्दिरे
धराभृदित्थं बहुशो निनिन्द सः ॥८५॥

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

मनोज्ञतल्पे परिरक्षितेऽधुना
महार्हभोगे सुकृतानुशंसिनि ।
निरस्तबाधे समये च साग्रहे
दरिद्रनिद्रे किमुपेक्षसे जनम् ॥८६॥

निसर्गशत्रोरपि वीक्ष्य मित्रता-
ममर्त्यसेव्यामपि मानसोत्तम ।
किमाधिभिर्दूषयसे स्वमन्त्रितं
दुराग्रहेणाग्रहवर्तिनं विधिम् ॥८७॥

जनेषु भावं परिपालयन्नपि
विशेषसत्त्वो दुरिताचलाशनिः ।
तथापि चिन्तापृतनाकदर्थिते
निरामयत्वे प्रबभूव न प्रभुः ॥८८॥

ध्रुवं मनःस्वास्थ्यपुरस्कृतं वपु-
र्बिभर्ति नैरुज्यफलं शरीरिणाम् ।
मनःप्रदेशान्तर - गूढवेदनां
शरीरमादर्शयतीव बिम्बिताम् ॥८९॥

द्विषामसूया प्रणयः सहायिना-
महेतुकल्याणधियः सदात्मनाम् ।
दुरन्तदिल्लीच्छलशङ्किनां भियो
गुरुं सतीर्थ्या इव तं प्रपेदिरे ॥९०॥

मुखान्मुखं लब्धपदा रुजः कथा
ततान सर्वासु दिशासु विस्मयम् ।
वनाग्निजिह्वेव शिवात्मनां भियं
शिवेतरार्णा दधती चिरोत्सवम् ॥९१॥

नरेन्द्रमार्गे कटुकण्टकं यथा
तमो विसर्पीव मनोज्ञमन्दिरे ।
दुरामयं तद् वपुषि व्यवर्धत
विरोधिहर्षैः स्वजनाऽऽधिभिः सह ॥९२॥

गलत्प्रभं वीक्ष्य विवर्णपाण्डरं
तदीयसौम्याऽऽस्यमनाश्रयास्थिराः ।
दिवानिशं तत्पदभाग्यङ्पक्तय-
स्तमोऽन्वभूवन् हृदि कुण्ठिता भटाः ॥९३॥

निगूढचेष्टोऽपि सपत्नभूपति-
र्न भावगुप्तिं क्षमते स्म शीलितुम् ।
तथापि नक्राश्रुमिषेण सत्वरं
शिवाय भैषज्यविदः समादिशत् ॥९४॥

विकासिहासोल्लसितान्तराऽपि या
कलङ्कयत्येव शुचा मुखं बहिः ।
स्वभावघोराऽपि वपुर्बिभर्ति सा
नरेशनीतिर्गणिका च मण्डितम् ॥९५॥

निदानभैषज्य - गुणोदितप्रथः
प्रलम्बिकूर्चान्तरितोदरस्थितिः ।
अथैकदा कोऽपि नृपानुमोदितो
भिषग्वरः पार्थिवपार्श्वमाश्रयत् ॥९६॥

असाधुचारोचितजिह्मदृष्टिना
शिरः सगूढं परिकम्प्य तत्क्षणम् ।
विविक्तवासे प्रथमो मनस्विनां
धराभृदित्थं जगदे गदारिणा ॥९७॥

शरीरदाहः श्वसितं विलम्बितं
निमित्तशून्यं हसितं स्मृतित्वरा ।
अमन्दकोपः सहसाऽक्षिमीलनं
विशेषतः स्वेदजलस्नुता तनुः ॥९८॥

मनोनिमित्ता वपुषो रुजो मुदो
वपुर्विकारा हि मनोऽनुवर्तिनः ।
मनोरथावाप्तिरतो भवत्कृते
निरामयत्वाय परं हि भेषजम् ॥९९॥

(क्रमशः)

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

पृथ्वीराजाख्यानकम्

— श्रीविश्वनाथ त्रिपाठी, साहित्याचार्यः —

(४)

संयोगिता-हरणम् , दिल्लीप्रस्थानञ्च

अद्यावधि पृथ्वीराजोपरि कस्यापि तत्रस्थस्य दृष्टिः नाकृष्टा। सर्वप्रथमं पितृव्येनैव कन्हरावेण तस्य भाले कुङ्कुमाक्षताः करे च वद्धं मङ्गलकङ्कणं विलोकितम्। आश्चर्यचकितेन तेन क्षणं मौनमालम्बितम्। कतिपय-क्षणादूर्ध्वं तेन पृष्टं यत् 'महाराज, कथमयं वैवाहिको वेषः ?' इति। पृथ्वीराजः सर्वं घटनाचक्रं यथाक्रमं निवेद्य तूष्णीमभूत्। कन्हेन क्षणं विचार्य कथितं यत् 'राजन्, वधूं शत्रोस्तत्पितुर्गेहे परित्यज्य गमनमस्माकं कृते सर्वथा धर्मविरुद्धम्। त्वरितं गच्छ, येन केनापि च उपायेन संयोगितामत्र समानय। इतो वयं गमनो-द्यमं रचयामः।

सामन्तानामपि ईदृशमेव अभिप्रायं विज्ञाय पृथ्वीराजः कन्हस्य निदेशं शिरोधार्य संयोगितामाहर्तुं प्रतस्थे। कतिपयैरेव क्षणैः स ताम् अश्वमारोप्य रोद्धृ-योद्धृवर्गं भिन्दन् स्वस्मिन् दले सम्मिलितः। युद्धं वेगेन आरब्धमासीत्। सामन्ताः अभितो निरुद्ध्य पृथ्वीराजं रक्षयन्तः तमादाय ततो निर्गन्तुम् अभि-लषन्ति स्म। किन्तु जयचन्द्रस्य गुर्व्याः सेनाया मुहुर्मुहुः आक्रमणेन ततः निस्सरणमार्ग एव न लभ्यते स्म।

इत्थं प्रचलति समग्रो दिवसो व्यतीतः। सायङ्काले च युद्ध-विरामः समभवत्। प्रथमदिनीये एव सङ्ग्रामे पृथ्वीराजस्य प्रमुखाः सप्त सामन्ताः वीरगतिमापुः, येषु गोयन्दरावः, चन्द्रसेन पुण्डीरः, दाहिमा नरसिंहः, कूरं-भरावादयः आसन्। रात्रौ सामन्तैः मन्त्रणां कृत्वा निर्धारितं यत् एकाकी राजा एव अस्मान् परित्यज्य दिल्लीमभिगच्छतु इति। किन्तु पृथ्वीराजेण एतत् न स्वीक्रियते स्म। अन्ततः चन्दवरदायिना बहुशो बोधितः अनुनीतश्च सः कथञ्चित् दिल्लीगमनं स्वीच-कार। प्रातरेव जयचन्द्रस्य महती सेना तत्स्थान-माचक्राम, सामन्तैश्च सह पृथ्वीराजो दिल्लीं प्रतस्थे।

सामन्तानां शौर्यम्, दिल्ली-परावर्तनञ्च

अस्मिन् युद्धे राज्ञ एकैकशः सामन्ताः तं प्रणम्य शत्रुसमूहे संपतन्ति स्म। तस्य च वीरतां विलोक्य महत्तराः वीरा अपि अकम्पन्त, सेना च रुद्धगति-रजायत। एवं काका कन्ह, अत्ताताई, अल्हनकुमार, बड़गुज्जर, निड्डुररायादयो वीराः क्रमशः अच्छि-द्यन्त अम्रियन्त च। पृथ्वीराजश्च अक्षुण्णं देहल्य-भिमुखं जगाम। नरसिंहः चतुरः क्रोशान्, बड़गूजरः पट्क्रोशान्, निड्डुरः अष्टौ क्रोशान्, छगनः षट्-क्रोशान्, कन्ह अष्टौ क्रोशान्, अल्हनकुमारो द्वादश क्रोशान्, अचलेस-बाघरायौ प्रत्येकं क्रोशत्रयम्, बींझराय-सलषौ च षोडश क्रोशान् एवम् लष्पन-पहाड़-रायौ च तावतः क्रोशान् यावत् क्रमशो युद्ध्यमानाः पृथ्वीराजम् अग्रे सारयन्त आसन्। सूकरक्षेत्र-(सोरों) सविधे समागते राज्ञि 'जंघाल'-योगिना

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

शत्रोराक्रमणतो राजा रक्षितः। अस्मिन्नवसरे भीषणं युद्धं कृत्वा अन्ते सोऽपि योगी वीरगतिं लेभे। अन्तिमदिवसस्य युद्धम् एतादृशं भयङ्करम् अजायत यत् सर्वतः 'मारय, मारय' इत्येव ध्वनिः श्रूयते स्म। केवलं होराद्वयघटिते युद्धे सप्तसहस्रादपि अधिकानां वीरशवानां राशिः सङ्घट्टिता। एतादृशं भीषणतरं सङ्गरं विलोक्य संयोगिताया अपि नेत्राभ्याम् अश्रूणां प्रवाहः प्रादुरभवत्। पृथ्वीराजसङ्गिनीं स्वां दुहितरम् अतितरां खिन्नां विलोक्य जयचन्द्रस्य युद्धोन्मादः शमितुं प्रावर्तत। विलोक्य स मनसि विचारितवान् यत् नैकैः राजभिः प्रज्वालितो युद्धाग्निः संप्रति प्राप्तपूर्णाहुतिः किल। पृथ्वीराजोऽपि स्वराज्यसीम्नि प्रविष्टः, अतोः युद्धविराम एव वरम्। इत्थं विचार्य युद्धं च निरुद्ध्य कुलपरम्परानुसारं वधू-वरयोः प्रदक्षिणां कृत्वा जयचन्द्रः अवदत्—'पुत्रि, त्वां चौहानवंशीयाय पृथ्वीराजाय समर्पयन् अहमत्र दिल्लीनगराय स्वीयां प्रतिष्ठामपि समर्पये' इति।

अथ जयचन्द्रः कान्यकुब्जाभिमुखं परावर्तत। पृथ्वीराजश्च संयोगितया सह दिल्लीनगरम् अभ्याजगाम। तस्मिन् दिने दिल्लीनगरे चतुश्चत्वारिंशच्छिबिकाः अवतीर्णाः, यासु एकस्यां संयोगिता वधू: निषण्णा आसीत्, अपरासु च आहताः सामन्ताः। युद्धात् परावृत्त्य कान्यकुब्जं समागतो जयचन्द्रः ततः पुरोहितेन सह वैवाहिकान् संभारान् सम्प्रेष्य संयोगितायाः विवाहविधिं निरवर्तयत्। एवं प्रमुखानां चतुःषष्टिसंख्यकानां सामन्तानां बलिदानेन जयचन्द्रस्य नगर-राजसभादर्शनेहां प्रपूर्य तत्पुत्रीं संयोगितां च परिणीय पृथ्वीराजो दिल्लीम् आजगाम।

शक्ति-परीक्षा, धीरस्य प्रतिज्ञा च

संयोगिता-विवाहानन्तरं पृथ्वीराजस्य कृते सर्वं राज्यकार्यं समाप्तप्रायं समभवत्। अहर्निशमेव सः संयोगितायाः अवरोधे एव केलिगृहे निवसन् आसीत्। कैमासस्य हत्यायाः तथा संयोगितायाः आहरणे च शिरोदातॄणां स्वाप्तजनानां स्मृतिः प्रतिक्षणं तं दूनमानसम् अकरोत्। अधुना परिगणिताः विरला एव सामन्ताः तत्सहकारिणः शिष्टाः। तेष्वपि केचन वृद्धाः सञ्जाताः, कियन्तश्च पृथ्वीराजस्य अतिमात्रं विलासप्रियत्वम् उच्छृङ्खलत्वं च विलोक्य दिल्लीनगरतः अपसृताः।

सर्वमिदं विलोक्य पृथ्वीराजः शक्तिपरीक्षणाय अष्टधातुमत्रम्, अष्टमुष्टिव्यासमेयं स्तम्भमेकं निर्माययित्वा उद्घोषयत् यत् यः कोऽपि एतम् शक्त्या छेत्स्यति, मुष्टिभिः पातयिष्यति वा, स सर्वश्रेष्ठवीरसामन्तपदम् अधिगमिष्यतीति।

अस्याः घोषणायाः राज्ये साधीयसी प्रतिक्रिया समभवत्। शनैः शनैः राज्ये सुव्यवस्था प्रतिष्ठातुं प्रावर्तत। पूर्ववत् वीरयुवकानां मण्डलानि सम्मुखीभूतानि। किन्तु कोऽपि पणममुं पूरयितुं न शशाक। सहयोगिनः सामन्ताः अपि पणस्यास्य पूरणे आत्मनः क्षमतायां सन्दिहाना एव अभवन्। एतादृशीमवस्थां विलोक्य पृथ्वीराजः स्वयमेव पणपूरणाय तत्रावतीर्णः। अश्वमारूढः स शक्त्या स्तम्भम् अच्छिनत्, किन्तु अश्वस्य तीव्रगत्या तां शक्तिं निस्सारयितुं नाशकत्। राज्ञः असामान्यं पराक्रममसुं दृष्ट्वा सर्वे 'साधु साधु' इति ऊचुः।

अधुना एक एव पणोऽवशिष्टः। अन्तःप्रविष्टायाः शक्तेः साहाय्येन कोऽपि स्तम्भं पातयितुं शक्तिं ततो निस्सारयितुं वा न शशाक। अत्रान्तरे तत्र चन्द्रसेनपुण्डीरस्य पुत्रो धीरपुण्डीरः समागतः। तेन

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

पृथ्वीराजस्य पणोंऽयं संपूरितः। स्तम्भं पातयित्वा ततः शक्तिं च निस्सार्य सः पृथ्वीराजाय प्रायच्छत्। सहैव सः युद्धे गोरिणं ग्रहितुमपि प्रतिजज्ञे। वृत्तमिदं चामण्डराय-परमारजैतरावाभ्यां न रोचते स्म। तथा चामण्ड-धीरयोः परस्परं रोषपूर्णानि उत्तर-प्रत्युत्तराण्यपि पृथ्वीराजस्य सम्मुखे समजायन्त। सदैव एकसूत्रे आबद्धेषु सामन्तेषु इदानीं परस्परम् ईर्ष्याभावः प्रादुरभवत्। ईर्ष्यायाः परिणतिः एतावतीं कोटिं गता यत् आश्विने जालन्धरदेव्याः दर्शनार्थं जालन्धरं गच्छतो धीरपुण्डीरस्य प्रतिज्ञामिमां स्वगुप्तचरद्वारा जैतरावः शाहगोरिणे असूचयत्।

धीरपुण्डीरस्य बन्धनम्

चामण्ड-जैतरावयोः सूचनानुसारं गोरिणः कूटचक्रं साफल्यम् अवाप। कियत्कालपूर्वं पृथ्वीराजेण अपमानितस्य कांगुराधिपतेः हाहुलीरावहम्मीरस्य सहयोगोऽपि गोरिणा निरायासं लब्धः। देव्याः दर्शनपूजनादिकं विधाय धीरः कस्मिंश्चन प्रस्तरखण्डे शयान आसीत्। पार्श्वे एव बैजलनामा तदनुचरोऽपि आसीत् यो हि धीरस्य विश्वस्ततमः सेवको यस्य च क्रोडे क्रीडन् धीरः शैशवं यापयामास। शून्या निशा नीरवा आसीत्। धीरं शयानं विलोक्य बैजलः उत्थाय उपविष्टः। तेन चतुर्दिक्षु दृष्टिः पातिता। अकस्मात् पार्श्ववर्तिनः वृक्षसमूहात् निःसृत्य कतिपये सैनिकास्तं विवशमकार्षुः। प्रतिरोधाय चेष्टमानः सः यावत् धीरम् अवबोद्धुम् इच्छति, तावदेव तस्य शिरसि किञ्चिद् गुरुतरम् वस्तु पतितम्, येन स निश्चेष्टो भूत्वा भूमौ पपात।

इतः गहन निद्रायां मग्नः धीरः स्वप्नलोके स्वीय-प्रतिज्ञापूर्तिकर-क्रमिकघटना-परेषु प्रातिभासिकचित्रेषु विहरन् आसीत्। अकस्मादेव सर्वाणि तानि चित्राणि त्रुटितानि। अभ्यासवशात् हस्तौ पार्श्वयोः प्रसृतौ अभूताम्, किन्तु तत्र सः शस्त्राणि नालभत। मुष्टानि आसन् खलु तानि। स चकितः सन् उदतिष्ठत्।

अत्रान्तरे तेषु तेषाम् अन्यतमेन उक्तम्—'अस्माभिः त्वं बन्दीकृतोऽसि। इतस्ततः किञ्चिदपि कर्तुं मा विचारय। त्वरितं चल गजमारुह्य अस्माभिः सह।' 'कुत्र तातार खाँ ?' इति धीरेण पृष्टम्। तातारः अवदत्—'सुलतानस्य समीपम्, यं हि युद्धे ग्रहीतुं त्वं प्रतिज्ञातवानसि।' धीरेणोक्तम्—'साधु! दृष्टं पौरुषं शयानं मां बध्नतस्तव! इदानीं ते शाहमपि अवलोकयामि कियत्पौरुषवान् अस्ती'ति।

अन्धकारमय्यां तस्यां निशायां ते दैत्याः धीरमादाय शाहगोरिणः सविधे प्रस्थिताः। प्रस्तरेण हतं धीरसेवकं बैजलं विसंज्ञितं दृष्ट्वा मृतं मत्वा शत्रुसैनिकैः स समुपेक्षितः। अथ संज्ञामवाप्य स प्रच्छन्नरूपेण वृक्षान्तरितो भूत्वा सर्वां वार्तां शुश्राव। तदनन्तरं स देवी मन्दिरं गतः।

(क्रमशः)

—:※:—

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

अखिल-भारतीय-धार्मिकाध्यात्मिक-संस्कृतविद्यापीठस्य

परीक्षा-फलम् : १९६७ वर्षस्य

श्री भारतधर्म-महामण्डलद्वारा सञ्चालितस्य अखिलभारतीय-धार्मिकाध्यात्मिक-संस्कृतविद्यापीठस्य १९६७ ईशवीयवत्सरस्य परीक्षाफलं तदीयपरीक्षामन्त्रिणा प्रेषितं निम्नलिखितं वर्तते ।

★

प्रथमा परीक्षा

क्रमाङ्कः नाम

व्याकरणम्

प्रथम श्रेणी

७ भोलानाथ उपाध्याय

द्वितीय श्रेणी

५ हरिहरप्रसाद पाण्डेय
११ कृष्णकिशोर पाठक

तृतीय श्रेणी

४ कृष्णकुमार पचौरी
९ सरस्वती देवी
१० सुधीन्द्रकुमार

वेदः

द्वितीय श्रेणी

१२ रामप्रसाद सारस्वत
१४ रामप्यारे पाण्डेय

तृतीय श्रेणी

१३ विश्वनाथ दूबे

कर्मकाण्डम्

द्वितीय श्रेणी

१५ मथुरालाल शर्मा

क्रमाङ्कः नाम

धर्मशास्त्रम्

द्वितीय श्रेणी

१७ रामेश्वर पाण्डेय
१८ राजकिशोर पाण्डेय

साहित्यम्

प्रथम श्रेणी

२५ गुणवन्तराय जोशी
२६ भगवान जी डोबरिया
२७ दुर्गा बहन
२८ बृजलाल जोशी
२९ निरञ्जन जोशी
३० जयसुखलाल जोशी
३३ हरिगोविन्द पाण्डेय
११३ यशोमती देवी

द्वितीय श्रेणी

२० मधुसूदन पाण्डेय
२२ चन्द्रफूल मिश्र
३१ सच्चिदानन्द पाठक

तृतीय श्रेणी

२३ धनराजसिंह उपके

क्रमाङ्कः नाम

हिन्दी

द्वितीय श्रेणी

४३ जयगोविन्द मिश्र
४४ दयानन्द पण्डित
५२ कनकराम
५५ नारायणदास वैष्णव
६१ मनोमोहन दास
६२ उपेन्द्रचन्द्र दास
६५ चैनसिंह

तृतीय श्रेणी

३५ मंघाराम
३६ महादेव
३७ अमोलख दास
३९ रामउदय प्रसाद
४० नरसिंह गोविन्दराव
४१ नारायण पाठक
४५ बृजभूषण सिंह
५० भूपसिंह
५१ मंगलूराम सिंह
५४ पुनीतराम
५६ खुशहालमणी
६० वंशीमोहन दास

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

मध्यमा परीक्षा

क्रमाङ्कः नाम

व्याकरणम्

प्रथम श्रेणी

९१ तुलसी पाठक
९२ धीरेन्द्रनाथ मिश्र
९५ महेन्द्रनाथ पाठक
९८ शिवनन्दन पाण्डेय
९९. शिवदत्त मिश्र

द्वितीय श्रेणी

९३ नर्मदेश्वर मिश्र
९४ गयादत्त मिश्र
९७ भरतकुमार तिवारी

कर्मकाण्डम्

द्वितीय श्रेणी

१०७ सुरेशप्रसाद पाठक
१०८ दिनेशप्रसाद पाठक

पुराणम्

प्रथम श्रेणी

१०९ काल्लूराम व्यास

ज्यौतिषम्

तृतीय श्रेणी

११० शम्भुप्रसाद भारद्वाज

धर्मशास्त्रम्

प्रथम श्रेणी

११२ रामेश्वर सिंह
११४ राजेन्द्रप्रसाद सिंह

क्रमाङ्कः नाम

द्वितीय श्रेणी

११३ रामवचन तिवारी

साहित्यम्

प्रथम श्रेणी

११६ रामनरेश तिवारी
११८ रामचरित्र तिवारी
१२३ सीताराम पाठक
१२७ विद्याधर उपाध्याय
१२९ रामकिशोर
१३५ प्रद्युम्न पाण्डेय
१३७ अभिमन्यु द्विवेदी
१४० गोपाल पाण्डेय
१४३ नवनीतलाल जोशी

द्वितीय श्रेणी

११५ राजेन्द्रप्रसाद तिवारी
११७ सन्तबख्श सिंह
११९ हरिनाथ दास
१२० रामसुचित यादव
१२१ इन्द्रा खरे
१२२ कल्लूप्रसाद
१२४ मातावदल पाण्डेय
१२५ केदार पाण्डेय
१२६ कमलेश्वर पाण्डेय
१३२ चन्द्रदेव पाण्डेय
१३९ किशनलाल व्यास

क्रमाङ्कः नाम

१४१ बाबूराम दीक्षित
४३२ रामदुलारी देवी

हिन्दी

प्रथम श्रेणी

१४७ दिनेश्वरप्रसाद पाण्डेय
१४८ वकील सिंह
१४९ कुमारी कलावती सिंह
१५० माँगूसिंह राजपूत
१६६ हरिनाथ यादव
१६७ कपिलदेव तिवारी
१७२ ओमनारायण माथुर
१७३ कीर्तिप्रसाद जैन
१८१ रुद्रदत्त पाण्डेय

द्वितीय श्रेणी

१५३ प्रेमनारायण शर्मा
१५४ श्रीकान्त मिश्र
१६४ त्रिलोकीनाथ श्रीवास्तव
१६५ योगेन्द्र पाण्डेय
१६८ कुशालचन्द्र
१६९ विष्णुदेव तिवारी
१७१ मुलखराज
१७७ रामयश पाण्डेय
१८२ शकुन्तला बाई
१८३ शान्तिबाई

तृतीय श्रेणी

१७४ दिवाकरप्रसाद श्रीवास्तव

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

शास्त्री परीक्षा

क्रमाङ्कः नाम

व्याकरणम्

द्वितीय श्रेणी

२३३ गणेशदत्त मिश्र

वेदः

द्वितीय श्रेणी

२३८ देवकरण शर्मा

कर्मकाण्डम्

द्वितीय श्रेणी

२३९ रामनाथशर्मा छकड़े

पुराणम्

प्रथम श्रेणी

२४१ ऋतुराज उपाध्याय दाहाल
२४२ हीराप्रसाद उपाध्याय

साहित्यम्

प्रथम श्रेणी

२५१ ब्रह्मस्वरूप शुक्ल
२५२ राजकुमार शुक्ल
२५४ तपेश्वर पाण्डेय

क्रमाङ्कः नाम

२६२ रामकृष्ण पुरोहित
२६३ सत्यदेवशर्मा खनाल
२६४ शुभराज अकेला
२६७ शम्भुप्रसाद शर्मा
२६८ भामचन्द शर्मा
२६९ सोमदत्त शर्मा
२७५ सर्वजीत पाण्डेय
२७६ रामसजीवन मिश्र

(सर्वप्रथमः)

२८४ नरेन्द्रदेव शर्मा

द्वितीय श्रेणी

२४४ रजनीकान्त पाठक
२४५ आनन्दनाथ मिश्र
२४९ कुमारी आशारानी शर्मा
२५० कालीशंकर शुक्ल
२५३ परशुराम सिंह
२५५ गयाप्रसाद पाण्डेय
२५६ वागीश्वरीदत्त पाण्डेय
२५७ राजेन्द्र तिवारी

क्रमाङ्कः नाम

२५८ रामजीत महतो
२६५ कपिलेश्वर पाठक
२७० जैनेन्द्रकुमार पाठक
२७४ रामगोबिन्द चौबे
२७७ मतीउल्ला सिद्दिकी
२७८ उमराव तिवारी
२८७ रामकुमार शर्मा

हिन्दी

प्रथम श्रेणी

२९० गौरांग बहादुर

द्वितीय श्रेणी

२९२ हरिशंकर शर्मा
२९३ प्रकाशचन्द्र शंखधार
२९४ अतरसिंह
२९६ रामखेलावन अग्रवाल
२९७ सरोजबाला भोला
२९९ कृष्णादेवी
४५० कमलप्रसाद

आचार्य परीक्षा

कर्मकाण्डम्

प्रथम श्रेणी

३६७ गयाप्रसाद मिश्र

ज्यौतिषम्

प्रथम श्रेणी

३६९ रामनन्दन प्रसाद
३७१ सच्चिदानन्द मिश्र

द्वितीय श्रेणी

३७० चन्द्रिकाप्रसाद पाठक
३७२ राजकान्त झा

धर्मशास्त्रम्

प्रथम श्रेणी

३७६ सूर्यप्रसाद मिश्र
३७७ राधेश्याम मिश्र

द्वितीय श्रेणी

३७८ दिगम्बर झा

साहित्यम्

प्रथम श्रेणी

३७९ ब्रह्मप्रकाश सारस्वत
३८३ रुद्रप्रसाद त्रिपाठी
४४१ योगेन्द्र पाण्डेय

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

क्रमाङ्कः नाम

द्वितीय श्रेणी

३८० सीताराम वैद्य
३८१ युगलकिशोर त्रिपाठी
३८२ कामता पाठक
३८४ किशोरी देवी

क्रमाङ्कः नाम

३८६ रामनरेश मिश्र

हिन्दी

प्रथम श्रेणी

३८८ कृपाशंकर सिंह
३९६ गयाप्रसाद श्रीवास्तव

क्रमाङ्कः नाम

द्वितीय श्रेणी

३८७ जनार्दन द्विवेदी
३८९ हरिशंकर चतुर्वेदी
३९२ नामवरप्रसाद यादव
३९३ रामसुख त्रिपाठी
३९४ रामवचन सिंह

१९६७ वर्षीयम् आयुर्वेदविषयस्य परीक्षा-फलम्

प्रथमा परीक्षा

द्वितीय श्रेणी

६८ मोतीलाल
७० शान्तकुमार श्रीवास्तव
७४ शिवराम मिश्र
७७ शालिग्राल गोस्वामी
८८ विजयलक्ष्मी सारस्वत

तृतीय श्रेणी

६६ मूलप्रसाद काछी
६७ वारेसिंह ठाकुर
६९ राघवेन्द्र सिंह
८७ पूर्णचन्द्र सुन्दरियाल

मध्यमा परीक्षा

द्वितीय श्रेणी

१८४ रमेशचन्द्र रावत
१९० चन्द्रशेखर चतुर्वेदी
१९७ कनौजीलाल मराल
१९८ त्रिभुवननाथ पाठक
१९९ बाबूराम
२०१ धर्मनारायण पाण्डेय
२०२ रामावतार शर्मा
२०४ केशवप्रसाद मिश्र
२०५ कैलाशनारायण द्विवेदी
२०६ संग्राम सिंह
२०८ रामभरोसे पाल
२०९ श्यामविहारी चतुर्वेदी
२१५ शिवकुमार गुप्ता
२१७ परमकिशोर शर्मा
२२६ नारायणपुरी स्वामी
२३० सुमेरचन्द अग्रवाल
२३१ रामनरेश सिंह
४४० शंकरलाल गोस्वामी

तृतीय श्रेणी

१८५ श्रीचन्द्र रावत
१८७ रणवीर सिंह
१८८ वसंत सिंह
१९३ हीरा सिंह
१९५ कृष्णकुमार त्रिपाठी
१९६ रामशंकर
२०७ रामसनेही कुशवाहा
२१० मूलशंकर रावल
२१४ पद्मकान्त व्यास
२१६ रामस्वरूप शर्मा
२१८ अमर सिंह
२१९ राजेन्द्र सिंह
२२४ राजेन्द्रसिंह नेगी
२२५ रामनिवास सारस्वत
२२७ धर्मनारायण गौड़
४३६ खुशीलाल

शास्त्री परीक्षा

द्वितीय श्रेणी

३०३ गोपाल पाण्डेय
३०५ शिशुवरन लाल
३०६ रामबाबू
३०८ सुखवासीलाल कटियार
३१० बाबूसिंह
३११ लोवान सिंह
३१४ सतीशचन्द्र सैनी
३१६ कृपालसिंह सेंगर
३१७ मुस्ताक खाँ
३१८ गिरीशचन्द्र मिश्र
३१९ लालबहादुर
३२० शिवकुमार शुक्ल
३२२ कृष्णबिहारी
३२४ बाबूलाल त्रिपाठी
३२५ राधेश्याम द्विवेदी
३२६ श्यामसुन्दरलाल मिश्र
३३८ गुणधरलाल जैन
३४३ सावरसिंह नेगी
३४६ ऋषिराज पाण्डेय
३४७ सुखदेव प्रसाद
३४८ कालीदीन
३४९ दयाशंकर वर्मा
३५२ श्यामसुन्दर पाण्डेय
३५३ रामकृष्ण वर्मा

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

क्रमाङ्कः	नाम
३५५	देवीशंकर अवस्थी
३५६	विद्याधर मिश्र
३५७	ओमप्रकाश मिश्र
३५८	रामबाबू मिश्र
३५९	जगदीशचन्द्र कटियार
३६०	सूर्यदत्त मिश्र
३६४	रामगोपाल त्रिपाठी
३६५	एहसान अली
४३४	सियाराम द्विवेदी
४३७	उमाशंकर
४३८	चन्द्रप्रकाश सिंह

तृतीय श्रेणी

३०४	ब्रह्मदेवशर्मा 'च्यवन'
३०७	राजबहादुर
३२१	विशुनदयाल गुप्त
३४०	कलावती शर्मा

क्रमाङ्कः	नाम
३४५	हरिशंकर पाण्डेय

आचार्य परीक्षा

प्रथम श्रेणी

४३५	संकठाप्रसाद शर्मा

द्वितीय श्रेणी

३९७	हरिशंकर दीक्षित
४०१	कृष्णगोपाल
४०२	राजकुमार प्रसाद
४०४	विश्वम्भरनाथ द्विवेदी
४०५	रजपाल तिवारी
४०६	दयाराम
४०७	नरेशबाबू त्रिपाठी
४०८	दुर्गाशंकर महेता
४१८	लक्ष्मीशंकर औदीच्य

क्रमाङ्कः	नाम
४१९	आशाराम वैद्य
४२०	किशोरीलाल भक्त
४२१	हरविष्णुदास उदासीन
४२४	रमेशचन्द्र द्विवेदी
४२५	सुरेशचन्द्र द्विवेदी
४३१	रामसुन्दर पाण्डेय
४३९	पूरनचन्द पन्त

तृतीय श्रेणी

४००	गयाप्रसाद त्रिपाठी
४०३	राजकरण त्रिपाठी
४१०	हरिलाल पण्ड्या
४१२	वासुदेव दवे
४१४	सुमनलाल व्यास
४१५	जयशंकर व्यास
४१६	वासुदेव आस्तिक
४१७	दौलतराय महेता

विविधपरीक्षासु समुत्तीर्णानां छात्राणां नामावली

ज्यौतिष मध्यमा

११ शिवकुमार त्रिपाठी

हिन्दी मध्यमा

७५ हरिनन्दनप्रसाद सिंह

व्याकरण शास्त्री

३४ गोविन्द पाण्डेय

३५ जयवन्त पाण्डेय

साहित्य शास्त्री

६१ श्रीकान्त मिश्र

हिन्दी शास्त्री

९ पद्मा श्रीवास्तव

९१ श्रीमती विमलादेवी जैन

हिन्दी आचार्य

३९५ बीरबल कुर्मी

आयुर्वेद मध्यमा

१८६ देवेन्द्रपाल सिंह

२१३ गोपालभाई पटेल

आयुर्वेद शास्त्री

३०९ बलवीरसिंह भदौरिया

३१३ लालताप्रसाद

३२३ मोहनलाल शर्मा

३३९ उमाकान्त शर्मा

३४१ परमानन्द शर्मा

३५४ रामसजीवन

३६१ शंकरलाल दीक्षित

३६२ रामसरूप

रमाकान्त पाण्डेयः
परीक्षा-मन्त्री
अखिलभारतीय-धार्मिकाध्यात्मिक-संस्कृतविद्यापीठस्य
महामण्डल-भवनम्, जगतगंज, वाराणसी

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

श्रीभारतधर्म-महामण्डल-शास्त्रप्रकाश-विभागद्वारा प्रकाशितानि पुस्तकानि

१.	धर्म-कल्पद्रुम प्रथम खण्ड	२)
२.	,, द्वितीय खण्ड	१॥)
३.	,, तृतीय खण्ड	२)
४.	,, चतुर्थ खण्ड	२)
५	,, पंचम खण्ड	२)
६.	,, षष्ठ खण्ड	३॥)
७.	,, सप्तम खण्ड	२)
८.	,, अष्टम खण्ड	३॥)
९.	धर्म-कल्पद्रुम द्वितीयखण्डसहित, रायल एडी०	५)
१०.	प्रवीण दृष्टि में नवीन भारत प्र० द्वि० खण्ड	२)
११.	नवीन दृष्टि में प्रवीण भारत	१)
१२.	साधन-चन्द्रिका	१।॥)
१३.	शास्त्र-चन्द्रिका	१॥)
१४.	धर्म-चन्द्रिका	१।)
१५.	आर्य-गौरव	॥)
१६.	नीति-चन्द्रिका	॥)
१७.	धर्म-प्रश्नोत्तरी	।)
१८.	चतुर्दश-लोकरहस्य	।)
१९.	गीतार्थ-चन्द्रिका सजिल्द	३)
२०.	,, ,, अजिल्द	२॥)
२१.	सनातनधर्म-दीपिका	।॥)
२२.	धर्म-विज्ञान प्रथम खण्ड	५)
२३.	,, द्वितीय खण्ड	४)
२४.	,, तृतीय खण्ड	४)
२५.	सतीचरित्र-चन्द्रिका	२)
२६.	नित्यकर्म-चन्द्रिका	।)
२७.	धर्म-सोपान	।)
२८.	धर्मकर्म-दीपिका	।)
२९.	सदाचार-सोपान	–)
३०.	कन्याशिक्षा-सोपान	–)
३१.	ब्रह्मचर्य-सोपान	।)
३२.	साधन-सोपान	॥)
३३.	शास्त्र-सोपान	।)
३४.	उपदेश-पारिजात	॥)
३५.	कल्कि-पुराण	१॥)
३६.	पातञ्जल-योगदर्शन	३)
३७.	महामण्डल-रहस्य	१॥)
३८.	मन्त्रयोग-संहिता	१)
३९.	हठयोग-संहिता	॥)
४०.	तत्त्वबोध	=)
४१.	स्तोत्र-कुसुमाञ्जलि	।)
४२.	भगवद्गीता प्रथम खण्ड	१)
४३.	विष्णु-गीता	१)
४४.	सूर्य-गीता	॥)
४५.	शक्ति-गीता	१)
४६.	धीश-गीता	।॥)
४७.	शंभु-गीता	१)
४८.	संन्यास-गीता	१)
४९.	गुरुगीता	।)
५०.	कर्ममीमांसा-दर्शन प्रथम खण्ड	१॥)
५१.	,, द्वितीय खण्ड	२)
५२.	,, तृतीय खण्ड	५)
५३.	कर्ममीमांसा-दर्शनम् (संस्कृत)	२)
५४.	राम-गीता	२॥)
५५.	कहावत-रत्नाकर साधारण रायल	१०)
५६.	रामायण तुलसीकृत	१॥)
५७.	दैवीमीमांसा-दर्शन प्रथम भाग	३॥)
५८.	,, द्वितीय भाग	५)
५९.	त्रिवेदी सन्ध्या	।=)
६०.	गोव्रत-तीर्थमहिमा	॥)
६१.	मार्कण्डेय-पुराण प्रथम खण्ड	१)
६२	,, द्वितीय खण्ड	१)
६३.	,, तृतीय खण्ड	१)
६४.	ऋजु-पाणिनीयम्	।॥)
६५.	संगीत-सुधाकर	।)
६६.	पुराण-रहस्य	१॥)
६७.	संन्यासधर्म-पद्धति	१॥)
६८.	पातञ्जल-योगदर्शनम् (संस्कृत)	४)

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

पञ्जीकृतसंख्या एल० १८९७

सूर्योदयस्य नियमाः

पत्र-संहिता

१. 'सूर्योदय'-मासिकपत्रस्य वार्षिकं शुल्कं रूप्यकपञ्चकं वर्तते। धनादेश (मनीआर्डर) द्वारा तत्प्रेषणीयम्। बी० पी० द्वारा प्रेषणे ५० पणाः पृथक् प्रदेयाः स्युः।

२. आवर्षं गम्भीरसाहित्यसमन्विताः १२ अङ्काः प्रकाश्यन्ते। नवीनग्राहकत्वं प्रथमाङ्कतः (जनवरी-अंकतः) एव स्वीक्रियते। माध्यमिकेन केनापि अङ्केन ग्राहकत्वं न स्वीक्रियेत।

३. आंग्लमासस्य २६ दिनाङ्के 'सूर्योदयः' प्रकाशितो भवति, वारद्वयं संशोध्य ग्राहकेभ्यः स प्रेष्यते। अतस्तदलाभे पूर्वं स्वकीय-पत्रालयतस्तदनागमनस्य निश्चयं कृत्वैव १० दिनाङ्कानन्तरं वयं सूचनीयाः।

४. लेख-कवितादीनां भाषा संयता, सरला, शुद्धा च भाव्या। प्रकाशनीय लेखादीनां स्पष्टाक्षरैः कागेजस्यैकपृष्ठे एव लेखनमावश्यकम्। अस्वीकृता लेखादयः पोस्टविभागीय-चिटिका (टिकट) प्राप्त्यनन्तरं परावर्तयितुं शक्ष्यन्ते।

५. सम्पादकीय-विषयसम्बद्धे पत्र-व्यवहारे 'सम्पादकः' इति, व्यवस्थाविभागीय-पत्रव्यवहारे च 'व्यवस्थापकः' इति च स्पष्टं लेखनीयम्। तेन उत्तरलाभे मुधा विलम्बो न भवेत्।

विज्ञापन-शुल्कम्

सूर्योदये सुरुचिपूर्णं विज्ञापनं प्रकाश्यते। एकवारं तस्य प्रकाशनस्य शुल्कक्रमश्च अधोलिखितोऽस्ति। सार्वकालिकस्य दीर्घकालिकस्य च विज्ञापनस्य कृते विशेष-सौविध्याय पत्र-व्यवहारः कार्यः।

साधारणस्य प्रतिपृष्ठस्य	१००) रु०	साधारणस्य प्रत्यर्धपृष्ठस्य	६०) रु०
साधारणस्य चतुर्थांशपृष्ठस्य	३५) रु०	आवरण-चतुर्थपृष्ठस्य	२००) रु०
आवरण-द्वितीय-तृतीयपृष्ठयोः	१५०) रु०	प्रथमावरणपृष्ठे विज्ञापनं न स्वीक्रियेत।	

— सङ्केतः —

'सूर्योदय'-कार्यालयः, भारतधर्म-महामण्डलम्, जगत्गंज वाराणसी।

सम्पादकः, प्रकाशकः, मुद्रकश्च—गोविन्द नरहरि वैजापुरकरः,
श्रीभारतधर्ममहामण्डलम, जगतगंज, वाराणसी कैण्ट।
मुद्रण-स्थलम्—मनोहर प्रेस, जतनबर वाराणसी।

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

सूर्योदयः

भारतधर्ममहामण्डलस्य
मासिकं मुखपत्रम

वर्षम् ४१

अङ्कः १०

सम्पादकः
गो० न० वैजापुरकरः

अक्तूबर
१९६७

वार्षिक-मूल्यम्
५) रूप्यकाणि

अस्याङ्कस्य मूल्यम्
अर्धरूप्यकम्

स एकोऽहं दीपकोऽस्मि...!

स एकोऽहं दीपकोऽस्मि यं सदा निर्वेगवायुरस्ति निर्वापयितुमर्हः !
यदा सन्ध्यायाः सुरागः प्रतीच्या अधरान् प्रयाति ।
यदा तारा सभा गगने हसन्ती सस्मिता याति ॥
चन्द्रिका यद् भुवं याति, तदायं मम प्रभालेशो, गेहकलकलमाप्तुमर्हः !
नैव दिवसे स्मरति काचित् प्रियतमासु प्रेमिका माम् ।
गृहे निशि पत्नी पतिं पश्यति प्रियं प्रीत्या प्रिया माम् ॥
राजदुहिता सा हसति मां तदीयश्च स मधुरहासः मम मनो ह्यपहर्तुमर्हः !
भवति विरहाकुला प्रोषितभर्तृका काचिद् यदानीम् ।
ज्वलन् कुर्वं प्राप्तधैर्यां दुःखितां तां निशि तदानीम् ॥
कथय, सम्बन्धो मदीयः कस्तया सह ? येन कायं भवामि ज्वालयितुमर्हः !
गृहीत्वा जीवनपथे मम प्रकाशं पान्थः प्रचलति ।
प्रगर्ते प्रतिपदं पूर्वं निपतनादवहितो भवति ॥
निस्सरति नो कोऽपि शब्दो मम गिरो मौनोऽहमस्मि, समार्थो प्रज्वलितुमर्हः !
मयि धरणिमागते विगता युगा नो जाने कियन्तः ।
लुण्ठिता स्वे मया दृष्टा किरण-धन-कोपा हि हन्त ॥
स्वर्गमथ नरकं ह्यपरश्रम, रामराज्यस्य प्रभावम्, गतमभूवं द्रष्टुमर्हः !

—डा० हरिदत्त पालीवालः 'निर्भयः'

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

अनुक्रमः

प्रपानकम्	पत्रपुटम्	परिवेषकः
मातङ्गकन्यां मनसा स्मरामि	२७३	सङ्कलितम्
श्री महर्षि-ज्ञानानन्द-चरितम्	२७४	श्री विन्ध्येश्वरीप्रसादशास्त्री
'तयाऽस्माकं वरो दत्तः !'	२७५	सम्पादकीयम् (अग्रलेखः)
सर्वतः संस्कृतम्	२७९	श्री रामस्वरूपशास्त्री
सूर्योदयविषये अत्यावश्यकं किञ्चित्	२८०	सम्पादकीया टिप्पणी
(२) वृषाकपि-सूक्तेन विष्णुमाहात्म्यातिशयस्य नेन्द्रापेक्षया परवर्तित्वम्	२८१	श्री पूज्य करपात्रस्वामिनः
मानस-भारती	२८५	श्री जनार्दन गङ्गाधर ग्टाटे
शरन्नवरत्नमाला	२८६	श्री स्व० अनन्तरामशास्त्रिवेतालाः
दर्शनानुशीलन-समीक्षा	२८८	श्री श्रीकृष्णमणि त्रिपाठी
थाई-भाषायां संस्कृत-भाषायाः प्रभावः	२९१	श्री भिक्षुः शासनरश्मिः
(३६) क्षत्रपति-महाकाव्यम्	२९४	श्री उमाशङ्करशर्मा त्रिपाठी
(६) पृथ्वीराजाख्यानकम्	२९५	श्री विश्वनाथ त्रिपाठी

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

सूर्योदयः

श्रीभारतधर्ममहामण्डलस्य मासिकं मुखपत्रम्

रागद्वेषनिशाटनं विधुरयन् मोहं तमो नाशयन्,
तामिस्रं जडवादकैरवकुलं ज्ञानत्विषा ग्लापयन्।
विद्वत्कोकमशोकयन् नयसुधीरोलम्बमुन्मीलयन्,
सञ्जातः सुमनोमनो मधुरयन सर्वत्र सूर्योदयः॥

४३ वर्षं] वाराणसी, आश्विनः २०२४ : अक्तूबर १९६७ ई० [१० अङ्कः

मातङ्गकन्यां मनसा स्मरामि

अम्ब शशिबिम्बवदने कम्बुग्रीवे कठोरकुचकुम्भे !
अम्बरसमानमध्ये शम्बररिपुवैरिदेवि मां पाहि ॥ १ ॥
कुन्दमुकुलाग्रदन्तां कुङ्कुम-पङ्केन लिप्तकुचभाराम्।
आनीलनीलदेसा (?) मम्बामखिलाण्डनायकीं वन्दे ॥ २ ॥
सारेगमपधनिसतान्तां वीणासङ्क्रान्तचारुहस्तां ताम्।
शान्तां मृदुलस्वान्तां कुचभरतान्तां नमामि शिवकान्ताम्। ३ ॥
अरहट-तटघटितजुटी-ताडिततालीकपाट-ताटङ्काम् ।
वीणावादनवेला-कम्पितशिरसं नमामि मातङ्गीम् ॥ ४ ॥
वीणारसानुषङ्गं विकचमदामोद - माधुरीभृङ्गम्।
करुणापूरितरङ्गं कलये मातङ्गकन्यकापाङ्गम् ॥ ५ ॥
दयमान - दीर्घनयनां देशिकरूपेण दर्शिताभ्युदयाम्।
वामकुचनिहितवीणां वरदां सङ्गीतमातृकां वन्दे ॥ ६ ॥
माणिक्यवीणामुपलालयन्तीं मदालसां मञ्जुलवाग्विलासाम्।
माहेन्द्रनीलद्युतिकोमलाङ्गीं मातङ्गकन्यां मनसा स्मरामि ॥ ७ ॥

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

श्री महर्षि-ज्ञानानन्दचरितं महाकाव्यम्

— श्रीविन्ध्येश्वरीप्रसादशास्त्री —

८९. ऋषयः परिचालयन्ति बोधं
य: इहाऽध्यात्मतया प्रसिद्ध आस्ते ।
पितरस्त्वधिभूत - वस्तुजातं
त्रिदशा - श्चाप्यधिदैव - कर्मवर्गम् ॥

९०. ऋषयः परिरक्षितावबोधाः
पितरो - ऽवन्त्यधिभूत - शुद्धिमेनाम् ।
त्रिदशा जनकर्मरक्षकाः स्यु-
स्त्रितयी संविदधाति लोककार्यम् ॥

९१. ऋषयोऽवतरन्ति बोधहेतौ
त्रिदशाः कर्मकलाप - रक्षणाय ।
पितरोऽवतरन्ति नैव लोके
कृतिमाविश्य पितॄन् प्रकुर्वते स्वाम् ॥

९२. ऋषिनायक ईश्वरो महेशो
विधिरास्तेऽपि च नायकः पितॄणाम् ।
हरिरस्ति मतः सुपर्वनेता
त्रय एते परिचालयन्ति लोकान् ॥

९३. अजजात - तनूज - यादवाद्याः
श्रुतिसिद्धा जगदीश्वरस्य विष्णोः ।
अवतारतया प्रसिद्धिमाप्ता
अपि च व्यासमुखा महर्षिवर्याः ॥

९४. अथ धर्मसुतादयो - ऽमरेशा
नृप - दुर्योधन - कंस - रावणाद्याः ।
मनुजेन्द्र - विभूति - सम्भवास्ते
भुवने - ऽशान्तिविधान - तत्परा ये ॥

९५. त्रिविधं परिगीयतेऽत्र पिण्डं
सहजं मानवमद्भुतं च दैवम् ।
अधिगत्य सदैव विष्णुरीशो-
ऽवतरत्येष करोति लोकरक्षाम् ॥

९६. भुवि मत्स्यक-कूर्म-शूकराद्याः
सहजं पिण्डमवाप्य सम्भवन्ति ।
अवलम्ब्य च मानवं हि पिण्डं
विलसन्त्यत्र तु राम-कृष्ण-बुद्धाः ॥

९७. हयमस्तक - नारसिंह - मुख्याः
शुभमाश्रित्य च दैविकं हि पिण्डम् ।
निजभक्तजनार्ति - भञ्जनार्थं
दलितुं दानववर्गमाविरासुः ॥

९८. भगवानखिलेषु विग्रहेषु
ह्यवतीर्णो भवतीश्वरः परात्मा ।
ऋषयोऽथ सुरासुराश्च सर्वे
ऽवतरन्त्याश्रित - मानवीय - देहाः ॥

(क्रमशः)

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

सम्पादकीयम्

तयाऽस्माकं वरो दत्तः !

को नाम मतिमान् स्वीयराष्ट्रस्य स्वातन्त्र्यलाभेन परितोषं नासादयेत्? मूढः खगोऽपि स्वर्णपञ्जरस्थो दाडिम-खण्डानि खण्डयन् सुधासुशीतलं पाथः पिबन्नपि न तथा सन्तुष्यति, यथा उन्मुक्ते अनन्ते गगने उड्डीयोड्डीय नीवारान्नानि भक्षयन् शुष्कपर्णसंसर्ग-कटुकं जलं पिबन् इतस्ततः परिभ्रमन् तुष्यति। प्रायः सहस्राब्दसङ्गतायाः चिरसङ्गिन्या इव परकीयदासताया मोहं दुर्दम्य - स्वातन्त्र्यलालसा - विवेकेन विच्छिद्य अनवरत-शताब्दिव्यापिना स्वातन्त्र्यसङ्गर-तत्त्वज्ञानेन दास्य-विमुक्तिं गतोऽस्माकं देशः।

हं हो! विचारितमस्माभिर्यत् इतः परमस्माकं देशे अस्माकं शासनं भवेत्। यथा वयं वाञ्छाम-स्तथैव सर्वं सम्पद्येत। परं सर्वमेतत् रात्रिर्गमि-ष्यति……इति श्लोकायितमभवत्। राजनैतिक-स्वातन्त्र्यन्तु लब्धम्, परं तत्फलं जनसाधारणेन किमपि नाद्यापि आसाद्यते। तस्य सर्वतोऽनिवार्या आवश्य-कता भोजना-ऽऽच्छादन-निवास-चिकित्सानां सहज-सौलभ्यं नाम। तच्च स्वातन्त्र्यलाभकालतः प्रतिवर्षम् उत्तरोत्तरं दुर्लभतरं जायमानमनुभूयते तेन। नहि राजनीतिरेव जीवनस्य चरममुद्दिष्टम्। देशस्यास्य दृष्ट्या श्रेष्ठतममनतिशयितं समुद्दिष्टं मोक्षो नाम श्रेयोऽपरपर्यायः, इह च प्रेयोऽपरपर्यायोऽभ्युदयः। उभयमपि सर्वथा रिक्ततमायामुदरदरौ बुद्धौ न जातु आरोहति, दूरे तयोः साधनम्!

अद्य किल वस्तूनां मूल्यानि उत्तरोत्तरं गगन-चुम्बीनि जायन्ते। जनसाधारणस्य क्रयशक्तिः सर्वथा विलयं गता। वस्तून्यपि भ्रष्टाचारिणां कृपया अनावृत-हट्टेभ्यो दुर्लभतराणि जातानि, प्रच्छन्नहट्टेभ्यस्तानि पुनर्महता मूल्येन सुलभतराणि। भारतीयो मानवोऽद्य रात्रौ स्वप्ने एव आकण्ठभोजनस्य तृप्तिमनुभवति। वस्त्र-महर्घतया ग्रामकिशोरैः प्रायो दिगम्बर-सम्प्रदाय एवानुगृह्यते। अनतिविस्तृते सूर्यचन्द्रानाविद्धे स्वल्प-तमे भवने माता-पितरौ, पुत्र-स्नुषे, भगिनी-भ्रातरौ सममेव शेरते। कामं परिवारनियोजनौषधानि समा-दातारः पुरस्क्रियन्तु शासनेन, परं निष्किञ्चनानां क्षुधाज्वर-तापस्तु चितानलतापेनैव शाम्यति। इत्थं वर्तते जनसाधारणस्य अनिवार्याऽऽवश्यक-वस्तुविषये सौलभ्यमद्य!

प्रकृतिमाताऽप्यस्मासु नूनमद्य कुपिता खलु। नो चेद् अवर्षण-प्रस्तरवृष्टि-पूरादीनां विपलताततिः कथं तया वितन्येत स्वार्भकेषु? तथाकथित-साम्प्रदायिको-न्मादानाम्, भाविराष्ट्रनिर्मातॄणाम् औद्धत्यमयानां यद्वा-तद्वानाचाराणाम्, कथित-साम्यवादानुगृहीतानां श्रमिकाणां 'घेराव-बन्दी'प्रभृतीनां महामहाभियानानां प्रकाराः पुनर्न्यूनता पूर्तये नग्ना नरीनर्तन्त एव।

शासनयन्त्रमप्यद्य शतं सहस्रंकुर्वतामेव कुञ्जिकया प्रचलति। फलतो भ्रष्टाचाराऽनाचारादिकन्तु सर्वथा-ऽविमर्शनीयमेव। यैरेभिरुपायैः भूयसा धनमर्जितम्, तेषां क्रयशक्तिरुत्तरोत्तरं वर्धते। व्यावसायिकैश्च त एव सुदुर्लभतर - वस्तुवितरणेन समनुगृह्यन्ते। अन-पेक्षिता-ऽर्थसञ्चयेन तेषां विलासिता मत्कुणैरिव वर्धते, दशति च स्वभावसिद्धान् साधारणजन-दारादीन्।

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

संसर्गजेन रोगेणानेन निष्किञ्चनाः परं परिभूयन्ते ।

इत्थमुलूकवाहनाप्रियाणां कुञ्जिकानुग्रहेण प्रचलच्छासनमपि अहोरात्रं दलपरिवर्तन-मधुमेहेन हीनवीर्यं सत् सदैवाऽधैर्यं भजते। सन्ततं दोलाधिरूढं मनः साम्प्रतिकं किमपि शासनं दृढं मन्तुमेव न प्रभवति। एतादृशेन शासनेन राष्ट्र-गृहरक्षणाय भगवानघटित-घटनापटीयानेव नः परिपातु इत्येव वक्तव्यं भवति ।

सर्वेषां राष्ट्राणां वयमद्य याचकाः संवृत्ताः। ऋणमपि तेषां प्रत्यावर्तयिष्यामो न वेति सन्दिहानेभ्यस्तेभ्यो मुहुर्मुहुः विश्वास-प्रतिवचनदानस्य दौर्भाग्यमायाति अस्माकं शासयितॄणां ललाटे। स्वीयविलक्षणादर्शवादितया यथार्थतोऽस्माकं मित्राण्यपि सुदुर्लभानि जातानि। राष्ट्रसुरक्षा-सन्निवेशोऽपि यथा तथा प्रचलति। एवंस्थितौ साम्राज्यवादलिप्सूनां राष्ट्राणामत्र देशे गृद्ध्रदृष्टिर्न भवेदिति कथं नाम सम्भवि ? तेऽत्र समाक्रमितुं प्रतीक्षन्त एव ।

सर्वथा इत्थं सर्वसाधनविहीनेन भारतीय-प्रजाजनेन किमद्य करणीयमिति मीमांसायामिदमेव वक्तव्यं भवति यदात्मनः पूर्वेतिहासः समवेक्ष्यताम्। तदा किं तत्कालीनैः कृतम्, तद्विमृश्यताम्। यतो 'इतिहासः पुनरावर्तते' इति हि ऐतिहासिकानां दृढं मतम् ।

सन्दर्भेऽस्मिन् मार्कण्डेय-पुराणान्तर्गतं देवीमाहात्म्यमस्मासु धैर्याधानाय नूनं प्रभवति। तत्र उत्तमचरिते विलोक्यते यदमृतान्धसामपि देवानामेकदा शुम्भ-निशुम्भाभ्यामीदृशी एव दशा समानीता। भ्रष्टराज्या हृताधिकारास्ते सर्वे देवाः किंकर्तव्यविमूढाः समेत्य किं कार्यमिति विचारयामासुः। ततस्तेषां स्मृतिपथे इदं समागतम्—

तयाऽस्माकं वरो दत्तो यथाऽऽपत्सु स्मृताखिलाः ।
भवतां नाशयिष्यामि तत्क्षणात् परमापदः ॥ इति।

दैवैस्तदा सा परामम्बा सर्वस्याद्या महालक्ष्मीः विष्णुमाया स्तुता। स्तवन-समकालमेव आविर्भूय सा ममतामयी शुम्भ-निशुम्भवधेन देवान् समाश्वासितवती। तस्या इयं प्रतिश्रुतिर्जागर्ति—

इत्थं यदा यदा बाधा दानवोत्था भविष्यति ।
तदा तदाऽवतीर्याहं करिष्याम्यरिसंक्षयम् ॥ इति।

सौभाग्यादस्मिन्नेव मासि शरत्कालिकं नवरात्रं पर्व समापतितमास्ते, यद्विषये भगवत्यैव तया कथितम्—

शरत्काले महापूजा क्रियते या च वार्षिकी ।
तस्यां ममैतन्माहात्म्यं श्रुत्वा भक्तिसमन्वितः ॥
सर्वाबाधाविनिर्मुक्तो धनधान्यसुतान्वितः ।
मनुष्यो मत्प्रसादेन भविष्यति न संशयः ॥ इति।

अतोऽद्य सम्पादकीयेऽस्मिन् वक्तव्ये नवरात्रस्य तदधिष्ठात्र्याः परामम्बायाः स्मरणमेव अस्माभिर्निर्ध्यातम्। यतो हि तयैवोक्तम्—श्रुतं हरति पापानि इति। आशास्यते यत् पाठका अप्यस्मिन् अस्माकमुपक्रमे सङ्गताः मातुः समष्ट्युपासनां विधास्यन्तीति ।

वस्तुतः कालोऽयं परं रामणीयकः। वृष्ट्या सर्वाणि वस्तुजातानि प्रक्षाल्य पावितानि अद्य। स्वयमपि सा पावकवत् नः पाययित्वा स्वस्मिन् विलीना। तेन घनार्द्रताकृत-पङ्क-दौर्गन्ध्यादिकमपि सर्वतो विलुप्तम्। नवधान्यानि क्षेत्रे पक्वप्रायाणि विलसन्ति। एतादृशे शोभने काले शारदीयं नवरात्रमिदं समायाति। आश्विन-शुक्ल-प्रतिपत्तिथितो नवमीं यावत् नवसु रात्रिषु महाकाली-महालक्ष्मी-महासरस्वतीस्वरूपिणी त्रिगुणात्मिका परामम्बा श्रीदुर्गा सङ्कष्टहारिणी महालक्ष्मी श्रीचक्राधिष्ठात्री परिपूज्यते कालत्रयं भावुकैः साधकैः। तैरस्मिन् पर्वणि देवीमाहात्म्यं पठ्यते, घटं संस्थाप्य तत्र देवीं प्रतिष्ठाप्य तत्सान्निध्यप्रतिभूर्ज्ञानमयोऽखण्ड-

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

दीपश्च तथैव सह परिपूज्यते समुपासकैः। अष्टम्यां तस्यै बलिर्दीयते। सभक्ति नैकाः कुमार्यः प्रपूज्यन्ते। नवम्याश्च पारणया शारदीयं नवरात्रमिदं परिसमाप्य दशम्यां विजयाय प्रस्थीयते। कामं राज्ञां समराङ्गण-गमनं विजयप्रस्थापनकेन्द्रं भूयात्, परं जनसाधारणस्य विजयकेन्द्रं युद्धाङ्गणं स्व-स्वकर्तव्यक्षेत्राण्येव। भगवत्या उपासनेन लब्धशक्तिकास्ते ते साधकाः स्व-स्वकार्य-क्षेत्रेषु समवतीर्य नूनं साफल्यविजयमनुभवन्ति। नात्र काचिद्विचिकित्सा!

विचार्यमाणे नवरात्रस्यास्य प्रत्येकं वस्तु आत्मनि प्रभूतं रहस्यं बिभ्रति। नात्र तस्य सर्वस्य प्रकाशनावसरः, न वा तच्छक्यम्। अतः कतिपये एव विषयाः पराम्बावाङ्मयीन-समुपास्तिभावनया समुपस्थाप्यन्ते।

नवरात्रम्

सर्वप्रथमं नवरात्रमेवादीयताम्—'नवरात्र'-शब्द एव 'नवानां रात्रीणां समाहारः' इति समाहारद्वन्द्व-निष्पन्नो जगतः सर्जन-पालनरूपस्य शिव-शक्तिद्वन्द्वस्य गौरवमभिव्यनक्ति। घटे प्रतिष्ठापितायाः पराम्बायाः सन्निधौ नवरात्रीः यावत् अखण्डज्ञानदीप-प्रतीकरूपेण संस्थापितेन भौतिकदीपेन इदमेव आशास्यते यदस्माकं नवसंख्यासु रात्रेरन्धकारस्य आवरणं सर्वथा निरसितं भवेत्, ततः परं विजयदशमीरूपेण वयम् आत्म-विजयोत्सवं विधास्याम इति।

ज्ञातव्यमेतत्, नवसंख्येयम् अखण्डस्य अवि-कारिण एकरसस्य ब्रह्मणः प्रतीकमेव। नवसंख्याया गुणन-दशकरूपः 'पहाड़ा'-पर्यायः पठ्यताम्, चमत्कारश्च दृश्यताम्, सर्वत्र नवसंख्यैव जागर्ति—९; १८ (८+१=९); २७ (२+७=९); ३६ (३+६=९); ४५ (४+५=९); ५४ (५+४=९), ६३ (६+३=९); ७२ (७+२=९); ८१ (८+१=९)। अन्ततः सैव नवसंख्या 'खं ब्रह्म'-रूपतां याति।

नवसंख्याया माहात्म्यमिदं सर्वथा अतुलनीयम्। सामान्यतो वर्षदिनानि ३६० संख्यकानि भवन्ति। तानि च नवसंख्यायां विभज्येरंश्चेत् ४० संख्या समायाति, या च तान्त्रिकेषु 'मण्डला'पर्यायेण भृश-मनुगृह्यते। कदाचित् एतस्याः ४० संख्यायाः शून्यं व्यवकलय्य चत्वारि नवरात्राणि उपासकैः परिगृहीतानि स्युः। तानि च चैत्रे, आषाढे, आश्विने, पौषे च मासि जायन्ते। तेष्वपि चैत्रमासिकं वासन्तिकं नवरात्रम्, आश्विनमासिकं च शारदीयं नवरात्रं विशिष्येते। तयोरपि शारदीयं नवरात्रं स्त्रीलिङ्ग - शरत्-सम्बद्धत्वात् सर्वाधिक-गुणयोगीति वक्तुं शक्यते। शक्ति-शिवयोरद्वैतभावनया समुपासकाः पुनः नव-रात्रद्वयमपि समनुतिष्ठन्ति। सर्वेणाप्यनेन बुद्धिविलासेन शारदीयस्यास्य नवरात्रस्य श्रेष्ठतमत्वं सिद्ध्यति।

नवार्णमन्त्रः

एवमेव भगवत्याः प्रसिद्धो मन्त्रो 'नवार्ण' इति कथ्यते। तत्रापि नव अक्षराणि, नवसंख्या तत्रापि जागर्ति। स यथा—"ऐं ह्रीं क्लीं चा मु ण्डा यै वि च्चे" इति। नैरुक्तिक-प्रक्रियया मन्त्रस्यास्य अयमेवाभिप्रायो यत् 'वयं महाकाली-महालक्ष्मी-महासरस्वतीनामिकां मूर्तित्रयविशिष्टां पराम्बां सच्चिदानन्दात्मक-ब्रह्मस्वरूपां योगमायामाद्यां शक्तिमधिगन्तुं पूजा-ध्यानाद्युपायैर्जानीम इति।

नव-दुर्गाः

नवरात्रे पूजनीया दुर्गादेव्योऽपि नवैव। यथा—
१. शैलपुत्री, २. ब्रह्मचारिणी, ३. चित्रघण्टा,

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

४. कूष्माण्डा, ५. स्कन्दमाता, ६. कात्यायनी, ७. कालरात्रिः, ८. महागौरी, ९ सिद्धिदा चेति ।

शक्तेः सत्त्व-रज-स्तम इति गुणत्रयेन रूपत्रयम् । षट्सु ऋतुषु अनिवार्यत इयं पूज्यते स्म प्राचीनैः । सा हि षट्संख्या त्रिभिर्गुणमयीभिराभिर्गुणने १८ अष्टादशत्वं भजते । अस्याः संख्यायाः पूर्तिः वासन्तिक-शारदीय-नवरात्रयोः नव-नव-दिनैः क्रियते । अतो यथा शारदीयं नवरात्रं देवीप्रीतये समनुष्ठेयम्, तथैव वासन्तिकमपीति विवेकः । इत्थमत्र नवसंख्यामादाय भगवत्याः कतिपये विषया विवेचिता अस्माभिः ।

इतः परं भगवत्याश्चरित्रत्रयस्यापि स्वारस्यं प्रसङ्गेऽस्मिन्नवधेयम् । सामान्यतोऽस्मिन् चरित्रत्रये मधु-कैटभ-महिषासुर-धूम्रलोचनादि-शुम्भनिशुम्भान्ता दैत्या देव्या हता इति ऐतिह्यं निरूप्य ऋषिणा समाधिर्वैश्यः सुरथश्च राजा देव्युपासनाय प्रतिबोधितः, ताभ्यां च समर्च्य देवीं क्रमशो राज्ञा नष्टं राज्यं प्राप्तम्, अन्ते च स सावर्णिर्मनुरभवत्, वैश्यश्च ज्ञानमासाद्य मायाजालतो मुमोच इत्येव दृश्यते । परं त्रयाणामपि चरित्राणां पृथक् पृथक् तात्पर्यम् ऋषेरन्यदेवाभाति, यच्च भारतीय-संस्कृतेः परमेण तात्पर्येण सङ्गच्छते । तच्चेत्थम्—

प्रथमचरितेन ऋषिः स्पष्टमेवाभिव्यनक्ति यत् सर्वशक्तिसम्पन्नोऽपि भगवान् यदा स्वपिति, तदा असुरा उच्छृङ्खलमाचरितुं निर्भीका प्रवर्तन्ते । परमेशितुर्नाभिकमलस्थं ब्रह्माणमपि हन्तुमुद्यतौ तौ मधु-कैटभौ भवतः । परं यदा किल भगवान् प्रबुद्धोऽभवत्, तदा तयोः का गतिरभवदिति तु स्पष्टमेव । तत्र इदमपि सूच्यते यच्छारीरिकबलतो बुद्धिबलं ज्यायः । मदेन बुद्धिबलं नश्यन्ति । अत एव च ताभ्यां भगवान् वरयाचनाय वृतः । तेनैव च वरेण भगवता तौ हतौ । अतः शरीरबलेन सह बुद्धिबलमप्यावश्यकम् ।

मध्यमचरितेन समष्टि-सङ्कल्पशक्तेः सर्वकामधुक्त्वमभिव्यज्यते । देवैः सर्वैर्मिलित्वा अमोघाः सङ्कल्पाः कृताः, तेन तेषां समष्टिरूपा महिषासुरमर्दिनी शक्तिः प्रादुरभूत् । न केवलं सङ्कल्पशक्तिरेव, क्रियाशक्ति-प्रतीकरूपाणि स्व-स्वायुधान्यपि देवैस्तस्यै दत्तानि । ज्ञानशक्तिस्तु सर्वेषु आसीदेव । इत्थं ज्ञानेच्छाकृतिरूपायास्त्रिविधशक्तेः समष्टिमात्रया सहस्रशो महिषासुरादिसदृश-प्रबलतमान्तरायाणामपि सहजत एव व्यपनोदनं जायते इति सायुधं सर्वसाधनसम्पन्नं सर्वविधशक्तीनां सङ्घीकरणं कस्यापि कार्यस्य साफल्यमूलमिति ऋषिः सूचयति ।

उत्तमचरिते नैकः द्वौ वा असुरौ, अपि तु तत्र असुराणां सम्मर्द एव सम्मिलितः ।

एकैवाहं जगत्यत्र द्वितीया का ममापरा ।
पश्यैता दुष्ट मय्येव विशन्त्यो मद्विभूतयः ॥

इति देवीवचनानुसारम् एकस्या एव देव्याः पराशक्तेः नैका विभूतिरूपिण्यो देव्यः प्रादुर्भूय मदोन्मत्तान् तान् सर्वानसुरान् घातयामासुः । तत्र धूम्रलोचनोऽसुरः अज्ञानस्य प्रतीकम्, चण्ड-मुण्डौ राग-द्वेषौ, रक्तबीजो राजस-तामसवासनाः, शुम्भोऽहङ्कारः, निशुम्भश्च विषयासङ्गः । सद्बुद्धिरूपिणी दुर्गादेवी स्वीयैनैकैरंशैः आविर्भावितानां देवीनां साहाय्येन सर्वमेतत् अज्ञानविजृम्भितम् अनर्थजातं व्यपोह्य स्वस्याश्चितिशक्तेः प्रकाशं सर्वत्र विस्तारयामास । अज्ञानकार्याण्येतानि सर्वाणि न स्थास्नूनि । सद्बुद्धिः, चितिशक्तिरेव त्रिकालाबाध्या । अत एव ऐकान्तिकात्यन्तिक-श्रेयःप्रेयोऽभिलाषिभिः सैव सर्वदा समुपास्येति ऋषेर्वर्णनस्य परमं तात्पर्यम् ।

इत्थं प्रस्ताविते देवीमाहात्म्यविषये बहु वक्तव्यमवशिष्यते । तथ्यं पुनरिदमेव यज्जगतः शब्दार्थजातं

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

सर्वतः संस्कृतं संस्कृतम् !

जन्मतः संस्कृतं जातितः संस्कृतं गच्छतः संस्कृतं भक्षतः संस्कृतम् ।
निद्रिते संस्कृतं जागरे संस्कृतं संस्कृतं संस्कृतं संस्कृतं संस्कृतम् ॥ १ ॥
लेखने संस्कृतं वाचने संस्कृतं शिक्षणे संस्कृतं भाषणे संस्कृतम् ।
चिन्तने संस्कृतं वाचने संस्कृतं संस्कृतं संस्कृतं संस्कृतं संस्कृतम् ॥ २ ॥
खेलने संस्कृतं कूर्दने संस्कृतं भोजने संस्कृतं भाजने संस्कृतम् ।
पानके संस्कृतं स्नानके संस्कृतं संस्कृतं संस्कृतं संस्कृतं संस्कृतम् ॥ ३ ॥
हाटके संस्कृतं वाटके संस्कृतं गेहके संस्कृतं क्षेत्रके संस्कृतम् ।
वाहने संस्कृतं बीजने संस्कृतं संस्कृतं संस्कृतं संस्कृतं संस्कृतम् ॥ ४ ॥
मामके संस्कृतं तावके संस्कृतं नायके संस्कृतं पायिके संस्कृतम् ।
शासके संस्कृतं शासिते संस्कृतं संस्कृतं संस्कृतं संस्कृतं संस्कृतम् ॥ ५ ॥
गायने संस्कृतं वादने संस्कृतं नर्तने संस्कृतं चेष्टने संस्कृतम् ।
कल्पने संस्कृतं जल्पने संस्कृतं संस्कृतं संस्कृतं संस्कृतं संस्कृतम् ॥ ६ ॥
मन्दिरे संस्कृतं दैवते संस्कृतं पूजने संस्कृतं पूजिते संस्कृतम् ।
प्रार्थने संस्कृतं वन्दने संस्कृतं संस्कृतं संस्कृतं संस्कृतं संस्कृतम् ॥ ७ ॥
ग्रामके संस्कृतं नागरे संस्कृतं धार्मिके संस्कृतं चार्थिके संस्कृतम् ।
कामके संस्कृतं मोक्षके संस्कृतं संस्कृतं संस्कृतं संस्कृतं संस्कृतम् ॥ ८ ॥

— श्री रामस्वरूपशास्त्री —

[सम्पादकः—'बालसंस्कृत'स्य]

सङ्कल्प्य तद्वर्ण्येत, तदाऽपि साधनाल्पता न निवर्तेत। यतो हि तत्तत्त्वमेव वाचामगोचरमास्ते, यतो वाचो निवर्तन्ते अप्राप्य मनसा सह इति श्रुतेः। तथापि 'स्थाली-पुलाक'न्यायेन यावदत्र विवृतं तेनापि पराम्बायाः कर्तुमकर्तुमन्यथाकर्तुं समर्था शक्तिर्नूनं सुस्पष्टा जायते। वयमद्य भारतीया प्रजाः कथं निर्बलाः बलवत्साहाय्यविहीनाश्च स्म इति लेखारम्भे एव दर्शितम्। एवंस्थितौ अस्माकमिदमेव कर्तव्यं यत्सर्वथा भक्तिश्रद्धा-समन्वितैर्भूत्वा सा पराम्बा मुहुर्मुहुः स्मर्तव्या, यतो हि—

तयाऽस्माकं वरो दत्तो यथाऽऽपत्सु स्मृताखिलाः।
भवतां नाशयिष्यामि तत्क्षणात् परमापदः॥ इति।

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

'सूर्योदय'-विषये अत्यावश्यकं किञ्चित्

'सूर्योदय'स्य अगस्तमासाङ्कतः अष्टौ पृष्ठानि न्यूनीकृत्य चतुर्विंशतिपृष्ठात्मक एव मासिकोऽङ्कः प्रकाश्यते। वर्षचतुष्टयात् पूर्वमस्य अयमेव आकार आसीत्। परं केन्द्रीयशासनेन अनुदानक्रमः प्रारब्ध इति कृत्वा ततो विगत-जुलाईमासपर्यन्तं ३२ पृष्ठात्मकोऽङ्कः प्रकाशितः। अत्रान्तरे कर्गज-मुद्रणादि - व्यवस्था उत्तरोत्तरं महर्घतां गता, गच्छति च। शासकीयेऽनुदाने पुनरंशतोऽपि वृद्धिर्नाभवत्। मूल्यं दत्त्वा संस्कृतपत्र-ग्राहका विरला एव समुपलभ्यन्ते। शासकीयानुदानभाजो विद्यालया अपि—येषां सविधे प्रायो वर्षचतुष्टयैः 'सूर्योदयः' प्रत्यङ्कं नियमतः अमूल्य एव प्रेष्यते—संप्रार्थिता अस्माभिः यद् 'इतः परमस्य समूल्यग्राहकत्वं स्वीकर्तव्यम्।' परं तैरपि सर्वथा समुपेक्षितम्। विज्ञापनमपि पत्राय न मिलति। अस्यामपिस्थितौ श्री भारतधर्म-महामण्डलेन ३२ पृष्ठात्मकोऽस्य आकारः अक्षुण्णतया परिचालितः। किन्तु इतः परं तस्य कृते एतावत्प्रकाशनं दुर्वाह्यं जायते। यतो हि शासकीयं स्वल्पतममपि दीयमानमनुदानं न नियतम्। वर्षेऽस्मिंस्तु तस्य अद्यापि वृत्तमपि न श्रूयते। अत एव विवशतो महामण्डलसञ्चालकैः २४ पृष्ठात्मकः प्रत्यङ्कः कृतो विगता - ऽगस्तमासतः। नूनं वृत्तमिदं महद् दुर्भाग्यकरं संस्कृतप्रणयिनाम्। संस्कृतसमुन्नयनस्य आक्रोशं कुर्वतां शासकानां कृते तु परं लज्जास्पदम्!

वयमत्र केन्द्रीयसंस्कृतसमितेः संस्कृतशिक्षाविशेषाधिकारिणाम्, शिक्षामन्त्रिणाञ्च दृष्टिमावर्जयामो यद् भवतां शासने सूर्योदयस्य ईदृशी स्थितिः कथमपि न न भाव्या। ४३ वर्षीयं प्रत्रमिदम् निखिल-भारतीय-संस्कृत -मासिकपत्रेषु चिराय अतिशेते। अत्र प्रकाशिताः भारते सुख्यातानां विदुषां लेखाः प्रायो ग्रन्थकल्पाः संग्राह्याश्च जायन्ते। महत्त्वपूर्णा विशालकाया विशेषाङ्काश्चापि अनेन प्रकाश्यन्ते, ये किल तैनैव पञ्चमुद्रापरिमितेन वार्षिकमूल्येन स्थायिग्राहकेभ्यः प्रहीयन्ते। पत्रस्य योजना वर्तते यदन्यूनं ६४ पृष्ठात्मकेन प्रत्यङ्केन भाव्यम्, यत्र ३२ पृष्ठानि यावत् केवलं जागतिक-मासिकवृत्तसमीक्षणम्, गल्पसाहित्य - प्रकाशनम्, नवलेखकानां नव्यकवीनां च कृते रचनाशिक्षा, प्राकृत - पाली-पाठशिक्षा—एवमादिविषया एव सङ्कलयितव्याः। योजनयाऽनया संस्कृतभाषा-प्रचारदिशि महती प्रगतिर्भवेदित्यनेन आशास्यते। परं शासनस्य एतादृशेनास्य समुपेक्षणेन तु इयमपि भीतिर्जायते यद्यापि परमोदारतया महामण्डलं यावत्साहाय्यमस्मै ददाति, तदपि दातुं दौर्भाग्यान्मण्डलं न प्रभवेत्तदा प्राचीनतमस्य पत्रस्यास्य किं स्यात्?

अतः केन्द्रीय-शिक्षाविभागः, केन्द्रीयसंस्कृत-समिति-सदस्याः अध्यक्षाश्च, संस्कृतशिक्षाविशेषाधिकारी च सहैव प्रार्थ्यन्ते यदविलम्बं सूर्योदयस्य कृते समुल्लेख्यस्य स्थायिनोऽनुदानस्य व्यवस्थया पत्रमिदं समुज्जीव्य पूर्वोक्तयोजनायाः कार्यान्वयनाय प्रोत्साहनीयम्। प्रादेशिकशासनान्यपि, तत्रापि विशेषत उत्तरप्रदेशशासनं प्रार्थ्यते यत्तेनाद्यावधि पत्रस्यास्य कृते सहायता न प्रदत्ता। पत्रमिदं सामान्यजनवत् भिक्षापात्रं गृहीत्वा द्वारि द्वारि गमनम्, कूटचक्र-चालनम्, प्रचाराऽम्बरविस्तारणं वाऽनुचितं मनुते, न वा तत्र तदीया लेशतोऽपि आस्था! तदेतत्सर्वं विचार्य राष्ट्रमङ्गलविधातृभिः स्वयसेवायं तथा क्षिप्रं सम्भावनीयो यथाऽग्रिमाङ्कादेव न्यूनातिन्यूनमिदं पत्रं पूर्वाकारेण प्रकाशितं भवेत्। आशास्यते यत् सम्बद्धा अधिकारिणोऽत्र नूनमवधास्यन्तीति।

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

पूर्वतोऽनुवृत्तः

वृषाकपिसूक्तेन विष्णुमाहात्म्यातिशयस्य नेन्द्रापेक्षया परवर्तित्वम्

— श्री पूज्य करपात्रस्वामिनः —

(२)

अग्निः पृथिवीस्थानः वायुर्वेन्द्रो वाऽन्तरिक्षस्थानः सूर्यो द्युस्थानस्तासाम्। महाभाग्यादेकैकस्या अपि बहूनि नामधेयानि भवन्ति (७.५ नि०) इत्यत्र वायोरिन्द्रस्य चान्तरिक्षस्थानत्वमुक्तम्। अजस्य नाभावध्येकमर्पितम् (ऋ० सं० १०.८२.६), प्रजापतिर्वै त्रीन् महिम्नोऽसृजतान्गिं वायुं सूर्यम् (तै० सं० ४.२.१२), पृथिव्यसि जन्मना वशा साग्निगर्भमधत्थाः अन्तरिक्षमसि जन्मना वशा सा वायुं गर्भमधत्थाः द्यौरसि जन्मना वशा सादित्यं गर्भमधत्थाः (मैत्रायणी सं० २.१३.१५), प्रजापतिर्लोकानभ्यपतत्, तेभ्यो रसात् प्रावृहद् अग्निं पृथिव्या वायुमन्तरिक्षात् सूर्यं दिवः (छा० उ० ४.११.१.) इत्यादिवचनेभ्यो वायुरूपस्य इन्द्रस्यैव मध्यमान्तरिक्षस्थानत्वेन मध्यमत्वम्। अथातो मध्यस्थानां देवतास्तासां वायुः प्रथमगामी (१०.१ नि०), वायवा याहि दर्शतेमे सोमा अरङ्कृताः। तेषां पाहि श्रुधो हवम् (ऋ० सं० १.२ १) इत्यत्र वायोः स्तुतिमुदाहृत्य 'कमन्यमध्यमादेवमवक्ष्यत् मन्त्रदृक्' इत्युक्तं दुर्गाचार्येण। प्रसिद्धं हीन्द्रस्य मध्यमस्य सोमपानम्, तदर्थत्वात् सोमसंस्कारस्य अप्रसाध्यमन्यस्य। तस्मादिन्द्र एव वायुः। 'तस्येन्द्रस्य वायोरैन्द्रे एव सूक्ते।' इन्द्रस्य विशेषणत्वेन वायुशब्दः प्रयुक्तः।

आसस्राणासः शवसानमच्छेन्द्रं सुचक्रे रथ्यासो अश्वाः।
अभि श्रव ऋज्यन्तो वहेयुर्नू चिन्नु वायोरमृतं वि दस्येत्॥
(ऋ० सं० ६.३७.३)

एतदर्थस्तु—रथ्या अश्वाः। सुचक्रे रथे। योगार्थम् इन्द्रम् अच्छ शवसानम् अभिवलायमानमधिकबलमात्मानम्। आसस्राणाः आसस्रवांसः। नित्यमासर्पन्ति। एतान् युक्त्वा रथेऽस्माकं यज्ञं सोमपानाय आयाहि। ऋज्यन्तो ऋजुगामिनो भूत्वा श्रवः अन्नं सोमाख्यमेतस्माद् यज्ञे यत् उ चित् नवं पुराणञ्च। तत्पानाय इन्द्रमभिवहेयुः। नु क्षिप्रं यथा अस्य इन्द्रस्य वायोरिदममृतम् एष सोमभक्षो न विदस्येत नोपक्षीयेत। अविदामो अनुपक्षीणे एतस्मिन् सोमभक्षे अभिवहेयुरित्याशास्महे। नू चित् इति नवपुराणाभिधायकौ निपातौ। यः सोमो गृहीत्वा तत्कालमेव हूयते स नवः यः प्रातःसवने गृहीत्वा माध्यन्दिने सवने तृतीये सवने वा हूयते स पुराणः।

अस्मिन् मन्त्रे ऐन्द्रसूक्तमध्यपातित्वात् इन्द्रप्रधाने मन्त्रे यद्वाय्वभिधानं तत् नैघण्टुकमिति इन्द्रस्यैव विशेषणार्थं व्यञ्जनमात्रमित्येके। अपरे तु उभयप्रधाना इयमृक्। तत्पुनरयुक्तम्; निष्केवल्ये विनियोगात्। द्युस्थानासु देवतासु अश्विनोः प्रथमोल्लेखो यथा—'अथातो द्युस्थाना देवतास्तासामश्विनौ प्रथमागामिनौ (१२.१ नि०) इति। कुत एतत्प्राथम्यमित्याह—'आश्विने च स्तुतशस्त्रके कर्मणि प्रथममश्विनोः कालः सन्धौ। यद्यपि द्युस्थानासु देवतासु तयोरुल्लेखः, तथाप्येकोऽश्वी मध्यस्थानः, एको द्युस्थानो नैरुक्ता-

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

नाम्। तेन द्युस्थानमध्यस्थानत्वात् तयोरश्विनोरुपन्यासः।

न चैवं तयोर्भिन्नस्थानत्वेनैव उपदेशो युक्तः ; एकैकस्य तयोरश्विशब्दस्य पृथग्भावेन स्तुत्यभावाद् अश्विद्वन्द्वस्य चात्यन्तमवियोगात् 'नासत्यावि'ति पृथक् स्तुत्यभावात्। यद्यपि सत्यप्यवियोगे प्राथम्यात् प्रथमस्य समाम्नानं प्राप्तम् ; तथापि मध्यस्थानस्य हीयमानरूपत्वात् द्युस्थानस्य च वर्धमानरूपत्वात् द्युस्थानत्वेनैव उपदेशः।

अश्नुवाते सर्वं रसेनोदकेनैकः ज्योतिषाऽन्यः तौ कौ अश्ववन्तौ तावित्यौर्णवाभः। केचित्तु द्यावापृथिव्यौ। तौ द्योर्ज्योतिषा व्याप्नोति पृथिव्यन्नेन। अहोरात्रौ इत्यपरे। अहर्ज्योतिषा रात्रिरवश्यायैः। सूर्याचन्द्रमसौ इत्यन्ये। सूर्यो ज्योतिषा व्यश्नुते रसेन चन्द्रमाः। राजानौ पुण्यकृतौ इत्यैतिहासिकाः। ऊर्ध्वमर्धरात्रादुषःकालं यावत्तयोः कालः। ततःप्रभृति सन्धिस्तोत्रं पुरोदयादाश्विनम्। उदिते सौर्याणि स्तोत्राणि। यत्तमोऽनुप्रविष्टं ज्योतिषि तद्भागो मध्यमस्य रूपम्। यज्ज्योतिस्तमस्यनुप्रविष्टं तद्भागं तद्रूपमादित्यः। तावेतौ मध्यमोत्तमौ। तत्र—

वसातिषु स्म चरथोऽसित पेत्वाविवौ।
कदेदमश्विना युवमभि देवाँ अगच्छतम्॥
(निरुक्ते १२.२.१)

अर्थः—वसातिषु रात्रिषु युवां चरथः। असितौ पेत्वौ मेघाविव समानरूपौ। उषसि कथमपि मन्त्रदृशा लक्षितौ। कदेदमस्मत् कर्म प्रति आगतान् देवान् प्रति युवां अश्विनौ अगच्छतम् आगतवन्तौ स्थः तयोरुभयोरपि ऊर्ध्वमर्धरात्रात्। कालः, तयोः कर्माण्येकम्, तिरोअह्न्याः सोमाः आश्विनश्च द्विकपालः।

इहेह जाता समवावशीतामरेपसा तन्वा३ नामभिः स्वैः।
जिष्णुवमिन्यः सुमखस्य सूरिर्दिवो अन्यः सुभगः पुत्र ऊहे॥
(ऋ० सं० १.१८१.४)

अर्थः—इह मन्त्रे चोभयोः स्थानभेदादिकं स्पष्टम्। तदर्थस्तु—हे अश्विनौ युवाम् इह मध्यस्थाने इह च द्युस्थाने जातौ समवावशीताम् संस्तूयेथे। केन अरेपसा अपापया तन्वा। स्वैर्नामभिः स्वैः परमनाश्रित्य स्वनिमित्तैः। वाम् युवयोः अन्यः जिष्णुः नित्यमेव जेता। सुमुखस्य सूरिः सुमहतो बलस्य प्रेरयिता शत्रुषु। स च नान्यो मध्यस्थानात् दिवः अन्यः सुभगः पुत्रः। ऊहे उध्यते वायुनान्तिकम्। स च नान्यः सूर्यात्। एको वासात्य उच्यते एकश्च उषसः, पुत्रः उषसः, पुत्रेण सूर्येण सह समानख्यानादसंशयम् मध्यमो वासात्यो रात्रेः पुत्रः। स एव मध्यम इन्द्रः। तेन मध्यमेन इन्द्रेण इन्द्राणी सुपुत्रा। तत्स्तुतिरूपया माध्यमिकया वाचा च सुस्नुषा इति।

निरुक्तरीत्या अन्येऽपि मन्त्रा इह सूक्ते आदित्यपरत्वेन व्याख्याताः। तथा हि—

यदुदञ्चो वृषाकपे गृहमिन्द्राजगन्तन।
क१ स्य पुल्वघो मृगः कमगञ्जनयोपनो विश्वस्मादिन्द्र उत्तरः॥
(ऋ० सं० १०.८६.२२)

अर्थः—अत्रापि हे भगवन् वृषाकपे इन्द्र! यदा त्वमुदञ्चः उदङ् एव वर्तमानः प्रदक्षिणं भुवनानि परिगच्छन् गृहम् अजगन्तन। गृहानुप्रवेशे हि व्यवधीयते। क्वस्य क सः पुल्वघः पुरु पूर्वस्य घसे रूपम्। बह्वादी मृगः, गत्यर्थस्य मार्ष्टेः। मार्ष्ट्यैव हि मृगः अगमत् गतवान्। येनास्माकमदृश्यः स देवो जनयोपनो जनमोहनो बभूव। विश्वस्मात् जगतः यस्त्वमिन्द्र उत्तरः। तमेतं त्वामादित्यमेवं ब्रूमो यदुदञ्चो वृषाकपे इति।

वि हि सोतोरसृक्षत नेन्द्रं देवममंसत।
यत्रामदद्वृषाकपिरर्यः पुष्टेषु मत्सखा विश्वस्मादिन्द्र उत्तरः॥
(ऋ० सं० १०.८६.१)

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

अर्थः—इह च आदित्यरश्मीनामतिस्तुतिः। आदित्यो रश्मीन् अहन्यहनि रश्मीन् व्यसृजत। किमर्थं सौतोः सर्वप्राणिप्रसवार्थम्। तत्प्रकाशितं लोकस्य सर्वकर्मसम्पत्तेः। तदा ते रश्मयः सर्वकर्मण्यनुगमनान्नेन्द्रं देवममंसत। तमात्मनो दीपयितारं न मन्यन्ते। स्वमहिम्नैव वयं दीव्यामह इति मन्यन्ते। यदा रश्मिपोषं पुष्यति पुष्टेषु मध्यन्दिने मत्सखा मम सखा सर्वस्मादुत्तर इति।

एवञ्च यत्र वृषाकपिशब्देन इन्द्रो विवक्षितः, तत्र स एवेन्द्रोऽपि। तेन सङ्घर्षकथा कल्पनामात्रसारा। इन्द्रपुत्रो वृषाकपिः वृषाकपायी च गौण्या वृत्त्या इन्द्रपत्नी इन्द्राण्येवेत्यादिकं तु सायणभाष्ये स्पष्टमेव।

उक्ष्णो हि मे पञ्चदश साकं पचन्ति विंशतिम्।
उताहमद्मि पीव इदुभा कुक्षी पृणन्ति मे विश्वस्मादिन्द्र उत्तरः॥
(ऋ० सं० १०.८६.१४)

अर्थः—अथेन्द्रो ब्रवीति। मदर्थं पञ्चदशसंख्यकान् विंशतिम् विंशतिसंख्याकान् उक्ष्णः सेचनसमर्थान् पशूनजान्। साकं सह मम भार्यया। इन्द्राण्या प्रेरिता यष्टारः पचन्ति। उत अपि च अहमद्मि भक्षयामि। जग्ध्वा चाहं पीव इत् स्थूल एव भवामीति शेषः। किञ्च मे मम उभा उभावपि कुक्षी पृणन्ति सोमेन पूरयन्ति यष्टारः, सोऽहमिन्द्रः सर्वस्मादुत्तरः॥ १४॥

वृषभो न तिग्मशृङ्गो ऽन्तर्यूथेषु रोरुवत्।
मन्थस्त इन्द्र शं हृदे यं ते सुनोति भावयुर्विश्वस्मादिन्द्र उत्तरः॥
(ऋ० सं० १०.८६.१५)

अर्थः—अथेन्द्राणी ब्रवीति। तिग्मशृङ्गः तीक्ष्णशृङ्गः वृषभो न यथा वृषभः यूथेषु गोसङ्घेषु अन्तः मध्ये रोरुवत् शब्दं कुर्वन् गा अभिरमयति तथा हे इन्द्र त्वं मामभिरमय। किञ्च हे इन्द्र ते तव हृदे हृदयाय। मन्थः सोमाभिषवशब्दः। शंकरो भवत्विति शेषः। किञ्च ते तुभ्यं यं सोमं भावयुः भावमिच्छन्तीन्द्राणी सुनोति अभिषुणोति सोऽपि शङ्करो भवत्वित्यर्थः। मम पतिरिन्द्रः विश्वस्मादुत्तर इति॥ १५॥

न सेशे यस्य रम्बतेऽन्तरा सक्थ्या३ कपृत्।
सेदीशे यस्य रोमशं निषेदुषो विजृम्भते विश्वस्मादिन्द्र उत्तरः॥
(ऋ० सं० १०.८६.१६)

अर्थः—हे इन्द्र स जनः। न ईशे स्त्रीजनेन समर्थो भवति। यस्य कपृत् शेषः। सक्थ्या सक्थिनी अन्तरा रम्बते लम्बते। सेत् स इत् स एव। ईशे समर्थो भवति। यस्य निषेदुषः शयानस्य रोमशं विजृम्भते विवृतं भवति॥ १६॥

न सेशे यस्य रोमशं निषेदुषो विजृम्भते।
सेदीशे यस्य रम्बतेऽन्तरा सक्थ्या३ कपृद् विश्वस्मादिन्द्र उत्तरः॥
(ऋ० सं० १०.८६.१७)

अर्थः—पूर्वं वाक्यं यियप्सोरिन्द्राण्याः, उत्तरं च वाक्यम् अयियप्सोरिन्द्रस्य। पूर्वोक्तव्यतिरेक एव उत्तरवाक्यस्यार्थः॥ १७॥

अयमिन्द्र वृषाकपिः परस्वन्तं हतं विदत्।
असिं सूनां नवं चरुमादेधस्यान आचितं विश्वस्मादिन्द्र उत्तरः॥
(ऋ० सं० १०.८६.१८)

अर्थः—इन्द्राणीवाक्यमिदम्। हे। इन्द्र अयं वृषाकपिः परस्वन्तमात्मनो विषयेऽवर्तमानं हतं हिंसितं विदत् विन्दतु। तथा हतस्य विशसनाय असिं शस्त्रं सूनाम् उद्धानार्थं पाकार्थम् नवं प्रत्यग्रं चरुं माण्डं आत् अनन्तरम् एधस्य काष्ठस्य आचितं पूर्णम् अनः शकटं च विन्दतु। मम पतिरिन्द्र विश्वस्मादुत्तर इति॥ १८॥

अयमेमि विचाकशद् विचिन्वन् दासमार्यम्।
पिबामि पाकसुत्वनोऽभि धीरमचाकशं विश्वस्मादिन्द्र उत्तरः॥
(ऋ० सं० १०.८६.१९)

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

अर्थः—अथेन्द्रो ब्रवीति। विचाकशत् पश्यन् यजमानान् दासम् उपक्षयितारमसुरम् आर्यमपि विचिन्वन् पृथक् कुर्वन् अयमहमिन्द्रः एमि यज्ञं प्रति गच्छामि। यज्ञं गत्वा च पाकसुत्वनः, पचतीति पाकः, सूनोतीति सुत्वा हविषां पक्तुः सोमस्याभिसोतुर्यजमानस्य सम्बन्धिनं सोमं पिबामि पाकश्चाद्मीति शेषः। यद्वा पचनं पाकः पाकेन विपक्वेन मनसा सोमस्याऽभिषोतुर्यजमानस्य सोमं पिबामि इति ॥१९॥

धन्व च यत् कृन्तत्रं च कति स्वित् ता वि योजना।
नेदीयसो वृषाकपे ऽस्तमेहि गृहां उप विश्वस्मादिन्द्र उत्तरः ॥
(ऋ० सं० १०.८६.२०)

अर्थः—धन्व निरुदकोऽरण्यरहितो देशः। कृन्तत्रं कर्तनीयमरण्यम्। यत् यत् धन्व कृन्तत्रं च भवति मृगोद्वासमरण्यम् एवंविधं भवति, न त्वत्यन्तविपिनम्। तस्य शत्रुनिलयस्याऽस्मदीयगृहस्य च मध्ये कतिस्वित्तो तानि योजना योजनानि स्थितानि नात्यन्तदूरे तद्भवतीति। अतः नेदीयसा अतिशयेन समीपस्थात् शत्रुनिलयात् हे वृषाकपे त्वम् अस्तम् अस्माकं गृहं प्रति वि एहि विशेषेणाऽऽगच्छ। आगत्य च गृहान् यज्ञगृहान् उपगच्छ। यतोऽहं इन्द्रः सर्वस्मादुत्तर इति ॥ २० ॥

पुनरेहि वृषाकपे सुविता कल्पयावहै।
य एष स्वप्ननंशनो ऽस्तमेषि पथा पुनर्विश्वस्मादिन्द्र उत्तरः॥
(ऋ० सं० १०.८६.२१)

अर्थः—आगत्य च प्रतिगतं वृषाकपिमिन्द्रो ब्रवीति। हे वृषाकपे त्वं पुनरेहि अस्मान् प्रत्यागच्छ। आगते च त्वयि सुविता सुवितानि त्वच्चित्तप्रीतिकराणि कल्याणानि कर्माणि कल्पयावहै। इन्द्राणी अहञ्च पर्यालोच्य कुर्याव। किञ्च—यः स्वप्ननंशनः उदयेन सर्वस्य प्राणिनः स्वप्ननाशकः आदित्यः स एव त्वं यथा मार्गेण अस्तम् आत्मीयमावासं पुनः एषि गच्छसि यतोऽहं विश्वस्मादुत्तरः। यास्कश्च सुप्रसूतानि वः कर्माणि कल्पयावहै, य एष स्वप्ननंशनः स्वप्नान्नाशयस्यादित्य उदयेन सोऽस्तमेषि यथामुक इति ॥ २१ ॥

यदुदञ्चो वृषाकपे गृहमिन्द्राजगन्तन।
क्व१ स्य पुल्वघो मृगः कमगञ्जनयोपनो विश्वस्मादिन्द्र उत्तरः॥
(ऋ० सं० १०.८६.२२)

अर्थः—गत्वा पुनरागतं वृषाकपिमिन्द्रः पृच्छति। हे इन्द्र परमैश्वर्य हे वृषाकपे यूयम् उदञ्चः उद्गामिनः सन्तो मद्गृहमजगन्तन आगच्छत। एकस्यापि बहुवचनं पूजार्थम्। तत्र भवतः सम्बन्धी पुल्वघः बहूनां भौमरसानामत्तास्य स मृगः क अभूत् जनयोपनो जनानां मोदयिता मृगः कं वा देशं अगन् अगच्छदिति ॥ २२ ॥

पर्शुर्ह नाम मानवी साकं ससूव विंशतिम्।
भद्रं भलत्यस्या अभूद् यस्या उदरमामयद् विश्वस्मादिन्द्र उत्तरः॥
(ऋ० सं० १०.८६.२३)

अर्थः—अनेन मन्त्रेण वृषाकपिराशास्ते। हे भल इन्द्रेण विसृज्यमान शर! भलतेर्भेदनकर्मत्वात्। पर्शुर्नाम मृगी, ह इति पूरणः। मानवी मनोर्दुहितेयम्। विंशतिम् विंशतिसंख्याकान् पुत्रान् साकं सह ससूव अजीजनत्। त्यस्यै तस्यै भद्रं भजनीयं कल्याणमभूत् भवतु। लोडर्थे लुङ्। यस्या उदरमामयत् गर्भस्थैः विंशतिभिः पुत्रैः पुष्टमासीत्। मम पिता इन्द्रः विश्वस्मादिन्द्र उत्तरः।

हे शर या विंशतिसंख्याकान् पुत्रान् अजीजनत् सा पर्शुर्नाम मृगी तस्या भद्रं भवतु तस्या रक्षणमस्तु इति ॥ २३ ॥

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

मानस-भारती : देवगिरा गुम्फितं मानसम्

—श्री जनार्दन गङ्गाधर रटाटे, बी. ए. साहित्याचार्यः —

★

यद्दृष्टं कपिसैन्यं यो विवक्षुः स शिवे जडः ।
नमन्त्यागत्य रामं ते दृष्ट्वा च सफला मुखम् ॥
कीशो नैकोऽपि सेनायां यं रामः पृष्टवान्न शम् ।
रामायैतन्नास्ति नूत्नं विश्वं विष्णुश्च सोऽस्ति यत् ॥
तस्थुः सर्वे समाज्ञप्तास्ततः सुग्रीव आह तान् ।
रामकार्ये मेऽनुरोधो यान्तु सर्वे चतुर्दिशम् ॥
भ्रातरो मृग्यतां सीता मासादागच्छताऽचिरम् ।
अज्ञात्वा तां कालयापी यो वध्यः स भवेन्मया ॥

श्रुत्वा वचस्ते सकलाः प्लवङ्गाः
क्षणाद् ययुः सर्वत एव दिक्षु ।
सुग्रीव आहूय नलाऽङ्गदादीन्
मरुत्सुतञ्चैव भटानुवाच ॥२२॥

शृण्वन्तु मारुते नीलाङ्गदौ धीराश्च जाम्बवन् ।
मिलित्वा यान्तु याम्याशां मार्गध्वं जानकीं तथा ॥
यतध्वं हृद्-वचः-कायैः कृत्यं रामस्य साध्यताम् ।
भानुः पृष्ठे पुरोऽग्निश्च सेवनीयौ परं प्रभुः ॥
संसेव्यः सर्वतोभावैर्मनुजेन छलं विना ।
निर्मायी साधनं कुर्यान् स्युर्नष्टा भवजाः शुचः ॥
त्यक्त्वेच्छाः सेव्यतां रामः साफल्यमिति जन्मनः ।
स गुणज्ञो महाभागो रामाङ्घ्र्योः प्रीतिमांस्तु यः ॥
गृहीत्वाज्ञां समे नत्वा रामं स्मृत्वा मुदा ययुः ।
ननामान्ते मरुत्सूनुः कार्यज्ञोऽथाह्वयत् प्रभुः ॥

स्पृष्ट्वा शिरो ददौ दास इति ज्ञात्वा स्वमुद्रिकाम् ।
ऊचे च रामो यत् सीतामाश्वासय निवेद्य च ॥
बलं मम वियोगञ्च परागच्छाऽऽशु यत्नतः ।
मत्वा धन्यं ययौ स्वं स चित्ते कृत्वा दयानिधिम् ॥
देवानां रक्षको रामो जानाति सकलां स्थितिम् ।
कपीनां प्रेषणाद् राजनीतिं रक्षयति प्रभुः ॥

गच्छन्ति सर्वे विपिनेषु तद्वन्
नदीषु शैलेषु सरस्सु चैव ।
गुहासु चिन्वन्त अनन्यचिन्ता
रामस्य कार्ये न शरीरचिन्ता ॥२३॥

क्वचिद् रक्षो मिलति चेद् घ्नन्ति तं ते चपेटया ।
मृग्येतेऽद्रिवने नाना मुनिश्चेद् वेष्टयतेऽर्थिभिः ॥
जलं नाप्तं वने भ्रान्तैस्तैस्तृषाव्याकुलैर्यदा ।
चिचिन्त मारुतिः सर्वान् म्रियमाणान् विना जलम् ॥
आरुह्याद्रिं दिक्षु दृष्ट्वा ददर्श स बिले गुहाम् ।
अद्भुतं तत्र यत्कोका बका हंसाश्च निर्गताः ॥
विशन्तस्तेन विविधाः खगा अपि विलोकिताः ।
अवरूढोऽद्रितः सर्वान् दर्शयामास तां गुहाम् ।
कृत्वा तं पुरस्तस्तेऽपि द्रुतं तां विविशुर्दरीम् ॥

प्रविश्य तेऽन्तर्ददृशुर्गुहायाः
सरः सुपद्मं ललितं वनञ्च ।
रम्ये तथैके सदने स्त्रियञ्च
तपःप्रकाशामुपविष्टमूर्तिम् ॥२४॥

(क्रमशः)

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

शरन्नवरत्न-माला

– १ –

रुचिकलितवृषाङ्का शीतशोचिः - कलाढ्या
हरतु तनुरिवाऽऽशु क्लेशमैशी शरद्वः ।
अलिभृतसकलाशा दर्शितोदारभावा
विलसति जलजन्मोल्लासमातन्वती या ॥

– २ –

परिपीतपयः पतावगस्त्ये शरदं द्रष्टुमिवोदिते तताभाम् ।
कलुषत्वमितैः प्रसादपूर्णैर्घनपुष्पैर्यदभावि तत्र चित्रम् ॥

– ३ –

असीमानि स्वैरं तत इत इतानि स्थितिपथे
कबन्धान्यातन्वत्यति - वितत - वाहिन्यनुगता ।
लसद्वीरोत्साहा प्रकृतिसुखदेयं किल शर-
न्महीभर्तुः किं वा लसति समरारम्भसरणिः ॥

– ४ –

श्वेताम्भोजमयातपत्रमहिता काशप्रकाशच्छला-
च्चञ्चच्चामरवीजिता विजयिनी राजश्रियाऽलङ्कृता ।
भूमौ दत्तपदा मुदा विहरते मेघान्धकारालयात्
सूर्याचन्द्रमसोर्विमुक्तिमतुलां सेयं दिशन्ती शरत् ॥

– ५ –

रसासक्तैरन्तर्लुलितवपुषः सैकततटी-
नितम्बश्री - पूर्णाश्चपल - शफरी - चारुनयनाः ।
मनाङ् मन्दां मन्दां गतिमभिनयन्तीह सरितो
रतिक्लान्ताः कान्ता इव शिथिलवेगाः क्षितितले ॥

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

— स्वर्गीयाः श्री अनन्तराम शास्त्रि वेतालाः

— ६ —

क्लृप्तश्रीरघुराजराजविजयोल्लासा प्रकाशीकरो-
त्येषा सा विजयादशम्यपि शरत्सौभाग्यमभ्युन्नतम् ।
श्रीमन्मङ्गलधाम्नि मङ्गलदिनेऽस्मिञ्जैत्रयात्रोन्मुखा
राजानो विजयश्रियोर्जिततमं विन्दन्त्यमन्दं यशः ॥

— ७ —

सान्द्रानन्दमयाः प्रकाममदना यत्राऽऽगणेया गुणा-
श्चञ्चच्चन्द्ररुचौ चकासतितरां सा शारदी पूर्णिमा ।
हंसाली-कलगीति-रीतिमिषतः सोल्लाहमस्मिन्महे
'को जागर्ति किले'त्युदञ्चितवचाः कोजागरीत्युच्यते ॥

— ८ —

शेफालिका - फल - मनोहर - बन्धुजीव-
सप्तच्छदाभिनव - पुष्पचया - ऽर्चितायाः ।
आरार्तिकं कलयितुं किमकल्पि लोके
दीपावलीह शरदोऽवनि - देवतायाः ॥

— ९ —

जलं मलिनतां गतं स्थितिपथं विलङ्घ्य स्थितं
क्रमाद्विमलतां नयन्नुपनयन् यथार्हं पदम् ।
उदारफलशालितां गतवतीं विनेता भुवं
परं शरदनेहसो जगति नात्युदारोऽपरः ॥

इयमस्तु सतां मनःप्रियोपहृता - ऽनन्तगुणप्रकल्पिता ।
विजयावसरे वरे शरन्नवरत्न - स्रगमन्द - सुन्दरी ॥

—:❀:—

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

दर्शनानुशीलन-समीक्षा

— श्री श्रीकृष्णमणि त्रिपाठी —

[व्याख्याता—वाराणसेय-संस्कृत-विश्वविद्यालयस्य]

वेदाः सन्ति भारतीयधर्म-दर्शनयोः प्राणाः। भारतीयधर्मे या जीवनशक्तिः दृष्टगोचरीभवति, तस्या मूलकारणानि वेदा एव। वेदो हि अक्षय्यविचाराणां मानससरोवरः। ततो हि प्रसृता विविधा विचारधारा भारतभूमेः विचारकाणां बुद्धीः आप्लावयन्ती समस्तं विश्वमुपकरोति। वेदो न केवलं भारतीय-वाङ्मयस्यैव आदिमो ग्रन्थः, प्रत्युत निखिलमानवेतिहासे इतोऽन्यः कश्चन ग्रन्थो नाद्यावधि उपलभ्यते। भारतीयधर्म-दर्शनयोः आकृतिम्, प्रकृतिम् उद्गमं विकासञ्च समुचितमनुसन्धातुम् एतत्पर्यालोचनं नितान्तमावश्यकम्।

अद्यत्वे वेदस्याध्ययनं प्रकारद्वयेन जायते, एकया प्राचीनया भारतीयपद्धत्या, अपरया च अर्वाचीनया पाश्चात्त्यपद्धत्या। तत्र अर्वाचीना पाश्चात्त्यपद्धतिः वेदार्थपरिशीलनार्थं देशान्तरीयं साहित्यमपेक्षते, भारतीयपद्धतिश्च पुराणेतिहासौ वेदार्थस्योपबृंहकौ मत्त्वा वैदिकरहस्यानां यथार्थज्ञानाय तत्साहाय्यमनिवार्यतः स्वीकरोति। पाश्चात्त्यवर्गः आदिमानामार्याणां गायनादधिकं महत्त्वं वेदाय दातुं नेच्छति। भारतीय-कल्पनानुसारं वेदा नित्या अपौरुषेया अमूल्यानां निधीनामाकराः साक्षात्कृतधर्मैः महर्षिभिरनुभूतानां तत्त्वानां परिचायकाश्च। इष्टप्राप्तेः अनिष्टपरिहारस्य चालौकिकानामुपायानां समुपदेशकाश्च। वस्तुतो वेदानां वेदता अत्रैव यत्ते प्रत्यक्षेणागम्यस्य अनुभवैश्च समुद्भावितस्य लौकिकोपायजातस्य च सन्ति समुद्बोधकाः। तथा चाहुः—

प्रत्यक्षेणानुमानेन यस्तूपायो न गम्यते।
एनं विदन्ति वेदेन तस्माद्वेदस्य वेदता॥ इति।

ऐतिहासिकदृष्ट्या विकाससिद्धान्तानुसारं सर्वेषां दर्शनानां मूलं रूपं वेदेषूपलभ्यते। ततः शनैः शनैः विकासमुपगच्छन्ति दर्शनानि किञ्चिदभिनवरूपेण दृष्टिगोचरीभवन्ति। तत्रोपनिषत्सु योगस्य वर्णनं विशेषत उपलभ्यते। ब्राह्मणारण्यकेषु निहितानां बीजानामुद्गम इह स्पष्टतया दरीदृश्यते। ततः पुराणेषु महाभारते च योगस्य महान् विकासो जातः। अत एव सर्व-धर्मानुयायिन आचार्याः योगाभ्यासे संलग्नाः, तद्बलेनैव स्वानुकूलां परिस्थितिं विधाय एवंविधयोः धर्म-दर्शनयोः स्थापने कृतकार्या अभवन् यत्प्रभावस्तेषां जीवनानन्तरमपि संसारे येन केनापि रूपेण प्रचलन्नद्यत्वेऽपि तदनुयायिभ्यः स्फूर्तिं प्रेरणां च प्रददाति।

न केवलं हिन्दवः, अन्यधर्मसंस्थापका अपि योगाभ्याससमासक्तमानसा आसन्निति तदितिहासेभ्योऽवगम्यते। मुहम्मदसाहबो योगस्याभ्यासी आसीत्। श्रूयते स पूर्वं व्यापारकुशलो व्यक्तिरासीत्, परं पश्चात् सुप्रसिद्धः अध्यात्मचिन्तक समभवत्। दाराशिकोहेन पारसिकभाषानिबद्धे स्वपुस्तके 'रिसाल-ए-हकनुमा' इत्याख्ये लिखितं यत् मुहम्मदसाहबः स्वामुष्ट्रामारुह्य यदा एकस्मात् स्थानाद् द्वितीयं स्थानं गच्छति स्म, तदा तत्र स्थित एव ध्यानाभ्यासं करोति स्म। अरब-मरुभूमौ मध्येमार्गं खर्जूरवृक्षच्छायायामुष्ट्रामाबद्ध्य ध्याननिमग्नो भवति स्म। तत्समये तच्छरीरमेवंविधं

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

गुरुर्भवति स्म, येन तस्य देहभारं सोढुमसहमाना सा सहसा भूमौ उपविशति स्म। एतद् गरिमासिद्धेः प्रत्यक्षमस्ति फलम्।

मध्ययुगे ख्रिष्टी-धर्मानुयायिनां भूयसां साधूनां साध्वीनां च योषितां जीवनचरिते प्रार्थनासमये आसनादुत्थानम् आकाशगमनादिकं चेति विचित्रां सिद्धिं समामनन्ति, तच्चरितनिबद्धारो विद्वांसः। अनेकेषां साधकानां जीवनचरिते बहुशोऽनुभूतमिदं तथ्यं यत् प्रार्थनासमये ते स्वासनेभ्योऽन्तराले उत्तिष्ठन्ति स्म, प्रार्थनाऽन्ते च शनैः शनैः अम्बरात् तेषां देह आसने ऽवतरति स्म। योगवासिष्ठे नभोविहरणादिकमुद्दिश्य महर्षिर्वसिष्ठो रामं प्रोवाच—

अनात्मविदमुक्तोऽपि नभोविहरणादिकम्।
द्रव्यकर्मक्रियाकालशक्त्या प्राप्नोति राघव॥
(३.५०.१५)

न केवलं पुराणेतिहासयोः, नापि च केवलं भारतवर्षे योगस्य चर्चा समुपलभ्यते। अपि तु जैन-बौद्धादिग्रन्थेषु निबद्धे आचार्याणां जीवनचरितेऽपि योगस्य चमत्कारो दृश्यते।

सूफीमत-साधनायां तु ध्यानं विशेषतः समादृतम्। ईसाई-धर्मप्रवर्तकः ईसामसीहः स्वयं योगी सिद्धपुरुषश्च आसीत्। तस्य सिद्धिविषये अनेका उक्तय 'न्यू-टेस्टामेण्ट' नामके पुस्तके उल्लिखिताः। इदन्तु ऐतिहासिकं तथ्यं यत्तेन स्वसाधनसमयः भारतीयसिद्धानां सत्सङ्गे तेषामुपदेशानुसारं यापितः। ईसाईमत-बुद्धमतयोरतिशयसाम्यस्य रहस्यमत्रैव निहितम्। एवं जैन-बौद्धधर्मादिषु योगस्य प्रचार-प्रसारौ तु सर्वविदितौ एव। एतेन योगस्य सार्वभौमत्वं स्पष्टं प्रतीयते।

ग्रीकदेशस्य प्राचीनतत्त्वविद्भिः प्लेटो-प्रभृतिभी राजयोगो भूरि भूरि प्रशंसितः। मिस्रदेशवासिभिः यहूदिषु इसेन-सम्प्रदायानुयायिभिः यूरोपनिवासिभिः ईसाई-संप्रदायिभिश्च राजयोगस्य महती प्रशंसा कृता। अस्याभ्यासं रोमन-कैथलिक-सम्प्रदायस्य उच्चतराः साधवोऽकुर्वन्। स्पिनोजा - कांट - शोपेनहर - एमर्शन-प्रभृतिभिः पाश्चात्त्यदार्शनिकैरपि योगस्य महती प्रशंसा कृता दृश्यते।

यथा हिमालयवर्तिनो मानससरोवरात् निःसृत्य विभिन्नानि स्रोतांसि उर्वरां भारतभूमिमाप्लावयन्ति तथैव उपनिषद्भ्य आविर्भूता विविधा विचारधारा भारतीय-विचारकाणां बुद्धीः निरन्तरं पुष्णन्ति तर्पयन्ति च। उपनिषदो भारतीयदर्शनानाम् आधारग्रन्थाः यत्र निहितबीजानादाय कालान्तरे अनेकदार्शनिकसम्प्रदायानामुदयोऽभ्युदयश्च अभवत्। औपनिषदस्य तत्त्वज्ञानस्य पर्यवसानं 'तत्त्वमसी'ति महावाक्ये दृश्यते। एतद्वाक्यद्वारा जीवब्रह्मणोः नितान्तमैक्यं साध्यते। अद्वैततत्त्वं साक्षात्कृतधर्माणां महर्षीणां दार्शनिकजगति महद्दानम्। एतदेव तत्त्वं हृदयङ्गमं विधातुं भारतीयदर्शनानां विकासो जातः।

प्रकृति-पुरुषयोः यथार्थस्वरूपज्ञानेन आत्मख्यातिर्जायते। अनात्मख्यात्या भेदज्ञानं सम्यक्ख्यात्या च अद्वैतज्ञानमुत्पद्यते। सम्यक्ख्यातिरेव सांख्यमुच्यते। विवेकख्यातिरेव सांख्यस्य चरमं लक्ष्यम्। प्रकृति-पुरुषयोः पृथक्त्वज्ञानं विवेकख्यातिरुच्यते। अयन्तु बौद्धिकः साक्षात्कारः। आत्मनो व्यावहारिकरूपेण साक्षात्काराय ध्यान-धारणादिप्रधानस्य योगस्य स्वीकार आवश्यकः।

एवं सांख्यं योगश्च एकस्यैव तत्त्वज्ञानस्य द्वौ पक्षौ। बौद्धिकपक्षस्य नाम सांख्यम्, व्यवहारपक्षस्याभिधान

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

योगः। कालान्तरे जीव-जगतोः यथार्थरूपं ज्ञातुं तद्गुणानां ज्ञानमावश्यकं जातम्। एवमात्मानात्मनोः गुणान् विवेक्तुं तयोर्विशेषज्ञानाय वैशेषिकदर्शनस्योत्पत्तिरभूत्। अथापि ज्ञानप्राप्तेः परिष्कृतपद्धतेरभावे सुचारुरूपेण विवेचनस्यानिष्पत्त्या ज्ञानस्य शास्त्रीयपद्धतेः निरूपणाय न्यायस्य जन्म जातम्। परं न्यायोऽस्ति शुष्कतर्कवादी। केवलेन तर्केण अध्यात्मज्ञानं न सम्भवतीति श्रुतेराश्रय आवश्यको जातः। दार्शनिकैः वैदिककर्मकाण्डस्य विवेचनं समारब्धम्। परिणामतः कर्ममीमांसाया उदयो जातः। किन्तु मीमांसादर्शनस्य अनुशीलनेन व्यक्तमभवत् यत मानवानाम् आध्यात्मिकप्रवृत्तिः न केवलया तर्कोपासनया पूर्णा भवितुमर्हति। अतो ज्ञानकाण्डस्य मीमांसा समारब्धा यस्याः पर्यवसानं वेदान्ते समभवत्।

एवमौपनिषदस्य तत्त्वमसीति महावाक्यस्य यथार्थव्याख्यानार्थं षड्दर्शनानामाविर्भावो जातः। आनन्दमयस्यात्मनः प्राप्तिं चरमं लक्ष्यं मन्यमानं दर्शनं न नैराश्यवादि भवितुमर्हति। अतोऽस्माकं दर्शनं परमाशावादि अस्ति। तत् सदैवाग्रे गन्तुमुपदेशं प्रदाय गन्तव्यमार्गं प्रापयति, यत्प्राप्य अन्यत् प्राप्तव्यं नावशिष्यते। भारतीयदर्शनानुसारं साधकाः शनैः शनैः अद्वैतवेदान्तस्य उच्चतमे शिखरे समारुह्यानायासम् अद्वैतब्रह्म समधिगम्य न पुनर्जननीजठरे आवर्तन्त इति। दर्शनशास्त्राणि वेदार्थावबोधाय नेत्ररूपाणि।

श्रुतिस्मृतिपुराणेतिहासादिसद्ग्रन्थेषु ये येऽध्यात्मविचाराः विलसन्ति, त एव मीमांसा-दर्शनशास्त्रेषु सम्यक् मीमांसिताः। दर्शनशास्त्राणां विशेषमहत्त्वस्येदमेव कारणं यत्तेषु पदार्थविवेचनं साङ्गोपाङ्गं सविस्तृतञ्च। सहैवेषां रचनाचातुरी अपि चतुरचित्तान् चमत्करोति। यस्य प्रमेयस्य सिद्धौ महान् ग्रन्थो लिखितः, तस्य सिद्धिर्दर्शनस्यैकं लघुसूत्रं तत्काले एव करोति। अत एव 'गर्गर्या सागर' इत्युक्तिः दर्शनशास्त्रेषु अक्षरशः चरितार्था जायते।

भारतीयदर्शनानि पूर्वमाचार्यैः सूत्ररूपेणोपनिबद्धानि। ततः कालान्तरे तेषां रहस्यं स्फोटयितुं तत्र तत्तन्मर्मविद्भिः विद्वद्भिः भाष्याणि लिखितानि। तदनु तानि सुगमानि विधातुं तेषु वार्तिकानि कृतानि, तदनन्तरं तेषामालोचन-प्रत्यालोचनादिजातं जायते, यास्यते चाग्रेऽपि।

दर्शनशास्त्रं हि भारतस्यास्ति अमूल्यो निधिः। एतद्धि ऐहलौकिकस्य पारलौकिकस्य चाभ्युदयस्य साधनम्—

यदाभ्युदयिकं चैव नैःश्रेयसिकमेव च।
सुखं साधयितुं मार्गं दर्शयेत्तद्धि दर्शनम्॥ इति।

अत एतस्य प्रचाराय प्रसाराय चास्यानुशीलनमस्ति परमावश्यकम्।

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

थाई भाषायां संस्कृतभाषायाः प्रभावः

— श्री भिक्षु शासनरश्मिः—

[वाराणसेय-संस्कृत-विश्वविद्यालयीयः]

भारतदेशस्य थाईलैण्डदेशस्य च अतीव पुरातनः सांस्कृतिकः सम्बन्धः इदानीं लुप्तप्रायो जायते। इमं सम्बन्धं दृढीकर्तुं नूतनान् सम्बन्धान् स्थापयितुं च विंशतिवर्षेभ्यः प्राक् दिवङ्गतस्वामि-श्रीसत्यानन्दपुरि-श्रीरघुनाथशर्मशास्त्रि - महाभागाभ्यां "थाई - भारत-सांस्कृतिक केन्द्रं" स्थापितम्। ततः प्रभृति इदं केन्द्रं सांस्कृतिकान् सम्बन्धान् दृढीकर्तुं प्रयतते।

अस्मिन् लघु-निबन्धे अहं केवलं 'थाईदेशस्य भारतदेशेन सह सांस्कृतिक-सम्बन्धः', 'थाईभाषायां संस्कृतभाषायाः प्रभावः' चेति विषये संक्षेपतः प्रकाशयितुं यतिष्ये।

संस्कृतभाषा भारतदेशस्य प्राचीना, दिव्या, सर्वासु भाषासु श्रेष्ठतमा च भाषा अस्ति। अस्याः भाषायाः वाङ्मयेनैव भारतीयसंस्कृतिः सजीवा। इयं संस्कृतिं सभ्यतां च पुरातनकालाद् आरभ्य अद्यावधि दीपयति दीपयिष्यति च। यदा भारतीयाः श्रद्धया इमां देववाणीं सेविष्यन्ते, तदैव संस्कृतेः सभ्यतायाश्च महत्त्वम् अस्याः भाषाया आयत्तमिति ज्ञास्यन्ति। स्थानेऽत्र नियोक्तुं एतादृशी योग्या न काचन अन्या भाषा वर्तते।

संस्कृतभाषायाः महत्त्वविषये न केषांश्चिदपि वैमत्यम्। शतद्वयसंवत्सरेभ्यः प्राक् संस्कृतभाषायाः अध्ययनं थाईलैण्ड - काम्बोज-ब्रह्मादि - देशेषु महत्या श्रद्धया कुर्वन्ति स्म तत्रत्याः। अस्मिन् विषये तेषु तेषु देशेषु लब्धाः शिलालेखा एव प्रमाणम्। ते भारतीयान् उद्घोषयन्ति यद् भवतां देशो यूयं च स्वतन्त्राः क्षीयमाणां देववाणीं रक्षत, तस्याः प्रचारं च कुरुत। तदैव संस्कृतेः भवतश्च कल्याणं भविष्यति। पूर्वजैरिव अनयैव भाषाया लोके ज्ञानस्य प्रचारः कार्यः।

थाईलैण्डदेशः, तत्समीपस्थाश्च कम्बोज-वियतनाम-प्रभृतयो देशाः सम्प्रति बौद्धप्रधानाः। बौद्धधर्मं संस्कृतिं च ते भारतादेव लब्धवन्तः। तथापि ज्ञातव्यमेतत् यत् पञ्चाशद्वर्षात् प्राक् थाईलैण्डदेशे सर्वेषां राजपुत्राणां राजकुमारीणां च कृते संस्कृतस्याध्ययनम् आवश्यकमासीत्। तदर्थम् अध्यापकाः नियुज्यन्ते स्म। अद्यापि शिक्षितानां समाजे संस्कृतविषये बहु आदरो वर्तते। ते तदध्ययनार्थं यतन्ते। प्रतिसंवत्सरं भारते संस्कृताध्ययनार्थं बहवो बौद्धभिक्षवः समागच्छन्ति।

थाईसंस्कृतिः भारतीयसभ्यतां भारतीय - संस्कृतेः तत्त्वानि च आत्मसात् करोति स्म। भारतीय-संस्कृतेः तत्त्वानां प्रत्यक्षं प्रभावः थाईसाहित्ये कलासु व्यवहारे, विशेषतो भाषायां दृश्यते। थाईभाषायां कांश्चित् शब्दान् विहाय ये शब्दाः वर्तन्ते तेषां संस्कृतशब्दैः अर्थैश्च प्रभूतं साम्यम्।

थाईभाषायाः संस्कृतभाषायाः कियान् नैकटिकः सम्बन्ध इति थाईभाषायाः पारिभाषिकशब्दैः ज्ञायते। यदा भारतदेशः स्वतन्त्रः समजायत तदाप्रभृत्यत्र विद्वद्भिः पारिभाषिकाः शब्दकोषाः सम्पादिताः। परन्तु कार्यमिदं थाईविद्वद्भिः स्वभाषायां पुरैव समारब्धम्। सर्वेषां शब्दानां संस्कृतशब्दैः सह साम्यम्। सर्वे शब्दाः संस्कृतशब्दानां आधारेण

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

निर्धारिताः। विषयेऽस्मिन् अधोनिर्दिष्टाः शब्दा एव निदर्शनम्—

1 Analysis विग्रहः।
2 Geometry रेखागणितम्।
3 Analytical Psychology चित्रशास्त्र-विग्रहः।
4 Anarchy अनाधिपत्यम्।
5 Anatomy कायविद्या।
6 Ancestor पूर्वपुरुषः।
7 Anchorite योगी ऋषिः।
8 Ancient पुराण-कालः।
9 Anger क्रोधः, दोषः।
10 Antique पुराण- वस्तु।
11 Index सूची।
12 Licentiousness प्राश्चाकशील-धर्मः।
13 Ministry गणराष्ट्रमन्त्री।
14 Warrant अनुज्ञातः।
15 Bank धनागारः।
16 Claim सिद्धिः।
17 Class प्रभेदः।
18 Cloud मेघः।
19 Jurisprudence धर्मशास्त्रम्।
20 Applied प्रयुक्तः।
21 Combustion सन्तापः।
22 Engine कलचक्रम्।
23 Entomology कीटविद्या।
24 Ethnography जातिबन्धु-वर्णना।
25 Geology धरणीविद्या।
26 Hypothesis सम्मतिदानम्।
27 Negative निषेधः।
28 Radience रश्मिः।
29 Space अवकाशः।
30 Trigonometry त्रिकोणमितिः।
31 Vaccum शून्याकाशः।
32 Cholera अहिवातक-रोगः।
33 Anthropology मनुष्यविद्या।
34 Conjugation संयोगः।
35 Duplicate द्विगुणम्।
36 Dynamics बलशास्त्रम्।
37 Instrument उपकरणम्।
38 Meterology ऋतुनियम-विद्या।
39 Reaction प्रतिक्रिया।
40 Organs अवयवः।
41 Diet भक्ष्याहारः।
42 Emotion आवेगः।
43 Helminthology कृमिविद्या।
44 Gynacologist नारीवैद्यः।
45 Hygiene सुखशास्त्रम्।
46 Mortality मृतभावः।
47 Obstetrician सूतिवैद्यः।
48 Operative surgery शल्यशास्त्रहस्तकरः।
49 Ophthalmic Surgery शल्यवैद्यः, चक्षुकर्म।
50 Pediatrician कुमारवैद्यः।
51 Plague कालरोगः।
52 Psychology रोग चित्त विद्या।
53 Venereal diseases कामरोगः।
54 Welfare स्वस्तिभावः संग्रहः।
55 Object वस्तुप्रसंगः।

एतादृशाः शतशः शब्दाः पाठकानां पुरः समुपस्थापयितुं शक्यन्ते, परं निबन्धविस्तारभयात् तेषामुल्लेखोऽत्र न क्रियते। थाईदेशे वर्तमानानां ग्रामवाचकानां जनवाचकशब्दानां च शब्दानां साम्यम् आश्चर्यकरम्, आह्लादजनकं सर्वथा विचारणीयं च। विषयेऽस्मिन् सर्वेषां भारतीयानां गौरवः। तेन सर्वे भारतीयाः संस्कृतभाषाम् अध्येतुं समुत्साहं लभेरन् इति आशासे।

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

थाईदेशवासिनां नामानि उपनामानि अपि संस्कृताधारेणैव सन्ति। कानिचित् उदाहरणान्यत्र प्रदर्श्यन्ते—धर्मशक्तिमन्त्रीः अस्मिन् शब्दे धर्मशक्तिव्यक्तेः नाम, मंत्री इति तस्य, उपनाम वर्तते। तथैव लक्षणाकर, क्षेमशान्त, विद्याधर इत्यादयो व्यक्तिवाचकाः शब्दाः।

केचन नगरवाचिनः शब्दाः प्रदर्श्यन्ते—अयोध्या, विष्णुलोकः, लवपुरी, नगर श्रीधर्मराजः, काञ्चनपुरी, धनपुरी, वज्रपुरी नगर-स्वर्ग इत्यादयः।

केषांचित् बौद्धविहाराणां नामानि—तैमित्र-विहारः, बोधारामः, महाधातु-विहारः।

ख्रिस्ताब्दस्य त्र्यशीत्युत्तर - द्वादशशतसंवत्सरे सम्राट् रामकमहैंग महाशयः थाईभाषायाः लिपिं विरच्य इमां भाषां स्थापितवान्। यद्यपि देवनागरी-लिपेः थाईलिपेश्च लेखने साम्यं नास्ति, तथापि अक्षर-संख्यायां उच्चारणे च साम्यं वर्तते। सत्यमेतत् यद् देशकालानुसारं परिवर्तनं तु भवत्येव।

बौद्धसंस्कृतेः प्राक् थाईदेशे ब्राह्मणसंस्कृतिः महता ऐश्वर्येण सम्पन्ना आसीत्। अस्याः संस्कृतेः अवशेषाः ब्रह्म-विष्णु-महेशादीनां मूर्तयः सन्ति। एवंरूपा एषा प्रभावशालिनी 'ब्राह्मण-संस्कृतिः' कथं लुप्ताऽभवदिति तु प्रबन्धान्तरस्य विषयः। तस्मात्तद्विषये नोल्लिख्यते।

एकस्मिन् प्रसिद्ध-बौद्धविहारे निखिलं रामायणं चित्रितमस्ति। रामायणं थाईदेशस्य नृत्यकलायाः, चित्रकलायाश्च विशिष्टः भागः। तथैव एकमभिन्न-मङ्गमप्यस्ति। थाईदेशस्य दूरदर्शनयन्त्रे (Television) उपहारगृहेषु नृत्यशालायां च रामायणाधृतं नृत्यं संगीतं नाटकञ्च भवन्तः प्रतिदिनं द्रक्ष्यन्ति। अनेन एतद्नुमीयते यत् थाईदेशे समीपस्थे देशेषु च भारतीयसंस्कृतेः कियान् महान् प्रभाव इति।

थाई-भारत-सांस्कृतिकाश्रमस्य कार्यम्

थाई-भारत-सांस्कृतिकाश्रमस्य वर्तमानसञ्चालकाः पण्डितवर्याः श्री रघुनाथशर्मशास्त्रिणः सन्ति। एतेषां दिवङ्गत - श्रीसत्यानन्दपुरिमहाभागानाञ्च उत्साहेन थाईदेशे निवासिनां भारतीयानां साहाय्येन च विंश-तिवर्षात् प्राक् स्थापिता इयं संस्था सम्यक्तया कार्यं सम्पादयति। अस्याः संस्थायाः थाईदेशस्य भारतदेशस्य च सांस्कृतिक सम्बन्धानां दृढीकरणं नूतनसम्बन्धानां स्थापनं च मुख्यं कार्यम्। इयं संस्था थाईदेशे सम्प्राप्तानां पण्डितानां विश्वविद्यालये आश्रमे च व्याख्यानानि आयोजयति। थाईभाषायां लघून् ग्रन्थान् निर्माय भारतीयसंस्कृतौ थाईजनतासु प्रेमोत्पादयितुं यतते। पुस्तकानि निःशुल्कं दीयन्ते। तानि पुस्तकानि थाई-देशनिवासिभिः महता औत्सुक्येन पठ्यन्ते। कानि-चित् पुस्तकानि द्विवारं त्रिवारमपि मुद्रापितानि।

दिवङ्गत - स्वामि श्री सत्यानन्दपुरि महाभागैः स्वजीवनकाले १६ ग्रन्थाः भारतीय-दर्शन-संस्कृत्यादि-विषयकाः सम्पादिताः। तेषु 'पातञ्जलयोगदर्शनस्य' थाईभाषायामनुवादः थाईविद्वत्समाजे अतीव प्रियः।

अनेन आश्रमेण संस्कृतभाषानुरागिणां जनानाम् अध्ययनार्थं केन्द्रे समग्रा व्यवस्था क्रियते, तेभ्यः सर्वाः सुविधाश्च दीयन्ते च। अस्मिन् कार्ये भारती-यानां थाईदेशनिवासिनां साहाय्यं सद्भावना च आश्रमं प्रति सम्पूर्णतया वर्तते। अत एव संस्थायाः कार्यं सम्यक् प्रचलति। आशास्महे यद् अस्मिन् भारतीयसंस्थानामपि साहाय्यं मिलिष्यति।

अस्मिन् जगति अस्माभिः स्वीयाः। पुरातनाः सांस्कृतिकसम्बन्धाः रक्षितव्याः। ते च दृढाःकर्तव्याः। तु भारतीयविदुषां धर्मप्रचारकाणां सांस्कृतिक क्षेत्रे संल्लग्नाना संस्थानां च कार्यम्। ★

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

छत्रपति-महाकाव्यम्

—श्री उमाशङ्करशर्मा त्रिपाठी—
[आंग्लभाषा-प्राध्यापकः—काशी-विद्यापीठम्, वाराणसी]

शिवासने सुप्रजनस्य लम्बितं
कर समुद्रं परिलक्ष्य रक्षिणः।
तमेव भूपं विविदुः पुरा यथा
व्यपेतशङ्काः स्थितिगौरवादराः ॥१४८॥

ततो द्वितीयेऽह्नि महात्मगौरवो
हिरोजिरुत्थाय बहिर्गतः क्षणात्।
स्वनिर्जनत्वं परिवीक्ष्य तद्गृहं
हृतश्रि निर्जीवमिवाभवद् वपुः ॥१४९॥

गृहेण शून्येन निबोध्य शून्यतां
निरुद्धवाचः परिशून्यचेतसः।
निपत्य शून्यीविदधुः स्वसूचितै-
र्विमूढफुल्लादममोघशस्त्रिणः ॥१५०॥

उपर्यधस्तल्पतले गवाक्षके
बिले वलभ्यां जलनालिकासु वा।
अनाप्तसूत्रो भयकातरो ह्यसौ
जगाम भूपं निपतन्निवाध्वनि ॥१५१॥

"धरैककीर्ते शिरसि स्थिरं प्रभो
यथार्हमापातय दण्डमस्मि ते।
अलक्षितो भूबिलवर्त्मनाऽथवा
विहायसाऽसौ ससुतः पलायितः ॥१५२॥

हठादधिक्षिप्य भटानुदायुधान्
मनोगतिर्वायुरिवा - ऽस्तबन्धनः।
गुरुप्रदिष्टाञ्जनशीलितेक्षणः
क्षणाद् विलुप्तः सहसा प्रयोगवित् ॥१५३॥

महीध्रकूटान्नृपतिः पतन्निव
जवादसम्बद्धकथं कथञ्चन।
निवार्य वज्रेण हृदीव ताडितः
स्थितोऽपि शाखीव हतप्रभोऽभवत् ॥१५४॥

हठाच्चिरिण्टीव सुगोपिताऽप्यसौ
जरावतश्चञ्चल - यौवनाङ्गना।
नरेशकीर्तिः प्रसभोन्मदाकुला
शिवेन मध्येगृहमाहृता द्विषा ॥१५५॥

पतिष्णु कम्पाद्धृदयं स्ववक्षसि
यदग्रहीदेककरेण पार्थिवः।
ततोऽपनेतुं स्वकरं निजायुषि
कदापि कुत्रापि शशाक नैव सः ॥१५६॥

गते सुधाम्नो बहिरार्यभूपतौ
कलङ्करेखा रिपुधामनन्दिनी।
विषादवृत्तिः समुपोढयौवना
ररञ्ज दिल्लीशमुखं स्वविभ्रमैः ॥१५७॥

क्षणेन पद्यास्वखिलासु सादिनः,
त्वरानुलीढाः प्रतिदक्षिणापथम्।
स्वरक्षिलोकानवधातुमाकुलाः
शिवात्मिकाया विपदो विनिर्ययुः ॥१५८॥

ध्रुवं महाराष्ट्रभुवः स्वतन्त्रतां
निजाधिबाधां निधनञ्च शस्त्रिणाम्।
अमन्यतारिर्ज्वलने ज्वलन्निव
निसर्गसिद्धामवनीश्वरे गते ॥१५९॥

असौ महाचण्डबलस्य भूपते-
रभीष्ट - वत्सोदयनोदित - श्रिया।
समेधितो वासवदत्तया यथा
स्वतन्त्रतासिद्धिपथे शिवोऽचलत् ॥१६०॥

मुक्तो बन्धाद्विहङ्गः प्रतिगगनमुखं सञ्चरन् शङ्कितोऽपि
देशं गच्छन् प्रवासाद् दिशि दिशि सुचिरात् प्रक्षिपन्नाधिभारम्।
मृत्योर्हस्ताद्विनष्टः प्रियजननयनं नन्दयन्नश्रुसिक्तं
सोऽसौ जानाति नूनं क्षणमिह सुकृती जीवितं जीवितस्य ॥१६१॥

॥ इति क्षत्रपति-महाकाव्ये चतुर्दशः सर्गः ॥

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

पृथ्वीराजाख्यानकम्

— श्रीविश्वनाथ त्रिपाठी, साहित्याचार्यः —

(६)

धीरमुखेन गोरिणोऽभियानस्य वृत्तं श्रुत्वा महाराजो मुख्यमन्त्रिणं जैतरावं सेनासन्नहनाय आदिदेश। अस्मिन्नेवान्तरे युद्धप्रत्यर्थनां वाञ्छतः शाहस्य दूतोऽपि तत्र प्राप्तः।

तद्दत्तपत्रे धीरपुण्डीरस्य प्रशंसा लिखितासीत्। साधारणशिष्टाचारानन्तरं पत्रेऽस्मिन् लिखितमासीत् यत् "चौहान; अहं च द्वावपि एकस्य ईदृशस्य समाजस्य राजानौ स्वः, यः एकस्य ईश्वरस्य प्रजात्वं गतोऽपि आचार-विचारयोः परस्परं भिन्न एव। एको मन्दिरम्, पुराणम्, ईश्वरञ्च मनुते। अपरश्च मसजिदम्, कुरानम्, खुदां च समाश्रयते। मया श्रुतम्, वार्ताऽपि कृता ते सामन्तेन धीरेण सह। तवायं नवसामन्तः धीरपुण्डीरः युद्धे मां बद्धुं दृढप्रतिज्ञो वर्तते इत्यपि ज्ञातम्। अतः स्वकथनानुसारं शाहगोरी समागच्छति। सोऽपि स्वीयं मनोगतं विधातुं पश्चात्पदो न भवेत्। जयः पराजयो वा एकतरः कश्चन युद्धे भवतीति मया विज्ञायते। अव्यवस्थितौ हि दृश्येते एतौ जय-पराजयौ संयुगे। शक्यते यद् अस्मिन् उपक्रमे अक्षास्तवैव आनुकूल्यं भजेयुः। तथापि नूनमेतत् न विस्मरेः चौहान! यत् एकस्मिन् विपिने द्वौ केशरिणौ कोशे वा एकस्मिन् द्वे असी स्थातुं न शक्नुतः। तथैव हिन्दुस्थानेऽस्मिन् द्वौ सम्राजौ अपि न स्थातुं शक्नुतः। अहम् आयोधनम् वाञ्छामि" इति।

युद्धोद्योगः

इतः परं किम्! युद्धोद्योगः परमया तत्परतया प्रावर्तत। राजा विलास-लीलां विस्मृत्य युद्धोद्योग एव व्यस्तोऽभवत्। चतुर्दिक्षु सर्वोऽपि परिसरः उत्साहमयः समपद्यत। सर्वे युद्धे गोरिणं बन्दीकर्तुं समुत्सुका अभवन्। सर्वेषां जिह्वाग्रेषु धीरस्य नाम मुखेभ्यः तत्प्रशंसा च प्रावर्तत। शाहं न्यक्कृत्य सकुशलं दिल्लीपरावर्तनस्य तदीया कथा चतुर्दिक्षु नैकेषु रूपेषु प्रसृता। एतेन चामण्डरायः परं क्षुब्धः। किन्तु सम्प्रति इतोऽन्य उपाय एव नासीत्।

इतो धीरः आस्थानमण्डपात् परावृत्त्य स्वावासं समवाप। आश्रित-सजातीयानां वीराणां सुहृदां च गोष्ठ्यां स मन्त्रयामास। जनास्तं चामण्डरायस्य ईर्ष्यायाः कूटनीतेश्च वार्ताम् आश्रवयन्, किन्तु धीरेण तत्सर्वं सर्वथा समुपेक्षितम्। अस्य युद्धस्य दायित्वं तस्मिन्नेव आसीत्। अतस्तेन सावधानतया निर्वाच्य दशसहस्राणाम् अश्वारोहिणां सेनां सज्जीकृत्य च तां तदुद्योगे संलग्नः अभवत्।

युद्धं प्रतिज्ञापूर्तिश्च

अन्ततः प्रतीक्षितं युद्धं समारभत्। युद्धवाद्यघोष-समकालमेव उभयपक्षयोः सेने समुद्रद्वयस्य विशालतरङ्गाविव गर्जन्त्यौ मिथः सङ्घट्टिते अभूताम्। क्षणादेवानन्तानि रुण्डमुण्डानि पतितुं प्रारभन्त।

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

द्विदिनावधिके युद्धे अकल्पितां जनहानिम् उरीकृत्यापि शाहः स्वयुद्धसीमनि निश्चलः अतिष्ठत्।

अन्ततः तृतीयेऽहनि यदा युद्धस्य भीषणता चरमसीमानम् प्राप्ता तदा धीरः स्वां प्रतिज्ञां पूरयितुं उद्युक्तोऽभवत्। नवीनसेनया आक्रममाणं धीरं विलोक्य आदिनं युद्धेन श्रान्ता गोरिणः सेना शैवालवत् छिन्नभिन्ना जाता। अगणितान् सैनिकान् मृत्युमार्गं प्रापयन्ती धीरस्य सेना शाहमावृत्त्य तिष्ठतां विशालकायानां करिणां दले समापतत्। शुण्डच्छेदव्याकुलाः चीत्कुर्वन्तः कियन्तः करिणः आहताः धराशायिनोऽभूवन्, कियन्तश्च व्याकुलाः स्वामेव सेनां ममर्दुः। एवं विषमां स्थितिं वीक्ष्य मीराः गक्खराश्च शाहवाहनं हस्तिनं परिवव्रुः। अस्मिन्नेवान्तरे धीरस्य साम्मुख्ये तातारखानः समायातः, किन्तु तस्य सम्मुखे सोऽपि स्थातुं न शशाक। धीरस्य शक्त्या तस्योभौ ऊरू अश्वपृष्ठे कीलितावास्ताम्, शिरसि च घोरखड्गाघातेन मूर्च्छितः स रणभूमौ अपतत्।

शाहं रक्षयितुं मीराः गक्खराश्च भीषणं युद्धम् अकार्षुः। धीरपुण्डीरस्य वीराः तैः साकं युध्यमानाः आसन्। इदं विलोक्य धीरः स्व वाहं शाहाभिमुखम् प्रेरयामास। तावदेव ह्रेषित्वा धीरस्य अश्वः उपप्लवत्, शाहस्य चक्षुषोः आकस्मिक-विद्युत्-चमत्कृताविव चाकचिक्यमाचक्राम। धीरस्य करवालेन कर्तिते करे शाहस्य करीः सकम्पो भूमौ समापतत्। यावदसौ धनुः करे कृत्वा सावधानः समुत्तिष्ठेत्, तावदेव धीरपुण्डीरेण शाहस्य ग्रीवायां धनुर्निक्षिप्य स आकृष्य हठान् हयमारोप्य प्रतस्थे।

इत्थं धीरपुण्डीरेण स्वप्रतिज्ञा परिपूरिता, शहाबुद्दीनगोरी स्वजीवने अन्तिमवारं पृथ्वीराजचौहानस्य सम्मुखे बन्दीवेषेण उपस्थितोऽभवन्। धीरस्य अभिप्रायम् अवगत्य राज्ञा गोरी मोचितः। कियन्तिचिद् दिनानि धीरस्तं स्वावासे आवास्य विससर्ज।

चतुर्दिक्षु धीरस्य वीरत्वस्य मैत्रीभावस्य च प्रशंसा प्रससार। कियन्तिचिद् दिनानि शान्त्या व्यतीयुः, किन्तु पिशुनाः राज्ञः कर्णेजपत्वं भेजिरे। एकस्मिन् दिने अत्यभिमानरूपम् अभियोगं पुरस्कृत्य राज्ञा धीरस्य देशान्निष्कासनाज्ञा दत्ता। यावत् दिल्लीराज्यात् परं धीरेण यदैव पदं प्रक्षिप्तं तावदेव गोरिणो दूताः तमाह्वयितुं समुपस्थिताः। कतिचिद् दिनानि स गोरिणः आतिथ्यं स्वीचकार। तदनन्तरं पृथ्वीराजः तदपराधं क्षान्त्वा प्रत्यागन्तुं न्यवेदीत्। गोरी वाञ्छति स्म यत् धीरो मदन्तके एव तिष्ठन्तु, कामं युद्धे कस्यापि पक्षं न गृह्णातु, किन्तु धीरेण एतन्नाङ्गीकृतम्। स ततः प्रस्थितः।

मध्येमार्गम् अश्वव्यापारिभिः संधाय तातारखानो धीरं मारयामास। वञ्चयित्वा धीरशिरच्छेदिनं कोलन खाँ पठानं गोरिणः पार्श्वे प्रेषयामास। धीरस्य मृत्युमाकर्ण्य दुःखितेन शाहेन स वञ्चकी मारितः। शोकसंतप्तश्च स धीरस्य शवं दिल्लीं प्रापयामास। दृष्ट्वेदं पृथ्वीराजः अत्यर्थं दुखितोऽभूत्। फलतः राजकार्यादिभ्यो विरतो भूत्वा स्वाच्छन्द्येन विलसन्नासीत्।

(क्रमशः)

—:०:—

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

श्रीभारतधर्म-महामण्डल-शास्त्रप्रकाश-विभागद्वारा प्रकाशितानि पुस्तकानि

१.	धर्म-कल्पद्रुम प्रथम खण्ड	२)
२.	,, द्वितीय खण्ड	१॥)
३.	,, तृतीय खण्ड	२)
४.	,, चतुर्थ खण्ड	२)
५	,, पंचम खण्ड	२)
६.	,, षष्ठ खण्ड	३॥)
७.	,, सप्तम खण्ड	२)
८.	,, अष्टम खण्ड	३॥)
९.	धर्म-कल्पद्रुम द्वितीयखण्डसहित, रायल एडी०	५)
१०.	प्रवीण दृष्टि में नवीन भारत प्र० द्वि० खण्ड	२)
११.	नवीन दृष्टि में प्रवीण भारत	१)
१२.	साधन-चन्द्रिका	१।॥)
१३.	शास्त्र-चन्द्रिका	१॥)
१४.	धर्म-चन्द्रिका	१।)
१५.	आर्य-गौरव	॥)
१६.	नीति-चन्द्रिका	॥)
१७.	धर्म-प्रश्नोत्तरी	।)
१८.	चतुर्दश-लोकरहस्य	।)
१९.	गीतार्थ-चन्द्रिका सजिल्द	३)
२०.	,, ,, अजिल्द	२॥)
२१.	सनातनधर्म-दीपिका	।॥)
२२.	धर्म-विज्ञान प्रथम खण्ड	५)
२३.	,, द्वितीय खण्ड	४)
२४.	,, तृतीय खण्ड	४)
२५.	सतीचरित्र-चन्द्रिका	२)
२६.	नित्यकर्म-चन्द्रिका	।)
२७.	धर्म-सोपान	।)
२८.	धर्मकर्म-दीपिका	।)
२९.	सदाचार-सोपान	—)
३०.	कन्याशिक्षा-सोपान	—)
३१.	ब्रह्मचर्य-सोपान	।)
३२.	साधन-सोपान	॥)
३३.	शास्त्र-सोपान	।)
३४.	उपदेश-पारिजात	॥)
३५.	कल्कि-पुराण	१॥)
३६.	पातञ्जल-योगदर्शन	३)
३७.	महामण्डल-रहस्य	१॥)
३८.	मन्त्रयोग-संहिता	१)
३९.	हठयोग-संहिता	॥)
४०.	तत्त्वबोध	=)
४१.	स्तोत्र-कुसुमाञ्जलि	।)
४२.	भगवद्गीता प्रथम खण्ड	१)
४३.	विष्णु-गीता	१)
४४.	सूर्य-गीता	॥)
४५.	शक्ति-गीता	१)
४६.	धीश-गीता	।॥)
४७.	शंभु-गीता	१)
४८.	संन्यास-गीता	१)
४९.	गुरुगीता	।)
५०.	कर्ममीमांसा-दर्शन प्रथम खण्ड	१॥)
५१.	,, द्वितीय खण्ड	२)
५२.	,, तृतीय खण्ड	५)
५३.	कर्ममीमांसा-दर्शनम (संस्कृत)	२)
५४.	राम-गीता	२॥)
५५.	कहावत-रत्नाकर साधारण रायल	१०)
५६.	रामायण तुलसीकृत	१॥)
५७.	दैवीमीमांसा-दर्शन प्रथम भाग	३॥)
५८.	,, द्वितीय भाग	५)
५९.	त्रिवेदी सन्ध्या	।=)
६०.	गोव्रत-तीर्थमहिमा	॥)
६१.	मार्कण्डेय-पुराण प्रथम खण्ड	१)
६२	,, द्वितीय खण्ड	१)
६३.	,, तृतीय खण्ड	१)
६४.	ऋजु-पाणिनीयम	।॥)
६५.	संगीत-सुधाकर	।)
६६.	पुराण-रहस्य	१॥)
६७.	संन्यासधर्म-पद्धति	१॥)
६८.	पातञ्जल-योगदर्शनम् (संस्कृत)	४)

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

पञ्जीकृतसंख्या एल० १८६

सूर्योदयस्य नियमाः

पत्र-संहिता

१. 'सूर्योदय'-मासिकपत्रस्य वार्षिकं शुल्कं रूप्यकपञ्चकं वर्तते। धनादेश (मनीआर्डर) द्वारा तत्प्रेषणीयम्। वी० पी० द्वारा प्रेषणे ५० पणाः पृथक् प्रदेयाः स्युः।

२. आवर्षं गम्भीरसाहित्यसमन्विताः १२ अङ्काः प्रकाश्यन्ते। नवीनग्राहकत्वं प्रथमाङ्कतः (जनवरी-अंकतः) एव स्वीक्रियते। माध्यमिकेन केनापि अङ्केन ग्राहकत्वं न स्वीक्रियेत।

३. आंग्लमासस्य २६ दिनाङ्के 'सूर्योदयः' प्रकाशितो भवति, वारद्वयं संशोध्य ग्राहकेभ्यः स प्रेष्यते। अतस्तदलाभे पूर्वं स्वकीय-पत्रालयतस्तदनागमनस्य निश्चयं कृत्वैव १० दिनाङ्कानन्तरं वयं सूचनीयाः।

४. लेख-कवितादीनां भाषा संयता, सरला, शुद्धा च भाव्या। प्रकाशनीय लेखादीनां स्पष्टाक्षरैः कर्गजस्यैकपृष्ठे एव लेखनमावश्यकम्। अस्वीकृता लेखादयः पोस्टविभागीय-चिटिका (टिकट) प्राप्त्यनन्तरं परावर्तयितुं शक्ष्यन्ते।

५. सम्पादकीय-विषयसम्बद्धे पत्र-व्यवहारे 'सम्पादकः' इति, व्यवस्थाविभागीय-पत्रव्यवहारे च 'व्यवस्थापकः' इति च स्पष्टं लेखनीयम्। तेन उत्तरलाभे मुधा विलम्बो न भवेत्।

विज्ञापन-शुल्कम्

सूर्योदये सुरुचिपूर्णं विज्ञापनं प्रकाश्यते। एकवारं तस्य प्रकाशनस्य शुल्कक्रमश्च अधोलिखितोऽस्ति। सार्वकालिकस्य दीर्घकालिकस्य च विज्ञापनस्य कृते विशेष-सौविध्याय पत्र-व्यवहारः कार्यः।

साधारणस्य प्रतिपृष्ठस्य	१००) रु०	साधारणस्य प्रत्यर्धपृष्ठस्य	६०) रु०
साधारणस्य चतुर्थांशपृष्ठस्य	३५) रु०	आवरण-चतुर्थपृष्ठस्य	२००) रु०
आवरण-द्वितीय-तृतीयपृष्ठयोः	१५०) रु०	प्रथमावरणपृष्ठे विज्ञापनं न स्वीक्रियेत।	

— सङ्केतः —

'सूर्योदय'-कार्यालयः, भारतधर्म-महामण्डलम्, जगत्गंज वाराणसी।

सम्पादकः, प्रकाशकः, मुद्रकश्च—गोविन्द नरहरि वैजापुरकरः,
श्रीभारतधर्ममहामण्डलम्, जगतगंज, वाराणसी कैण्ट।
मुद्रण-स्थलम्—मनोहर प्रेस, जतनवर वाराणसी।

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

सूर्योदयः

भारतधर्ममहामण्डलस्य
मासिकं मुखपत्रम्

वर्षम् ४२

अङ्कः ११

सम्पादकः
गो० न० वैजापुरकरः

नवम्बर
१९६७

वार्षिक-मूल्यम्
५) रूप्यकाणि

अस्याङ्कस्य मूल्यम्
अर्धरूप्यकम्

प्रत्नं रत्नं तनोतु शं नूत्नम्

★

१. काञ्चन - सञ्चयरुचिमद - वञ्चक - देहप्रभाझरैर्भरिताम् ।
काञ्चन किञ्चन-कुञ्चितलोचनकमलां भजे हरिर्महिलाम् ।।

२. निस्तुलशस्तगुणावलि - संस्तुतमस्तापदुद्गमं स्तुत्यम् ।
किञ्चिद् वस्तु पुरस्तान् चकास्तु हृदये हरेऽस्तु वास्तव्यम् ।।

३. मधुररसाधिकमसृणं क्षीरधिमथनोदितं सुधासहजम् ।
किञ्चन नवनवनीतं नमतां तनुतां तनोः परां पुष्टिम् ।।

४. मञ्जुल-मञ्जुल-शिञ्जित-मणिमञ्जीरैं निरञ्जवैर्ध्येयम् ।
रञ्जयतु मानसं नः किमपि महः क्षीरसागरोदरजम् ।।

५. हरिहृदयहारि कौस्तुभसहजं सुकुमारकायमतिदीप्रम् ।
किञ्चन रत्नाकरजं प्रत्नं रत्नं तनोतु शं नूतनम् ।।

—'गीतिरत्न'तः ।

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

अनुक्रमः

प्रपानकम्	पत्रपुटम्	परिवेषकः
श्री राधिकायाः लास्यम्	२९७	श्री आचार्य जानकीवल्लभशास्त्री
श्री महर्षि-ज्ञानानन्द-चरितम्	२९८	श्री विन्ध्येश्वरीप्रसादशास्त्री
श्रौतधर्मः, तत्प्राणपदा यज्ञसंस्था च	२९९	सम्पादकीयम्
रमा-वाक्सपर्या	३०२	श्री शिवप्रसादद्विवेदाः
(७) पुरुषसूक्त-देवीसूक्तयोः परमं तात्पर्यम्	३०४	श्री पूज्य करपात्रस्वामिनः
(३७) क्षत्रपति-महाकाव्यम्	३०९	श्री उमाशङ्करशर्मा त्रिपाठी
उत्सर्गः—एका कथा	३११	श्री 'शर्मा'
भारते भातु भारती	३१३	श्री हनुमद्दत्त शास्त्री
संसेविता सा निधिरेव नित्यम्	३१४	श्री वैद्यः रामस्वरूप शास्त्री
मानस-भारती	३१५	श्री जनार्दन गङ्गाधर रटाटे
उपमा कालिदासस्य	३१६	श्री केशवराव मुसलगांवकरः
सुस्वागतं हिमांशो !	३१७	सम्पादकः
(७) पृथ्वीराजाख्यानकम्	३१९	श्री विश्वनाथ त्रिपाठी

सूचना—अङ्केऽस्मिन् ३०५ पृष्ठे ३०७ पृष्ठे च पृष्ठशीर्षकयोः 'पुरुषसूक्त-श्रीसूक्तयो…' इत्यस्य स्थाने 'पुरुषसूक्त-देवीसूक्तयोः…' इति पठनीयम्। ३१६ पृष्ठे 'उपमा कालिदासस्य' इत्यस्य लेखकनाम्नि 'मुगलगांवकरः' इत्यस्य स्थाने 'मुगलगांवकरः' इति पठनीयम्।

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

सूर्योदयः

श्रीभारतधर्ममहामण्डलस्य मासिकं मुखपत्रम्

रागद्वेषनिशाटनं विधुरयन् मोहं तमो नाशयन्,
तामिस्रं जडवादकैरवकुलं ज्ञानत्विषा ग्लापयन्।
विद्वत्कोकमशोकयन् नयसुधीरोलम्बमुन्मीलयन्,
सञ्जातः सुमनोमनो मधुरयन् सर्वत्र सूर्योदयः ॥

४३ वर्ष] वाराणसी, कार्तिकः २०२४ : नवम्बर १९६७ ई० [११ अङ्कः

श्री राधिकायाः लास्यम्

ज्योत्स्नास्नाते निशीथे किसलय - शयिते मर्मरे स्निग्ध-सान्द्रे
चान्द्रं पीयूषमाचामति चटुल - चल - च्चञ्चु - चञ्चच्चकोरे ।
वेल्लत् - कल्लोललीला कलकल - कलिते यामुने काम्यकूले
मन्दं मन्दं कदम्बं स्पृशति मधुमये माधवीये समीरे ॥ १ ॥
किं किं किं किङ्किणीनां कण-कण - रणनं कङ्कणद्वन्द्वबन्धि
स्मारं स्मारं विरावं चल-चरण-मिलन्-मञ्जु-मञ्जीरजातम् ।
लोला-शीलालि-खेलत्-करतल - कलितो - ताल-ताल सहास्यम्
लास्यं श्रीराधिकायास्तिरयतु दुरितं मानसं मानवानाम् ॥ २ ॥

—आचार्य श्री जानकीवल्लभशास्त्री

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

श्री महर्षि-ज्ञानानन्दचरितं महाकाव्यम्

— श्रीविन्ध्येश्वरीप्रसादशास्त्री —

नव पञ्च-सुभूतलेषु वासा ऋषिसङ्घस्य समादृताः सुधीभिः ।
इतरे पितरः सुरासुरा वा निजनिर्धारितभूषु संवसन्ति ।। ९९ ।।

१००. अत एव महर्षिसङ्घ - नेता
सकलैरेव सुरासुरैर्नमस्यः ।
न तथा कमलासनश्च विष्णुः
सुसमर्थावपि नैव विश्ववन्द्यैः ।।

१०१. अथवैष सदा त्रिदेवमध्ये
महितो ज्ञाननिधिर्महेश्वरो वै ।
तमतः प्रतिपद्य सर्वलोकाः
शिवमज्ञान-विनाश-माद्रियन्ते ।।

१०२. ऋषयो निगमागमावबोधं
प्रकटीकर्तुमावातरन्ति पूर्णे ।
भरतस्य पवित्र - भूमिभागे
नहि तद्भिन्नभुवि श्रुतेः प्रकाशः ।।

१०३. इह भौतिक - तत्त्वहेतुभूतं
भुवि विज्ञानमतं समस्तमेव।
प्रकटीक्रियतेऽवतीर्य लोके
विधिरार्षः परिचिन्तनीय एषः ।।

१०४. ऋषयस्त्रिदशाश्च दानवाश्च
निखिले मर्त्यनिवासभूतलेऽस्मिन् ।
अवतारमनेकमद्भुतं यं
दधते नित्यमहो न तस्य सङ्ख्या ।।

१०५. अवनं किल कर्म देवमूलं
हननं तद्भुवि दानवीयमास्ते ।
अपि बोधसमुद्भवं च सर्वं
परिवेद्यं निखिलैर्भवेऽत्र चार्षम् ।।

१०६. परमात्म- महर्षि - देव-दैत्या
विविधं यं यमुपायमाश्रयन्तः ।
भुवनेऽवतरन्त्यहर्निशं त-
न्नहि संख्यातुमहीश्वरोऽपि शक्तः ।।

१०७. अवतारवपुर्धराः समस्ता
ध्रुवमुच्चावचजीवकेन्द्रमेव ।
निजकर्म - सुसाधनाऽनुकूलं
दृढमाश्रित्य समुद्भवन्ति नित्यम् ।।

आकर्ण्य तर्कमहितां श्रुतियुक्तियुक्तां कर्णामृतोपम-सुखप्रदवाचमेनाम् ।
राज्ञां सतां च सुधियां विनतैः शिरोभिर्बालांशुभास्कर इवैष यतिर्विरेजे ।।१०८।।

।। इति श्री महर्षि-ज्ञानानन्दचरिते द्वादशः सर्गः ।।

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

श्रौतधर्मः, तत्प्राणप्रदा यज्ञसंस्था च

विगतमासस्य १३ दिनाङ्के वाराणसेय-वल्लभराम-शालिग्राम-साङ्गवेद-विद्यालयस्य सञ्चालकानां कैलासवासिनां वेदशास्त्रसंरक्षकाणां श्री मुरारीलाल नागरमहोदयानां प्रस्तरमूर्तेः अनावरणोत्सवस्य अध्यक्षपदेन अभिभाषणं कुर्वद्भिः काशिराज-श्री विभूतिनारायणसिंह एम. ए. महोदयैरुक्तं यत् 'साम्प्रतं यज्ञसंस्था लुप्तप्राया जायते। साङ्गवेदविद्यालयस्य प्रायो व्रतमिदं दृश्यते यत् विलोपं गच्छतां भारतीय-संस्कृति-मानबिन्दूनां संरक्षणं नाम। साङ्गवेदाध्ययन-वैदिकवर्षाशनप्रदानादिमुखेन विद्यालयेनात्र बहु प्रयतितं वर्तते। कैलासवासिभिः श्रीमुरारीलालमहोदयैरपि यावज्जीवमेतद्व्रतं महता आटोपेन निर्व्यूढम्। अत एव मे साग्रहं निवेदनं यदनेन विद्यालयेन यज्ञसंस्थायाः प्रोज्जीवनाय अक्षुण्णतायै च प्रतिवर्षमत्र काश्यामेकस्य महायज्ञस्य आयोजनं नियमतः समायोजनीयमि'ति।

एवमेव अस्मिन्नेव मासि काश्यामागतैः उदासीनसम्प्रदायाचार्यैः महामण्डलेश्वर - श्री गङ्गेश्वरानन्द वेददर्शनाचार्य स्वामिपादैः समायोजितायां पण्डितसभायामुक्तं यत् 'साम्प्रतं श्रौतधर्म-यज्ञादिविधीनां शिक्षाविधौ नितान्तमभावो दृश्यते, येन भारतीयसंस्कृतेः विकाश-प्रसारविधौ दार्ढ्यं न जायते। अतः श्रौतधर्मप्रचारणाय विद्वद्भिरग्रेसर्तव्यमिति। अत्रास्यैव भाषणद्वयस्य प्रकाशे श्रौतधर्मानुगुणाया यज्ञसंस्थाया विषये किञ्चिद् विचार्यते।

इदं तु स्पष्टमेव यदस्माकं भारतीयजीवनं धर्मप्राणम्। धर्म एवास्माकं सर्वस्वम्। अत एव भगवान् कृष्णद्वैपायनो ब्रूते—

ऊर्ध्वबाहुर्विरोम्येष न च कश्चिच्छृणोति मे।
धर्मादर्थश्च कामश्च स धर्मः किं न सेव्यते॥ इति।

धर्मोऽयं वेदस्रोतस एवाविर्भवति, 'वेदप्रतिपाद्यः प्रयोजनवदर्थो धर्मः' इति हि तल्लक्षणात्। अत एव मूलभूतो धर्मः श्रौतधर्म एव, तदनुगुण एव स्मार्तो धर्मः। श्रौतधर्मविलोपे मूलविलोपेन स्मार्तधर्मस्थितेरपि निरन्तरायता असम्भाव्या। साम्प्रतं नामस्मरणकीर्तनादयः स्मार्ता धर्माः सुबहु प्रचारिताः। तेषां प्रचार-प्रसारमोहस्तु एतावान् विततो यन्नित्य-नैमित्तिककर्मणामपि तैर्गतार्थता मन्यते बहुभिः, तथा प्रायः प्रयत्यतेऽपि। अनपेक्षितमेतत् भारतीयधर्मरक्षणदृष्ट्या। अतो वेदप्रसूतानां धर्माणां शिक्षणं तदनुष्ठानं तत्प्रचारणं शिक्षासु तन्निवेशश्च परमावश्यक एव संवृत्तो धार्मिकाणां कृते। तदर्थं तद्धर्मप्रवक्तॄणां वेद-तदङ्गादीनां समग्रस्य वैदिक-वाङ्मयस्याऽपि आलोडनं नव-नवतत्त्वोद्भेदनं व्यापकप्रचारणञ्च परमावश्यकम्।

सन्दर्भेऽस्मिन् श्रौतमार्ग-प्रतिष्ठापकाः उदासीनसम्प्रदायाचार्या एते युवावस्थात एव अद्यापि ८८तमे वयस्यपि प्रयतमाना विलोक्यन्ते। तैर्वैदिकवाङ्मयं सर्वतो मथित्वा सुबहु नवनीतं वितीर्णं वेदप्राणेभ्यो भारतीयेभ्यः। निरुक्तकारदिशा नैकेषां वेदमन्त्राणां नैकविधा अर्थाः प्रस्तूयन्ते, तैश्च राम-कृष्णादिपौराणिकमहापुरुषाणां चरितान्यपि प्रमाप्यन्ते। शतपथस्यापि प्रथमकाण्डं सुपरिष्कृतम्। अधुना समग्रवेदस्य मन्त्रब्राह्मणात्मकस्य बृहदाकारेण अधिकाधिकद्वित्रभागैः प्रकाशनं नगरे नगरे तत्स्थापनेन वेदमन्दिराणां निर्माणञ्च

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

तेषां तात्कालिक-योजनाधीनम् । इत्थं ते सर्वथा वेदरक्षणाय प्रयतन्त एव । विद्वद्भिरपि अत्रावहितैर्भूत्वा निरालसैः क्षणं लौकिकाः कामनाः दूरे संस्थाप्य प्रयतनीयम् । यतो हि विदुषां स्वरूपरक्षा श्रौतधर्म-प्रतिष्ठायामेव निर्भरा । अत्र दौर्भाग्यादस्माभिः प्रमाद्येत तदा नूनमस्माकं स्थितिरेव सङ्कटाकुला भवेत् ।

इत्थं श्रौतधर्म - प्रसारस्य युगाह्वानत्वं प्रसाध्य श्रौतधर्म-प्राणपदाया यज्ञसंस्थाया विषयेऽपि समासतोऽत्र विचार्यते । महाराजैः श्री काशिराजैः स्वीये भाषणे यस्या यज्ञसंस्थायाः प्रोज्जीवनस्य अक्षुण्णतास्थापनस्य च अनिवार्यत आवश्यकत्वमुक्तं तत्स्वात्मनि बहुलमर्थं बिभर्ति । यतो हि भारतीयसंस्कृतेरिदं सुदृढमभिमतं यज्जगदिदं यज्ञमयमेव । कालिकापुराणे (३१.४०) स्पष्टमेवोक्तम्—सर्वं यज्ञमयं जगत् इति । भगवद्गीतायां तु धर्मसमन्वितानि सर्वाणि कर्माण्येव यज्ञत्वेन स्वीकृत्य प्रोक्तम्—

यज्ञार्थात् कर्मणोऽन्यत्र लोकोऽयं कर्मबन्धनः । इति ।

छान्दोग्योपनिषदि (३.१६) तु पुरुषजीवनमेव यज्ञरूपेणोक्तम् । श्रौतयज्ञवत् तत्रापि सवनत्रयं प्रकल्प्य उक्तं यत् शास्त्रोक्तविध्यनुसारमेतादृशं जीवनयज्ञं कुर्वाणो मानवः ११६ वर्षपर्यन्तं जीवितुं प्रभवति । उपनिषत्सु आध्यात्मिका - ऽधिभौतिका - ऽधिदैविकेति त्रिविधयज्ञानां बहुशो वर्णनमुपलभ्यते । मानववत् प्रकृतिरपि अहरहो यज्ञं तनुते, देवाश्चापि तथा । शतपथब्राह्मणे उक्तम्—यज्ञो वै विष्णुः (१.१.१.१३) इति । भारतीय-वाङ्मये विष्णुः सर्वदेवमय उक्तः । अतो यज्ञे सर्वदेवानां सान्निध्यं सहजत एव साध्यते । जगतः पालनकर्तुः विष्णोः प्रसादनं जगति जीवतां जनानां कियदनुपेक्ष्यमिति पृथक् वक्तव्यं नावशिष्यते ।

अन्यच्च, भारतीयानां जीवनव्यवसाया न केवलं भूमण्डलमात्र-सीमिताः । भूमण्डलत उपरितनेषु लोकेषु सुलभाः पदार्था अपि भारतीयैरत्रैव आसादयितुं शक्यन्ते । तत्र माध्यमं देवाः, तैश्च एतेषां सम्पर्को यज्ञेनैव साध्यते । स्वभावतोऽल्पसाधनानां मानवानां देवतानुग्रहः कियाननुग्राहीति किमु वक्तव्यम् ? अत एवोक्तम्—

तथा च यजमानं देवा ईश्वराः सन्तो जीवनार्थेऽनुगताश्चरुपुरोडाशाद्युपजीवनप्रयोजनेन, अन्यथापि जीवितुमुत्सहन्तः कृपणां दीनवृत्तिमाश्रित्य स्थिताः, तच्च प्रशास्तुः प्रशासनात् (बृ० उ० भा० ३.८) इति ।

अत एव भगवद्गीतयाऽप्युक्तम्—

देवान् भावयताऽनेन ते देवा भावयन्तु वः ।
परस्परं भावयन्तः श्रेयः परमवाप्स्यथ ॥
इष्टान् भोगान् हि वो देवा दास्यन्ते यज्ञभाविताः ।
तैर्दत्तानप्रदायेभ्यो यो भुङ्क्ते स्तेन एव सः ॥
(३.११-१२) इति ।

गीताकारस्य यज्ञविलोप्तुः कृते इतोऽधिकः शापो भवितुं नार्हति । अतः सुस्पष्टमेतद् यन्मानवैः नियमतो यज्ञनिष्ठैर्भाव्यम् । तदैव तेषामभ्युदयः संभवेत् । गीतोक्त-युक्त्यनुसारं कर्मणां निष्कामानुष्ठानेन तान्येव मोक्षसाधकानि भवन्तीति नयेन यज्ञानां प्रेयोवत् श्रेयःसाधकत्वमपि अर्थतः सिद्ध्यति ।

भारतीयं यज्ञविज्ञानमेतदतीव गभीरम् । एतादृशेन एकाधिकेन सीमितस्थानेन लेखेन तन्निरूपणं सर्वथा दुष्करम् । अग्निषोमात्मके जगति यज्ञसंस्थाया यादृशी व्याप्तिस्तादृशी व्याप्तिर्विष्णोरन्तरा कस्यापि न संभवति । अन्ततो विष्णुरपि यज्ञरूप एवेति एकमेवाद्वितीयं यज्ञतत्त्वं निखिलेऽस्मिन् जगति ओत-

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

प्रोतम्। तमवमन्य को नाम जन्तुः क्षणं स्वात्मसत्तां धारयितुं प्रभवेत्?

तथापि व्यावहारिकदृष्ट्या वैदिकपद्धत्यनुसारं विचार्यमाणे शुक्लयजुर्वेदसंहितोक्ताः सर्वे यज्ञा अपि तथैव मानवस्य श्रेयःप्रेयसाधकाः। गीताकारेण हि मानवशरीरस्य श्रेयप्रेयसोः परमस्य माध्यमस्य उपादानमेव यज्ञा उक्ताः—'यज्ञाद् भवति पर्जन्यः पर्जन्यादन्नसम्भवः। अन्नाद् भवन्ति भूतानि' इत्यादि-कार्यकारणभावमौपनिषदमुपक्षिपता। अतः श्रेयःप्रेयोऽभिलाषिभिः आस्तिकैर्भारतीयैरियं यज्ञसंस्था नूनं पुनरुज्जीवनीया। यथा वेदरक्षणस्य तत्प्रोज्जीवनस्य चानिवार्यत्वमस्माकं कृते भवति, तथैव सायण-महीधरोव्वटस्कन्दस्वाम्याद्याचार्यप्रवरैरुक्तस्य वेदपरमतात्पर्यभूतस्य यज्ञविधानस्यापि प्रचारणमुज्जीवनं प्रशिक्षणञ्चापि सर्वथाऽनुपेक्ष्यतां भजते।

महाराजैः काशिराजैस्तु स्वीये भाषणे प्रसङ्गतस्तदा साङ्गवेद - विद्यालय - सञ्चालका एव एतदर्थं प्रार्थिताः, तथापि न तत्रैव तेषां तात्पर्यं परिसमाप्यते। भगवद्गीता भगवता पार्थाय प्रोक्ता, न च तावता सा पार्थमात्र-विश्रान्ता। अद्यापि सा विश्वस्मै मार्गदर्शनाय प्रभवति, यावच्चन्द्रदिवाकरौ प्रभविष्यति च। एवमेव महाराजैः काशिराजैः प्रसङ्गतः साङ्गवेदविद्यालयाय कृतोऽपि यज्ञसंस्था - प्रोज्जीवनाग्रहः पर्यायेण सर्वेभ्य आस्तिकेभ्यस्त्रैवर्णिकेभ्य एव लगति। तैरिदम् अस्मत्पूर्व - पूर्वतर - पूर्वतमैः उद्भावितं विज्ञानं वैज्ञानिकेऽस्मिन् युगे मीमांसादिपद्धतीः समाश्रित्य तथा परिष्करणीयं प्रचारणीयं च यथा तद् भौतिकविज्ञानसमुन्नयने परासक्तानाम्, अन्ते च महाविनाशफलमेव समासादयतां मानवानां सर्वथा शाश्वतशान्तेः प्रयोजकं भवेत्।

सूर्योदय-सञ्चालकस्य प्रवृद्धस्य श्रीभारतधर्ममण्डलस्य पुनरत्र विषये अतितरामाग्रहः। न केवलमाग्रह एव, तज्जनकैः पूज्यपाद-महर्षि - श्री ज्ञानानन्दस्वामिपादैर्यावज्जीवम् अस्या एव यज्ञसंस्थायाः प्रोज्जीवनाय प्रयतितम्। नैके महान्तो महायज्ञास्तैः समाचरिताः, अखण्डरूपेण तदनुष्ठानाय पश्चाद्भाविनो महामण्डलसञ्चालकाश्च समनुशिष्टाः। अद्यापि कामं प्रतीकरूपेणैव भवतु, महामण्डल - वर्तमानसञ्चालिकाभिः परमगुरुभक्ताभिः पूज्यश्री विद्यादेवी महोदयाभिः प्रतिवर्षं शारदीय-वासन्तिकेति यज्ञद्वयं पराम्बायाः प्रीतये अखण्डं समनुष्ठीयते। अतोऽस्माकमत्र विषये पुनः सर्वथा आग्रह एव सर्वेभ्यो भारतीयेभ्यः सुस्पष्टः।

काममद्य नैके स्मार्ताः धर्माः प्रचलन्तु। यावत् श्रौता धर्माः, तत्रापि प्रमुखतमो यज्ञसंस्थात्मको धर्मस्तदुपष्टम्भकं वैदिकं वाङ्मयमस्माभिर्न प्रोज्जीव्येत, न प्रचार्येत स्वातन्त्र्यलाभानन्तरमपि विंशतिवर्षोत्तरम्, तदा कृतं भारतीयसंस्कृति-समुन्नयन-समुद्घोषेण। वेदा हि भारतीय-संस्कृतिशरीरस्य प्राणाः, यज्ञश्च तेषु साक्षिचैतन्यम्। चैतन्यविरहितां भारतीयसंस्कृतिमादाय प्रचार्येत, तदा नूनं तत् शवोद्वहनायितं भवेत्। अतो भारतीयैः सर्वैः भारतीयसंस्कृति-समुन्नयने बद्धपरिकरैः महाराजानां काशिराजानाम्, महामण्डलेश्वराणाम् उदासीनवेददर्शनाचार्याणाम् श्री गङ्गेश्वरानन्दस्वामिपादानाम् ब्रह्मलीन - महर्षिवर्याणां श्री ज्ञानानन्दस्वामिपादानां सूर्योदय-भारतधर्ममहामण्डल-प्रोज्जीवकानां हितोपदेशेऽस्मिन्नवधाय वेदानां यज्ञसंस्थानां तदनुप्राणितायाः वैदिकसंस्कृतेश्च समुन्नयनेन विनाशक - विज्ञानदावानल - दन्दह्यमानवपुषो विश्वस्य शाश्वत-शान्तिदानाय अप्रमदितैः प्रयतितव्यमित्येवास्माकं साग्रहं निवेदनम्। ★

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

रमा-वाकूसपर्या

— कविवराः श्री शिवप्रसाद द्विवेदाः —

★

१. पद्मासनेन कमलासन - माश्रयन्तीं
दिग्दन्ति - हस्तधृत- कुम्भसुधाप्रवाहैः ।
स्नान्तीं हरिप्रणयरूपधरां कराब्जां
देवीं भजामि भवभीतिहरां पराख्याम् ।।

२. सुवर्णकुसुमाक्रान्तां पद्मरागदलात्मिकाम् ।
चाकचिक्यवरां शाटीं श्रीजनन्या भजामहे ।।

३. पद्मपत्रोपरि लसद्धिमबिन्दु - समाकृति ।
दिङ्नखं पादयोर्मातुः स्मारंस्मारं मतिं लभे ।।

४. सुवर्णमित्रालङ्कार - बन्धरीतिमनोहरौ ।
सुश्लोकचरणौ लक्ष्म्या बुधबोध्यौ नमाम्यहम् ।।

५. हंसकोपासितौ प्रेमसुरसौ सुरसेवितौ ।
नारिकेलसमुद्गाभौ गुल्फौ देव्याः स्मराम्यहम् ।।

६. हेमखट्वाङ्गसुभगे विश्वकर्मकलातिगे ।
रोहावरोहशोभाढ्ये श्रीजङ्घे शरणं मम ।।

७. कामपल्यङ्कपदयोर्मस्तभाने मनोहरे ।
जननीजानुनी जैत्रे सौन्दर्यस्य यजामहे ।।

८. वर्णमार्दवमादाय चम्पकानां विनिर्मितम् ।
करिशुण्डद्वयं तद्वद् देव्यूरूयुगलं नुमः ।।

९. ब्रह्मवत् संशयापन्नं रसनोपनिषत्स्फुटम् ।
ज्ञानविज्ञानसंवेद्यं मध्यभागं श्रियाः स्तुमः ।।

१०. स्वर्णदी - स्वर्णसोपान - सदृशं त्रिवलीवलम् ।
शोभाया मन्दिरं मातुरुदरं प्रणमाम्यहम् ।।

११. शोभायाः सरितो मध्ये शुभावर्तसुशोभिताम् ।
गम्भीरनाभिं श्रीदेव्याः शोकमोक्त्रीं हृदा भजे ।।

१२. गभीरकूपनिर्गच्छत् फणिनी - शैलयोरधः ।
प्रविशन्तीव पद्माया रोमराजिर्विराजते ।।

१३. शम्भुमूर्तिद्वयोपेतं कैलासोभयवत् स्थितम् ।
वक्षोजयुगलं मातुर्जीवनं जगतो नुमः ।।

१४. विकसत्-कोशकमल-कान्तिकोमलताऽऽहितौ ।
कर्णिका-हेममुद्राढ्यौ करौ ध्येयौ श्रियाः सदा ।।

१५. क्वणत्-कङ्कणरत्नालि - प्रभा - शक्रधनुर्द्वयम् ।
मणिबन्धद्वयं देव्या मनसा परिचिन्तये ।।

१६. सुवर्णवेणु-सद्ग्रन्थि - स्वक्षाकारौ च कूर्परौ ।
करुणाकोष-कीलाभौ कमनीयौ श्रियाः स्तुमः ।।

१७. मृणालकोमलौ स्फीतौ लवली-शाखिकोपमौ ।
माणिक्याङ्गद-दत्ताभौ भावयामि भुजौ श्रियाः ।।

१८. मांसलावंसकौ मातुर्हीरहारलतालसौ ।
बाहुमूले स्रंसमानौ ध्येयौ विधिमनोरथौ ।।

१९. सौकुमार्य-समापन्न - शङ्खसादृश्य- शोभनम् ।
हेमसौभाग्यसूत्राढ्यं कण्ठं मातुः स्मरेत् सदा ।।

२०. मुनिपुष्प - समाकारं भवेन्नारङ्गकं यदा ।
तत्तुल्यं चिबुकं मातुर्मोदमानं भजेज्जनः ।।

२१. बन्धूक - कुसुमारक्तौ पद्मपत्र - समाकृती ।
मातुरोष्ठौ सुराज्येष्ठौ नुमो विस्मयकारकौ ।।

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

२२. कुसुमं तिलकोत्पन्नं सौवर्णं चेद् भवेदिह।
तत्तुल्यां जननीनासां ध्यायंध्यायं सुखी भवेत्॥

२३. निष्कलङ्क-विधुद्वन्द्वं सन्ध्यारागोपशोभितम्।
मातुः कपोलयुगलं कामपूरं प्रतीक्ष्यताम्॥

२४. एकत्रैव मुखे कृत्वा मीनयुग्मं वसेद्यदा।
तन्निभं नयनद्वन्द्वं दृष्ट्वा मोदामहे श्रियाः॥

२५. इन्द्रनीलकृते शार्ङ्गे श्रीशस्य रक्षिते यथा।
मनोहरे भ्रुवौ मातुः सुरासुर - शुभाकरे॥

२६. हेमपट्टार्धचन्द्राभं कस्तूरी - तिलकाञ्चितम्।
ललाटं हरिसुन्दर्या भक्तानुग्राहकं भजे॥

२७. सुधां सौधाकरीं पातुमुद्गीर्णमणिनागराट्।
चूडामणिर्भालमूले कवर्य्यामिव सच्छ्रियाः॥

२८. मिलिन्दमण्डली - मेघनीलकण्ठादि- मेलनम्।
तत्तुल्यं कवरीभारमिन्दिराया हृदा भजे॥

२९. वैकुण्ठे श्रीरसि सुनयने ब्रह्मलोके तु वाणी
कैलासे त्वं हिमगिरिसुता सूर्यलोके च संज्ञा॥
इन्द्राणी वा शतमखपुरे वारिराजस्य राज्ञी
यद्यत् तेजो भवति कमले सर्वमेव त्वमेव॥

३०. एका त्वमेव कमले मधुसूदनस्य
त्रैगुण्यतो विरहितस्य समेश्वरस्य॥
चेतोहरा विविधरूप - विधापयित्री
पादाब्जयोस्तव भवानि कदा नु भृङ्गः॥

३१. अम्ब त्वदाश्रयमवाप्य निरञ्जनानि
दृश्यानि लोकनिवहे - नलिनीदलानि।
ये भक्तिभावविभवा भवतीं भजन्ते
तेषां हृदब्जममलं सुतरां विभाति॥

३२. लक्ष्मीपदाङ्गुलि - नखानि विधातुमेव
वेधा विधोर्दशकला नितरां निनाय।
निस्सारनीलमिह वीक्ष्य कृपाभिरामा
पूर्णं करोति कमला प्रतिपूर्णिमञ्च॥

३३. कमलनयन - मात्माधार - माश्रित्य पद्मा
सदसदिति जनानां संशयं निर्णिनाय।
जगदिदमपि कृत्वा सक्षकं तं विधाय
श्रयति सततमम्बा तां तुरीयामवस्थाम्॥

३४ कलिकलुष - कपटालोचने मुद्रयन्ति
हृदयकमलसंस्थां त्वां न पश्यामि पद्मे।
विघटय करुणाया घट्टनैस्त्वं यथाहं
तवचरणसरोजं हृत्सरोजे निरीक्षे॥

३५. लक्ष्मि त्वत्पदपद्मकोषयुगलं जागर्ति यत्रालये
तत्रस्थाः कृश-काण-कुब्ज-कुणयो जातिक्रियावर्जिताः।
सम्मान्या नृवरैर्भवन्ति सरले विद्वद्वरैः संस्तुता-
स्तेजोभिर्यशसा दिगन्तजयिनो देवालयं भुञ्जते॥

३६. क्षाराम्भसां प्रपूरोऽपि लब्ध्वा यामेककन्यकाम्।
अम्बुधिः क्षीरधिर्भूत्वा विष्णोश्च पूज्यतामगात्।

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

पुरुषसूक्त-देवीसूक्तयोः परमं तात्पर्यम्

—श्री पूज्य करपात्रस्वामिनः—

प्रसङ्गादत्र सुप्रसिद्धस्य वैदिकस्य पुरुषसूक्तस्य देवीसूक्तस्य च परमं तात्पर्यं किमिति मृग्यमाणे अत्रैव परब्रह्मणि पूर्णशक्तिसम्पन्ने भगवत्येव तत् प्रतितिष्ठति। अत एव सूक्तयोरेतयोः समीक्षणपूर्वकं सूक्तमन्त्रार्था अत्र व्याक्रियन्ते। तत्र प्रथमं पुरुषसूक्तमेव विचार्यताम्—

अनन्तानन्तब्रह्माण्डान्तर्गतानाम् अनन्तानन्तप्राणिनां यान्येव शीर्षादीनि तान्यस्यैवेति सहस्रशीर्षत्वादिकं युज्यते। अत्र पुरुषः परमात्मैव;

पुरुषान्न परं किञ्चित् सा काष्ठा सा परा गतिः।

इति श्रुतेः, पूर्वमहमेवासमिति तत्पुरुषस्य पुरुषत्वम् इति श्रौतनिर्वचनाच्च स एवात्र अभिप्रेतः। वेदाहमेतम् इत्युत्तरनारायणसूक्तेऽपि तस्यैव परामर्शः। ह्रीश्च ते लक्ष्मीश्च पत्न्यौ इति लक्ष्मीपतित्वञ्च तस्यैव।

सहस्रशीर्षं देवं विश्वाक्षं विश्वशंभुवम्।
विश्वं नारायणं ज्ञेयमक्षरं परमं प्रभुम्॥

इति तत्रैव नारायणवृत्तित्वेन सहस्रशीर्षत्वादेः प्रतिपादनात्।

पुंसंज्ञे तु शरीरेऽस्मिन् शयनात् पुरुषो हरिः।
शकारस्य षकारोऽयं व्यत्ययेन प्रयुज्यते॥ इति।

पुरि शयनाच्च पुरुषः, पूर्णत्वाच्च पुरुषः। तथा चोक्तम्—

पूर्णत्वात्पुरुषो विष्णुः पुराणत्वाच्च शार्ङ्गिणः।
यद्वा पुरुषशब्दोऽयं रूढ्या वक्ति जनार्दनम्॥ इति।

भूमिं भूम्यादिलोकं ब्रह्माण्डभूमिं मायाभूमिं वा स्पृत्वा कारणत्वेन व्याप्य दशाङ्गुलम् अनन्तपरिमाणम् अत्यतिष्ठत्। अथवा भूमिं नाभेरधोभागं विश्वतो वृत्त्वा दशाङ्गुलं नाभेरूर्ध्वं हृदयदेशमलंतिष्ठत् हृदयमण्डलेऽवतिष्ठते।

'पुरुष एवेदं सर्वमि'ति अद्वैतिमते बाधसामानाधिकरण्यं केषाञ्चित् शरीर-शरीरिभावनिबन्धनम्, अन्येषां कार्यकारणभाव-निबन्धनम्। अमृतत्वस्य मोक्षस्य ईशानः स्वामी तत्प्रदाता। अन्तः प्रविष्टः शास्ता जनानाम् इत्यादिश्रुतेः। अन्नेन अदनीयेन यत्संसारिमण्डलं स्वकारणमतीत्य रोहति देव-तिर्यङ्मनुष्यादिरूपेण प्रादुर्भवति, तत् कियत्? अथवा यत् आत्मजाते अहरहः अशितेन अतिरोहति पूर्वपूर्व-बाल्य-कौमाराद्यवस्था अतीत्य वर्धते। तदुक्तं मोक्षधर्मे विष्णुपुराणे (१ अंशः, १२ अ०) —ध्रुवेण पुरुषसूक्तेनैव भगवान् स्तुतः इति। अत्र विष्णुरेव सहस्राक्षत्व-सहस्रशीर्षत्वादिना स्तूयते। ततः प्रथमे श्लोके—

बृहत्त्वाद् बृंहणत्वाच्च यद्रूपं ब्रह्मसंज्ञितम्।
तस्मै नमस्ते सर्वात्मन् योगिचिन्त्याविकारिणे॥

इति वेदान्तवेद्यं ब्रह्मैव प्रक्रान्तम्। एतदेव च—

अनादिमत् परं ब्रह्म न सत्तन्नासदुच्यते।
सर्वतः पाणिपादं तत् सर्वतोऽक्षिशिरोमुखम्॥

इत्यादिना गीतासु प्रोक्तम्।

पुरुषसूक्तस्य परमात्मपरत्वं लक्ष्मीतन्त्रे प्रोक्तम्—

देवो नारायणो नाम जगतस्तस्थुषस्पतिः।
तावावां परमव्योम्नि पितरौ जगतः परौ॥

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

सुखिनः स्युरिमे जीवाः प्राप्नुयुर्नो कथन्त्विति ।
उपायान्वेषणे यत्तौ परमेण समाधिना ॥
मथ्नावस्त्वतिगम्भीरं शब्दब्रह्म महोदधिम् ।
मथ्यमानात् ततस्तस्मात् सामर्ग्यजुषसङ्कलात् ॥
तत्सूक्तमिथुनं दिव्यं दध्नो घृतमिवोत्थितम् ॥ इति ।

सहस्रमिति आनन्त्यस्य उपलक्षणम् । शत-सहस्र-मयुतं सर्वमानन्त्यवाचकम् । बोधकमनन्ताद्याश्रयत्वात् । शीर्षशब्दः सर्वेन्द्रियबोधकः । पराऽस्य शक्तिर्विविधैव श्रूयते इति अङ्गप्रत्यङ्गादीनामभावात् तत्कार्यभूतज्ञान-क्रियाशक्त्योः आनन्त्यमेव विवक्षितम्, न तस्य कार्यं करणञ्च विद्यते, अपाणिपादो जवनो ग्रहीता इत्यादि-श्रुतेश्च । दशाङ्गुलं दशगुणं महापरिमाणम् । सर्वं जगदतिक्रम्य निरवधिर्भगवान् । स्पर्शोऽत्र कारणस्य कार्यव्याप्तिरूपो न संयोगमात्रम्, येनावृतं खञ्च महीञ्च यच्च किञ्चिज्जगत् इति श्रुतेः । विराट् प्रकृतिः विविधं राजमानत्वात्, अनिरुद्धो वा । तदुक्तं मोक्षधर्मे—

ईश्वरो हि जगत्स्रष्टा प्रभुर्नारायणो विराट् ।
अनिरुद्ध इति प्रोक्तो लोकानां प्रभवोऽथ यः ॥ इति ।

अथवा—विराडादयो लोकाः अधिपूरुषः अधिकारिपुरुषो ब्रह्मा । अथवा अधिपुरुषः हिरण्य-गर्भः । विराट् ब्रह्माण्डम्, स्वराट् ब्रह्मा, सम्राट् मनुः, एषामधिष्ठाता अधिपुरुषः, त्वत्तः सर्वेऽप्येते जायन्ते । सर्वमस्मिन् पशु-पुरोडाशादिरूपेण हुतम् । श्रीमद्भाग-वतस्य द्वितीयस्कन्धे षष्ठेऽध्याये—

तेनेदमावृतं विश्वं वितस्तिमवतिष्ठति ।
सोऽमृतस्यामयस्येशो मर्त्यमन्नं यदत्यगात् ॥
सती विचक्रमे विष्वङ् शासनानशने उभे ।
यदविद्या च विद्या च पुरुषस्तूभयाश्रयः ॥
यस्मादण्डं विराट् जज्ञे भूतेन्द्रियगुणात्मकः ।
तद् द्रव्यमत्यगाद् विश्वं गोभिः सूर्य इवातपन् ॥
गतयो मतयः श्रद्धा प्रायश्चित्तं समर्पणम् ।
पुरुषावयवैरेव सम्भाराः सम्भृता मया ॥
(६. २०, २१, २६) इति ।

इत्थञ्च परब्रह्मण्येव सूक्तस्यास्य तात्पर्यं सिद्ध्यति । अतः परं प्रत्येकशो मन्त्रार्थोऽवलोक्यताम् । तेनाप्येत-देव स्फुटीभवति । यथा—

सहस्रशीर्षेति षोडशर्चं षष्ठं सूक्तम् । नारायणो नाम ऋषिः । अन्त्या त्रिष्टुप्, शिष्टा अनुष्टुभः । अव्यक्त-महदादिविलक्षणश्चेतनो यः पुरुषः 'पुरुषान्न परं किञ्चित्' (कठ उ० ३.११) इत्यादिश्रुतिषु प्रसिद्धः स देवता । तथा चानुक्रान्तम्—'सहस्रशीर्षा षोडश नारायणः पौरुषमानुष्टुभं त्रिष्टुबन्तं तु' इति ।

सहस्रशीर्षा पुरुषः सहस्राक्षः सहस्रपात् ।
स भूमिं विश्वतो वृत्वाऽत्यतिष्ठद् दशाङ्गुलम् ॥
(ऋ० सं० १०.९०.१)

अर्थः—वेदवेद्यः परमेश्वरः सर्वान्तरात्मत्वात् समष्टिप्राणिदेहैरपि देहवानिति सर्वप्राणिसमष्टिरूपो ब्रह्माण्डात्मको विराड्रूपेण सहस्रशीर्षा । सहस्रशब्दो-ऽनन्तवचनः । अनन्तैः शिरोभिर्युक्तः । यानि सर्व-प्राणिनां शिरांसि तानि सर्वाणि तद्देहान्तःपातित्वात् तदीयान्येव । एवमेव सहस्राक्षित्वं सहस्रपादत्वञ्च । स परमात्मरूपः पुरुषः भूमिं ब्रह्माण्डगोलकरूपां प्रकृति-मण्डलरूपां वा भूमिं, वृत्वा परिवेष्ट्य, कारणत्वाद् अज्ञानं तत्कार्यात्मकं प्रपञ्चम् आध्यासिकतादात्म्यसम्ब-न्धेनैव व्याप्य । शाखान्तरे स्पृत्वेति पाठः, तत्रापि न संयोगमात्रमभिप्रेतम् । दशाङ्गुलं दशाङ्गुलपरिमितं देशं अत्यतिष्ठत् अतिक्रम्य व्यवस्थितः । दशाङ्गुलं

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

दशगुणं महापरिमाणं वा देशं अत्यतिष्ठत्। ब्रह्माण्ड-मण्डलाद् बहिरपि व्याप्य स्थित इत्यर्थः। सर्वकारण-भूतः परमेशः सर्वविकारजातं व्याप्य ततो बहिरपि स्थितः, प्रकृतितद्विकाराणां तदेकदेशस्थितत्वात्। यथा अनन्ताकाशैकक्षुद्रप्रदेशे मेघमण्डलस्थितिस्तथैव भगवतोऽतिस्वल्पप्रदेशे प्रकृति-तद्विकारजातं स्थितम्। 'विकारावर्ति च तथा हि स्थितिमाह' (४.४.१९) इति सूत्रेण निर्णीतं श्री बादरायणेनापि।

यद्वा—सहस्रशीर्षशब्देन शिरःस्थचक्षुरादिकरण-ग्रामस्यापि ग्रहणम्। यद्वा सहस्राक्ष-सहस्रपाच्छब्दाभ्यां ज्ञानकर्मेन्द्रियाणां ग्रहणम्, तेन सर्वज्ञानक्रियाशक्ति-मत्त्वमभिप्रेतम्। स्वतस्तस्य शीर्षाक्ष्याद्यभावेऽपि तत्त-च्छक्तिमत्त्वं बोध्यते। 'न तस्य काय करणञ्च विद्यते स्वाभाविकी ज्ञानबलक्रिया च। अपाणिपादो जवनो ग्रहीता' इत्यादिश्रुतिभ्यः॥ १॥

पुरुष एवेदं सर्वं यद्भूतं यच्च भव्यम्।
उतामृतत्वस्येशानो यदन्नेनातिरोहति॥
(ऋ० सं० १०.९०.२)

अर्थः—पुरुष एवेदमिति। यदिदं वर्तमानं तत्सर्वं पुरुष एव। यत् भूतमतीतं जगत्, यच्च भव्यं भविष्यत् जगत् तदपि पुरुष एव। यथाऽस्मिन् कल्पे वर्तमानाः प्राणिदेहाः सर्वेऽपि विराट्पुरुषस्य अव-यवास्तथैव अतीतागामिनोरपि कल्पयोर्द्रष्टव्यमित्य-भिप्रायः। यथा वा इदानीन्तनं कार्यं कारणाभिन्नं तथैव अतीतानागतान्यपि कार्याणि तथाभूतान्ये-वेत्यर्थः। उत अपि च अमृतत्वस्य देवत्वस्य मोक्षस्य वा अयम् ईशानः स्वामी। यत् यस्मात्कारणाद् अन्नेन निमित्तभूतेन प्राणिनः भोग्यान्नेन अतिरोहति स्वकीयां कारणावस्थामतिक्रम्य जगदवस्थां प्राप्नोति, तस्मात् प्राणिनां कर्मफलभोगाय जगदवस्थास्वीकारात् नेदं तस्य वस्तुत्वम्।

पुरुषसूक्तप्रकरणे मोक्षधर्मे—'अजाऽज्ञातस्य भूतस्य मनुष्यादेरकारणात्। निर्वाणदायी भवति कृपया पुरुषोत्तमः' इति। अमृतत्वस्य परमपदस्य ईशानः यत्परमपदम् अत्यन्तं नित्यापूर्वमिव प्रादुर्भवति लीलाविभूतिमतिक्रम्य रोहति प्रकाशते॥ २॥

एतावानस्य महिमाऽतो ज्यायांश्च पुरुषः।
पादोऽस्य विश्वा भूतानि त्रिपादस्यामृतं दिवि॥
(ऋ० सं० १०.९०.३)

अर्थः—एतावानस्य महिमेति। अत्र केचित्—भूतानि अचित्संसृष्टा जीवास्तस्य पुरुषस्य पादस्तुरीयांशः। दिवि परमव्योमपदवाच्ये समस्तसमष्टितत्त्वजातमस्य त्रिपात् पादत्रयम्। भोग्य-भोगोपकरण-भोगस्थानरूपस्य त्रिविधस्य वस्तुनः सत्त्वात् तेषां पादत्रयव्यपदेशः। यद्वा—जगदन्तर्गतवस्त्वभिमानिनाम्, अस्त्र-भूषणादिरूपाणां नित्यानां भगवदनुभवमात्रपराणां नित्यानां मुक्तानाञ्च परमपदे सत्त्वात्तेषां त्रिपात्त्वव्यपदेशः। अथवा—पादः भगवदाश्रयायाः सृष्ट्यादिशक्तेरेकदेशः। परमपुरुष-शक्तिलेशविजृम्भितमिदं जगदित्यर्थः। तथा च पराशरः—'यस्यायुतायुतांशांशे विश्वसृष्टिरियं स्थिता' इति। अस्य त्रिपाद् अधिकांशस्तु अमृतम् अमरणधर्मकं नित्यमुक्तरूपं दिवि परमव्योम्नि, भासते इति शेषः, 'जागृवांसः समिन्धते' इति श्रुतेः। अथवा—त्रिशब्दो बहुपरः, पादशब्दश्च गुणपरः। तथा च अनन्तज्ञानानन्दादिगुणविशिष्टमित्यर्थः। अथवा—वासुदेव-सङ्कर्षण-प्रद्युम्ना-ऽनिरुद्धात्मकस्य भगवतस्तुरीयोऽनिरुद्धांशः सर्वाणि भूतानि, अवशिष्टं च त्रिपाद्रूपं दिवि नाकपृष्ठे निवसतीति शेष इत्यर्थमाहुः।

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

एतावानस्य महिमा, सर्वं पूर्वोक्तमस्य पुरुषस्य महिमावैभवम्। यद्यपि तद्वैभवे इयत्ता तु नास्त्येव; तथापि अपरिच्छिन्नत्वस्य एतत्परिच्छेदे बाधाभावात्। अतः अपरिच्छिन्न-ज्ञानशक्त्यादिसत्त्व-सर्वान्तर्यामित्व-रूपात् हेतोः पुरुषो ज्यायान्। अथवा–अस्य प्रपञ्चस्य एतावान् महिमा पुरुषश्चातो ज्यायानेव। अथवा–सर्वमपि पूर्वोक्तमस्य पुरुषस्य महिमा सामर्थ्यमात्रम्, अतः सर्वस्मादस्मात् पुरुषो ज्यायान्। ज्यायस्त्वमेव प्रपञ्चयति–पादोऽस्य विश्वाभूतानि। अस्य पुरुषस्येति भावः।

सम्प्रदायविदस्त्वित्थं वर्णयन्ति—अतीताऽनागत-वर्तमानरूपं जगद् यावदस्ति, एतावान् सर्वोऽपि अस्य पुरुषस्य महिमा स्वकीयसामर्थ्यविशेषः, न तु तस्य वास्तवं स्वरूपम्। वास्तवस्तु पुरुषः अतः महिम्नोऽपि ज्यायान् अतिशयेनाधिकः। तदेव प्रपञ्च्यते—अस्य पुरुषस्य विश्वाभूतानि कालत्रयवर्तीनि सर्वाणि भूतानि प्राणिजातानि पादश्चतुर्थांशः। अस्य पुरुषस्यावशिष्टं त्रिपात्स्वरूपम् अमृतं विनाशरहितं सत् दिवि द्योतनात्मके स्वप्रकाशस्वरूपे, व्यवतिष्ठते इति शेषः। यद्यपि च 'सत्यं ज्ञानमनन्तं ब्रह्म' (तै० उ० २.१) इत्याम्नातस्य परब्रह्मण इयत्ताभावात् चतुष्पात्त्वमपि निरूपयितुमशक्यम्; तथापि जगदिदं ब्रह्मस्वरूपापेक्षया अल्पमिति विवक्षितत्वात् पादत्वोपन्यासः ॥ ३ ॥

त्रिपादूर्ध्व उदैत् पुरुषः पादोऽस्येहाभवत् पुनः।
ततो विष्वङ् व्यक्रामत् साशनानशने अभि ॥
(ऋ० सं० १०.९०.४)

अर्थः—त्रिपादूर्ध्व उदैदिति। त्रिपात् अपरिच्छिन्न-ज्ञानशक्त्यादिमान् वासुदेव-सङ्कर्षण-प्रद्युम्नरूपः नित्य-मुक्तादिभिः परिचर्यमाणः। ऊर्ध्वे प्रकृतिमण्डलादुपरि परमव्योम्नि वैकुण्ठे। उदैत् उदगच्छत्। तस्यैवंभूतस्य जगत्स्रष्टृत्वादिकं न स्वप्रयोजनाय भवति, न वाऽन्य-नियमाधीनम्, किन्तु कृपामूलकम्। पादोऽस्य इह लीलाविभूतौ अभवत् अवातरत्। तदुक्तं वैकुण्ठसंहितायाम्—'सर्वव्यापी विष्णुः स्वाच्छरीरात् जगत् त्रातुं सङ्कर्षणमभावयत्, स प्रद्युम्नं सोऽप्यनिरुद्धमभावयत्। तस्मात् जगत्स्रष्टुं ब्रह्माऽभवत्। 'एवं चतुर्धा संव्यूह्य स्वात्मानं पुरुषोत्तमः। अण्डेभ्यः परतो नित्यं त्रिपादेन विराजते' इति। अनिरुद्धात्मा स भगवान् सृष्ट्यनुकूलं सङ्कल्पं करोति। ततः = योगनिद्रावसाने स एव, विष्वक् समन्तात्, व्यक्रामत् स्वसङ्कल्पेन समाक्रान्तवान्। 'बहु स्यां प्रजायेय' इति श्रुतेः। साशनं जङ्गमदेवमनुष्यादिरूपम्, अनशनं स्थावरं वृक्षगुल्मलतादिरूपम् ते, अभि उद्दिश्य, स्थावर-जङ्गमात्मक-कृत्स्नजगद्रूपेण बहुभवनसङ्कल्पमकरोत्।

त्रिपात्-पुरुषः संसाररहितो ब्रह्मस्वरूपः। ऊर्ध्वं उदैत्। अस्मादज्ञानकार्यात् संसाराद्बहिर्भूताः अत्रत्यैर्गुणदोषैरस्पृष्टः उत्कर्षेण स्थितवान्। अस्य पादश्चतुर्थांऽशो लेशो वा। इह मायायां पुनरभवत् सृष्टि-संहाराभ्यां पुनः पुनरागच्छति। सर्वस्य जगतः परमात्म-लेशत्वं भगवताऽप्युक्तम्–'विष्टभ्याहमिदं कृत्स्नमेकांशेन स्थितो जगत्' (भ० गी० १०.४२)। ततो मायायामागत्य अनन्तरं विष्वङ् देव-मनुष्य-तिर्यगादि-रूपेण विविधः सन्, व्यक्रामत् व्याप्तवान्। किं कृत्वा? साशनानशने अभिलक्ष्य। साशनं भोजनादिव्यवहारोपेतचेतनम्, अनशनं तद्रहितं गिरिनद्यादिकम्, तदुभयं यथा स्यात्तथा स्वयमेव विविधो भूत्वा व्याप्तवानित्यर्थः ॥ ४ ॥

तस्माद्विराळजायत विराजो अधि पुरुषः।
स जातो अत्यरिच्यत पश्चाद्भूमिमथो पुरः ॥
(ऋ० सं० १०.९०.५)

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

अर्थः— ततो विराडजायतेति । ततः सङ्कल्पाद्धेतोः विराट् महदादिरूपेण विविधं राजते इति विराट् प्रकृतिः, अजायत महदाद्यण्डपर्यन्तरूपेण अजायत । अद्वारका सृष्टिरेषा । अथ सद्वारकां सृष्टिं वक्तुं चतुर्मुखसृष्टिरुच्यते—विराजः अण्डपर्यन्तप्रकृतिमण्डलस्य, अधि अनन्तरम्, पुरुषः चतुर्मुखोऽजायत ।

अथवा—ततः परमपुरुषात् विराट् विशेषेण राजते इति विराट् अनिरुद्धः, अजायत परमपुरुषोऽनिरुद्धरूपेण अवतीर्ण इत्यर्थः । तदुक्तं मोक्षधर्मे—'ईश्वरो हि जगत्स्रष्टा विभुर्नारायणो विराट् । अनिरुद्ध इति प्रोक्तः अंशानां प्रभवाप्यये' इति । विराजः विराट्पुरुषादनिरुद्धात् अधिपुरुषः अधिकारिपुरुषः चतुर्मुखः अजायत । स चतुर्मुखो भगवत्कृपया प्रवृद्धकायोऽभवत् येन अतिमहदपि वस्तु कर्तुं शक्नुयात् । तद्वृद्धिमेव दर्शयति—पश्चाद्भूमिं भूमेः पश्चादित्यर्थः भूमेरधः । अथो भूमिं पुरः भूमेरूर्ध्वञ्च अत्यरिच्यत । भूमिशब्दो ब्रह्माण्डपर्यन्तस्य उपलक्षणम्, ब्रह्माण्डस्य बहिरन्तश्च व्यापकोऽभूत् । अथवा—'विष्वङ् व्यक्रामते'ति पूर्वोक्तांशस्यैवात्र प्रपञ्चः । तस्मादादिपुरुषात् विराट् ब्रह्माण्डदेहोऽजायत । विविधानि वस्तूनि राजन्तेऽत्रेति विराट् । विराजो अधि विराड्देहस्य उपरि तमेव देहमधिकरणं कृत्वा, तद्देहाभिमानी कश्चित् पुमानजायत । सोऽयं सर्ववेदान्तवेद्यः परमात्मा स्वयमेव स्वकीयया मायया विराड्देहं ब्रह्माण्डाख्यं सृष्ट्वा तत्र जीवरूपेण प्रविश्य ब्रह्माण्डाभिमानी देवात्मा जीवोऽभवत् । तदुक्तमाथर्वणे नृसिंहोत्तरतापनीये—'स वा एष भूतानीन्द्रियाणि विराजं देवताः कोशांश्च सृष्ट्वा प्रविश्यामूढो मूढ इव व्यवहरन्नास्ते माययैव' (नृ० ता० २.१.९) । स जातो विराट्पुरुषः अत्यरिच्यत अतिरिक्तोऽभूत्, विराड्व्यतिरिक्तो देव-तिर्यङ्-मनुष्यादिरूपोऽभूत् । पश्चात् देवादिजीवभावादूर्ध्वं भूमिं ससर्जेति शेषः । अथो भूमिसृष्टेरनन्तरं पुरः तेषां जीवानां शरीराणि सप्तधातुभिः पूर्यन्ते इति पुरः ससर्ज ॥ ५ ॥

यत् पुरुषेण हविषा देवा यज्ञमतन्वत ।
वसन्तो अस्यासीदाज्यं ग्रीष्मः इध्मः शरद्धविः ॥
(ऋ० सं० १०.९०.६)

अर्थः—यत्पुरुषेणेति । स जातश्चतुर्मुखः स्वयं जगत्सृष्टिमजानानो भगवदुपदिष्टमार्गेण भगवन्तमात्मसमर्पणरूपेण मानसयागेन आराध्य तत्प्रसादात् लब्धविज्ञानो जगत्सृष्टिमकरोदिति वक्तुं भगवदाराधनात्मकं यागमाह—यत् यदा, पुरुषेण चतुर्मुखात्मकेन, हविषा देवास्तदिन्द्रियाणि, यज्ञं मानसं ध्यानरूपम् अतन्वत, तदेत्यध्याहारः । अस्य यज्ञस्य वसन्त आज्यम्, वसन्तकालस्य आज्यप्रचुरत्वेन तत्राऽऽज्यकल्पनम् । ग्रीष्म इध्मः, तदानीं पलाशादीनां बाहुल्योपलम्भात् । शरत् हविः, तत्कालस्य सस्यप्रचुरत्वात् । एवं वसन्तादीनां मानसयज्ञे आज्यादित्वेन ध्यानम् । यत् यदा पूर्वोक्तक्रमेणैव शरीरेषु उत्पन्नेषु सत्सु । देवाः उत्तरसृष्टिसिद्ध्यर्थं बाह्यद्रव्यस्य अनुत्पन्नत्वेन हविरन्तराऽसम्भवात् पुरुषस्वरूपमेव मनसा हविष्ट्वेन सङ्कल्प्य पुरुषेण पुरुषाख्येण हविषा, मानसं यज्ञम्, अतन्वत अन्वतिष्ठन् । तदानीम् अस्य यज्ञस्य, वसन्तः वसन्तर्तुरेव, आज्यम् आसीत् अभूत् । तमेवाऽऽज्यत्वेन सङ्कल्पितवन्तः । ग्रीष्मः ग्रीष्मर्तुः, इध्म आसीत् । तमेव इध्मत्वेन भावितवन्तः । तथा शरद्धविः पुरोडाशादिहविष्ट्वेन शरदं भावितवन्तः । पूर्वं पुरुषस्य हविःसामान्यरूपत्वेन सङ्कल्पः, अनन्तरं वसन्तादीनामाज्यादिविशेषरूपत्वेन सङ्कल्पः ॥ ६ ॥ (क्रमशः)

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

छत्रपति-महाकाव्यम्

—श्री उमाशङ्करशर्मा त्रिपाठी—

[आंग्लभाषा-प्राध्यापकः—काशी-विद्यापीठम्, वाराणसी]

॥ अथ पञ्चदशः सर्गः ॥

कारागृहान्निर्गतः सगणः शिवराजः प्रच्छन्नवेषः दिल्लीपतेरन्वेषणप्रयत्नं मोघीकुर्वन् मथुरादिषु तीर्थेषु पर्यटन् काश्यां विश्वेश्वरं समर्च्य विविधान्तरायानुत्तीर्य महाराष्ट्रभुवमाजगाम । —इतीतिहासः ।

जटाः पिशङ्गीः परिलम्बि कूर्चं,
स्थूलं कषायाम्बरमादधानः ।
शिखीव भस्मान्तरितात्मवृत्ति-
र्भावस्थिरोऽभादधिपः प्रजानाम् ॥१॥

सर्वंसहः साहससिद्धमूर्ति-
स्तपस्विवेषोऽपि धृतावधानः ।
लोकस्थितिं द्रष्टुमनाः सुगुप्तो
धर्मो यथाऽसौ विचचार भूमिम् ॥२॥

बिभ्रद्वपुस्तापस - निर्विशेषं
निरस्ततन्द्रिः द्विषदिङ्गितेषु ।
स्मरन् महाराष्ट्रजनाऽनुतापं
नृपस्ततापा -ऽद्रिरिवान्तरग्निः ॥३॥

कूजद्द्विजोद्गीथमनोज्ञसूक्तान्
ब्रह्मर्षि-जुष्टाननघा-ऽभिषेकान् ।
श्रयन्महातीर्थ - विविक्तदेशान्
योगीव लोकानवलोकिताभः ॥४॥

अचिन्त्यवर्त्मानुचरो - ऽरिचारान्
मोहाभिचारानिव सत्पथस्थः ।
शरीरषड्वर्गरिपून् वशीव
निरीक्षमाणोऽयतताऽऽत्ममार्गम् ॥५॥

तमन्तरङ्गो व्रजभूमिमार्गे
यथार्थमासेवित - देशवर्त्मा ।
पिबन्तमुत्कण्ठित - दृष्टिपात्रे
वनान्तसौन्दर्यमिवा - ऽऽबभाषे ॥६॥

पुष्पैः स्खलद्भिर्विहगैः सरावैः
मन्दं पतद्भिर्गिरिनिर्झरैश्च ।
सिद्धप्रचारैः समवेतसत्त्वै-
राकर्षतीवाऽध्वजनान् वनश्रीः ॥७॥

लसत्तडित्पीत - पटाभिरामं
दृष्ट्वा घनश्याममधिष्ठसानुम् ।
नृत्यस्फुरद्बर्हभरा मयूराः
केकाभिराशाः परिपूरयन्ति ॥८॥

करीलकुञ्जान्तिक - सन्निषण्णै-
र्गायद्भिराराध्य - किशोरकीर्तिम् ।
गावोऽर्धलीढान् कवलान् वहन्त्यः
पर्युत्सुकाः गोपजनैः क्रियन्ते ॥९॥

पुरः प्रियाणामपि गोपवध्वो
हठाऽक्षमाः संस्मृतभावसिक्ताः ।
अस्त्रैर्मनोमन्थन - सास्रजातै-
र्गात्राभिषेकं रचयन्ति मुग्धाः ॥१०॥

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

मध्येपथं विस्मृतवर्त्मयत्नो
मुक्ताग्रहः पान्थजनः प्रसह्य ।
भूमौ निखाताङ्घ्रियुगो यथाऽद्रिः
शून्यान्तरालः सहते न गन्तुम् ॥११॥

अजातमुक्षिप्य भविष्यगर्भे
तिरोदधत् प्रस्तुतमप्यरागम् ।
राधारमोन्मादि - कथाऽनुबन्धो
वीतं समक्षं प्रकटीकरोति ॥१२॥

बलान्निरोन्मुक्त - निमेषपातै-
रन्तर्मनोरागमिवा - ऽस्रपूरम् ।
मोघापदेशैः सुधियोऽपि वक्त्रं
मृजन्ति निह्नोतुमपारयन्तः ॥१३॥

मुक्तप्रसूनाभरणाः नितान्तं
शुष्यत्पलाशाः विफलाऽभिलाषाः ।
वीक्ष्योपकूलं व्रततीः विपन्नाः
सञ्जीवयन्तीव घनाश्रुसेकैः ॥१४॥

पवित्रकाष्ठैरपि कालजालै-
राकृष्यमाणानवलोक्य मीनान् ।
असून् यथा जीवितमोहदीनान्
दाशार्भकैः पातुमपारयन्ती ॥१५॥

आत्मन्यथो कालविपर्ययस्थे
गाम्भीर्यवर्जं दधती प्रबन्धम् ।
ताते वृषाङ्केऽपि विमुक्तरोधाः
विलङ्घिता काऽपि जनैः सहेलम् ॥१६॥

कृष्णस्मृतिं कूलतमालकुञ्जं
पर्युत्सुका वक्षसि बिभ्रतीव ।
सूर्यात्मना लोलतरङ्गहस्तै-
राशंसतीवाऽभ्युदयं तवाऽऽर्य ॥१७॥

प्रियस्वरूपं हृदि धारयन्त्याः
कलिन्दवंशाऽसितवर्णकान्तेः ।
छायाभुवः तिग्मकरात्मजाया
अम्भो घनश्याममिवाविभाति ॥१८॥

वृन्दावने स्नेहनिसर्गपीठे
वंशीवटे तीरकदम्बके वा ।
नवाम्बुद - श्याम - तमालकुञ्जे
स्वान्तःस्मृतिं विरमतीव चेतः ॥१९॥

दधत्तरङ्ग - श्वसितावरोधं
भृशं कृशा शोषितजीवनाशा ।
अम्भोजकल्पै - र्नयनै - रपीयं
न वीक्षते किञ्चिदपीक्षमाणा ॥२०॥

या साक्षिणीयं जगदेकभर्तु-
र्दिव्यप्रयोगाननिशं ददर्श ।
कलिन्दजा तद्विरहेऽपि सैषा
किं स्यन्दते रोदिति वा न विद्मः ॥२१॥

सुखं चरन्त्यः पुलिनोपकूलं
कच्छेषु शक्राश्महरित्तृणेषु ।
क्वचित् समाकीर्ण - नमेरुकुञ्जे
रोमन्थरागार्ध निमीलिताक्ष्यः ॥२२॥

त्वगोकसो रक्तभुजो भिषग्भिः
खगैरिव स्वेदकृमीन् हरद्भिः ।
निस्पन्दभावाहृत - शल्यचेष्टाः
क्वचिन्निषण्णाः परिसेव्यमानाः ॥२३॥

चलत्खुरोद्धूत - रजःपरागैः
रागैरिवापूर्य दिगास्यलक्ष्मीम् ।
ध्वानैः रणत्कण्ठविलम्बिघण्टैः
सायं नभो गाव्र निपूरयन्त्यः ॥२४॥

(क्रमशः)

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

ऐतिहासिक-कल्पनाधृता कथा

उत्सर्गः ★

श्री 'शर्मा'

"हा वत्स ! कोऽस्त्यत्र दयाप्रवणो यो मां तवान्तिकं प्रापयेत्"—प्रासादोपकण्ठे परिभ्रमता उज्जयिनी-नरेशेन त्रिविक्रमेण यदा करुणार्द्रा वाणी श्रुता, तदाऽपूर्वं किमपि भाव-तारल्यं तद्धृदयं पस्पर्श । क्रमशो घनतामापद्यमानं तमो मन्दं मन्दं समस्तां चराचर-सृष्टिमुदरस्थीकरणे तत्परमासीत् । नरेशोऽन्धकारं भित्त्वा सोपानमार्गेण बहिर्निश्चक्राम ।

'मदीये राज्येऽपि काचिद् वृद्धा पुत्रशोकाकुला करुणं विलपति ? अहो ! जीवन्नेव मृतोऽद्य त्रिविक्रमः' इत्थं विकल्पसहस्रपूर्णः भूपतिः वृद्धायाः सविधे निष्कम्पोऽस्थात् । तेन पुरः दुर्वल-जङ्घाद्वयोपरि धृतं अस्थि-पञ्जरं, चिन्ताबाहुल्येन संकोचित - चर्मनद्धं दन्तविहीनं मुखं, क्षीयमाण-ज्योति-धूसरितं नेत्रयुगं, जरा-निपीडन-वशाद् धवलिमानं प्राप्तः केशसम्भारः प्रतिदिनं शोषं गच्छन् मांसपिण्डं चावलोकितम् । रुद्धकण्ठेन तेन कथमपि जरती पृष्टा—

"मातः ! कुत्रास्ति तव वत्सः ? अहं त्वा तत्समीपं नेष्यामि ।"

"मम दुःख-भाराक्रान्तस्त्वं कोऽसि पुत्रक ?"

"उज्जयिनी-नगरनिवासी कश्चिद् वराकोऽहम् ।"

"जाने, त्वमपि पुत्रवियुक्तोऽसि मादृश एव ।"

"त्वादृश एवाहं मातः । अन्यथा कथं तव दुःखितां वाणीं कर्णगोचरीकर्तुं पारयेयम् ?"

"नहि तदा त्वां पीडाभराक्रान्तं कर्तुमीहे । यतस्त्वं स्वयमेव दुःखितोऽसि ।"

"नाहं तथा दुःखविकलो यथा त्वमसि मातः ! अवश्यमेवाहं ते सुतमन्वेषयिष्यामि । प्रार्थये, विश्वासास्पदोऽयं जनः ।"

"त्रिविक्रमं स्मरामि……"—वृद्धायाः नेत्रेऽश्रुपूर्णे जाते ।

"मृतस्त्रिविक्रमः । यस्य राज्ये त्वादृशी क्लेशविक्लवा जननी नगरीवीथिकासु दुःखिता भ्रमति ! चल मातः, मदीयेकुटीरे । तत्रैवाहं प्रक्ष्यामि सर्वं वृत्तान्तजातम् ।"

त्रिविक्रमहस्तावलम्बिता स्थविरा शनैः शनैः निशाया अभेद्ये तमसि विलीना । अन्धकारः क्रमश उपचीयमान आसीत् ।

× × ×

इयं घटना भारतीयेतिहासे तदाऽभवद् यदायं देशो विभिन्नेषु जनपदेषु विभक्त आसीत् । यद्यपि राजनैतिकधरातले जनपदशासकानां हृदयेषु परस्परं विद्रोहिणो भावा जनिमलभन्त, परं सांस्कृतिकक्षेत्रे तेषामैक्यमासीत् । आसेतुहिमाचलं भारतीयतायाः प्रवाहोऽमन्दं प्रवहमाणः समस्तराष्ट्रमभिव्याप्य स्थितोऽभूत् । शासकस्य सर्वोच्चगुणानां सर्वत्र प्रशंसा भवति स्म ।

त्रिविक्रमो वृद्धायाः मुखादखिलं वृत्तमवगत्य तत्पुत्रं शिवदत्तम् अन्वेष्टुं स्वराजधान्या बहिर्निःसृतः । वृद्धायाः भोजनादिव्यवस्थां विधाय राज्यभारं सुयोग्य-धार्मिक-मन्त्रिमण्डलोपरि निक्षिप्य तेन सोद्देश्या धर्मयात्रा

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

प्रारब्धा। विदर्भ-अश्मकाख्यं जनपदद्वयं निपुणमन्विष्य तेन पश्चिमपयोधितीरमासादितम्। दक्षिणापथं प्रविश्य सह्याद्रिपर्वतमार्गमवलम्ब्य पाण्ड्यराज्ये मदुराया गगनचुम्बिप्रासादश्रेणीमवलोकयत्। स कन्याकुमारीनाम्ना प्रथितं दक्षिणदिगन्तमाससाद। 'चोल'-राज्यस्य प्रख्याताम् उरगपुरनगरीं दृष्ट्वा पूर्वपयोधितटवर्तिषु आन्ध्र-उत्कल-मगध-वङ्गाङ्गेषु आहिण्डमानोऽसौ पूर्वदिगन्तस्थितान् प्राग्ज्योतिषान् प्राप। नाशकन्निश्चेतुं स कुत्र बाष्पीकरणं जातं वृद्धायाः पुत्रस्य शिवदत्तस्येति।

साहसमवलम्ब्य एकल एव हिमगिरेरुपत्यकापथानुसारं विदेह - कान्यकुब्ज - पाञ्चालेषु प्रभूतं कुटीर-प्रासादविलोडनं व्यदधात्, परं शिवदत्तो न दृष्टिपथमागतः। तदनन्तरं स गान्धार-कम्बोजादि-जनपदद्वयं परित्यज्य उज्जयिन्यभिमुखं प्रतस्थे। मार्गवर्ति-त्रिगर्तोशीनर-कैकेय-यौधेयानुल्लङ्घ्य आभीर-मरुदेशे पुष्कर-राजधानीं अस्पृशत्।

नगरीमध्ये एकस्मिन् चतुष्पथे लब्धनाम-सङ्केतः स पुष्कर इति नामधेयस्य तत्रत्यनृपस्य अङ्गरक्षकं शिवदत्ताभिधानं पप्रच्छ।

"अहं भवद्भिः सह किमपि आलपितुमिच्छामि, अवकाशश्चेत्"—त्रिविक्रमस्तमवदत्।

"कुत आगतोऽसि? किमर्थ्यते? शीघ्रं वद। नाधिकोऽवसरो मे"—शिवदत्तस्तं याचकोऽयं कोऽपीति ज्ञात्वा हेलयाऽपृच्छत्।

"षण्मासाः समतीताः उज्जयिनीतः प्रस्थितस्य मम। वृद्धैका 'पुत्र शिवदत्त!' इति भृशं व्याहरन्ती मां त्वत्सकाशं प्राहिणोत्।"

"आह! मातः, जननि! कृतघ्न-पुत्रः शिवदत्तोऽयं त्वदीय......अपि कुशलिनी सा?"—तस्य नेत्रे बाष्पायिते समभूताम्। सवेदनं स त्रिविक्रमाभिमुखं पदद्वयं त्रयं वोपगम्य अप्राक्षीत्।

"भवतां तत्रगमनमावश्यकम्। पुत्रवियोगार्ता न ज्ञायतेऽद्य सा कस्यामवस्थायां स्यात्?"

"नाहं गन्तुं समर्थो भद्र! मदीयं कर्तव्यमामद्य अत्रैव स्थातुमनुरुणद्धि।"

"कथमिव? का बाधा? जराक्रुष्टाया यमराजमार्गनीताया मातुः पश्चिमदर्शनमपि पुत्रस्य सर्वोपरि कर्तव्यं भवति। तदत्र कर्तव्यपालनमार्गे कथं मोहो भवताम्?"

"भद्र! स्नेह-परिपालनं कर्तव्य-रक्षणञ्च द्वयोः मध्येऽद्य सङ्घर्षः प्रारब्धः। अत्राहं महाराजपुष्करस्य अङ्गरक्षकः। अकालपिशाच-परिगृहीतेयं मरुभूमिः। क्रूर-पिशाचेन यदाऽन्धवद् विवेकशून्यं जनमारणं प्रारब्धं तदा अत्रत्येन धार्मिक-नृपेण पुष्करेण तरसा युद्धे आहूतः सोऽवदत्—किमिति मुधैवं महार्घान् स्वकीयप्राणान् जहासि? तत्त्वं यदि प्रजाजनेषु कञ्चिदेकं पूतहृदयं धार्मिकं नरमुपहारीकरोषि तदाऽहं तस्य सुललितं मांसं भक्षयित्वा परां तृप्तिं गत्वा तव राज्यं परित्यज्य अन्यत्र कुत्रचिद् गमिष्यामीति।" इयन्मात्रं कथयित्वा शिवदत्तो व्यरंसीत्।

परं त्रिविक्रमस्य चक्षुषोः प्रवृद्धां जिज्ञासामवगत्य स पुनर्वक्तुमारेभे—

"अतो भद्र! अहमस्य नृपतेरङ्गरक्षकः। नाहमेतं निजप्राणपरित्यागात् प्राक् अकालपिशाचेन हन्यमानं द्रष्टुं पारयामीति मदीयः कर्तव्यभावो मां दिशति। कर्तव्यकर्मणां पालने न मया कदापि प्रमादः कृतः।"

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

भारते भातु भारती

१. वेदेषु वेदमन्त्रेषु विभाति महिमाततिः ।
सुर - भूसुर - सम्पत्तिर्भारते भातु भारती ॥
२. अन्तर्ज्योतिर्बहिर्ज्योतिः, महाज्योतिर्महाद्युतिः ।
महाप्रीतिर्महाकीर्तिः, भारते भातु भारती ॥
३. महागीतिर्महारीतिः, महानीतिर्महास्तुतिः ।
महाशक्तिर्महाभक्तिः, भारते भातु भारती ॥
४. यतियुक्तिः स्थितिस्वस्तिःस्वानुभूतिः समुन्नतिः ।
क्षतिपूर्तिः क्षमामूर्तिः, भारते भातु भारती ॥
५. श्रुति-स्मृति-समुत्पत्तिः, प्रपत्तिः शरणागतेः ।
महाकान्तिर्महाशान्तिः, भारते भातु भारती ॥
६. सदावृत्तिः, सदाऽऽवृत्तिः, मञ्जुसंस्कृत-संस्कृतिः ।
भूतभूतिर्महाभूतिः, भारते भातु भारती ॥
७. निर्गुणे सगुणेऽवृत्तिरादिशक्तिः सरस्वती ।
गायत्री-बृहती-पङ्क्तिर्भारते भातु भारती ॥
हनुमद्दत्त - सम्पत्तिर्विभाति प्रणवाकृतिः ।
सदा मामनुगृह्णाति सदावति सरस्वती ॥

—श्री हनुमद्दत्तशास्त्री दाधीचः

"श्रीमतां भावः प्रशंसनीयः । नाहमत्र विरोधी, परं 'कर्तव्यकर्मसु नाद्यावधि प्रमादोऽभूत्' इति विषये महाराज-त्रिविक्रम-मुद्रयाङ्कितं पत्रमिदं प्रमाणम्"—त्रिविक्रमस्तस्य हस्ते स्वमुद्राङ्कितं पत्रमददात् ।

पत्रं पठित्वा शिवदत्तो निराशीभूय मौनं स्थितः ।

"अहं धर्माधिकारिणां सामाजिककर्तव्योपेक्षापराधपङ्केन कलङ्कितः । यतो हि आगृहनिर्गमनादद्यावधि षड्वर्षपर्यन्तं मया जनन्युपेक्षा कृता । नाहं धार्मिकः, न मया स्वकर्तव्यपालनं सम्यग् विहितम् । अतो नाहं समर्थो जीविकादातुर्नृपस्य प्राणरक्षणे । हा धिङ् मां पापम् !" अद्य स कर्तव्यबुद्धेः समक्षं पराजितोऽभूत् ।

"श्रीमतां उज्जयिनीगमनमेव श्रेयः । मातृदर्शनमपि भविष्यति, कर्तव्यपथे विहितो व्याघातोऽपि निरासमेष्यति । त्रिविक्रम-पत्रानुसारमहं स्थानापन्नो भविष्यामि । अनेनात्रापि कर्तव्य-परिपालनं भविता ।"—शिवदत्तं सान्त्वयन् सोऽब्रवीत् । एवं निश्चित्य द्वावेव महाराजपुष्करस्योपकण्ठं जग्मतुः ।

\+ \+ \+

महाराजपुष्करेण इदमेव चिन्तितं यत् श्वः पिशाचमन्दिरं गत्वा स तं स्पष्टगिरा कथयिष्यति यत् निजराज्ये कमपि धार्मिकं पापं वा प्रजाजनं केनापि मूल्येन स पिशाचाय दातुं न प्रस्तुतः । अतो यदि बलिदानमावश्यकमेव तदा स स्वयमेवात्मानं उपाहारीकरिष्यतीति ।

परं तस्मिन्नेव दिवसे प्रातरेव अङ्गरक्षक-शिवदत्तस्थानापन्नः प्रच्छन्नत्रिविक्रमः नगरस्य दक्षिण-पार्श्वस्थितम् अकालपिशाचमन्दिरं गत्वा तमवादीत्—

'शक्तिशालिन् ! अकालासुर ! अयमहं नृपतेरङ्गरक्षकस्तव भोजनायोपस्थितः । गृहाणास्य नश्वरमिदं देहपिण्डं येनायं नृपतेरानृण्यं गच्छेत् ।"

"अहो ! सभ्योऽसि ! किं धार्मिकोऽप्यसि ?"—पिशाचो गम्भीरनादं मुमोच ।

"बलिन् ! नाहं जाने धार्मिकोऽस्मि अधार्मिको वा । परमहं तव तुष्ट्यै प्रभूतं प्रयासं करिष्यामीति भृशं जाने । अत आदेशं देहि, को नियोगोऽनुष्ठातव्यः ?"

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

संसेविता सा निधिरेव नित्यम्

★

– १ –

अश्नाति धेनुर्यवसं सुखेन
खलं बुसं धान्यतुषं च भुङ्क्ते ।
पीत्वा जलं भ्राम्यति सा वनेषु
सायं समायाति गृहं स्वकीयम् ॥

– २ –

सा लेढि वत्सं परमेण प्रेम्णा
हुँकृत्य वात्सल्यमुपानयन्ती ।
औदार्यभावेन ददाति दुग्धं
पथ्यं प्रभूतं मधुरं प्रियं च ॥

– ३ –

सा सर्वलोकैर्जननीव मान्या
सम्पूजनीया खलु देवतेव ।
शोभेव गेहस्य च रक्षणीया
संसेविता सा निधिरेव नूनम् ॥

—श्री वैद्यः रामस्वरूपशास्त्री,
सम्पादकः 'बालसंस्कृत'स्य

"प्रस्तुतोऽसि प्राणोत्सर्गाय किम् ? तर्हि निजदक्षिणभुजं छित्त्वा देहि येनाहं क्षुधातुरामिमां उदरदरीं सम्भावयामि ।"—पिशाचो निशितमेकं क्षुरं प्रक्षिप्य भयङ्करं अट्टहासगर्जनं चकार ।

त्रिविक्रमः क्षुरेण तेन कदलीदलमिव स्वभुजं छित्त्वा सविनयं तस्मै ददौ । पिशाचः सकौतुकं नेत्रे निमील्य स्रवदूरक्तं लिलिक्षमाणः चिन्तापरोऽभूत् ।

"अहो परां तुष्टिं गतोऽहमद्य । भद्र ! तृप्तिपर्यवसायिन्, इदं पैशाचं शरीरम् । मुक्तोऽहम् अद्य त्वया क्षुधानलात् । शरीरमोक्षात् पूर्वं वरय अभिलाषानुरूपं किमपि ।"

"नाहं किमपि याचे, ऋते महाराजपुष्करस्य दीर्घायुः प्रजासमृद्धिं च ।"

"एतेनैव सार्धं तेऽपि शुभं भूयात्" इति कथयन्नेव पिशाचो निजतनुमजहात् । पुष्करोऽपि तत्सर्वं वार्तालापं तत्रैव प्रच्छन्नोऽश्रृणोत् । स्थानापन्नं अङ्गरक्षकं च निपुणं निरीक्ष्य पर्यचिनोत् ।

"महाराज त्रिविक्रमो मदीयोऽनुचरः !"—इति वदन्नेव स तच्चरणौ पस्पर्श ।

"किमिदं राजन् ! सेवकोऽहमिदानीम् । मा जनमिमं कलङ्कितं विधेहि"—त्रिविक्रमस्तं उत्थाप्य पौनःपुन्येन पिशाच - वरदान - समुदित - दिव्यभुजद्वयेन आलिलिङ्ग ।

\+ \+ \+

"मातः प्राप्तः शिवदत्तस्त्वया ?"—तेनैव वेषेण कुटीरद्वारस्थितेन त्रिविक्रमेण वृद्धा पृष्टा । सा तूर्णमुत्थाय वेगशील-स्नेह-रस-सिक्त-हृदयेन तं परिषस्वजे । अस्थिमय-वक्षो निहित-मस्तको राजा विकम्पमानं मातृवात्सल्यं अनुभूय दिव्यां कामपि भावभूमिमारुरोह । शिवदत्तोऽपि विदित-सर्ववृत्तान्तः अलक्षित एव विरतिविहीनाश्रुधारया चिरं तस्य चरणौ पावयामास ।

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

मानस-भारती : देवगिरा गुम्फितं मानसम्

—श्री जनार्दन गङ्गाधर रटाटे, बी. ए. साहित्याचार्यः —

ते दूरादेव नेमुस्तां पृष्टाश्चोचुः कथां स्वकाम् ।
सरसाणि फलान्यत्तुं जलं पातुं च सादिशत् ॥
स्नात्वा फलानि जग्ध्वा ते तस्या निकटमाययुः ।
उक्त्वा कथां स्वां सा प्राह रामं यास्याम्यतः परम् ॥
निमील्याक्षीणि विवरं त्यक्त्वा यात न शोचत ।
सीतां लप्स्यथ, तच्छ्रुत्वा तेऽक्षीणि पिदधुस्तदा ॥
उन्मीलिताक्षा ददृशुस्तेऽब्धितीरस्थितिं निजाम् ।
सा तु राममुपागम्य ननाम चरणाम्बुजे ।
स्तुतिं च विविधां चक्रे स भक्तिं निश्छलामदात् ॥

प्रभोरनुज्ञां शिरसा गृहीत्वा
ब्रह्मेशवन्द्यं च हृदाऽङ्घ्रियुग्मम् ।
स्वयम्प्रभा राघवभक्तिपूता
जगाम हृष्टा बदरीवनं सा ॥२५॥

अत्र कीशाश्चिन्तयन्ति कार्यं नैवावधिर्गतः ।
परामृशन्ति सर्वे किं कार्यं सीतास्थितिं विना ॥
ऊचेऽङ्गदः साश्रुनेत्रो द्विविधं मरणं हि नः ।
सीतास्थितिर्न ज्ञाताऽत्र सुग्रीवो हन्ति तत्र च ॥
पितुर्वधे स हन्यान्मामरक्षद् राघवः परम् ।
मम संरक्षणे नास्ति तस्य काचिदुपक्रिया ॥
श्रुत्वाङ्गदवचः कीशाः सास्रा वक्तुं न चाशकन् ।
शोकमग्नाः क्षणं सर्वे वीरा इत्थं ततोऽवदन् ॥
युवराज न यास्यामः सीतास्थित्या विना वयम् ।
इत्युक्त्वा ते क्षारसिन्धोस्तीरे दर्भेषु संस्थिताः ॥
जाम्बवानङ्गदं दृष्ट्वा कथाः खिन्नमुपादिशत् ।
हे तात ! रामं मा मंस्था नरं किन्त्वजमव्ययम् ।
धन्या बहु वयं दासाः सगुणप्रीतयः सदा ॥

निजेच्छाया गोद्विजदेवहेतो-
र्गृह्णाति रामो विविधावतारान् ।
भक्ताः स्वरूपे सगुणे विहाय
मोक्षांस्तु सेवानिरता भवन्ति ॥२६॥

इत्थं जाम्बवता कीर्त्यमानास्ता विविधाः कथाः ।
गिरिदर्यां स्थितः पक्षी सम्पाती शुश्रुवे तदा ॥
बहिर्भूत्वा कपीन् दृष्ट्वा प्राह मह्यं समर्पितः ।
आहारो जगदीशेन निराहारश्चिरादहम् ॥
भक्षयिष्याम्यद्य सर्वान् नोदरं पूरितं कदा ।
दैवेनैकत्रितं दत्तमिति तैर्गृध्रवाक्छ्रुता ॥
भीताः प्रोचुः सत्यमेव ज्ञातं मृत्युः स्थितोऽद्य नः ।
दृष्ट्वोदतिष्ठंस्तं सर्वे शुशोचातीव जाम्बवान् ॥
ऊचेऽङ्गदो नास्ति तुल्यो धन्यः कोऽपि जटायुषा ।
त्यक्त्वा तनुं रामकार्यान्महाभागः परं गतः ॥

हर्षशोकाप्लुतां वाचं श्रुत्वा पक्षी ययौ कपीन् ।
दत्ताभयांस्तान् पप्रच्छ स्वभ्रातुः कुशलं तदा ।
भ्रातुः कर्मनिशम्यासावर्णयद् रामविक्रमम् ॥

स प्राह कीशान् नयताब्धितीरं
तस्मै प्रदास्यामि तिलाञ्जलिं तु ।
वाचा करिष्यामि सहायतां या-
न्निष्ठास्ति वः प्राप्स्यथ तामिदानीम् ॥२७॥

(क्रमशः)

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

उपमा कालिदासस्य

— श्री डॉ० केशव सदाशिवशास्त्री मुगलगांवकरः —

(एम्. ए. बी. एड्. डि. फिल्, लश्कर-ग्वालियर)

मासेऽस्मिन् अखिले भारते कविकुलगुरोः महाकवि कालिदासस्य जयन्त्युत्सवो महता समारोहेण समायोजितः संस्कृतप्रणयिभिः। वयमपि शुभेऽवसरेऽस्मिन् तेषां पदपाथोजयोः श्रद्धासुमनोऽञ्जलिं वितीर्य तेषां गुणगानाय लेखमुमम् उपायनीकुर्मः।

—सम्पादकः

गीर्वाण-वाङ्मये महाकवीनां सुदीर्घपरम्परायाम् उपमा कालिदासस्य इत्युक्तिं श्रुत्वा यत्र कवि-कालिदासस्य उपमानैपुण्यं मूर्तिमन्तं दृग्गोचरतां याति तत्रैव पक्षान्तरे विविधाः प्रश्ना अपि चेतसि समुद्भवन्ति। यथा—१. महाकविकालिदासस्य वैचक्षण्यमुपमालङ्कार-प्रयोगेष्वेवासीत् उत तदतिरिक्तालङ्कारान्तरेष्वपि? २. उपमाप्रयोगसौष्ठवं यथा कालिदासीयकृतिषु वर्तते, न तथा तदतिरिक्त-महाकविपरम्परायां वर्तते किमु? ३. उपमाबाहुल्यं वैपुल्येन सर्वत्र संस्कृत-साहित्ये वर्तते, नास्त्यत्र विदुषां वैमत्यम्। तर्हि कालिदासीयोपमासु किं नाम वैशिष्ट्यम्?

वस्तुतः उपमा कालिदासस्य इत्युक्तिः कवियशसा लोकोक्तिषु परिवर्तिता। परमस्य किं रहस्यमित्येव गवेषणाविषयः। लोकोक्तिषु परिगणिता परिवर्तिता वा एषा उक्तिः साधारणतया सहृदयपाठकानपि भ्रामयति।

प्रायः सामान्यजना आपातत उपमायाः वाच्यार्थमेव गृह्णन्ति। उपमालङ्कार-प्रयोगेष्वेव कालिदासीयं यशः सीमितं कुर्वन्ति ते। परं न तथेति सुस्पष्टतया वक्तुं शक्यते कालिदासीय-काव्यानुशीलनानन्तरम्। साधारणजनानामाकलनसीमायामिदं न याति, अलङ्कारान्तरप्रयोगेष्वपि तथैव कालिदासस्य नैपुण्यं यथा उपमालङ्कारप्रयोगेषु। महाकवि-कालिदासस्य विषये उपमाशब्दस्य वाच्यार्थोऽतिव्यापकः। यदा यदा तस्य 'उपमा'विषयकं नैपुण्यमधिकृत्य विचारयामः, तदाऽस्माकं तात्पर्यं तदीय-समस्त-काव्यग्रन्थेषु न केवलं प्रयुक्तालङ्कारविषयकं नैपुण्यं भवति, न वा तदीयरसपरिप्लुत-हृदयस्य स्पन्दनस्य अभिव्यक्ति-कौशलमधिकृत्य भवति, न वा तत्कथन-चातुरीमधिकृत्य तत्। नैपुण्यन्तु सार्वत्रिकमस्ति, नैकाङ्गिणं तत्।

वस्तुत उपमा भूयसामलङ्काराणां मूलम्। उपमास्वरूपं प्रबोधयता अलङ्कारमर्मज्ञेन श्रीदीक्षितेन विद्वद्वरेण सम्यगुक्तं यत् उपमानाम्नी काचिन्नटी (शैलूषी) वर्तते, या विविधभूमिकासु काव्याख्ये रङ्गमञ्चे सहृदय-काव्यतत्त्वविदां मनो रञ्जयति। यथा-

उपमैका शैलूषी सम्प्राप्ता चित्रभूमिकाभेदान्।
रञ्जयति काव्यरङ्गे नृत्यन्ती तद्विदां चेतः॥ इति।

अस्या एव उपमाख्यायाः शैलूष्याः विविधविचित्रविलासजन्या उक्तिभेदा एव काव्यतत्त्वविद्भिः विद्वद्वरैः पृथक् पृथक् नामान्तरैरभिव्यक्ततां नीताः। समाहितचेतसा यदा विचारयामः, तदा एवं ज्ञातुं शक्यते यत् श्रीमतां दीक्षितानां कथनमिदं बह्वर्थं व्यनक्ति।

काव्यद्वारा काव्य-रसज्ञानां मनोरञ्जनार्थं यावन्ति कलावैचक्षण्यानि विद्यन्ते, तेषां सर्वेषां मूले एकाकिन्या

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

पुस्तक-समीक्षणम्

सुस्वागतं हिमांशो !

हिमाचलप्रदेशीय-सोलन-नगरस्थितस्य राजकीय-महाविद्यालयस्य विद्यालय-पत्रिका 'हिमांशुः' इति नामा वर्तते मेऽक्ष्णोः पुरतः। अयमस्ति अस्या ऐषमः (१९६६-६७ वर्षीयः) विशेषाङ्कः। आंग्ल-हिन्दी-संस्कृतेति त्रैभाषिकीयम्। आंग्ल-विभागे ४४ पृष्ठानि, हिन्दी-विभागे ३० पृष्ठानि, संस्कृत-विभागे च १८ पृष्ठान्यत्र सन्ति। सचित्रेयं पत्रिका मुद्रण सम्पादनादि-विषये नूनं समुल्लेख्या। छात्रैस्तदध्यापकैश्च अस्याः साफल्याय बहु प्रयतितं दृश्यते। सम्पादकाः श्री मनसारामशर्मा अरुणः, छात्रसम्पादकमण्डलीयाश्च एतदर्थे बहुशो धन्यवादार्हाः। छात्रसम्पादकमण्डले सर्व-श्री वासुदेव भारद्वाजः, रूपलालः, चमनलालः, दयाशर्मा, कृष्णाकुमारी, सुदेशकुमारी वर्तन्ते। सर्वैः संस्कृत-विभागीय-सामग्रीसङ्कलने यादृशं वैविध्यं दीर्घदर्शिता सूचकता संस्कृत-साहित्यस्य प्रौढं पाण्डित्यं प्रदर्शितम्, नूनं तत् सर्वथा प्रशंसनीयम्। मन्ये, तैः संस्कृत-मासिकपत्रिकारूपेणाऽपि अस्य हिमांशोः प्रकाशनं कर्तुं शक्यते, एतावदेषु बौद्धिकं क्षमत्वं दृश्यते। छात्रैस्तन्नेतृभिरध्यापकैरत्र अवधानं दीयेत चेत् देववाण्या महती सेवा भवेत्। सर्वमपि लेख-कविता-हास्यादिवाङ्मयं प्रशंसास्पदम्। वयमस्य समुन्नतिं कामयमाना निदर्शनरूपेण 'उत्सर्गा'ख्यां कथामत्राङ्के समुल्लिखामः। तेनैव पत्रिकाया अस्याः प्रौढत्वं स्फुटीभवेत्।

—सम्पादकः।

अस्या उपमारूपिण्याः शैलूष्या एव लीलाविलासाः दृष्टिपथमायान्ति। श्रीदीक्षितेन स्वाशयस्य पुष्ट्यर्थं मुख-चन्द्रदृष्टान्त इत्थं प्रतिपादितः—

"चन्द्र इव मुखमिति सादृश्यवर्णनं तावदुपमा। सैवोक्तिभेदेन अनेकालङ्कारभावं भजते। तथा हि—चन्द्र इव मुखं मुखमिव चन्द्र इत्युपमेयोपमा। मुखं मुखमिवेत्यनन्वयः। मुखमिव चन्द्र इति प्रतीपम्।'.........

......'एवमुक्तानेकालङ्कार-विवर्तवती इयमुपमा।

अत एव राजशेखरोऽपि—

अलङ्कारशिरोरत्नं सर्वस्वं काव्यसम्पदाम्।
उपमा कविवंशस्य मातेवेति मतिर्मम॥ इति।

कविकृतेषु समस्तकाव्यग्रन्थेषु तत्प्रयुक्तालङ्कारेषु वैपुल्येन कालिदास-नैपुण्यं सहृदयचित्तमानन्दयति।

कवित्व-निकषे सुस्थिराणां महाकवीनां काव्येषु अलङ्काराणां सन्निवेशो नास्ति कृत्रिमः। ते तु सहजत एव अहमहमिकया स्फुरन्ति। यथा वर्षर्तौ पर्वतशिखरात् जलधारा वेगेन अधोऽवतरति, तदा सा क्वचित् कर्णमधुर-कलकलादि-मन्दस्निग्धध्वनिं क्वचिच्च भैरव-नादञ्च कुर्वन्ती स्वच्छन्दरीत्या स्वमार्गं प्रशस्तं करोति, तथैव कवेः रसपरिप्लुतो हृत्कुम्भो यदा आकण्ठं पूर्यते तदा स सहजरीत्या उच्छलति। तदुच्छलनेनैव सहजमेव काव्ये तत्-तत्-स्थानोचित-वृत्तालङ्काराणां सन्निवेशो भवति। समुचितच्छन्दोवृत्तादि-नियन्त्रित - श्लोकरूपतां प्राप्नोति च। तदर्थं पृथक् प्रयत्नो नापेक्ष्यते। कालिदासोत्तरवर्तिभिः कविभिः तादृशं यशो न लब्धं यादृशं कालिदासेन समधिगतम्। अत्र इदमेव बीजं यत् तेषां कृतिषु अलङ्कारादीनां सन्निवेशो न साहजिकः। तेषां कृतिर्नूनं

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

बुद्धिग्राह्या जाता, न परं हृदयग्राहिणी। साहजिकतायाः स्थाने कृत्रिमता, सरलतायाः स्थाने कठिनता विदग्धता च तत्र दृष्टिपथमायाति। सुबन्धु-बाण-श्रीहर्षादिकवीनामुपमा न स्वाभाविकी। सा बहुधा श्लेषाधिष्ठिता बुद्धिग्राह्या च।

प्रयत्न-साधितालङ्काराणां सन्निवेशो रस-ध्वनि-वादिभिर्न स्वीकृतः, न चानुमतः। आनन्दवर्धनाचार्यैरुक्तम्—

रसाक्षिप्ततया यस्य बन्धः शक्यक्रियो भवेत्।
अपृथग्यत्ननिर्वर्त्यः सोऽलङ्कारो ध्वनौ मतः॥ इति।

कालिदासकृतिषु नास्त्येवम्। कालिदासेन प्रयुक्तासु उपमासु उपमानोपमेययोर्मध्ये सर्वाङ्गीणं सादृश्यं सहजरीत्यैव प्रतिभाति। यथा—

वैदर्भनिर्दिष्टमसौ कुमारः क्लृप्तेन सोपानपथेन मञ्चम्।
शिलाविभङ्गैर्मृगराजशावस्तुङ्गं नगोत्सङ्गमिवारुरोह॥
—रघु० ६.३।

अत्र इन्दुमती-स्वयंवरप्रसङ्गेन स्वयंवरार्थं समागतानां राजकुमाराणां मध्ये अजवर्णने अजः सिंहोपमया वर्णितः, अजासनञ्च पर्वतशिखरेण, तत्-पीठं गन्तुं निर्मिताश्चाधिश्रेणयः पर्वतोपत्यकाभिरुपमिताः। महाकविकालिदासेन उपमालङ्कारेण स्वकृतिरलङ्कृता, अलङ्करणे च तेन प्रकृतितः शास्त्रतश्च सारभूतं वैचित्र्यं यत्र तत्र गृहीत्वा स्वोपज्ञता प्रकटीकृता। यथा—

सञ्चारिणी दीपशिखेव रात्रौ यं यं व्यतीताय पतिंवरा सा।
नरेन्द्रमार्गाट्ट इव प्रपेदे विवर्णभावं स स भूमिपालः॥
(रघु० षष्ठसर्गे) इति।

अत्रापि पतिंवरान् इन्दुमतीं दीपशिखोपमया संवर्ण्य कविना हृदयवर्तिनः हर्ष-विषादरूपाः सूक्ष्मभावा अपि मूर्तरूपेण नेत्रगोचरतामानीताः। अन्यच्च—

अनाघ्रातं पुष्पं किसलयमलूनं कररुहै-
रनाविद्धं रत्नं मधुनवमनास्वादितरसम्।
अखण्डं पुण्यानां फलमिव च तद्रूपमनघं
न जाने भोक्तारं कमिह समुपस्थास्यति विधिः॥ इति।

अत्रापि कविना दुष्यन्तप्रेयसीं शकुन्तलामनाघ्रातपुष्पोपमया, अविद्धरत्नोपमया, अनास्वादितनवमधुरसोपमया, पुण्यानामखण्डफलोपमया च संवर्ण्य हृदयग्राहिणं मनोरमं सजीवं शब्दचित्रमुपस्थापयता राज्ञः दुष्यन्तस्य वासनया उन्मत्तहृदयस्य सकम्पस्पन्दनमपि सहृदयेषु प्रकाशितम्।

एतादृशा अनेके प्रसङ्गा महाकविकालिदासकृतिषु यत्र तत्र अनायासेनैव उपलभ्यन्ते। रघुवंशस्तु उपमालङ्कारेणैव प्रारभ्यते तेन—

वागर्थाविव सम्पृक्तौ वागर्थप्रतिपत्तये।
जगतः पितरौ वन्दे पार्वती-परमेश्वरौ॥ इति।

क्वचित् कविना एकस्मिन्नेव श्लोके उपमा-माला ग्रथिता। सर्वत्र तस्य मौलिकता, गभीरता सरसता च परिलक्षिता भवति।

सहजसौन्दर्यसम्पन्नासु तत्-कृतिषु आलङ्कारिकैर्निर्दिष्टदोषे न कोऽपि दृष्टिक्षेपं करोति। यतो हि—

एको हि दोषो गुणसन्निपाते निमज्जतीन्दोः किरणेष्विवाङ्कः।

एतावता उपमाप्रयोगसौष्ठवं यथा कालिदासकृतिषु काव्यतत्त्वविदां रुचिकरं प्रतिभाति, न तथाऽन्यत्र इत्यस्मिन् विषये नास्ति विदुषां वैमत्यम्।

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

पृथ्वीराजाख्यानकम्

— श्रीविश्वनाथ त्रिपाठी, साहित्याचार्यः —

★

(७)

राज्ञो विलासित्वम्, सामन्तेषु वैमत्यं च

शहाबुद्दीन गोरी निरन्तरं पृथ्वीराज-पराभवस्य अवसरं प्रतीक्षमाण आसीत्। तेन स्वचरैः यत्किमपि श्रुतम्, ततोः स अतितरां तुतोष। तदा दिल्ली अनाथेव संवृत्ता, सामन्तेषु च महान् भेदः परिदृश्यते स्म। राज्ञो विलासपरिप्लुतां स्थितिं विलोक्य केचन स्व-स्व-निकेतनं जग्मुः। केचिच्च तत्र स्थिता अपि तटस्थाः समभवन्। राज्ञा अपमानितो महावीरो हाहुलीरायः स्वराज्ये परमस्वतन्त्रो भूत्वा अवर्तत। राजसभायां पुरुषवेषेण स्त्रियोऽपि उपविशन्त्य आसन्। वीरोऽपि राजा अस्यामेव दशायां परम् आनन्दमन्वभवन्नासीत्। पृथ्वीराजस्य प्रतिशोधं विधाय इन्द्रप्रस्थम् अधिकर्तुम् इतः परः कः शोभनोऽवसरो भवेत् इति विचार्य गोरिणा तस्मै निर्णायक-युद्धस्य सूचना प्रेषिता।

युद्धस्य सूचनां समासाद्य राज्ञः प्रमादावृते चक्षुषी उन्मीमिलतुः। शनैः शनैः पुनः राजसभा समसज्जत। अभितः सेनाः समागच्छन्ति स्म। गोरिणः आक्रमणस्य सूचनाम् आसाद्य सामन्तसिंह एव सर्वप्रथमं पृथ्वीराजस्य साहाय्याय आजगाम। चन्दस्य साहाय्येन स विरक्तान् सामन्तान् आश्वास्य एकत्रीकृतवान्। चामण्डरायं निगडात् मोचयित्वा स्वपक्षेण युद्धे योद्धुम् अनुकूलमकरोत्। सामन्तसिंहस्य सन्देशं लब्ध्वा धीरपुण्डीरस्य वीरसुतः पावसोऽपि तत्र समाजगाम।

युद्धोपकरणानां सर्वेषां यथावस्थितं संयोजनं सम्पाद्य रुष्टं हाहुलीरायम् अनुकूलयितुं राज्ञा चन्दवरदायी प्रेषितः। परं हाहुलीरायः छद्मना चन्दवरदायिनं जालन्धरदेव्याः मन्दिरे निगडितं कृत्वा स्वयं ससैन्यः गोरिणा साकं संदधे। वृत्तमिदं समाकर्ण्य पृथ्वीराजो भृशं चुक्षोभ, किन्तु सम्प्रति किमपि तदधीनं नासीत्।

गोरीतः पराजित्य बन्दी-भवनम्

प्रतीक्षिता तिथिः समुपस्थिता, युद्धं च प्रारभत। गोरिणो विशालसेनया युध्यमानानां सामन्तानां संख्या शनैः शनैः चिक्षिये। क्रमशः चामण्डः, जैतरावः, लोहाना, सिंहप्रमारः, निड्डुरराय - पुत्रः, धीरपुत्रः पावसः, रावलः सामन्तसिंहः, यामराय जादो, पुरोहितो गुरुरामादयः सर्वेऽपि अस्मिन् युद्धे हताः।

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

अभितः शत्रुभिराक्रान्तः पृथ्वीराजः भीषणतमं युद्धं व्यधात्। अन्ततः भृशमाहतः स बन्दीकृतो गोरिणा। राज्ञो दशामिमां विलोक्य अवशिष्टा स्वल्पा सेना पलायिष्ट।

विजयान्ते गोरिणा बन्दीकृतः पृथ्वीराजः गजनीं प्रापितः। दिल्लीनगरे वृत्तमिदं समासाद्य संयोगिता सपदि प्राणान् जहौ। अन्याश्च सर्वाः मृत-वीरसामन्तानां ललनाः सोत्साहं सदार्ढ्यं ससङ्कल्पञ्च चिताग्नौ प्रविश्य सत्यो भूत्वा स्वप्रियान् अनुसस्रुः।

समस्तं दिल्लीनगरं स्तब्धम् अभूत्। सर्वत्र श्मशान इव नीरवत्वम्, रुदन-कोलाहलः व्यथित-चीत्कारश्च सर्वतो व्याप्नोत्।

अत्रान्तरे हाहुलीरायबन्धनात् मुक्तः चन्दवरदायी दिल्लीमाजगाम। तत्रत्यां दशां विलोक्य भृशं विलक्षितः पृथ्वीराजस्य गुणागुणौ स्मारंस्मारं स विललाप। मनसि दृढं निश्चित्य पृथ्वीराज-चरितं लेखितुं प्रारभत्। शीघ्रमेव तत्संपूर्य स्वपुत्राय जल्हणाय तत्समर्प्य स्वयं पृथ्वीराज-दर्शनाय गजन्यभि-मुखं प्रतस्थे।

चन्द-पृथ्वीराजयोः सम्मिलनम्

अरण्येषु इतस्ततः परिभ्रमन् चन्दः कथमपि गजनीं प्रापत्। तत्रागत्य स राजसभायां शाह-साक्षात्काराय समुद्यमं व्यधात्। परं दृढं प्रयत्याऽपि स स्वाभीष्टकार्ये साफल्यं न प्राप। इतस्ततो भ्राम्यन् आसीत्।

एकस्मिन् दिने शाहः 'हदफ'क्रीडार्थं बहिर्निर्जगाम। मार्गस्थे दर्शकसमाजे चन्दवरदायी अपि समुपस्थित आसीत्। शाहं विलोकयन्नेव स हस्तौ उत्थाप्य तस्मै आशीर्भिः युयोज। शाहः तमभिज्ञाय स्वान्तःपुरं निनाय। अत्रैव शाहेन स्वयुद्धस्य विजयस्य च पूर्णा गाथा तस्मै श्राविता। तेन इदमपि कथितं यत् पृथ्वीराजः कारागारे किञ्चिदपि नाश्नाति, दौर्बल्यं च भजते। मया बद्धोऽपि मत्संमुखे दृशं न न्यक्षयतीति तच्चक्षुषी तप्तशलाकया दग्धे। अद्य स किमपि कर्तुं नार्हति। वाञ्छसि चेत् तं साक्षात्कर्तुं प्रभवसि।

इत्थं तदाज्ञया चन्द्रः पृथ्वीराजं साक्षात्कृतवान्। स शनैः शनैः शाहे स्वविश्वासं अदृढत्। स्वेष्टयोजनायाः साफल्याय पृथ्वीराजेन समं सदा मिलन तमपि समुत्साहितं कुर्वन्नासीत्।

(क्रमशः)

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

सूर्योदयस्य नियमाः

पत्र-संहिता

१. 'सूर्योदय'-मासिकपत्रस्य वार्षिकं शुल्कं रूप्यकपञ्चकं वर्तते। धनादेश (मनीआर्डर) द्वारा तत्प्रेषणीयम्। वी० पी० द्वारा प्रेषणे ५० पणाः पृथक् प्रदेयाः स्युः।

२. आवर्षं गम्भीरसाहित्यसमन्विताः १२ अङ्काः प्रकाश्यन्ते। नवीनग्राहकत्वं प्रथमाङ्कतः (जनवरी-अंकतः) एव स्वीक्रियते। माध्यमिकेन केनापि अङ्केन ग्राहकत्वं न स्वीक्रियेत।

३. आंग्लमासस्य २६ दिनाङ्के 'सूर्योदयः' प्रकाशितो भवति, वारद्वयं संशोध्य ग्राहकेभ्यः स प्रेष्यते। अतस्तदलाभे पूर्वं स्वकीय-पत्रालयतस्तदनागमनस्य निश्चयं कृत्वैव १० दिनाङ्कानन्तरं वयं सूचनीयाः।

४. लेख-कवितादीनां भाषा संयता, सरला, शुद्धा च भाव्या। प्रकाशनीय-लेखादीनां स्पष्टाक्षरैः कर्गजस्यैकपृष्ठे एव लेखनमावश्यकम्। अस्वीकृता लेखादयः पोस्टविभागीय-चिटिका (टिकट) प्राप्त्यनन्तरं परावर्तयितुं शक्ष्यन्ते।

५. सम्पादकीय-विषयसम्बद्धे पत्र-व्यवहारे 'सम्पादकः' इति, व्यवस्थाविभागीय-पत्रव्यवहारे च 'व्यवस्थापकः' इति च स्पष्टं लेखनीयम्। तेन उत्तरलाभे मुधा विलम्बो न भवेत्।

विज्ञापन-शुल्कम्

सूर्योदये सुरुचिपूर्णं विज्ञापनं प्रकाश्यते। एकवारं तस्य प्रकाशनस्य शुल्कक्रमश्च अधोलिखितो-ऽस्ति। सार्वकालिकस्य दीर्घकालिकस्य च विज्ञापनस्य कृते विशेष-सौविध्याय पत्र-व्यवहारः कार्यः।

साधारणस्य प्रतिपृष्ठस्य	१००) रु०	साधारणस्य प्रत्यर्धपृष्ठस्य	६०) रु०
साधारणस्य चतुर्थांशपृष्ठस्य	३५) रु०	आवरण-चतुर्थपृष्ठस्य	२००) रु०
आवरण-द्वितीय-तृतीयपृष्ठयोः	१५०) रु०	प्रथमावरणपृष्ठे विज्ञापनं न स्वीक्रियेत।	

— सङ्केतः —

'सूर्योदय'-कार्यालयः, भारतधर्म-महामण्डलम्, जगत्गंज वाराणसी।

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

विषय-सूची

अस्मिन्नङ्के	पृष्ठ
१. मा नः सूर्यस्य सन्दृशो युयोथाः (ऋग्वेदः)	१
२. श्री गुरुगीता —श्रीज्ञानानन्दमहाराजगुरुवर्याः	२
३. सम्पादकीयम्	३
३. वामा विलासकाव्यम् —श्रीमन्तः राघवरामत्रिपाठिनः	४
५. ज्ञानगंजयोग —श्रीमन्तश्चन्द्रशेखरस्वामिनः	५
६. पञ्चनदप्रदेशे संस्कृतस्य स्थितिः —आचार्यभद्रसेनः	६
७. ग्रहनक्षत्रादिप्रभावनिरोधकं धातुरत्नादि धारणम् —श्रीमान् पतञ्जलिमिश्रः	७-८
८. शृङ्खला —डॉ० परमहंसमिश्रस्य	८
९. अर्जुनोर्वशीयम् —महाकविः अभिराजराजेन्द्रमिश्रः	९-१६
१०. ननु भवेद् विलम्बो नैवान्यायः —डॉ० भागीरथप्रसाद त्रिपाठिनः	१७-२३
११. किंचिद् हास्यमपि —वीरेन्द्रकुमार जैनः (दतिया)	२३
१२. तुलसीप्रशस्तिः —महाकविः रतिनाथ झा महोदयः	२४

किञ्चिद् हास्यमपि

ले–पं० प्रशस्यमित्रः शास्त्री, एम० ए० लब्धस्वर्णपदकः
प्रवक्ता—संस्कृत विभाग, फिरोजगान्धीकालेज, बरेली

एकः प्रश्नः

लज्जैवाऽऽभूषणं नार्या लज्जैव वसनं यदा।
कथं कार्पासवस्त्राणि नारी परिदधात्वसौ ॥

काश्चिदभिनवाः परिभाषाः

छात्रा निर्वाचने व्यग्रा यत्राऽधीति-पराङ्मुखाः।
विद्याया लयमिच्छन्ति तस्मात् विद्यालयः स्मृतः ॥

परितः पुस्तकस्तोमं कृत्वा प्रश्नसमाधये।
अनुक्रियार्थम् ईक्षा या परीक्षा सैव कथ्यते ॥

धूम्रदानम्

यात्रिणं धूम्रपानं वै कुर्वन्तम् परिचालकः।
प्राह–"मोटरयानेऽस्मिन् धूम्रपानं विवर्जितम् ॥

प्रत्युवाच ततो यात्री परिचालकमञ्जसा।
करोमि धूम्रपानं नो, धूम्रदानं करोम्यहम् ॥

षोडशीप्रार्थना

सश्रद्धं मन्दिरे गत्वा पत्रपुष्पकरान्विता।
प्रत्यहं षोडशी काचित् प्रार्थयत्येवमीश्वरम् ॥

न मे याच्ञाऽस्ति हे देव ! काचिदप्यात्मने, परम्।
जनन्यै कृपया कश्चिज्जामाता दीयताम् मम ॥

मुरारि-शासने-संस्कृतम्

रच०–रामस्वरूपशास्त्री अमरः तालबेहटस्थः

यवनैश्चापि गोराङ्गैः पीडिता या निरन्तरम्।
जीवनं धारयत्येषा गीर्वाणवागुपेक्षिता।

इन्दिरा-शासने यस्या नैव जाता समुन्नतिः।
मुरारेश्चापि कारुण्यं यथेष्टं नास्ति साम्प्रतम् ॥

स्वैराचाररता सर्वे पशवो मानवाः खगाः।
केवलं संस्कृताभाषा संस्कृति दुर्मनायते ॥

स्वीयाः सुशासका एव देववाण्यामुदासिताः !।
भूयाद् भव्यं कथं तस्या मुरारी राजते यदा ॥

सेवकाःसंस्कृतस्यास्य दैन्यभावमुपाश्रिताः।
मुरारि-शासने सत्यं कथं रक्षा भविष्यति ?॥

साम्प्रतम् नितरां हीनाः, संस्कृतज्ञाः स्वभारते।
भारते त्रिपदापन्नाः को हि रक्षां विधास्यति ?॥

हंसा परमहंसानां लब्ध्वा सम्बलसन्ततिम्।
सन्ततं मुदमापन्ना विपन्ना एव भारते ॥

भूयात्तु सुख-सम्पत्तेः शीघ्रं सूर्योदयः प्रभो !
मुरारेः शासने धातः, स्वातन्त्र्यं किल तद् भवेत् ?॥

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

सूर्योदयः

रागद्वेषनिशाटनं विधुरयन् मोहं तमो नाशयन्,
तामिस्रं जडवादकैरवकुलं ज्ञानत्विषा ग्लापयन्।
विद्वत्कोकमशोकयन् नवसुधीरोलम्बमुन्मीलयन्,
सञ्जातः सुमनोमनो मधुरयन् सर्वत्र सूर्योदयः॥

५५ तमे वर्षे] वाराणसी, मार्गशीर्ष २०३५ नवम्बर १९७८ [अङ्कः ११

卐 मा नः सूर्यस्य सन्दृशो युयोथाः 卐

आ ते पितर्मरुतां सुम्नमेतु, मा नः सूर्यस्य सन्दृशो युयोथाः।
अभि नो वीरो अर्वति क्षमेत, प्र जायेमहि रुद्र प्रजाभिः॥१॥
त्वा दत्तेभी रुद्र शन्तमेभिः, शतं हिमा अशीय भेषजेभिः।
व्यस्मद् द्वेषो वितरं व्यंहो, व्यमीवाश्चातयस्वा विषूचीः॥२॥
श्रेष्ठो जातस्य रुद्र श्रियासि, तवस्तमस्तवसां वज्रबाहो।
पर्षि णः पारमंहसः स्वस्ति, विश्वा अभीती रपसो युयोधि॥३॥
मा त्वा रुद्रचुक्रुधामा नमोभिर्मा दुष्टुती वृषभ मा सहूती।
उन्नो वीराँ अर्पय भेषजेभिर्भिषक्तमं त्वा भिषजां शृणोमि॥४॥

हे मरुतां पितः! त्वत्तः (अस्मभ्यं निर्वारितं) सुखम् आगच्छतु! त्वं सूर्यस्य संदर्शनात् अस्मान् वञ्चितान् मा अकार्षीः। अस्माकम् पुत्रपौत्रादयः शत्रुहन्तारः सन्तु। हे रुद्र! पुत्रपौत्रादिसन्तानपरम्पराभिः त्वदुपासकाः यजमानाः समन्विताः स्युः।

हे रुद्र! त्वम् उत्तमः भिषक् असि। त्वद्दत्तैः औषधैः वयम् शरदः शतम् जीवेम! अस्माकं द्वेष्टॄन् विनाशय, पापं च अपाकुरु।

हे रुद्र! त्वं जगति गतिशीलस्य सर्वस्य वस्तुनः शिरोमणिरसि! तथा हे वज्रबाहो। त्वं महतोऽपि महीयान् असि। त्वमेव विश्ववैतरण्याः पारं गमयितुं समर्थः असि। कुशलपूर्वकम् अस्मान् पापेभ्यः पारं नय, पापप्रहारेभ्यश्चा-स्मान् रक्ष।

वयम् उपासकाः अयथोचितैः नमस्कारैः त्वां सक्रोधं मा विधास्यामहे। सविधिस्तुतिभिश्च स्तोष्यामहे। अन्यैः देवैः सहाह्वानेन च भवन्तं सक्रोधं मा विधास्याम। वयं जानीमहे यत्त्वं भिषक्सम्राट् असि। उपासकान् अस्मान् सन्तति-समन्वितान् संविधेहि!

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

श्री गुरुगीता

[गुरुशिष्यलक्षणम्]

आविष्कारकाः—भगवत्पूज्यपादाः महर्षयः ज्ञानानन्दस्वामिगुरुवर्याः

पंचतत्त्वविभेदज्ञः पञ्चभेदां विशेषतः—॥४३॥

सगुणोपासनां यस्तु सम्यग्जानाति कोविदः ।
चातुर्विध्येन विततां ब्रह्मणः समुपासनाम् ॥४४॥

गम्भीरार्थां विजानीते बुधो निर्मलमानसः ।
सर्वकार्येषु निपुणः जीवन्मुक्तस्त्रितापहृत् ।
करोति जीवकल्याणं गुरुः श्रेष्ठः स कथ्यते ॥४५॥

श्रीमहादेव्युवाच

सच्छिष्यलक्षणं नाथ ! मुमुक्षूणां त्रितापहृत् ।
गुरुभक्तस्य शिष्यस्य कर्त्तव्यञ्चापि मे वद ॥४६॥

मुमुक्षुभिश्च शिष्यैः कैः शुभाचारैरवाप्यते ?
आत्मज्ञानं दयासिन्धो कृपया ब्रूहि तानपि ॥४७॥

येन ज्ञानेन लब्धेन शुभाचारान्वितैर्द्रुतम्,
मुच्यते बन्धनान्नाथ ! शिष्यैः सद्गुरुसेवकैः ॥४८॥

श्रीमहादेव उवाच

शिष्यः कुलीनः शुद्धात्मा पुरुषार्थपरायणः ।
अधीतवेदः कुशलो दूरमुक्तमनोभवः ॥
हितैषी प्राणिनां नित्यमास्तिकस्त्यक्तवञ्चनः ॥४९॥

स्वधर्मनिरतो भक्त्या पितृमातृहिते स्थितः ।
गुरुशुश्रूषणरतः वाङ्मनः-कायकर्मभिः ॥५०॥

शिष्यस्तु स गुणैर्युक्तो गुरुभक्तिरतः सदा ।
धर्मकामादिसंयुक्तो गुरुमन्त्रपरायणः ॥५१॥

सत्यबुद्धिः गुरोर्मन्त्रे देवपूजनतत्परः ।
गुरूपदिष्टमार्गे च सत्यबुद्धिररुधीः ॥५२॥

अलुब्धः स्थिरगात्रश्च आज्ञाकारी जितेन्द्रियः ।
एवंविधो भवेच्छिष्यः इतरो दुःखकृद् गुरोः ॥५३॥

शरीरमर्थं प्राणांश्च गुरुभ्यो यः समर्पयन् ।
गुरुभिः शिष्यते योगं स शिष्य इति कथ्यते ॥५४॥

दीर्घदण्डवदानम्य सुमनाः गुरुसन्निधौ ।
आत्मदारादिकं सर्वं गुरवे च निवेदयेत् ॥५५॥

[क्रमशः

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

सम्पादकीयम्—

साम्प्रतिकी समाजनीतिः

भारतेऽस्मिन् वर्षे पुरा या सामाजिकी व्यवस्था आसीत् तदनुसारं संसारे मानवजातिः चातुर्वर्ण्यं चातुराश्रम्यं च स्वीकृत्य स्वां सामाजिकीं जीवनसरणिं सम्यगनुससार। चातुर्वर्ण्यव्यवस्थया भारतीयं लोकजीवनं जागराञ्चकार। 'एतद्देशप्रसूतस्य सकाशादग्रजन्मनः इति मनूक्त्या विज्ञायते यदत्र देशे चातुर्वर्ण्यचरित्रसदाचारस्तु पूर्णतया प्रचलित एवासीत्-यत्र नासीत् तत्रत्याऽपि भारतीयैरशिक्ष्यन्त क्षमतया। तदा भारतमेष देशः जगद्गुरुरासीत्।

अतिक्रान्तेषु मन्वन्तरेषु साम्प्रतम् मनुतनुजाः एतद्देशीयाः असंख्याताः पाश्चात्यचारित्रानुकरण-दूषितान्तःकरणाः स्वात्मोत्कर्षविमर्शविस्मृताः दिग्भ्रान्ताः विविध-वैमत्यग्रस्तमस्तिष्काः स्वकीयां समाजनीतिं विहाय, ध्रुवां परित्यज्याध्रुवां स्वीकर्तुं तत्पराः दृश्यन्ते।

एतेषां दृष्टौ भेदभावनायाः भीषाकरोऽभव्यः भूधर एव परिवर्धित विविधानि वैधेयधौरेयतां विदधाति। प्रतिभाति यत् सम्प्रति देशः आविष्ट इवात्मवैशिष्टचविस्मृतिं स्वीकृत्य जागरायामपि सन्निपातशयनमधितिष्ठति।

अद्यापि वर्त्तन्ते भारतीययाग्रजन्मानः प्राक् विश्वस्मिन् विद्याप्रचारकाः, अद्यापि वर्त्तन्ते आद्यशङ्करप्रतिष्ठापित-पीठाः, महात्मानः विद्याविभूतिसंभूतिभव्याः शङ्कराचार्याः, सहस्राधिकाः महामहोपदेशकाः! सर्वे एते मिलित्वापि यदुपदिशन्त्यूर्ध्वबाहवः, करालकालकीलितकार्यकलापा प्रजा न तच्छ्रोतुमपि तत्परा, किमाचरितुमिति कुवैचित्र्य-ग्रस्ता उच्चावच - विचारवीचिविचिकित्सितचित्ता न धारयितुमपि पारयति, न चोत्तरधिकारतः प्राप्तं सांस्कृतिकमैश्वर्यमेव स्मर्तुमाचरितुं वा प्रभवति।

तन्त्रं किमपि स्यात्-किमेतेन? किन्तु क्वापि मा भवेत् तत्र भुजङ्गमभावना, मा च प्रचलेत्तत्र विषदन्तदंशन-समीहा, मा च विपक्षिवर्गं पातालगर्त्तं गमयितुं दुराग्रहः।

दुर्भाग्यमेवास्य देशस्य यदत्र सम्प्रति सर्वत्र वैरूप्यमेव वैमत्यमेव वैकृत्यमेव प्रचारितं दृश्यते–यत् सर्वग्रासग्रसन-तत्परतात्वारित्यमेव सर्वतस्तनोति!

समाजे सर्वत्रक्षेत्रे सम्प्रत्यक्षमतैव परिलक्ष्यते, अक्षान्तिरेव दिक्षु विक्षिप्तयक्षिणीव प्रतिक्षणं क्षिणोति, क्षतात् किल त्रायते इति क्षत्रशब्दस्तु विलुप्तएव जातः क्षतत्रततैव तता सर्वत्र समुज्जृम्भते।

पश्यन्तु भवन्तः भवदीये देशे दिष्टचा समागतम् प्रजातंत्रम् प्रजामेव पीडयति। देशप्रेव गवाक्षे रक्षित्वा नेतारः स्वार्थ-संपूरणतत्पराः परस्परं कुक्कुटकलहं कल्पयन्ति कलयन्ति च। अयं न मामनुसरति इति एनं कीनाशनिकेतनातिथिं विधाय स्वैरमाचरणीयम्, स्वार्थसाधकानां संग्रथनं कृत्वा, दुरुद्देश्यप्रेरितैक्य-प्रदर्शनकान् मेलयित्वा हस्ताहस्ति, केशाकेशि युद्धरताः संसदोप्यवमाननामगणयित्वा निरन्तरमशोभनमेवाचरन्तः तथाकथितजनप्रतिनिधयः समाजकल्याणपराङ्मुखाः एव दृश्यन्ते। साम्प्रतिकी राजनीतिरेव अराजकतामन्वर्थतां नयति।

विश्वस्मिन् याः सामाजिक्यः पद्धतयः प्रचलिताः वर्त्तन्ते तासु भारतीया सामाजिकी सरणिः सर्वास्ताः सर्वतोऽतिशेते। अत्र जन्मन्येव कर्मणश्च सामञ्जस्यं सम्यक् निहित विद्यते। एकस्मिन्नेव सिद्धे, सर्वं सिद्धं भवति इति कृत्वा शास्त्रतः निर्धारितकर्मसिद्धौ जागतिक-दृष्टचा साफल्यं तथा आध्यात्मिक-दृष्टचा 'सर्वधर्मान् परित्यज्य मामेकं

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

शरणं व्रज इति नीत्यनुसारं शरणागतिं संसाध्य मानवजीवनयापनं शोभनं स्वीकृतम् अस्ति भारतीयैः मनीषिभिः।

अद्य ये धमस्य धकारमपि न जानन्ति तेऽपि अनधिकारिणोऽपि सन्तः धर्मस्य विषये मुधा प्रलपितुमुत्सहन्ते। धर्मतः सामाजिकतां पृथक्कृत्य भारतीयदृष्टचा विचारयितुमपि न शक्यते। दुर्भाग्यमेतत् यत् कोपि सम्प्रति यदि प्रसिद्धिं वांच्छति तदा— इदमेव जंजपीति-यज्ञोपवीतं त्रोटय, शिखां कर्त्तय, मन्दिरं मा गच्छ, शिवाम्बुपानं कुरु, ब्राह्मणान् देशात् निःसारय, रामायणं ज्वालय, धर्मं परित्यज इत्यादि। एवं प्रकारैः एकां तपःपूतां ऋषिदृष्टां व्यवस्थामुज्जासयितुं तत्परा एते भविष्यद्विषये अन्धैर्नीयमाना अन्धा यथा प्रक्रमन्ति। मोहम्मद-ख्रीस्तादिविषये वक्तुमपि भीताः एते तद्विषये तूष्णीं तिष्ठन्ति किन्तु हिन्दूनां वर्णाश्रमव्यवस्थां प्रति विषमेव सुतरामुद्गिरन्ति।

सूर्योदयः भारतीयान् मनीषिणः साधून् सन्यासिनश्च समाह्वयति यत् ग्रामे ग्रामे गत्वा नगरे नगरे वीथीषु वीथीषु च जनसम्पर्कं साधयित्वा शान्त्या ऋषिप्रतिष्ठापितां भारतीयां समाजव्यवस्थां ते पुनः प्राणान्वितान् विदध्युः येन "ब्राह्मणोऽस्य मुखमासीत् बाहू राजन्यः कृतः ऊरू यदस्य तद्वैश्यः पद्भ्यां ग्वं शूद्रो अजायत" इति श्रुति-सिद्धान्त-सामरस्यं सिद्धचेत्।

वामाविलास-काव्यम्

—श्रीमन्तः राघवरामत्रिपाठिनः

रसैरेका राकापतिमकलयन्ती, मुखरुचा-
वलग्नेन क्षामा तनुभिरभिरामाम्बुजलता।
अपाङ्गव्यासङ्गैस्स्मर-निशित-नाराचविषमा-
स्तनश्रान्ता भ्रान्ता हिमगिरिकिशोरी मदयते।१।

आन्दोलितालिकुलकूजित संभ्रमेण
भ्रूभङ्गमाकृतवती प्रतिपश्यतो मे।
आरादुपाश्रयितुमङ्क मपूर्व-दृष्टा
मृष्टानना नु चपलायति विभ्रमेण॥२॥

आधूयदीपक - शिरस्सरसीरुहाणा-
मामोदपूरितमुखालिकिशोर - माला।
चेतश्चकार चपलाक्षिकरं वरीतुं
कामं चुचुम्बिषति तद्भ्रमतो मुखं ते॥३॥

प्रातस्तने मुकुलितायत - लोचनाया
न्यायात-पञ्जर-करालसनिर्भरायाः।
वैभ्रम्यतस्खलित-काञ्चन काञ्चिनीव्या
नव्याङ्ग-सङ्गमधुनापि न विस्मरामः॥४॥

तडित्पीता प्रीता गगन-घनमालोक्य चकिता,
स्मरक्रीता स्फीता स्तनभर-विनीतामृतलता,
श्रिता ह्रीता भीता द्वितयनयनेषज्जलभरा
झटित्याटित्यग्रे तडिदिव मदङ्के निविशतां॥५॥

एषा लसन् मधुरहासविलासनेत्रा
नेत्रातिथिर्नवनिकुञ्ज - मिलत्तमाले।
मालेव - मीलित - मयूर - कलानुकूले
कूले गलत्परिविगूहतु गूढभावैः॥६॥

वीणापाणितलारुणाद्रिमकरा वेणीभरा घूर्णिता,
मध्ये विद्रुमपाटलार्चितनखी मञ्जुस्वरा स्रग्धरा।
आलापारुणपद्मरागनयनोन्मादैक - संक्षालिता,
धृत्वाहस्तमितस्त्रपाभिरसमा नस्सारयामास माम्।७

एषादूषितपीवपूषणकरावासोवरा - विर्भरा,
दीपालोकनदीप्तिदीपितदृशोर्दूरं क्षिपन्ती दृशम्।
श्वासामोदमधुव्रतावृतमुखी शीत्कारमातन्वती,
प्रातः पञ्जरपिञ्जरागततनूर्बाला न विश्लिष्यते।८॥

सायन्तनाम्बुधर-निर्गतशीकराणाम्,
द्वारादुपेत-मधुरानिल-निर्झराणाम्।
शीतादधौतसकलाधिकला - विलापै-
र्बाला बहिर्विहरतो गलमाजुगूहे॥९॥

आलोकितच्युतशिरोवसनालकास्या,
वापीतटात् सदनपृष्ठपथे व्रजन्तम्।
आलोक्य मां मृदुकियत्कथनच्छलेन
स्वालीजने परदृशो विचकर्ष चेतः॥१०॥

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

[पूर्वतोऽनुवृत्तम्

ज्ञानगंजयोगः

आविष्कर्त्तारः—श्रीमन्तश्चन्द्रशेखरस्वामिनः

तंत्र प्रगतिः—

[अधीतमेव श्रीमद्भिः सूर्योदयस्य स्वातंत्र्योत्तर-संस्कृत-प्रगति—विशेषाङ्के ज्ञानगंजयोगसूत्ररूप-पारमेश्वरपीयूषशास्त्रम्। तस्यैवैषोऽवशिष्टोंऽशः सम्प्रति प्राकाश्यं नीयते। आविष्कर्तुः विषये सूत्रसम्बन्धे च बहवः बहुविधं विचारवैमत्यं प्रकटयितुं प्रभविष्यन्ति किन्तु भारतीयमनीषाविमर्शप्रकर्षसंमर्शकाः निश्चप्रचमेवास्यामृतप्रवाहस्य महत्त्वमुररीकरिष्यन्ति। सूत्राण्येतानि तन्मनस्कतयाऽध्येतव्यानि। आविष्कर्तुः विमर्शस्तरं सामरस्यं च स्वाध्यायिनोनुभवेयुरिति सूर्योदयः समीहते। सं०]

तृतीयं दलम्

१—एकत्रैव स्थैर्यम्
२—मातृभाव एव श्रेष्ठः
३—तत्र साधकः सुत एव
४—तत्रार्पण-विधिः
५—स्थायिभावेनैव स्थितिः
६—साम्मुख्यभाव एव सन्तानस्य
७—भावार्पणं तु प्रथमम्
८—करणार्पणं तु द्वितीयम्
९—तृतीयं क्रियार्पणम्
१०—तेन सर्वार्पणम्
११—भावमहाभावयोरैक्यात् इष्टस्याविर्भावः
१२—अद्वैतस्थितिः
१३—स्वरूपमेव तत्र
१४—महाशक्तिस्वरूप एव
१५—स्वात्मस्वरूपाभेदः
१६—प्रत्येकाकारस्य स्वात्मस्वरूपेणावबोधः
१७—स्वात्मप्राधान्यात् इष्टस्यापि तद्रूपत्वम्
१८—सर्वेषां देवानां स्वात्मस्वरूपेण दर्शनम्
१९—तत्रापि द्रव्यभावः
२०—द्रष्टृदृश्ययोरैक्यम्
२१—दृश्यमपि तद्रूपमेव
२२—तत्र वर्णमेव दृश्यम्
२३ एकस्मिन् वर्णे सन्त्यनन्तवर्णानि
२४—तेषु केन्द्रे एवाकारः
२५—तदाकारस्तु स्वात्मस्वरूपः
२६—अत्र योगस्तु स्वात्मनः पुत्रभावेन
२७ तदामातृस्वरूपाविर्भावः
२८—तत्रैव दृष्टिः
२९—आराधनञ्च

चतुर्थं दलम्

१—मातृस्नेहमात्रमेवाराधनम्
२—तत्र संचारिभावोदयः
३—स्थायिभावे स्थितिः
४—नैजे धाम्नि प्रवेशः
५—तस्याः धाम रक्तवर्णात्मकम्
६—महानुरक्तया तादात्म्यम्
७—तस्याः स्वरूपे एकत्वं
८—तत्र महाशक्ति-स्वरूपदर्शनम्
९—सर्ववर्णेषु स्वरूपदर्शनम्
१०—तत्रापि परिवारदेवताः
११—तासामपिदर्शनम्
१२—वर्णशक्तीनामपि दर्शनम्
१३—समष्टि-स्वरूपेण दर्शनम् नतु व्यष्टिरूपेण
१४—साधकस्य तादृशस्वरूपमेव
१५—अतएवालिङ्गनम्
१६—तस्मात् कारणात् स्वात्मस्वरूपावबोधः
१७—बोधस्तु स्वात्मशक्तिस्वरूपः
१८—तस्य केन्द्रे चित्स्वरूपम्
१९—तादृशस्वरूपेणैव प्रसरणम्

[क्रमशः

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

पञ्चनदप्रदेशे संस्कृतस्य स्थितिः

आ. भद्रसेनः, साधु आश्रम, होशियारपुर

पञ्चनदप्रदेशः भारतस्य प्रख्यातः प्रदेशः वर्तते। प्राचीनकाले अस्मिन् प्रदेशे सतलुज-रावी-व्यास-जेलहम-चिनाव-सिन्धु-सरस्वती नदीनां तीरेषु विविधानां ऋषीणां आश्रमाः आसन्। येषां भारतीयेतिहासे सुप्रतिष्ठितं स्थानं विद्यते। पञ्चनदस्य भारतीयसाहित्यनिर्माणे विशिष्टं योगदानं वर्तते। महावैयाकरणं पाणिनिं कः संस्कृतज्ञः अथवा विज्ञः न वेत्ति। स्वाधीनतायाः पूर्वं लवपुरं शिक्षाकेन्द्रम् एव आसीत्। मुहुः मुहुः परिच्छिन्ने पञ्चनदे संस्कृतस्य विविधाः विद्यालयाः महाविद्यालयाः च आसन्। येषां संख्या सर्वथा शतात् अधिका आसीत्।

सम्प्रति पञ्चनदे त्रयः विश्वविद्यालयाः सन्ति। यैः सह शिक्षासंस्थानां सम्बन्धः वर्तते। तेषु गुरुनानकदेव-विश्वविद्यालयः अमृतसर, एकः। येन सह अमृतसर—जालन्धर-कपूरथला-गुदासपुर--मण्डलानां अर्वाचीनपद्धतिमयाः महाविद्यालयाः (कॉलेज) सम्बद्धाः वर्तन्ते। येषु प्रायः सर्वत्र एव संस्कृतविभागः विद्यते, परम् एतत् सर्वथा चिन्तनीयम्। यत् सर्वत्र एव संस्कृतछात्राणां संख्या अति अल्पीयसी। आम्, एतत् तु सर्वथा आश्चर्यकरं, यत् गुरु नानकदेव-विश्वविद्यालयस्य स्वकीयः संस्कृतविभागः न वर्तते। केवलं तत्सम्बद्धेषु महाविद्यालयेषु एव संस्कृतविभागाः सन्ति।

एषां मण्डलानां अर्वाचीनसंस्कृतशिक्षणवत् प्राच्यसंस्कृतशिक्षणस्य संस्कृतपाठशालाः अपि अनेन विश्वविद्यालयेन सम्बद्धा सन्ति। अतः एषः विश्वविद्यालयः प्रतिवर्षं प्राज्ञ-विशारद-शास्त्रिपरीक्षाणां व्यवस्थां करोति। सम्प्रति अनेन विश्वविद्यालयेन सम्बद्धानां संस्कृतपाठशालानां संख्या दशपरिमिता भविष्यति।

पञ्चनदस्य द्वितीयः विश्वविद्यालयः पंजाबीविश्वविद्यालयः पटियालायां वर्तते। अस्य स्वकीयः संस्कृतविभागः अपि विद्यते। यत्र केवलं संस्कृत-एम्. ए. परीक्षायाः एव व्यवस्था वर्तते। प्राच्यपद्धतिदृष्टया भूयमानानां शास्त्रिप्रभृतिपरीक्षाणां पाठनस्य प्रबन्धः न विद्यते। आम् एष विश्वविद्यालयः अपि प्रतिवर्षं प्राज्ञ-विशारद-शास्त्रिपरीक्षाणां व्यवस्थां करोति। अनेन विश्वविद्यालयेन पटियाला-संगरूर-भटिण्डा-फरीदकोट-मण्डलानां अर्वाचीनपद्धतियुक्ताः महाविद्यालयाः तत्रत्याः संस्कृतपाठशालाः च सम्बद्धाः सन्ति। अत्र संस्कृतपाठशालानां संख्या काठिन्येन सप्त भविष्यति।

पञ्चनद प्रदेशस्य तृतीयः प्राचीनतमः, प्रख्यातः पंजाबविश्वविद्यालयः चण्डीगढ़े विराजते। पूर्वमेषः एकः एव आसीत् तदनन्तरं समये समये अपरयोः स्थापना जाता तथा मण्डलानुसारं महाविद्यालयानां सम्बन्धः एभिः त्रिभिः सह संयोजितः। पंजाबविश्वविद्यालयेन सह लुध्यानाहोशियारपुर-फिरोजपुर-रोपड़-मण्डलानां अर्वाचीन-प्राच्यपद्धतिमयाः महाविद्यालयाः सम्बद्धाः सन्ति। सर्वेषां महाविद्यालयानां संस्कृतविभागः विद्यते। छात्रसंख्या तु न संतोषप्रदा।

पंजाबविश्वविद्यालयस्य स्वकीयौ द्वौ संस्कृतविभागौ वर्तेते। संस्कृतविकाससंरक्षणदृष्टया अनयोः विशिष्टं स्थानं वर्तते। अस्य विश्वविद्यालयस्य एव स्वकीयः संस्कृतविभागस्य प्राच्यकक्षः होशियारपुरे विराजते। तत्र विशारदशास्त्रि-आचार्य-कक्षाणां पाठनस्य, प्रबन्धः वर्तते। अत्र दश प्राध्यापकाः पाठयन्ति। होशियारपुरे विश्वविद्यालयस्य अनुसन्धानसंस्थानमपि शोभते, यत्र विशेषतः वैदिकसाहित्येन सम्बद्धं कार्यं कुर्वन्ति सम्प्रति। पंजाब विश्वविद्यालयः प्रतिवर्षं प्राज्ञ-विशारद-शास्त्रि-आचार्यपरीक्षाणामपि व्यवस्थां करोति। अनेन सम्बद्धाः दश संस्कृतपाठशालाः सन्ति।

परीक्षार्थिनः अत्र एव अधिकाः भवन्ति। हिमाचलहरियाणा-पञ्जाब-दिल्ली प्रदेशस्थाः बहवः छात्राः व्यक्तिगतरूपेण पंजाबविश्वविद्यालय परीक्षां ददति।

[संस्कृत भवितव्यतः साभारम्

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

ग्रहनक्षत्रादि-प्रभावनिरोधकं धातु-रत्नादि-धारणम्

लेखकः—श्रीपतञ्जलिमिश्रः शास्त्री
मिथिला संस्कृतशोधसंस्थानम्, महेशनगरम् (दरभंगा)

मानव-जीवने प्रभावोत्पादकानां ग्रहनक्षत्रादीनां प्रभावस्याऽध्ययनमेव ज्योतिषशास्त्रं (फलितं) विद्यते। ग्रहनक्षत्रादयः चेतनरूपेण स्वयं कञ्चिदुपकारमपकारं वा नैव कुर्वन्ति प्रत्युत ते तु धनात्मकान् ऋणात्मकान् वा किरणान्येव विकिरन्ति। स्वयं ते मानवजातेः सहायतां हानिं वा नैव सम्पादयन्ति किन्तु प्राक् काले पूर्वजन्मनि च मानवैः स्वयं कार्य-कारणरूपायाः समतुला क्रियाशिलिनी सम्पादिता तामेव ग्रहादयो वाह्यजगति प्राकृतिकनियमानुसारं प्रकाशयन्ति इति येषामाधुनिकानां मतं ते ग्रहादीन् आधिभौतिकानेव मन्यन्ते नाऽऽध्यात्मिकानपि।

जातकः (जातिका वा) तादृशे क्षणे दिवसे मुहूर्त्ते वा जन्म लभते, यदा ग्रहनक्षत्रादीनां रश्मयः तस्य (तस्याः वा) कर्मभिः सह सादृश्यं भजन्ते। जन्मपत्रं तस्य (तस्याः च) कर्मणां समाना प्रतिकृतिर्भवति। तत् (जन्मपत्रम्) सद्योजातस्य शिशोः अपरिवर्तनीयाऽतीत-भविष्यत् कालयोः सम्भावितं परिणामं प्रकटयति। अन्तर्ज्ञानसम्पन्नाः एव जनाः वास्तविकं जन्मफलं बोद्धुं ज्ञापयितुं वा शक्नुवन्ति किन्तु तादृशजनानां संख्या स्वल्पा विद्यते।

जातकस्य (जातिकाया वा) जन्म-मूहूर्ते ग्रहनक्षत्रादीनां यादृशः समावेशो भवति, जन्म-समये आकाशे यः संदेशः अंकितो भवति, तस्योद्देश्यं भाग्यस्य-भूतकालिक-शुभाशुभ-कर्मफलस्य-सूचनामात्रमेव नास्ति, प्रत्युत अदृष्ट-विश्वबन्धनाद् मुक्तये जातकस्य शिशोरिच्छाशक्तेः सुषुप्तायाः जागरणमुद्दीपनं चास्ति। प्राक्तेन (शिशुना) यत् कृतं न तत् परिवर्तयितुमपि शक्नोति। तस्य जीवने वर्तमानानां निखिलप्रभावाणां तत्कारणानां च स्वयं स एव प्रवर्तको नान्यः कश्चित्। स काश्चिदप्यसमर्थतामतिक्रान्तुं शक्नोति। यतः सः स्वयमेव तेषां (पूर्वोक्त-जीवन-व्यापि निखिल-प्रभावाणां तत्कारणानां च) स्वकार्यैः सर्जकोऽभूत्। एतदतिरिक्ता तस्य स्वीयाऽध्यात्मिकी शक्तिरपि विद्यते, या केषामपि ग्रह-नक्षत्रादीनामधीना नैवाऽस्ति।

ज्योतिषशास्त्रं विश्वासस्य विषये भ्रमपूर्णमेकं भयं प्रचारयन्ति विवेकहीनाः यत्, तच्छास्त्रं मानवान् स्वादेशे यन्त्रवत् चलान् स्वयं चालितप्रतिमारूपानेव कारयति। अतो विवेकिनो जनाः सृष्टौ न किन्तु सृष्टिकर्तरि स्वनिष्ठां संस्थाप्य स्वनिष्ठ-ग्रहनक्षत्रादिजन्यप्रभावम्-प्राक्कर्मफलं-पराभूत निष्फलं वा कुर्वन्ति।

विवेकवान् आत्मतत्त्वेनाऽऽत्मसत्वेन च सह यथायथं तादात्म्यमनुभवति तथा-तथा जडप्रकृतेः प्रभावाद् मुक्तो बोभवीति। आत्माऽजरोऽमरो मुक्तोऽजन्मा चाऽस्ति। अत आत्मा कदापि ग्रहनक्षत्रादिप्रभावाधीनो भवितुं नार्हति।

मानवः शरीरवान् सन्नपि आत्मास्ति। यदा स समुचितामात्मोपलब्धिं करोति, तदा स निखिलाः अनिवार्यताः अतिक्रम्याऽग्रे प्रगतिं करोति। यावत्कालं स आत्मविस्मृतेः साधारणावस्थायां किंकर्तव्यविमूढस्तिष्ठति, तावत् स नैसर्गिक-विधि-नियम-शृङ्खलाबद्धो भवति।

समस्वरताऽविरोधो वा ईश्वरस्य रूपम्। तेन सह तादात्म्यम् अनुभवन् भक्तः कदापि निषिद्धं कर्म विकर्म वा नैव कुरुते नैव कर्तुं पारयति च। तस्य

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

सर्वाणि कर्माणि सद्रूपाणि स्वाभाविकरूपेण ज्योतिष-शास्त्र-विनिहित-नियमानुरूपाणि एव बोभूयन्ते। निश्छल-प्रार्थनया ध्यानेन च स दिव्यचैतन्येन सह संपर्कं संस्थापयति। संरक्षिकायाः तस्या आन्तरशक्तेः अपेक्षया नाऽस्ति काचिदन्या महती शक्तिः।

यायावरः पान्थो यदि गन्तव्यस्थानं प्राप्य निर्देशार्थं गृहीतं मानचित्रम् परित्यजेत् तदा नास्ति काचन निन्दनीया त्रुटिः किन्तु यात्रायां साधीयसो मार्गस्य लाभाय प्रयत्नो विधेयो भवति। अतः प्राक्तना महर्षयो मायामरीचिकायां भ्रमणस्याऽवधिं न्यूनयितुम् अनेकानुपायानन्वेषितवन्तः। यद्यपि कर्मफलनियमस्य कतिपयेंऽशाः यन्त्रवत् प्रचलन्ति तथापि ते युक्त्याऽनुकूलाः कर्तुं शक्यन्ते।

विश्वात्मनो विधानस्योल्लंघनं मानवस्यकृते दुःखाय-कल्पते। अतः शास्त्रैः निर्धारितं यद् 'ईश्वरीयं कर्तुमकर्तुमन्यथाकर्तुं च सामर्थ्यं सादरं मनसि स्मारं-स्मारं मानवैः प्राकृतिकनियमाः पालयितव्याः।' अतः प्रार्थनया, इच्छा-शक्तिवृद्धया, धारणा-ध्यानात्मकयोगाङ्गाभ्यासेन, महात्मनां सदुपदेशपालनेन, यथानिर्दिष्टाऽऽयाम-विस्तार-मान-मात्रावतां ज्योतिषशास्त्रोक्त-ग्रहनक्षत्रादिजन्य-प्रतिकूलप्रभाव-निरोधक-रत्न-धातुवलयाङ्गुलीयक-वृक्ष-लता-गुल्म-फलमूलादीनां त्वचि स्पर्शानुकूल-धारणेन च प्राक्तन-कर्मणः प्रतिकूल-प्रभावो न्यूनो विनष्टो वा कर्तुं शक्यः।

यथा विद्युदाघातं विफलयितुं प्रासादोपरि ताम्रस्य शूलान्यारोप्यन्ते तथाऽन्यैः विविधोपायैः शरीर-मन्दिरमपि त्रातुं शक्यते। जगति वैद्युत्योऽयस्कान्तीयाश्च शक्तयो विकीर्णा भवन्ति। मानव-शरीरेषु तासामनकूलः सुखदः प्रतिकूलो दुःखदश्चाऽपि प्रभावो भवति। अतः पुरातना ऋषयो मुनयश्च-जगति पोस्फुरमाणानां शक्तिकिरणानां प्रतिकूलप्रभावं सोढुं न्यूनयितुं विफलीकर्तुं च गवेषणया निश्चितवन्तो यत् शुद्ध-स्वर्णादि-धातुभ्यः प्रसरत्सु सूक्ष्मप्रकाशकिरणेषु ग्रहनक्षत्रादानीमरिष्टघ्नी प्रचण्डा महाशक्तिः विद्यते। वृक्ष-लतागुल्मादीनां त्वक्-पत्रपुष्प-मूल-फलादीनां मानव-शरीरे संयोगोऽपि सहायकोऽत्रविषये। रक्तिका-द्वयाऽन्यूनपरिमाणानि शुद्धानि कीटानुवेध-रहितानि निर्मलानि रत्नानि सर्वापेक्षयाऽधिक-प्रभावकारीणि सन्ति। भगवन्नामजप-यन्त्र-मन्त्र-कवचहोमादि-प्रयोगोऽपि विशेषेण फलप्रदः आयुष्य-सौख्य-शान्ति-तुष्टि-पुष्टि-वर्चस्ववर्धकश्चेत्यलं काकदन्तपरीक्षया।

卐 श्रृङ्खला 卐

सर्वज्ञोऽस्ति, सनातनोऽस्ति, परितः पूर्णोऽस्त्ययं व्यापकः,
कर्तृत्वेऽपि समर्थ ब सततं, स्वातंत्र्यशक्त्या शिवः।
विद्या-कालकलाप-राग नियतिक्रीडाकला-कञ्चुकैः,
बद्धः श्राम्यति भेद-बुद्धि-विकलः ! केयं कला-श्रृंखला ? ॥१॥

शैवा अद्वयवादिनः जगदिदं, जानन्ति सत्यं शिवम्
नैर्मल्यान्निखिलं विमर्शमुकुरे स्वस्मिन् स्वयं बिम्बितम्।
क्रीडेयं ननु तस्य विश्ववपुषः, षड्त्रिंश-तत्त्वात्मिका,
शक्त्या पुष्यति शाश्वतं चिति-कला-स्वाभाविकी-श्रृंखला ॥२॥

—डा० परमहंस मिश्रस्य

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

अर्जुनोर्वशीयम् (एकाङ्किरूपकम्)

कृतिकारः—महाकवि : अभिराजराजेन्द्रमिश्रः

नेपृथ्यगृहे संगीतकं प्रवर्तमानं श्रूयते । क्रमेण च गीतवाद्यनर्तनध्वनिरपचीयते । सर्वतोऽपि निर्मक्षिकं गाम्भीर्यं समुज्जृम्भते । जवनिकाभ्यन्तराले नान्दीपाठः प्रस्तूयते)

त्रैलोक्यस्फुटनिर्वृतिं विदधते यस्य स्मितं केवलं
प्राकाश्यं गमयत्यहो त्रिभुवनं यन्नेत्रविद्युच्छटा ।
यच्चैतन्यमथोल्बणं वितनुते लोकं स्फुरच्चेतनं
पायाद् वो व्रजबल्लवीशकटिकाक्रीडी मुकुन्दश्चिरम् ॥१

अपि च

प्राणेशं परिरम्भणैककृपणं स्तन्योत्सुकं वा शिशुं
अर्धक्लृप्तमहानसं नु शयनं तल्पीभवत्पुष्पकम् ।
द्वारेष्वर्गलितेष्वपि व्युपगताश्चञ्चद्गवाक्षच्युताः
गोप्यो यं शिशुमाधवं सरभसं पायात्स योगेश्वरः ॥२

(नान्द्यन्ते ततः प्रविशति गृहीतपुष्पाञ्जलिकः सूत्रधारः सविलासं सस्मितं इतस्ततो निरीक्ष्य सश्रद्धं पुष्पाणि विशीर्य च)

मान्यवर्याः सहृदयसामाजिकाः, एषोऽहं कौशलमिश्रो वृतसूत्रधारभूमिको भवद्भ्यः सर्वेभ्यः स्वकीयां विनीतनतिततिं समुपायनीकरोमि ।

(नेपथ्याभिमुखं विलोक्य)

एषा च मे सहाध्यायिनी सखी सारिका नाट्यप्रयोगेऽस्मिन् मद्गृहिणीपदमुपगता समायाति भवतोऽभिनन्दितुम् ।

(चोटिकां दत्त्वाऽऽहूय सादरम्)

सारिके ! मत्पार्श्वमायाहि तावत् ।

(मध्येमञ्चमुपगम्य सहृदयजनानभिवाद्य च सस्नेहम्)

नटी—आर्य ! किम्मामनवसरमाहूतवान्, न पश्यसि भवान् मम वैक्लव्यम् ?

पट्टभारसमाक्रान्तो भेक एव हि केवलम् ।
अनुभूय विजानाति क्वासौ वपुषि पीड्यते ॥३॥

सूत्रधारः (सहासम्) गृहदेवते ! कथमद्य त्वयाऽहं सर्वजनसमक्षम् एवमधिक्षिप्ये ? न च मया ते किमप्यत्याहितम् ।

नटी—आर्य न मां नर्मपात्रीकर्तुमर्हति भवान् । आत्मकृच्छ्रं निवेदितम्मया । अलमन्यथा सम्भाव्य ।

सूत्रधारः प्रिये ! तत् किमिति भेकीकृत्यात्मानं प्रस्तौषि । कोऽसौ पट्टभारः येन समाक्रान्ता त्वमिति ज्ञातुमिच्छामि ।

नटी—ननु विस्मृतिपरायणो भवान् किन्न जानाति, यदद्यैव वत्सको मम राजर्षिः स्वविद्यालयसमायोजितायां पदकन्दुकप्रतियोगितायां विजयश्रियमवाप्य प्रथमस्थानञ्चोपलभ्य गृहमागतः । तदभिनन्दनार्थं मया त्यक्तसर्वस्वं प्रयत्यते ।

सूत्रधारः (सस्नेहम्)

सारिके ? सत्यं विस्मृतोऽस्मि । किं करवाणि, नवनवाभिनेयलालसेयं बलवती मां प्रसह्योत्पथीकरोति । स्वयमेवादिष्टं पुत्राभिनन्दनसंविधानकं विस्मृत्य सहृदयमनोरञ्जनाय एषोऽधिमञ्चं तिष्ठामि । ननु आश्चर्यमेव !

नटी—आर्य ! क्वचिद् दुष्यन्त इव समरतां शकुन्तलां मामपि न विस्मरेत् भवनानिति बिभेमि !

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

सूत्रधारः (साट्टहासं सहृदयाभिमुखीभूय)

मूढे ! अस्मादेव कारणात् स्वनामाङ्किता मुद्रिका मया किञ्चिल्लघ्वी निर्मापिता । पश्य कियद्दृढमारूढा तेऽनामिकायाम् ।

नटी—(सानुरागं सव्रीडञ्च)

परिहासकुशलो भवान् । अलमेतावतैव । आदिशतु भवान् किम्मयाऽनुष्ठातव्यमत्र ?

सूत्रधारः—प्रिये ! यद्युत्सहसे तद्ब्रवीमि ! ममापि कार्यं त्वत्कार्यसंवादि !

नटी—(भ्रान्तिं नाटयन्ती)

आर्य ! न खल्ववगच्छामि । स्फुटमाज्ञापयतु कस्मिन् खलूपक्रमे मया सहगामिन्या भवितव्यम् ?

सूत्रधारः—सुन्दरि ? त्वन्नवीकृतचेतनोऽयमहं स्फुटं भणामि । पश्य यथा त्वं शचीव स्वकीयं विजयिनं पुत्रं राजर्षिमत्राभिनन्दितुं प्रवृत्तासि तथैवाहमपि पुरन्दरीभूय विनिहतनिवातकवचकालिकेयदैत्यप्रमुखं स्वकीयं विजयिनं पुत्रमर्जुनं मध्येशालमभिनन्दितुमुत्सहे ।

नटी—(विहस्य सशिर कम्पम्)

एष गृहीतोऽस्ति भवान् साम्प्रतम् । आर्य ! अलमिदानीं प्रहेलिकाभिः । स्पष्टं किन्न भणति भवान् यदद्याऽस्मिन् नाट्यसमारोहे अभिराजराजेन्द्रविरचिते अर्जुनोर्वशीयनामधेयेन, एकाङ्किरूपकेण सहृदयान् प्रसादयितुमिच्छति भवान् !

सूत्रधारः—(सस्मितम्)

देवि ! धीमतां कृते तु सङ्केत एव प्रभवति ।

नटी—आर्य ! यद्येवं तर्हि किमिति विलम्ब्यते । अभिधानमात्रेणैव भवता शचीकृताऽस्मि । साम्प्रतं कृतदेव्युचितवेषविन्यासाऽवितथमेव शचीव परिस्फुरन्ती भवता लक्षिष्ये ?

(इति सविलासमपक्रामति)

सूत्रधारः—(प्रियावियोगमभिनीय)

गता मे सर्वकालसहचरी ! भवतु, प्रकृतिमनुसरामि तावत् ।

(अग्रतोऽवलोक्य, परिक्रम्य च)

भो भोः सुरगवीसमर्चकाः सहृदयाः सामाजिकाः ! साम्प्रतं प्रस्तूयते मया भवन्मनोरञ्जनाय श्रीमदभिराजराजेन्द्रविरचितं नूतनमेकाङ्कम् अर्जुनोर्वशीयं नाम । श्रीमन्तः,

यं रागामृतनिर्झरं वृतवती सारस्वती कच्छपी,
श्रीहर्षश्च तनान यत्सुरुचिरं काव्यं च मामल्लजः ।
तद्रागामृत-काव्य-कुम्भ-विलसज्जीवातुचञ्चत्तनुः,
भूयाद्वो नुतयेऽभिराजपदभाग्राजेन्द्रमिश्रोऽनघः ॥४॥

अपि च

मुञ्जादप्यधिकं नृशंसमशुभं चितङ्कुषं प्रेरितम्,
येनात्मप्रतिरक्षणाय सततं तातानुजस्य स्वयम् ।
ईर्ष्यामर्षपरायणं दुरितजं कृत्यं शतम् मर्षितम्,
तस्यैवोमभिनीयते सुयशसो नाट्यं मया सुन्दरम् ॥५॥

(नेपथ्यगृहात् सङ्गीतकध्वनिः स्फारीभवति)

मदनो भाति पुरन्दर-वेषः
रतिरिव भाति शची पौलोमी,
जयति जयति विबुधेशः !!
नृत्यति रम्भा नूपरपूतम्,
प्रीतिमुपैति निवेशः !!

(सोत्कण्ठं श्रुतिमभिनीय रङ्गशालाभिमुखीभूय)

अये ताल-लयाश्रित-रागपरीवाहिणा स्वरेण पुरुहूतपौरुषमभिलक्ष्य यदिदं कोमलकान्तपदसंवलितगीतं गीयते देववनितमित्रनीभिस्तेन सिद्ध्यति यत्समुपपन्न एव पार्थाभिनन्दनसमारोहसम्भारः । तदहमपि तावत्पुरन्दरीभवितुं नेपथ्यगृहं प्रविशामि ।

(इत्यपक्रामति)

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

(प्रथमं दृश्यम्)

(ततः प्रविशति काञ्चनसिंहासनस्थो लसद्विग्रहः पुरन्दरः सपरीवारः। पुरन्दरसभायामेकतो वरुण-कुबेर-प्रमुखाः देवास्तिष्ठन्त्यपरतश्च चित्ररथादि गन्धर्वाः ऊर्वशी-प्रमुखाः अप्सरसश्च। उत्तरदिग्वर्तिषु मृगचर्ममण्डितासनेषु नारद-प्रभृतयो देवर्षयोऽपि राराज्यन्ते। निखिलमपि देवा-स्थानमण्डपं मृगमदचन्दन-पारिजातागुरुगन्धैस्सुवासितं वर्तते। सङ्गीतकं प्रस्फुरति।)

नन्दनवनपरिमललसदङ्गा
मरुताऽऽनीयत इह सुरगङ्गा
रुचिरोऽयं परिवेषः ॥६॥

देवेन्द्रः—(सरणरणकम्)

तुम्बुरो! साधुगीतं त्वया गायनीभिश्च! रम्भे! तवापि नृत्यमङ्गीकृतलास्यं वरीवर्ति। भद्रे! सर्वथा परितुष्टोऽस्मि त्वन्नृत्यवैशारद्या! एतद्भवतु युष्माकं पुरस्कारः।

(इति मणिबन्धात् रत्नवलयानि निस्सार्य प्रयच्छति। तुम्बुरुः रम्भाऽन्याः देवाङ्गनाश्चपारितोषिकं सविनयं गृह्णन्ति)।

जयन्तिके! सम्प्रति मद्वचनादुच्यतां मातलिर्यदर्जुनं सादरमुपनयेति।

जयन्तिका—यद्भर्ताऽऽज्ञापयति।

(इति निष्क्रान्ता। पुनश्च मातलिनाधिष्ठितेनार्जुनेन सह प्रविष्टा)।

जयन्तिका—(सादरं निर्दिश्य)

वीर! एष देवेश्वरोऽस्माकं भर्ता भवन्तमेव स्नेहा-नुपूरित-चक्षुर्भ्यां निर्निमेषं विलोकयन् सन्तिष्ठते। प्रसादयतु भवान्।

अर्जुनः—(प्रेम्णा गादीभूय पुरन्दरचरणयोर्निपत्य)

तात पितृचरण! भवदशजातः कौन्तेयोऽयं प्रणमति।

देवेन्द्रः—(निर्दयमाश्लिष्य)

वत्स अर्जुन! चिरञ्जीव! शतञ्जीव, युगञ्जीव, पुत्रक! अद्याऽहं जयन्तेन त्वया चोपपन्नो भाग्यवत्तमं मन्ये त्रिषु लोकेषु! वत्स,

हत्वाऽऽजौ कालिकेयान्त्रिदशगतिहरा-
न्नामशेषान्निवातान्,
यस्त्वं कौन्तेय! कृत्वा नकुल इव बली
पीनभोगान्भुजङ्गान्।
अक्षुण्णं ह्यागतोऽसि प्रमुदितवदनः
शान्तशान्तो नितान्तं,
दर्शं दर्शं कृतात्मा तदिह दशशतं
नेत्रकं व्यातनोमि ॥७॥

(इति मन्दारमालां कण्ठप्रदेशादवतार्यार्जुनस्य कण्ठमधिरोहयति)

अर्जुनः—(विनीतः कृताञ्जलिस्सन्)

तात! तवैव विक्रमेणाभिमन्त्रितेन मया सर्वमे-तत्कृतम्। न मे पार्थिवशौर्यं प्रभवति।

देवेन्द्रः—वत्स! जनन्युचिता ते प्रियप्राया विनीतवृत्तिर्म-हीयते। सर्वथा त्रिभुवनेऽ प्रतिरथो भविष्यसि। इयमेव मदाशीः। अयमेव तुभ्यम्मे वरः।

अर्जुनः—(प्रह्वीभूय) तात! कृतार्थोऽस्मि।

देवेन्द्रः—(स्थानं निर्दिश्य)

एहि वत्स! अर्धासनम्मेऽधितिष्ठ।

(अर्जुनः सविनयं तिष्ठति)

देवेन्द्रः—मातले! सम्प्रति मन्त्रियोगात् प्रवर्तन्तामर्जुना-भिनन्दन-समारोह-सम्भाराः। एते वयमवहिताः स्म।

मातलिः—यदाज्ञापयति स्वामी।

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

(इति नेपथ्यगृहं प्रविशति । क्षणानन्तरमेव तारस्वरेणोद्घोष्यते)

भोः भोः पारिषदाः अवहिताः भवत । साम्प्रतं देवाङ्गनोत्तमयोर्वश्या तत्सखीभिश्च निवातकवचकालिकेयविनाशाभिनयः प्रस्तूयते ।

ततः प्रविशति अर्जुनवेषधारिणी विहितयुद्धवेषोर्वशी मूकाभिनयं नाटयन्ती । इतरदिशातः प्रविशन्त्यन्या अप्सरसश्शितिवाससः कालिकेयसैन्यमनुकुर्वाणाः । युद्धोचित संगीतकं प्रवर्तते)

खण्डय खण्डय चण्डि कपर्दिनि कालिकेयमस्तम्,
छिन्धि छिन्धि ननु भञ्जय विकलय विश्वस्तम् !!
ज्वलय मन्दिरं शोषय वापीं प्रशमय सततगतिम्,
दिशिदिशि पूरय शिखिनमुच्छिखं कीलय सकलभूतिम् !!

खं पततां पततां पृथिवीयं मार्तण्डः पतताम् ।
यदि च पतन्तां विधुबुधगुरवश्शनैश्चरः पतताम् !!
याहि याहि द्रुतमपसर कुरु कुरु दनुजापसद नुतिम् !
कौन्तेयोऽयं पाशुपतास्त्रैर्नयति दुरन्त गतिम् !!८।।

(गीततालमाश्रित्य विविधकरणाङ्गहारं नाटयन्ती रौद्रोद्धतनृत्यञ्च प्रस्तुवन्ती श्रितताण्डवोर्वशी संलक्ष्यते) रङ्गमञ्चोपरि संदृश्यते उल्कापात. । कर्णकर्कशचीत्कारध्वनिः मृत्युमूर्छाप्रलापो विद्रावणपलायनशब्दाश्च श्रूयन्ते । भैरवशस्त्रप्रहारान् नाटयन्ती उर्वशी पुनरपि प्रस्तौत्युद्धतनृत्यम् । नेपथ्ये तुमुलाजिध्वनिः श्रूयते)

क्वासि कालिकेय हतक मूढ कृतकशूर !
पाण्डुनन्दनाद् बिभेषि कथं रे विमूढ !!
क्वासि भो निवात कवच ! दलितदेवलोक !
नोऽवगच्छसि प्रजान्ध ! क्लृप्तभूरिशोक !!
तिष्ठ तिष्ठ मलिम्लुच ! प्रमथ्नामि तान्त !
क्लान्त भवसि नैष मदिरघूर्णिताक्ष दान्त !! ९।।

(पार्थो निर्निमेष आलिखित इव मुषित इव हतप्रभ इवोर्वशीं पश्यन् स्थितः । गीतध्वनिः परिवर्तते । नृत्यञ्चापि समधिकतरं भैरवं संल्लक्ष्यते)

देवेन्द्रः --(अर्जुनं सविशेषं परिलक्षमाणः आत्मगतम्)

अये नागरसीमन्तिनी-रूपमाधुरी-मथित-हृदयो ग्रामटिकाबटुक इव यदयं वत्सो मेऽनुभूतचेतनालेशं निपुणमवेक्षते वृन्दारकवधूटीमुर्वशीं तेन स्पष्टं विज्ञायतेऽस्यानुराग एतस्याम् । भवतु उपायं चिन्तयिष्याम्यनयोस्सङ्गमस्य ।

(संङ्गीतकं स्फारीभवति)

बाहू भिनत्ति चरणे छिनत्ति कृन्तति शिरश्च निशितम्
खड्गं निधाय पाणौ पिधाय कायं करोति पिशितम् !!
भैरवशिवोऽस्ति मरुतां गणोऽस्ति पार्थोऽस्ति बज्रपाणिः
हाहा हतोऽस्मि शरणागतोऽस्मि पार्थोऽस्ति मृत्युपाणिः !!१०।।

(पलायते कालिकेयसैन्यम् । व्यापन्नाश्च दृश्यन्ते नैके पिशिताशनाः ।

पार्थ-वेषधारिणी देवसैन्यपरिगतोर्वशी विजयं नाटयति । नेपथ्ये चालोकशब्दः जयजयकारध्वनिश्च श्रूयते । जवनिका पतति । क्षणान्तरमेव मेनकारम्भादि परिगतोर्वशी पुरन्दरसमीपमागत्य सविनयं स्थिता । ऊर्वशीमायान्तीं दृष्टवाऽर्जुनः शनकैरपक्रामति ।)

देवेन्द्रः—(रोमाञ्चमनुभूय) सुन्दरि ! साध्वभिनीतं त्वया । न मे वाक्प्रसरति त्वन्नृत्यकला-प्रशंसने । पश्य,

कलयति यदि भानुः पद्मिनीनां प्रशंसां
प्रभवति न विशेषस्तेन तस्याः कदाचित् ।
विगलित-युगभावे प्रीतिबन्धे विरूढे
भवति हृदयमेव व्यक्तवाहो न जिहवा !!११।।

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

ऊर्वशी –(जानुभ्यां प्रणिधाय साञ्जलिपुटम्)

देवेश्वर ! अलमनपेक्षितं सम्भाव्य ! भवद्भिः समुपानीकृतप्रतिष्ठाः वयमप्सरसो वस्तुतः कृतार्थाः । न जानीमहे केन सेवाविधानेन प्रसादनीयाः भवन्तोऽस्माभिः !

देवेन्द्रः--(स्मितं नयनविकासञ्चनाटयन्)

ऊर्वशि गृहाण प्रथमं तावत्परितोषप्रतीकभूतं पारितोषिकं पश्चात् कथयिष्यामि ते विशिष्टमेकं सेवाविधानमपि !

(इति मणिमाणिक्यखचिते कुण्डले कर्णयोर्निस्सार्य प्रयच्छति)

ऊर्वशी--(स्मेरवदनाम्बुजा सानुरागं)

देवीं शचीमपृष्ट्वैव प्रयच्छति मे कुण्डलद्वयममरावतीश्वरः !

देवेन्द्रः (अव्यक्तं विहस्य साकूतम्)

किन्तेन ?

रम्भा—(जनान्तिकम्)

ऊर्वशी ! भण तावत्किमपि शल्यभूतमधुरम् ।

ऊर्वशी--(सविलासमधरोष्ठं विकुञ्च्य)

सुरोत्तम ! यत्तेन भविष्यति तदधिशय्यं रात्रावेव ज्ञास्यति भवान् ।

(सर्वा अप्यप्सरसः सकरतालं साट्टहासं पुरन्दरं व्यङ्ग्यैः पीडयन्ति,

देवेन्द्रः--(वैलक्ष्यं नाटयन्)

अयि भोः साम्प्रतं जितं युष्माभिः । शची-विक्रमं रात्रौ प्रेक्षिष्ये, उर्वशि, त्वयाप्यद्य रात्रौ कस्यचित् प्रसूनधन्वावतारस्य विक्रमः प्रेक्षणीयः ।

ऊर्वशी—(सकोपम्)

विबुधेश ! कथमिदानीं भवताऽनाद्रिये !

देवेन्द्रः--सुन्दरि ? न भवतीं खलीकरोमि । एष कर्णयोरेव तव भणिष्यामि । मुहूर्त्तमात्रमभितस्तावत् ।

(ऊर्वशी पुरन्दरसमीपमागच्छति । स च कर्णयोः भणति एवमिव)

ऊर्वशी--(पुलकमनुभवन्ती)

यदाज्ञापयति स्वामी । साम्प्रतं भवदनुज्ञाताः जिगमिषामो वयम् ।

देवेन्द्रः—(सस्नेहम्)

सुन्दरि गच्छ ! शुभरात्रिस्ते भूयात् ।

(अप्सरसो बद्धालापा सविलासमपक्रामन्ति)

देवेन्द्रः--(एकाकिनमनुभूयात्मानम्)

अहो विनयः कुन्तीनन्दनस्य । ऊर्वशीं मत्सविधिमायान्तीं दृष्ट्वैव जनकोचित-सम्मान-प्रदर्शनवशात् स्वयमेवापक्रान्तः । सम्प्रत्यहमपि विगतचिन्तोऽस्मि ऊर्वशीं सम्प्रेष्य तत्सेवायाम् । यद्यपि मयोपभुक्ता सा मत्सुतोपभोगौचित्यं नार्हति, तथापि न कोऽपि दोषोऽस्मिन् । अप्सरसस्तु विधातुः वरप्रभावेण सर्वभोग्याः सत्योऽपि व्यभिचार-वचनीयतां नोपयान्ति ।

(जृम्भां नाटयन् छोटिकां वादयन्)

वत्स अर्जुन !

एषा ते शुभरात्रिर्भवतु मनोज्ञा प्रियाङ्कसुखदात्री ।
सुरपुरवसतिसुखानां पात्रं भव कौन्तेय !
निशीथे !!१२।।

(इत्येवं शचीमन्दिरं प्रतिष्ठते)

द्वितीयं दृश्यम्

(पुरन्दरस्य वैजयन्तप्रासादे अर्जुनस्य निवासकक्षः । चलत्पारिजातपलाशान्तरगोचराश्चन्द्रमरीचयो गवाक्षरन्ध्रैस्समाविशन्ति कक्षे । भवनभित्तिप्रत्युप्ताः मणिमाणिक्येन्द्रनीलवैदूर्य-पद्मरागादि-मणयः विविधच्छटां किरन्तस्सं-

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

ल्लक्ष्यन्ते । मध्येशालमधिशय्यं शयानोऽर्जुनः स्मृतिशून्यतां नाटयन् भवनच्छदिं विलोकयते)

अर्जुनः--(सामोदम्)

नृत्यमपि नाम चित्तहरणक्षमं कलारत्नम् ! यत्सत्यम्-

क्वचित्तारं रौति द्रुतजघनकाञ्ची कलरुता
झणत्कारं सूते क्वचिदपि च मञ्जीरयुगलम् ।
गलत्केयूराणां भवति मणिबन्धोऽधिकरणं
न के लास्ये दास्यं विबुधरमणीनां विदधति ! १३

(स्मृतिमभिनीय, सरणरणकम्)

धन्यासि ऊर्वशि धन्यासि ? प्राप्तं मयाऽर्जुनेन नयनयोः पुण्यफलम् ? मर्त्योऽपि सन् यन्मयाऽवेक्षिताऽमरावती ततोऽप्यधिकं त्वन्नृत्यकलासन्दर्शनमात्रेणैव समवाप्तम्मया ?

(दीर्घं निःश्वस्य)

अनिन्द्य-सुन्दरि ?

अङ्गानि त्वतिशेरते सुरतरोश्चञ्चत्सुमानिध्रुवं
हास्यं त्वद्वदनाम्बुजाग्रनिलयं ह्यत्येति शेफालिकाम्
चक्रीभूततटी कटी वितनुते यद्वेतसी वक्रतां
तेनैव प्रतिभासि भूरिविभवे ? त्वं लोकलोकाधिका !!१४॥

(ततः प्रविशति सखीभिरनुगम्यमाना अभिसारिकोचितवेषा ऊर्वशी)

ऊर्वशि--(सोत्कण्ठम्)

सखि रम्भे प्रत्यायितास्मि नाम देवेश्वरेण यत् कुन्तीनन्दनोऽर्जुनो मयि बलवत्स्निह्यति । तथापि साध्वसवशात् परिवेपिताऽस्मि । पश्य,

प्रभवति हि नितान्तं गूढगूढोऽनुरागः
विकलयति निशीथश्चापि दीप्यन्मृगाङ्कः ।
प्रबलतरमनङ्गं किन्न कान्तो विधत्ते
अहह सखि ! मयेदं प्राप्तमद्य त्रिरत्नम् !!१५॥

रम्भा—(साश्वासनम्)

सखि मोत्ताम्य ! समाश्वसिहि, समाश्वसिहि । कौन्तेय-सङ्गमसुखमवाप्य भयमेतत्तेऽनावृतघनसारतामेष्यति ।

ऊर्वशी--(सदैन्यम्)

हञ्जे, अपि नाम पुरुषरत्नं किरीटी अन्यान्य-पुरुषदेवसहवासास्तमित-नारी समयां मां हृत्तल्पस्थां कुर्यात् ।

रम्भा—अपि आत्मलाघवभिदुरे ! कः खलु कुमुदक्षुपो निर्मुदिरां मुदीं नाभिनन्देत् ? त्वं पुनः (इत्यर्धोक्त एव श्रुतिमभिनीय)

सखि ऊर्वशि ! किञ्चिदनावृतकपाटरन्ध्रादेषोऽव्यक्तध्वनिरिव श्रूयते । तदेहि मूहुर्तमात्रमितस्तावत् अवहिते श्रणुवः क एष व्याहरति ।

(उभे कवाटसमीपमागत्य श्रुतिं नाटयतः)

अर्जुनः--(सोच्छ्वासम्)

सुन्दरि ! बहुर्निमितिसमुद्वेजितेन विधात्रा निर्मितासीति न प्रत्येमि । मन्येऽहं,

रिङ्गल्लोलतरङ्गभङ्ग - विलसद्देवापगातश्छविं
वासन्तीरजनीकलाकलनतो लावण्यमङ्गस्फुटम् ।
आकारं प्रकृतेश्चिर्चिं ग्रहगणादाखण्डलान्मण्डनं
चन्द्रादाननमार्दवं बुधतयोन्मुच्यैव जातासि किम् !१६।

ऊर्वशी--(सनिर्वेदम्)

एष परित्यक्तमर्त्यलोकोऽयं निघृणः पाञ्चाली-प्रणयपर्युत्सुकोऽद्यापि तामेव सोत्कण्ठापरिवाहं स्मरति ।

रम्भा--(अङ्कपाल्यां लालयन्ती)

अयि कोपनशीले ! आद्यन्तमश्रुत्वैव किम्मुधाऽऽशङ्कसे? अह पुनर्मन्ये यत्त्वमेवास्य व्याहरणस्य मूलम् ।

(पुनः श्रुतिमभिनयतः)

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

देवाङ्गने ! ऊर्वशि!! सर्वथा प्रीतोऽस्मि दर्शंदर्शं त्वाम् ।

ऐलेयप्रणयानुबन्ध-मुषितं यज्जीवितं ते क्वचिद्,
मर्त्याणां भुवि सम्बभूव जनिदं चन्द्रान्वयस्यध्रुवम् ।
तेनैव त्रिदशेश्वरं सविनयं त्वं सेवमाना शुभे
स्वायत्ती-कृतकलमषाऽपि मधुरा गङ्गेव राराज्यसे।१७।

रम्भा—(सोल्लुण्ठम्)

अपिनाम पाञ्चाल्यास्संस्तवनं तुभ्यं रोचते ?

ऊर्वशी -(सव्रीडम्)

सखि रम्भे ! किम्मामुपहससि ! न मया किंपप्यत्या-हितमाशङ्कितम् । सर्वथैकान्त-प्रणयिनो भवन्तीमे मर्त्याः ।

रम्भा—(सावधारणम्)

भवतु ! साम्प्रतं विश्रब्धभावेन प्रतीक्षोत्तान-हृदयं कान्तमुपगच्छ । सुखशयित-प्रच्छिकाहं प्रभाते पुनस्त्वां द्रक्ष्यामि ।

(परावर्त्य सभ्रू भङ्गम्)

सखि ऊर्वशि ? शिवास्ते पन्थानस्सन्तु !

(इत्यपक्रामति)

अर्जुनः –(शय्यातः समुत्थाय कुतुकोत्कण्ठां नाटयन्)

हन्त भोः ! स्वप्नवेलेव स्मृतिमात्रोपलब्धिर्जाता सुर-लोकवसतिः ? श्वः प्रातर्वेलायामेव मम प्रस्थानकौतुकं संपत्स्यते ।

(स्मृति-चिन्तां नाटयन्)

अपि नाम प्रस्थानात् प्राक् सकृदेव पुनः ऊर्वशीदर्शनं स्यात् !

(अर्वावृतकावाटयुगलमनावृत्य मन्दमन्दं कौन्तेय-पार्श्व मुपगम्य चानङ्गभावं दर्शयन्ती)

ऊर्वशी—(सलज्जम्)

पुरुषोत्तम ! त्वद्‌गुणप्रवालमुद्रिकेयम् ऊर्वशी स्वयमेव त्वदर्शनोत्सुका तिष्ठति ।

(इति सलज्जानुरागं पाणिभ्यामर्जुनस्य सव्येतरं प्रकोष्ठं गृह्णाति)

अर्जुनः – (सार्तकितभयं सोद्वेगं किञ्चित्पदं पश्चाद्‌गत्वा)

देवि ! किमिदं भवत्याऽनुष्ठीयते !

ऊर्वशी —(हतप्रभेव पुनरपि चित्तवृत्तिं समाधाय)

पुरुषोत्तम ! त्वद्‌गुणपराक्रमनिर्जितेयं दासी मन्दार-प्रसूनलुब्धा मधुव्रतगेहिनीव कामयमाना सन्तिष्ठते । तत् क एष निर्दयो व्यवहारः ?

अर्जुनः—(कर्णौ पिधाय)

शान्तं पापम् । देवि वासवप्रेयसि ! मामैवम् !

यथाचरति वात्सल्यं हरिजाया जयन्तके ।
तत्प्रणयानुवर्तिन्या भवत्याऽपि तथा मयि !!१८!!

ऊर्वशी—(कपोल-पाण्डुरतां वेपथुञ्च नाटयन्ती)

कौन्तेय ! अप्सरसो वयं विरञ्चेः वरप्रभावात् व्यभि-चारदोषमुक्ताः स्मः । तदलमात्मपौरुषावमानेन । पश्य,

आह्लादयति कासारं प्रासादं गगनं भुवम् ।
समरूपं सिता ज्योत्स्ना पत्रिणं पुरुषं पशुम् !!१९!!

अर्जुनः—(ससंयमम्)

देवि ! नैतन्मय्युपपद्यते ! मर्त्याः प्राणिनो वयं धर्मा-चरणनिरुद्धाः, न खलु स्वैरमाचरितुं शक्नुमः । पश्यतु भवती,

समरूपा समाह्लादा तुल्यभाऽपि विधोर्मुदी ।
कुमुदं ह्येव बध्नाति प्रेम्णा न खलु वारिजम् !!२०!!

ऊर्वशी—(सोद्वेगम्)

किरीटिन् ! प्रत्यायितास्मि वृत्रनिषूदनेन यत्त्वं मयि

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

साभिनिवेशं बलवत् स्निह्यसि। रङ्गशालायामपि मां निमीलनभ्रंशजुषा स्निग्धदृष्ट्या प्रेक्षमाणस्स्थितोऽसि !

अर्जुनः—देवि ! मन्येऽसावेव मद्व्यवहारस्तातचरणस्य भ्रान्तेः कारणम् !

ऊर्वशी—न खल्ववगच्छामि।

अर्जुनः—देवि ! कृतयुगे भवती राजर्षेः पुरूरवसोऽर्द्धाङ्गिनी त्वमुपगता सती चन्द्रवंशस्यादिजननी भूतेति सात्मगौरवं ससम्मानं मयाऽर्जुनेन चन्द्रवंशजेन साभिनिवेश भृशं प्रेक्षितेति। मन्ये,

यथार्भकः कोऽपि निरीक्षते स्वां
विलोलदृष्टि जननीं पिपासुः।
तथैव साक्षी-कृत-पूर्व-भाव—
स्मृति-प्रमुग्धेव मयाऽसि दृष्टा !!२१!!

ऊर्वशी—(समुज्जृम्भमाणं पारुष्यं नियम्य)
भवतु। कृतयुगे मया यत्कृतं साम्प्रतं द्वापरे तन्न प्रभवति। पार्थ ! एषाऽहमिदानीं त्वां विषयीकृत्य मन्मथ-शरासारबिद्धा कामयमाना तिष्ठामि ! धर्मज्ञोऽसि। मम मनोभवरुजमपाकर्तुमर्हसि। पश्य,

धातुः सृष्टौ निखिलरमणीरत्नमुख्यास्मि घुष्टा
लावण्याख्यं जगति महितं तत्वमास्ते मयैव !
पीयूषम्मे क्षरति नितरां विग्रहाङ्गात्किरीटिन्
नार्हस्येवं मदन-विकलां मां निराकर्तुमद्य ।।२२।।

अर्जुनः—(दृढ़तां संयमञ्च नाटयन्)
देवि ! मद्वंशजननि ! न मां पापकर्मण्यस्मिन् प्रसह्य नेतुमर्हति भवती। पाण्डुनन्दनोऽहं न क्षमेऽधर्माचरणाय।

ऊर्वशी—(सरोषमश्रुपूरितमुखी)
मूढ ! न मां जननीं वक्तुमर्हसि। गहना गतिः धर्मस्य। केनाऽपि कयाऽपि सार्धमुपपन्नः सम्बन्धः शरीरत्यागेनैव विनश्यति। अदृष्टभोगपरिपाकवत् प्रत्येकं जीवो विविधैः सम्बन्धैरन्वितो जायते। न कोऽपि स्मर्तुं शक्तः स्वपूर्वजन्मसम्बन्धम्।

अर्जुनः—(अविचलभावेन)
मातः, क्षन्तव्योऽस्मि न मेऽनुचितेऽस्मिन् प्रस्तावे प्रवृत्तिः।
(इति करसम्पुटं विधाय प्रणमति)

ऊर्वशी—(लोहितेक्षणा सक्रोधम्)
अलमलं भोः धृष्टकापुरुष ! क्लीब !! पुरन्दरेण त्वया चाद्य विप्रलब्धाऽस्मि।
(सोच्छ्वासं विघूर्णितनयनाभ्याम्)
अलभ्यलावण्य-ललामां कमलालयां मामुर्वशीं विनिवेदितमनोभवभावामपि यत्त्वं षण्ढ इवोपेक्षसे प्राप्स्यसि निश्चप्रचमस्याविनयस्य फलमपि।
(वामं बाहुमुद्यम्य)
मूढ ! अङ्गीकुरुममाभिशापम्। वर्षमात्रं षण्ढीभूय वैलक्ष्यमनुभविष्यसि। सुन्दरीणां मध्ये निवसन्नपि स्वपौरुषोपहासं द्रक्ष्यसि।
(इति निर्विण्णभावेन मन्दंमन्दमपक्रामति)

अर्जुनः—(किंकर्तव्यविमूढतां नाटयन्)
हन्त भोः कुतोऽयमनर्थसम्पातः ?
(धृतिमभिनीय)
भगवन् नन्दनन्दन ! अन्तर्यामिन् !! एष भवत्पादेन्दीवरचञ्चरीकोऽर्जुनो विपन्नस्तिष्ठति ! शरणागतोऽस्मि, रक्षस्व भवदेकसर्वस्वं कौन्तेयं माम्। प्रभो,

धर्मो मयाऽऽहोस्विदधर्म एव
वृतोऽद्य जाने न मनागधीरः।
त्वमेव साक्षी मम सद्व्रतानां
शापोऽप्ययम्मे शमुपैति तस्मात् !!२३!!

(जवनिकापातः)

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

टालस्टायकथा—

२. ननु भवेद् विलम्बो नेवान्यायः

डॉ० भागीरथप्रसादत्रिपाठी "वागीशः शास्त्री" निदेशकः अनुसन्धानविभागः सं० सं० वि० वि०

निवसति स्म पाटलिपुत्रनाम्नि पत्तने हरवंशपालो नाम वणिक् । तस्य किल द्वे पण्यशाले आस्ताम्; निवासाय [1]चोदवसितम् । युवा स स्वस्थविग्रहः,काकपक्षधरःस्मिताननः, प्रकृत्या विनोदशीलः, गानरुचिश्च तारुण्यप्रासादमधिरुह्य सुरासेवी संवृत्तः । सत्यर्थे स मद्यमपि सन्दधातिस्म । निर्वृत्ते समुद्वाहे तदीयाः प्राक्तन्यः प्रवृत्तयः शनकैरन्यथात्वं गताः ।

एकदा कार्तिक्या मेलकं गन्तुमानसं गेहिन्याः सकाशात् सम्प्राप्यमाणानुज्ञं पत्नी प्रावोचत्—"अवधेहि, नाथ ! नाद्य याहि, दृष्टदुःस्वप्नाऽहम् ।"

हरवंशपालो हसित्वाऽवदत्—"मेलकं संगत्य [2]सम्मदमुपेतोऽहं कृतरिक्थापव्ययः[3] सम्पत्स्य इति जाने तावत् तवात्र भयम् ।"

गेहिनी प्रत्यवदत्—"भयमेतदेव तावदन्यद् वेति समुचितं न वेद्मि । ननु कुस्वप्नो दृष्टः । प्रत्यावृत्तस्य तेऽवतारितोष्णीषस्य केशललापो जातो धवलधवल इति निभालितः[4] संवेशे[5] ।"

हरवंशपालस्ततोऽप्युच्चैर्हसित्वा प्रावोचत्—"भाग्योदयस्य स्वप्नोऽयम् । नेष्यमाणानि पण्यवस्तूनि विक्रेष्यन्ते सामस्त्येन, त्वदर्थं च विविधोपहारान् गृहीत्वा मङ्क्षु[6] प्रत्यागमिष्यामि ।"

एवङ्कारं प्राप्तस्वजनानुज्ञश्चचाल मेलकम् । मार्गार्धमतिक्रम्य सङ्गतः किलैकेनान्येन वणिजा प्रत्यभिज्ञातेन । तावुभौ सहैव वसतिं चक्रतुर्विश्रामालये विहितसग्धी[7], संश्लिष्टकोष्ठौ स्वापाय समुपेतौ ।

हरवंशपालस्तु प्रत्यूषे स्वापानभ्यस्तः प्रगेतने सुशीतले समीरयुते व्यतिकरे यात्रा·सौकर्यमिति मनसि निधाय [8]उषोदयात् प्रागेव.सारथिं सम्बोध्य समादिशत्—"भोः ! यन्तः !! वृषभौ शकटचामायोज्य चल" इति ।

अथ कृतपक्षद्वारवसतिकं विश्रामसदनाधिपं समुपेतस्तदीयमादेयं समर्प्य साधुवादान् वितरन् प्रययौ हरवंशपालो मार्गान्तरम् ।

क्रोशदशके सारथिर्वृषभौ पयः पाययितुं निर्योक्त्रौ[9] विहितवान् । हरवंशपालोऽपि कृतविश्रामो विश्रामालये [10]उष्णिकापानार्थं सन्देशं प्रहित्य वेणुं निर्गमय्य वादयितुम् उपक्रान्तवान् ।

अत्रान्तरे पुष्यरथ एकस्तूर्णं समुपेतः । घोटकग्रीवायां लम्बमानाः क्षुद्रघण्टिका निनादं कुर्वन्तिस्म । तत एकोऽवातरत् पदाधिकारी राजपुरुषाभ्यामनुस्रियमाणः । समागत्य पदाधिकारिणा[11]नुयुक्तो हरवंशपालः - "कस्त्वम् ? कुत आयातः" इति ।

हरवंशपालस्तु संविहितप्रश्नोत्तरः समुपस्थिताम् उष्णिकां वीक्ष्य प्रोक्तवान्—"अयि महानुभाव ! समागम्यताम्, मधुक्वाथे सहयोगो दीयताम्" इति ।

तद्वचोऽनवधाय पदाधिकारी स्थिरतर्को भूयो भूयोऽनुयुक्तवान्—"दोषा क्वासीः ? नन्वेकल आसीः ? आहो-

१. गृहम् । २. प्रमोदम् । ३. धन । ४. निहारा । ५. स्वप्ने । ६. द्रुतम् । ७. सग्धिः=सहभोजनम् । ८. उषा स्याद्रजनीशेषे 'उष' इत्यपि दृश्यते'-(रमसकोषः) । ९. योक्त्रम्=जोत । १०. चाय । ११. अनुयुक्तः=पृष्टः ।

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

स्वित् कश्चिदन्योऽपि सार्थवाहस्त्वया सङ्गतः । अपि जाता ते साक्षात्क्रिया [1]गोसर्गे तेन व्यापारिणा ? कुतो ब्रह्मवेलायामेव विश्रामालयादचालीः ?" इति ।

प्रश्नैर्विविधैः किमर्थं सोऽनुयुज्यते ? इत्याश्चर्यसिन्धुनिमग्नोऽपि यथायथं वर्णितवान् घटितचरम् । ससाहसं पुनरसौ व्याहार्षीत्--"दस्युं पाटच्चरमिव मां प्रश्नानामुपरि प्रश्नान् आपृच्छमानो भवान् । स्वेन कर्मणा गच्छामि । नैवमन्ये प्रश्नाः प्रष्टुमपेक्ष्यन्ते ।"

एतच्छ्रुत्वा पदाधिकारी राजपुरुषावुपाहूय तं प्रत्यवदत्--"अहमारक्षाधिकारी मण्डलस्यास्य । येन समं त्वं नक्तं विश्रान्तः, सोऽद्य छिन्नग्रीवो लब्ध इत्यस्माद्धेतोस्त्वां प्रश्नैरनुयोजयामि । अधुना तेऽन्वेषं विधास्यामः ।"

एवमुक्त्वा शकटमभ्युपेतास्त्रयस्ते हरवंशपालस्य सामग्रीं निर्ग्रन्थयितुं समन्वेष्टुं च व्यापृताः साश्चर्यं ततो निर्गतां छुरिकामेकामपश्यन् ।

पदाधिकारी सतारं पृष्टवान्—"कस्यैषा ?"

हरवंशपालश्चकितचकितः शोणितसम्पृक्तामवेक्ष्य तां छुरिकां स्वकीयसामग्रीतो निर्गताम् अवागभूत् स्तब्धकलेवरः। स भृशं भीतिमापन्नः ।

"कथमेषा छुरिका रक्तचिह्नाङ्किता ?"

हरवंशपालस्य प्रत्युत्तरितुं प्रयतमानस्यापि मुखान्न निर्गताः समीचीनाः शब्दाः । लोहलता[2]मुपगतेन स्वरेण प्रत्यवोचत्—अ···ह··म्, नै····व··म···दी...या, नाहं जा ना ··मि ।

आरक्षाधिकारी प्रण्यगादीत्—"अद्य निशान्ते तस्य शयनीये स सार्थवाहो मृतो दृष्टः । गलच्छेदो विहितः केनचित् । त्वामन्तराऽस्मिन् कर्मणि कस्याप्यन्यस्य प्रवृत्तिर्नानुमीयते । शयनकक्षद्वारमन्तर्विष्कम्भेण सुपिहितमासीत् । त्वदृते न कस्यापि चञ्चुप्रवेशः : पुनश्च त्वत्सामग्रीतश्छुरिकाऽप्येका निर्गच्छति । अस्या उपरि रक्तचिन्हान्यपि प्रोल्वणानि । सर्वस्यान्ते त्वदाकृतिर्व्यवहारप्रकारश्चापि भेदं प्रकाशयितुमलम् । सत्यं ब्रूहि, कथमसौ मारितस्त्वया, कति च मुद्रा हस्तेकृताः ?" इति ।

हरवंशपालस्तु सशपथं प्रत्यवदत्—"नैतत् कर्म मामकीनम् । अनुदोषासश्चि नासौ पुनर्विलोकितोऽपि मया सार्थवाहः । आत्मनः सहस्रपञ्चदशकमुद्रा अतिरिच्य नास्त्यन्यन्मदन्तिके किञ्चित् । नैषा छुरिकाऽपि मामिका ।

परमेवं भाषमाणस्य तस्य रशना लोहलतामापद्यते स्म, पीतिमानं चाननम् । भयाद् व्यजनवदेजमानो बाढमभियुक्तः प्रतिभाति स्म । अथ रक्षाधिकारिणा समादिष्टौ राजपुरुषौ— "विनिगडय्य निपातनीय एषः ।"

राजपुरुषाभ्यां बद्धहस्तपादः शकटचां विनिपातितः । क्लिन्नलोचनो हरवंशपालः प्रार्थनया परमेशं शरणं गतः । तस्य पार्श्वे नावशिष्टा सामग्री नापि मुद्राः । सर्वस्वमाच्छिद्य स नेदीयस्या नगर्याः कारालयं निगडाय प्रहितः । कीदृक्चरित्रो हरवंशपाल इति पाटलिपुत्रे निरीक्षा सम्पन्ना । सरकरसिकचरोऽपि [3]संमदेन किलापव्यतीतसमयोऽपि मनुजोऽस्ति शिष्टः, इतस्तूद्वाहात् प्रभृति सत्पथेन वर्तयतीति तत्रत्येन सार्थवाहमण्डलेन जनैरपरैश्च विज्ञापितम् । चलितोऽभियोगः । विचित्रपुरस्य व्यापारिणो हत्यारोपः [4]वसुमितसहस्रमुद्राणां मोषारोपश्च तच्छिरसि समापतितौ ।

एतदाकर्ण्य हरवंशपालस्य जाया शोकविमूढा सञ्जाता । सा न प्रत्यगात्, कथं चात्मनः कर्णयोः प्रत्ययं विदध्यात् ? तनया लघुलघव । एका तु स्तनन्धयी बालिका । सर्वान्

१. प्रभाते--'व्युष्टं विभातं द्वे क्लीबे पुंसि गोसर्ग इष्यते' (अ. को. १।४।३) । २. अस्फुटवाक्ताम् ।
३. 'मुत् प्रीतिः प्रमदो हर्षः प्रमोदामोदसंमदाः'--अ० को० १ । ४ । २४ । ४. अष्टसहस्र० ।

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

सह नीत्वा सा तन्नगरीमुपेता यत्रासीद् धवस्तस्या निगडबद्धः। प्रथमतस्तु साऽनुपलब्धानुज्ञा साक्षात्काराय नानुमता। बहुविनयैः प्रयासैश्च लब्धानुज्ञा पति-प्रकोष्ठं प्रहिता। निगडबद्धं कारागारवस्त्रविरूपितं दस्युभिः पाटच्चरैश्च सह निगृहीतं विलोक्य पतिं तद् दुःखम् असहमाना मोहमुपगता। चिरेण साऽभूत् सुस्था। ततः सुतं क्रोडे धृत्वा पतिमभ्युपविश्य गृहचर्चामचालयत् ! साऽनुयुक्तवती —"कथमेतज्जातम् ?"

हरवंशपालेन घटितचरं निखिलं वर्णितम्।

सा प्रष्टुमुपक्रान्ता—"ननु किमिदानीं प्रतिविधानीयम् ?,,

"एको निरपराधो जनो मृत्युपाशाद् विमोचनीय इति नरपालस्त्वया प्रार्थनीयः।

जाया प्रत्यवदत्—"प्रहिताऽपि प्रार्थना नानुमता।"

हरवंशपालः प्रत्युत्तरीतुं नाशक्नोत्। अधोनयनः पश्यन्नवस्थितः।

जाया प्रावोचत्—'अयि शृणोषि ! नासीन्निर्निमित्तको मे स्वप्नः। नितरां धवलबालस्त्वं दृष्ट इति। ननु स्मरसि ? नहि त्वया तद्दिने प्रयाणीयम् आसीत्। परन्तु —"

अग्रे सा स्वत एव वक्तुं नापारयत्। पुनः प्रियस्य केशेष्वङ्गुलीश्चालयन्ती न्यवीविदत्—प्राणाधार ! ननु त्वया निजाङ्गना नहि प्रतारणीयाऽनृतवचःकदम्बकैः। सत्यमभिधीयताम्, अपि नैव घातो व्यधायि त्वया ?"

"हा धिक् कष्टम्। त्वमपि सन्दिहाना ?"—इति प्रणिगदनसमकालमेव हरवंशपालः पाणिभ्यामाननमाच्छाद्य प्रस्फुटमरोदीत्।

ततो राजपुरुषेण प्रविश्य सूचितम्—"समतीता साक्षात्कारवेला। इदानीं बहिश्चलतु भवती।"

उच्चलिता सात्मजा जाया। चरमे पले स्नेहं विनिमाल्य हरवंशपालो विससर्ज परिवारम्।

सर्वतः किं किं प्रचार्यमाणं चर्च्यमानं चेति चलितवत्यां तस्यां स गम्भीरं व्यचिन्तयत्। भार्याऽपि मयि सन्दिहाना, अन्येषां कथैव का ? एवं सर्वमामूलचूलं विचिन्त्य विनिर्धारयामास—"ऋतं हरिरेव विजानाति। दीनबन्धुः स एव साम्प्रतं सम्प्रार्थनीयः। स एवाशास्यो दयायै दयार्णवो नेतरः कोऽपि जनः" इति विधाय नान्यत् किमपि प्रार्थनापत्रं पुनः प्रहितवान् न्यायालयम्। हीनाशाभिलाषः परमेश-वन्दनानुरञ्जनोऽभूत्।

तस्य कशादण्डो देशनिर्वासनदण्डश्च श्रावितौ। आदौ तिमित[1]कशाभिर्निकामं ताडितः। सञ्जातेषु रुधिरपलल[2]-व्याप्तेषु व्रणेषु निर्वासितः पुनरन्यैर्दण्डितैः समं देशाद् बहिः।

तत्र षड्विंशतिवर्षाणि प्रवासे समवस्थितो निगडबद्धः। अत्रान्तरे पिचुधवलवालः, मलिनशणावदातकूर्चश्मश्रुश्च संवृत्तः। निरन्तर्मोदः न्युब्जश्रोणिः सुमन्दचलनः सुमितवचनः, विनिर्हसनश्च सञ्जातः। विदधाति स्म च समधिकसमुपासनां व्याशः[3]। कारायां समुपात्तपादूग्रथनकलेन च तेन समुपार्जिताः कतिचन कार्षापणाः। तैश्च क्रापिता "महापुरुषजीवनम्" इत्याख्या पुस्तिका। सति च रन्ध्रप्रकाशावकाशे तत्पुस्तिकाध्ययनानुरक्तः पठति स्म। आदित्यवासरे भगवद्गीतां समुत्कीर्त्य श्रावयति स्म। अधुनापि मेदुरस्वरोऽसौ भक्तिरसाप्लुतः सङ्कीर्तनीयानि कीर्तयति स्म।

कारासवीक्षका हरवंशपाले स्निह्यन्ति स्म। स विनीतः, ऋजुव्यवहारः सुसरलश्चासीत्। तत्रत्याः सर्वेऽपि दण्डितास्त सभाजयन्ति स्म। ते तं तात तातेति भक्तराज भक्तराजेति सम्बोधनैः समाह्वयन्ति स्म। काराविकारिणां

१. क्लिन्न.। २. मांस.। ३. विगताऽऽशा यस्य सः।

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

सदेशे सम्प्रस्तोष्यमाणायां निवेदनायां मुख्यत्वेन हरवंशपालमेव अग्रे कुर्वन्ति स्म। मिथो विवादेऽपि तमेवोपस्थाय तत एव न्यायादिकं समीहन्ते स्म।

अनधिगतस्वजनोदन्तो नहि विजानाति स्म हरवंशपालो जायात्मजाश्च जीवन्ति न वेति।

एकदा तस्यां कारायां दण्डितानामेको गणः प्रवेष्टुं समायातः। निशामुखे प्रत्ना दण्डिता नवागतान् परितोऽवस्थाय समनुयोक्तुं प्रारेभिरे--"के कौतस्कुताः? कियच्चिराय दण्डिताः? किञ्जातीयाश्च दण्डाः" इति। अनुयोजककदम्बके हरवंशपालोऽपि समवेतोऽधोनयनस्तदुक्तिप्रत्युक्तीः श्रृण्वन् मौनमास्थितः।

नवाभ्यागतानां दण्डितानामेको दीर्घदेहः सुघटितशरीरः प्रसाधितश्मश्रुकूर्चः, षष्टिवर्षदेशीयो जनः प्रमुदितः सन्नात्मीयजीवनगाथा-वर्णनपरो हरवंशपालेन निभालित इत्थं प्रब्रुवाणः—

निर्वच्मि मित्राणि! काराऽऽगमनकारणम्। एकदा रथादेकस्मादश्वमेकमुन्मोच्य गृहीतवान् इत्यहं निगृहीतः, स्तैन्यापराधीत्युद्घोष्य समभियुक्तः। न्यायालयं प्रापितोऽहं प्रत्युदितवान्--"अयि मान्याः! द्रुततरमायातुं स्वभवनम् अश्वमुदमोचयमहम्। स्वगेहं प्राप्य किलासौ विनिर्गडं विमुक्तः। रथवांश्च नाम मन्मित्रम् इति नेह कश्चन मे दोष इति।"

न्यायाधीशो व्याहार्षीत्--"मौनमास्थेयम्। त्वया चौर्यमाचरितम्।" परन्तु केन प्रकारेण क्व च चौर्यमाचरितमिति साधितुं खल्वनीशः समतिष्ठत्। आम्, बन्धवः! एकदा मया नूनमाग आचरितम् इति तदा देशनिर्वासनेन दण्डय आसम्। परन्तु मम तदपराधस्य केनाप्यनवगतत्वान्नाहं निगृहीतः। इदानीं चात्र नगण्यापराधेन समागतः। किन्तुं सुहृदः! मुधा प्रलपामि। इहाहं पुरापि समागतोऽस्मि। परन्तु नाधिकानि नीतानि दिनानि।

तेषामेकोऽनुयुक्तवान्—"भोः! किन्देशीयो भवान्" इति।

"पाटलिपुत्रं मे ग्रामः। "बलराम" इत्याख्याया समाख्यातश्चास्मि। संक्षेपेण मां 'बल' इति सम्बोधयन्ति जनाः।"

हरवंशपालः पाटलिपुत्रीयं नामधेयमाकर्ण्य पूर्धानमुत्थापितवान्, अपृच्छच्च--

"अपि परिचिनोति भवान् पाटलिपुत्रे राजगेहीयान्? जनान्? का नु तद्दशा? ननु जीवति तेषां कतमोऽपि सम्प्रति?"

किमप्राक्षीः! ओम्, ओम्, जानामि सुतराम्। कथं न परिचिनुयाम्! सन्ति ते समृद्धाः। आम् तदीयो जनक इहैव क्वापि चौरवत् पाटच्चरवच्च निगडबद्धोऽस्ति। परन्तु तात! त्वमिह कथमायातः?"

नहि रुचिता किलात्मनो दौर्भाग्य-कथा-विनिवेदना हरवंशपालाय। स तु दीर्घमुच्छ्वस्य भाषितवान्--"इहैव षड्विंशतिवत्सरेभ्यः स्वकीयं पापदण्डमनुभवन्नवतिष्ठे" इति।

बलरामो व्याचष्टवान्--"किन्नाम तत् पापम्?"इति

"तिष्ठतु नाम तत्। दुराचरितं तु स्यादेव किमपि।"

अनभिधित्सावपि हरवंशपाले "कथमिव दण्डितो हरवंशपालः" इत्यन्यैर्बलरामो बोधितः—"कश्चन घातुको विचित्रपुरस्य व्यापारिण निहत्य रक्ताक्तां छुरिकामस्य सामग्र्यां निगूहितवान् एवंकारः दण्डितो निरपराध एषः" इति।

एतच्छ्रुत्वा बलरामः साचि समपश्यद् हरवंशपालम्। क्षणानन्तरं च जङ्घामास्फोटयन्नवदत्—"विचित्रमेतद्

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

घटितम् । अहह ! असामान्यम् एवैतत् संवृत्तम् !! अहो ! कियज्जीर्णोऽसि जातस्तात !"

एतद् विलोक्य प्रवृत्ता अनुयोक्तुं दण्डिता अपरे- 'हरवंशस्यजीवनवृत्तमाकर्ण्य कथमेवमाश्चर्यचकितः प्रहर्ष-पुलकित इव सञ्जातोऽसि महाशय ! अपीतः पूर्वं विलकितोऽयं भवता क्वापि ?"

बलरामो नैव प्रत्युदतीतरत् । "सखायः ! घटनेयं देवसंयोगाद्, यदिह वयमागत्य सङ्गताः" इत्येतन्मात्रं भणित्वा स तूष्णीमास्थित. ।

एवम्भूतेन तदीयेन व्याहारेण व्यवहारेण च हरवंशपालस्यापि कुतूहलं समुदभूत् । केन स व्यापारी निहत इति तावदेष वेत्ति" इति सोऽनुमाय अपृच्छत् पुनस्तम्— बलराम ! तदभियोगस्य सम्बन्धे श्रुतं स्यात्, क्वचिदहमपि विलोकितः स्याम् ?" इति ।

"श्रोत्रे कथं नापतत् ? संसारो वार्तागारम् । श्रवणौ कस्य पिहितौ ? परन्तु गतो दीर्घः कालः । तदानीं किं श्रुतमासीदिदानीं तत् किमिव स्मर्येत ?"

हरवंशपालः समपृच्छत्[1]—"केन निहतो व्यापारी" इति नाम त्वयाऽऽकर्णितं भवेत् ।"

एतत् कर्णे कृत्वा विजहास बलरामः—"यस्य सामग्रयाश्छुरिका निस्सृता स वै घातुकः । यद्यन्येन केनचिद् निवेशिता स्यात् तर्हि त्वया कथं न वृतोऽसौ जाल्मः । अपरम्, उपधानीकृते ते प्रसेवे छुरिकां निवेशयितुं कथं शक्नोति स्म कश्चिदन्यः ? तथा कृते सति त्वन्निद्राभङ्गो विनिश्चित आसीत् ।"

एतन्निशम्य हरवंशपालो निरचैषीत्—,नूनमेष तद्घातुकः" इति । एवं स्मृत्वा तन्मनो जातं खिन्नम् इति समुत्थाय ततः, सोऽन्यतः प्रयातः ।

निद्रादेवी रुष्टा तस्मिन्निति त्रियामायां कष्टमन्वभवत्तराम् । प्रतिपलमशान्तिः समेधिता । नानाविधानि चित्राणि मनोभित्तौ समङ्कितानि । मेलकं गन्तुमुद्यताय कथङ्कथमपि समनुज्ञां ददानाया भार्याया मुखमकिङ्तम् । जीविता सम्मुखे[2] तिष्ठमानेव सेति तं प्रत्यभात् । स्प्रष्टुं सुकरेवेत्येवं प्रत्यक्षा !! तस्या हास्यस्वरः संभाषणस्य प्रतिशब्दश्च श्रूयमाण इव प्रत्यक्षः । ततस्तन्मनोभित्तौ बालकानां चित्राणि रचितानि । कुसमकोमला बालकाः । एकस्तु दीर्घप्राये [3]नीशारे निलीन आसीत्, अन्यश्च हसने क्रीडापर, अपरा च स्तन्यपानरता बालिका । ततस्तदानीन्तनं नैजं चित्रं मनसि समुद्गतम् यदा स सुतरुणः सुप्रसन्नः सुस्वस्थः सुन्दरश्च नाम आसीत् । सोऽस्मरत् — विश्रामालये कथमिव परमानन्दनिमग्नो वेणुवादनतत्परो निश्चिन्तो नितराम् ! तदैव निगृहीतोऽभूवम् इति च । पुनश्च तद् दृश्यं स्थलं च स्मृतिपथमुपारूढे यत्र कशाभिस्ताडितः । अविकारिणः कतिचन दण्डिताश्च समन्ततोऽवस्थिता आसन् । ततः कारायां समतीतानां षड्विंशतिवर्षाणां निखिलं जीवनं चक्षुषोरग्रे चिन्तया नर्तितम् । इहत्या विपदः कुसङ्गाः, निगडाः, समयात् पूर्वं च समापन्नं वार्द्धकम् इति सर्वम् अनुस्मृत्य तदीयं चेतो जातं क्लान्तम् । तस्य ज्यायसी व्यथा समजनि । मृत्योः परिरम्भार्थमपि समीहा समुद्गता ।

"एतानि चाखिलानि तस्य पापीयसः कुकृत्यानि'—इति हरवंशपालो व्यचिन्तयत् । बलरामविपक्षे समुज्जृम्भितो व्याकोपस्तस्य मानसे ।

मरणमापतेयं नाम, परं तस्य कितवस्य दण्डोऽवश्यप्रदेयः । निशायामीशप्रार्थनया नीतायामपि नासादिता मनागपि शान्तिः । अपरेद्युरसौ बलराम-संसर्गाद् व्यपवृक्तः

१. विदिपृच्छिस्वरतीनामुपसंख्यानम् (वा०) । २. आशयं प्रकाशमानेव (पा० अ० १।३।२३) । ३. आद्यन्त-वर्णविपर्ययेण 7 रज़ानी (नलोपः) 7 रज़ाई 7 रजाई ।

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

समवस्थितः। सम्मुखमायातेऽपि तस्मिन् नोपरिष्टाद् दृष्टिरपि समुत्थापिता। अनेन क्रमेण समतीतं सप्ताहद्वयम्। हरवंशपालो रजनीषु कष्टातिरेकाद् निद्रातुं नापारयत्। किं कुर्याम्, किं न कुर्याम्? इति निश्चेतुं नैव प्राभवत्।

अथैकदा निशीथे कारायां परिभ्रमता तेन पार्श्वतो मृत् पतन्तीवोपलक्षिता। भित्तेरेकतो बलरामस्य मुखमुद्गतमिति सुस्थिरीभूय तेन निभालितम्। हरवंशपालमवलोक्य बलरामस्याऽऽननं भयाद् भस्मच्छुरितमिव संवृत्तम्। "ननूपेक्षणीयमेतद्" इति मनसि विचार्योपेक्षितवत्यपि हरवंशपाले बलरामो बहिर्निर्गम्य तद्धस्तं धृत्वा निजगाद शनैस्तराम्—"मया प्रकोष्ठान्मार्गः खातः प्रात्यहिककृत्य-सम्पत्त्यै, बहिर्निर्याणवेलायां खातमृदं प्राक्षिपम्। नन्वधुना तूष्णीम्भावमास्यताम्। चल, त्वमपि मया समं बहिर्निर्याहि। विपर्यासेऽस्य, विहिते त्वया रावे यमलोकनिकेतनं दर्शयिष्यामि त्वां प्राक्। तदनु राजपुरुषाः कशाभिः कशित्वा प्राणाञ्छरीरात् किमिति न वियोजयेयुर्नाम?" इति।

हरवंशपालः समवलोक्य प्रत्यर्थिनं रुषा समेजमानो झटिति हस्तं समाचकर्ष, अभणच्च—'नाहं पलायितुकामः। पूर्वं एव मारितं मां किं पुनर्मारयिष्यसि! तवैतद्-रहस्योद्घाटनविषये नाहं किमपि विवक्षामि। परमेशो यद् विधास्यति तत् परिणंस्यते।'

श्वो दिने यदा दण्डिता बहिर्गताः कर्म कर्तुम्, तदा संवीक्षकैरेकत्र मृच्चयो वीक्षितः। "केनचिद् दण्डितेनैव नायं मृदिह पातिता भवेत्?" इति विहिते काराविचयने[1] गुप्तमार्गोऽपि सम्परिज्ञातः। कस्येयं कुचेष्टा?' इति समागतेन काराधिकारिणा पृष्टे सति—'न वयं जानीमहे, न वयं जानीमहे' इति प्रत्यूदुः सर्वे तावदैकस्वर्ये। ज्ञानवृत्ता अपि ते बलरामस्य प्राणापद्भयान्नैवोद्घाटयामासुस्तद्रहस्य-भेदम्। हरवंशपालः खलु सत्यनिष्ठ इति काराधिकारी सम्मानयति स्म। अतोऽन्ते तमनुयुक्तवान्[2]—

"अयि हरवंशपाल! त्वमसि सदाचारः सत्यनिष्ठश्च। ईश्वराद् बिभेषि। सत्यं ब्रूहि कस्येदं कुचेष्टितम्" इति।

बलराम आत्मानमनभिज्ञमिव प्रदर्शयन् काराधीश्वरे स्थिरनयनः समवतस्थे। नहि व्यापारयामास दृष्टिं विस्मृत्यापि हरवंशपालं प्रति। अनुप्रश्नं हस्तौ हरवंशपालस्य प्रकम्पितौ रदनपटावपि। चिराय मुखात् तस्य नैकोऽपि शब्दो बहिरायातः। क्षणं विचारितवान्—'येन मे जीवनं विनाशितं किमर्थं तमहं रक्षेयम्? अहह! कियद् दुःखमनुभूतं मया? अधुना तत्प्रतीकारे तेनाप्यनुभवनीयं निकामम्।' परमपरस्मिन्नेव पले दयार्द्रेण कल्पितम्—'समुद्घाटिते सति तद्रहस्य-भेदे कारारक्षकाः प्राणेभ्य एनं वियुयोजयिषिष्यन्ति। अपरं च सम्भाव्यते दुश्चित्तत्वादेषा मामिका शङ्कैव, तद् वृत्तं चानृतम्। पुनश्च यद् गतं तद् गतमेव, नेदानीं तद्दुःखेन मे सुखावसरः।'

अधीक्षकेण समनुयुक्तम् आवृत्त्य—'अपि शृणोषि भोः हरवंशपाल! पापाद् बिभेषि, सत्यं वद केन च्छिद्रिता भित्तिः?" इति!

हरवंशपालो बलरामं प्रति विलोक्य व्याजहार—"अत्रभवन्! नाहं तन्निबोधने प्रभुः। नैवेशाज्ञा निबोधनार्थं। भवन्निदेशोल्लङ्घने यदुचितं मन्येत भवान् दण्डयेत्। एष जनोऽत्रभवदायत्तः।"

अधीक्षकेण संवीक्षकेण च बहु प्रयत्तं परं नाग्रे किमपि जल्पितवान् हरवंशपालः। अस्यामवस्थायम् उपजा[3]पाशक्यत्वेन सोऽभियोगस्तादृगेव स्थगयितुमापतितः।

रजन्यां शयनीयारूढं तन्द्रावस्थं हरवंशपालमुपाविशत् कश्चिल्लघुपादेन समागतः। सुतैक्ष्ण्येन पर्यचैषीत् तन्द्रालुः—बलराम इति।

१. विचयने—मार्गणे। २. पृष्टवान्। ३. उपजापः = भेदः

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

हरवंशपाल: प्रोवाच--"अहह ! अत: परं किमन्यद् वाञ्छसि मत्सदेशात्[1] ? अपि नैव सन्तुष्ट: ?"

बलरामस्तूष्णीम्भावं शृण्वन्नवस्थित: । शय्यां विहाय हरवंशपाल उपाविशत्, अवदच्च--'क: खलु ते मनोरथ: । नन्वाकारयामि[2] दौवारिकान् ?"

हरवंशपालचरणयोरवनतप्राय: संवृत्तो बलराम: । मन्दमवादीच्च--"हरवंशपाल ! भ्रात: !! क्षमस्व माम् ।"

"क्षमा किमर्था ?"

"अहमपराधी पाप: । निहत्य तं व्यापारिणं त्वामपि [3]जिघांसुर्बहि: कोलाहलमाकर्ण्य च्छुरिकां सामग्र्यां ते झटिति निवेश्य वातायनपथेन प्रपलायित आसम्" इति ।

हरवंशपालो मौनमास्थित:[4] । नहि प्रस्फुरितस्तस्य मुखात् कश्चन शब्द: । बलरामो धरायां जानुभ्यां समुपविश्य प्रार्थयामास सानुनयम्--"हरवंशपाल ! भ्रात: !! क्षमस्व मेऽपराधम् । अहं किल सर्वम्[5] आश्रोष्यामि स्वापराधं न्यायाधीशसंमुखे । वदिष्यामि--'अहं घातुक:' इति ? विमुक्तस्तदेतो गृहं यातुं प्रभविष्यसि । हरवंश ! विचारय, पादयोर्निपतामि ते !'

हरवंशपालो न्यगादीत्--"बलराम ! ननु किमिदानीं भणेयम् ? वच: सरलम् । षड्विंशतिवर्षाणि यावत् किं किं नानुभूतं मया ? एतत् सर्वं किमर्थम् ? निमित्तं त्वमेव केवलम् । विमुक्तोऽपि क्वाधुना यास्यामि ? गेहिनी दिवङ्गता मामिका । आत्मजैश्चाहं नूनं विस्मृत: । को मां प्रत्यभिज्ञास्यति ? बलराम ! नहि जगति मदर्थं सुषमं स्थानम् ।

बलरामो धरातलान्नोत्थित: । तत्रैव शिरस्ताडं ताडमवस्थित: ।

"हरवंश ! क्षमस्व माम् । नहि तथा दु:खितोऽभूवं वेत्रैराहतोऽप्यहं यथेदानीं त्वां विलोकमान आसे । नेदं मे सह्यम्…मया त्वं प्रपीडित:, प्रपीड्यमानेनापि त्वयाऽहं सन्ततं रक्षितो रक्ष्यमाणश्च । हरवंश ! हाहा करोमि, परमात्मन: साक्ष्ये क्षमस्व माम् । क्षुल्लक: पापिष्ठ: कदाचारश्चाहम् ।

बलरामं समुच्छ्वस्य रुदन्तं दृष्ट्वा हरवंशोऽप्यरोदीत् । साश्रुनयन: सन्नवोचत्--"परमेश: क्षंस्यते बलराम ! नाहं त्वत्तोऽपि शतगुणित: पापीयान् इति को जानीते ?'

एवमाभाषमाभाषमुदित इव तदन्त: प्रकाश एक: । समस्तस्तर्षो विलुप्त इव तदीय: । गृहगमनाभिलाषो निलीनो निश्शेषम् । कारातो मुक्तेरीहैव तस्मिन् नावशिष्टा । इदानीं केवलमीश्वरस्य निदेशो मन्महाप्रयाणाय भवेदित्येवाशासान: सुतरामवस्थित: ।

हरवंशपालेन बहुधा प्रबोधितोऽपि बलरामो न्यायाधीशाग्रे स्वापराधमङ्गीकृत्यैव विरराम । इतस्तु हरवंशपाल: कारातो मुक्तेरादेशात् प्रागेव देहान्मुक्तिमवाप्तवान् ।

उपकारिषु य: साधु: साधुत्वे तस्य को गुण: ।
अपकारिषु य: साधु: स साधु: सद्भिरुच्यते ॥

किञ्चिद् हास्यमपि

कार्यालयप्रमुख:— (लिपिकं प्रति) कथमेतावान् विलम्ब:? कुत्रासीस्त्वम् ?

लिपिक:—केशकर्त्तनालयं केशप्रसाधनार्थं गतव न् आसम् श्रीमन् !

कार्यालयप्रमुख:—त्वं कार्यकाले केशप्रसाधनार्थं गन्तुं नाज्ञापित: ।

लिपिक:—कथं न श्रीमन् ? इमे केशास्तु कार्यावसरेऽपि समेधन्ते एव ।

वीरेन्द्रकुमारजैन: (दतिया)

१. समीपात् । २. आह्वयामि । ३. हन्तुमिच्छु: । ४. आश्रित: । ५. स्वीकरिष्यामि ।

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

तुलसी-प्रशस्तिः

महाकविः रतिनाथझामहोदयः
रीडर, काशीहिन्दूविश्वविद्यालय, वाराणसी

(१)

यः पञ्चदेवपरिपूजनशिक्षणेन मात्सर्यमार्यहृदयादपसार्य सद्यः ।
दुस्साम्प्रदायिकविरोधमधश्चकार गोस्वामिनं तमतुलप्रतिभं नतोऽस्मि ॥

(२)

जाड्यं हरन्नपनयन् मनसोऽन्धकारं प्रोन्निद्रयन्नमितमानवमानसाब्जम् ।
रात्रिन्दिवं निरुपमं वितरन् प्रकाशं धर्माम्बरे जयति सम्प्रति मानसार्कः ॥

(३)

आराध्यवैदिकसनातन-धर्मलक्ष्म्या भालस्थलेऽङ्कितसुकुङ्कुमशोणविन्दुम् ।
श्रीरामभक्तिमतिदुर्लभशक्तिभूतां पूतात्मनां मनसि कस्तनुते त्वदन्यः ? ॥

(४)

गीर्वाणवाङ्मयमहोदधिमन्थनेन प्राप्तां सुधां वसुमतीगरिमैकहेतुम् ।
त्वामन्तरा न भुवि कश्चन निर्विशेषं सर्वान्निपाययति विश्वकवे ? स्वसूक्त्या ॥

(५)

श्रीरामचन्द्रजननोर्जितवैभवेषु विश्वाभिवन्द्यसरयू-सलिलार्चितेषु ।
व्याप्ता सुतीर्थनृपतिष्ववधेषु लोकवाणी त्वयैव गमिता निगमप्रतिष्ठाम् ॥

(६)

श्रीरामरम्यचरितामृतपूरपूर्णे पद्माकरे परमहंसविहारयोग्ये ।
को मानसे न रमते रमणीयवर्णे सोपानबद्धमणिमण्डितमञ्जुतीरे ॥

(७)

रामप्रपत्तिरसनिर्भरमानसस्य काव्यागमस्य च परस्य परः शतस्य ।
शक्तिस्त्वयाऽपरिमिता निहिताक्षरेषु मन्त्रेषु भक्तजनवाञ्छित-पूरकेषु ॥

(८)

एकैकशब्दमवलम्ब्य परः सहस्रमर्थाः सहस्रकिरणा इव भान्ति भानुम् ।
यत्स्पर्शतः सहृदयात्मनि पद्मकोषे प्रादुर्भवन्ति विकसन्ति मधूनि शश्वत् ।

(९)

आतङ्कपङ्कमलिनानि मनांसि पुंसां प्रक्षाल्य मानसरसोच्छलदुत्तरङ्गैः ।
सम्माननीयपुरुषोत्तमतामवाप्तुं संप्रेरयन्तमनिशं कविराजमीडे ॥

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

हनुमद्वन्दना

(१)

चञ्चद्दोर्दण्डचण्डाद् यमभटविकटाद् यातुधानप्रकाण्डाद्,
लङ्काऽऽतङ्काविशङ्कात् सुरमनुजमनो-मोदमृत्यूग्रदण्डात्।
भीतां सीतां समेतां बहु-भय-जनिकाभिर्महाराक्षसीभिः,
सन्त्रस्तां सान्त्वयन्तं पवनजहनुमन्तं तं कपीन्द्रं नमामि।

(२)

रुद्रश्रेष्ठाऽवतारो - दशरथ सुतशोक - प्रसारप्रहारो,
भक्तानां दुःखहर्ता मुनिगणतनुभुग्-रक्षसां नाशकर्ता।
लोलल्लङ्काकलङ्कं बहुभयनिवहं रावणं रावयन् यः,
सीतेशाऽशेष क्लेश-क्षयमकृत कृपालुः कपिः पातु मां सः।

(३)

भोगभ्रष्टाः सकष्टा लवविभव-निकृष्टाः कुमार्गे प्रविष्टा,
दुर्भाग्यग्राहनष्टाः कटुकपटपटुप्राड्विवाकाऽहिदष्टाः।
जीर्णाः शीर्णा विदीर्णाः खलबल-बहुलैः शत्रुभिः क्लेशपूर्णा-
आशाहीना निहीना अपि कपिकृपया के लभन्ते न सौख्यम्।

(४)

हे स्वामिन्! तेऽवतारः खल-दलनरुषद् दीनहीनोपकारो,
रामस्त्वामात्यलक्ष्यं समलभत निजं जानकीरत्नरूपम्।
वैरिव्याघ्रैर्विपन्नं खलमृगयुकृते रज्जुपाशे विषण्णं-
मां रक्षन् दीनहीनं कपिकुलबल! मे साम्प्रतं साधयेष्टम्।

(५)

दिव्यं दौत्यं दधानो रघुकुल-यशसो रामचन्द्रस्य नित्यं-
रक्षोव्यूहं विभिन्दन् कलिमलकलुषं क्षालयन्नञ्जसैव।
दीनानां यः शरण्यः सुर-मनुज वरेण्यश्च वीराग्रगण्यः
कल्पान्तं विद्यमानो जगति विजयते रामभक्ताग्रगण्यः।

दामोदर शर्मा भारद्वाज
गो० सं० महाविद्यालय, वाराणसी

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

पञ्जीकृत-संख्या--एल॰ आर॰ एन॰/१०२

सूर्योदयस्य नियमाः

पत्र-संहिता--

१—'सूर्योदयः' मासिकपत्रस्य वार्षिकं शुल्कं रूप्यकनवकं वर्तते। धनादेश—(मनीआर्डर) द्वारा तत्प्रेषणीयम्। वी॰ पी॰ पी॰ द्वारा प्रेषणे ३०० पृथक् प्रदेयानि स्युः।

२--आवर्षं गम्भीरसाहित्यसमन्विताः १२ अङ्काः प्रकाश्यन्ते। नवीनप्रथमाङ्कतः (जनवरी-अङ्कतः) एव ग्राहकत्वं स्वीक्रियते। माध्यमिकेन केनापि अङ्केन न स्वीक्रियते।

३—आंग्लमासस्य २६ तमे दिनाङ्के 'सूर्योदय' प्रकाशितो भवति। वारद्वयं संशोध्य ग्राहकेभ्यः सः प्रेष्यते। अतस्तदलाभे पूर्वं स्वकीय-पत्रालयतस्तदनागमनस्य निर्णयं कृत्वैव १० दिनाङ्कान्तरं वयं सूचनीयाः।

४--लेख-कवितादीनां भाषया संयतया, सरलया, शुद्धया च भाव्यम्। प्रकाशनीयलेखादीनां स्पष्टाक्षरैः कर्गजस्यैकपृष्ठे एवं लेखनमावश्यकम्। अस्वीकृता लेखादयः पोस्टविभागीय-चिटिका—(टिकट) प्राप्त्यनन्तरं परावर्तयितुं शक्यन्ते।

५—सम्पादकीय-विषयसम्बन्धे पत्र व्यवहारे 'सम्पादकः' इति, व्यवस्था-विभागीय-पत्र-व्यवहारे च 'व्यवस्थापकः' इति च स्पष्टं लेखनीयम् येन उत्तरलाभे मुधा विलम्बो न भवेत्।

विज्ञापनशुल्कम्--

सूर्योदये सुरुचिपूर्णं विज्ञापनं प्रकाश्यते। एकवारं तस्य प्रकाशनस्य शुल्कक्रमश्च अधोलिखितोऽस्ति, सार्वकालिकस्य दीर्घकालिकस्य च विज्ञानस्य कृते विशेष-सौविध्याय पत्र-व्यवहारः कार्यः।

साधारणस्य प्रतिपृष्ठम्	१००	साधारणस्य प्रत्यर्धपृष्ठम्	६०)
साधारणस्य चतुर्थांशपृष्ठस्य	३५)	आवरण-चतुर्थपृष्ठस्य	२००)
आवरण- तृतीयपृष्ठस्य	१५०)	प्रथमद्वितीयवरणपृष्ठे विज्ञापनं स्वीक्रियते।	

सङ्केतः

'सूर्योदय'—कार्यालयः, भारतधर्ममहामण्डलम्, लहुराबीर, वाराणसी—१

सम्पादकः, प्रकाशकः, मुद्रकश्च---डॉ॰ श्री परमहंसमिश्रः,
श्रीभारतधर्ममहामण्डलम्, लहुराबीर, वाराणसी-२२१००१
मुद्रण-स्थल--जयभारत प्रेस, बाँसफाटक, वाराणसी।

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

सूर्योदयः

भारतधर्ममहामण्डलस्य
मासिकं मुखपत्रम्

वर्षम् ४३

अङ्कः १०

सम्पादकः

गो० न० वैजापुरकरः

दिसम्बर

१९६७

वार्षिक-मूल्यम्

५) रूप्यकाणि

प्रत्यङ्क-मूल्यम्

अर्धरूप्यकम्

ईश-प्रार्थना

विभो ! त्वदीयमाश्रयं भजामहे सदा वयम् ।
विशुद्ध-बुद्धिदायकं, समस्त-मङ्गलालयम् ॥
प्रकाश आशु ज्ञानजः प्रकाशतां प्रभोऽनिशम् ।
त्वदीय-संस्मृतिः सदा भवेद् दिवानिशम् ॥
विभारतं सदैव भारतं विभासतां भवे,
न भारतीय-मानसे भयं भवेद् युगे नवे ॥
अधीत्य सत्वरं सतां मतं सुमार्गमाश्रिताः,
विवेक-भूषिता भवेम विश्वराग-रञ्जिताः ॥

—श्री ओङ्कार [illegible] त्रिपाठी

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

ग्राहका विनिवेद्यन्ते—

अनेन अङ्केन 'सूर्योदय'स्य ४३तमं वर्षं पूर्णं भवति। अग्रिमोऽङ्कः ४४तमवर्षस्य प्रथमाङ्को भवेत्। कृपया ग्राहकैः अस्याङ्कस्य प्राप्तेः समकालमेव ५) पञ्चरूप्यकात्मकं वार्षिकं मूल्यं धनादेश-द्वारा (मनिआर्डर द्वारा) त्वरितं प्रेषणीयम्। सति सम्भवे अन्योऽप्येको नवीनो ग्राहको विधेय इत्यपि प्रार्थयते।

—व्यवस्थापकः

अ नु क्र मः

प्रपानकम्	पत्रपुटम्	परिवेषकः
विबुधवन्द्य-दत्तं भजे	३२१	श्री श्रीधरस्वामी
श्रीमहर्षि-ज्ञानानन्द-चरितम्	३२२	श्री विन्ध्येश्वरीप्रसाद शास्त्री
लोकतन्त्रघाति राष्ट्रभाषा-संशोधन-विधेयकम्	३२३	सम्पादकीयम्
पुरुषसूक्त-श्रीसूक्तयोः परमं तात्पर्यम	३३१	श्री पूज्य करपात्रस्वामी
मानस-भारती	३३३	श्री जनार्दन गङ्गाधर रटाटे
शिशिर-विलासः—सव्याख्यः	३३४	श्री लक्ष्मीनारायण द्विवेदः, श्री डॉ० हरिदत्त पालीवालश्च
(३८) क्षत्रपति-महाकाव्यम्	३३६	श्री उमाशङ्करशर्मा त्रिपाठी
'विवाह-वयोमर्यादा,प्रकल्पस्चे' ति लेखस्य अशास्त्रीयत्वम्	३३७	श्री बालचन्द्र दीक्षितः
(७) पृथ्वीराजाख्यानकम्	३३९	श्री विश्वनाथ त्रिपाठी
नेतृ-चरितम्	३४०	श्री रामस्वरूप शास्त्री 'क्रमशः'
४३ तमवर्षीया लेख-लेखक-सूची	३४१	सङ्कलिता

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

सूर्योदयः

भारतीय-संस्कृतेः प्रातिनिधिकं संस्कृतं मासिक-पत्राम्

★

—सम्पादकः—

श्री गोविन्द नरहरि वैजापुरकरः

एम० ए०, न्याय-वेदान्त-साहित्याचार्यः

★

—प्रकाशकः—

त्रिचत्वारिंशत्-तमं वर्षम्

श्रीभारतधर्म-महामण्डलम्

जगत्गंज, वाराणसी

वार्षिक-मूल्यम् पञ्चरूप्यकम्

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

त्रिचत्वारिंशद्वर्षीया लेख-सूची : १९६७

[अत्र प्रथमं ससङ्केतं लेखकनाम, तदनु लेखनाम पृष्ठसंख्या चेति क्रमोऽवसेयः ।—सम्पादकः]

सम्पादकीयम् (अग्रलेखः)—चिकित्साविज्ञाने भारतीयो दायः ३, तुरीयं महानिर्वाचनम्, शासन-संस्था च ३७, रत्नं समागच्छतु काञ्चनेन ! ६८, राष्ट्रीय-शिक्षा-कार्यक्रमस्य नव्य उपक्रमः १०१, संस्कृत-शिक्षा, शास्त्राभ्यासश्च १६४, गोवध-निरोध-महाभियानस्य अन्तिमं निर्णायकं पर्व : तिहाड-काराकाण्डम् १९६, अभिनन्दनीयानां श्रीगौरीनाथ-शास्त्रिणामभिमतम् २२९, संस्कृताध्यापकाः, राष्ट्रिय-शासनसंस्था च २५१, तयाऽस्माकं वरो दत्तः ! २७५, श्रौतधर्मः, तत्प्राणपदा यज्ञसंस्था च २९९, लोकतन्त्रघाति राष्ट्रभाषा - संशोधन-विधेयकम् ३२३ ।

सम्पादकीया टिप्पणी—अस्माकं त्रिचत्वा-रिंशत्तमं वर्षम् ८, जगद्गुरुप्रभृतीनां महाव्रत-समाप्तिः ८, नवशासकानामभिनन्दनानि ७०, नवराष्ट्रपतीनामभिनन्दनम् १०६, स्वर्गीयाः श्री खणङ्गशास्त्रिणः २५४, पूज्य श्री कविराजपादाना-मभिनन्दनम् २५५ 'सूर्योदय'विषये अत्यावश्यकं किञ्चित् २८० ।

श्री (पूज्य) स्वामी अखण्डानन्द सरस्वती, आनन्द-कानन, ढुण्ढिराजगली, वाराणसी—मानस-पूजायां तन्मयता ९९ ।

श्री 'अङ्गारः' ३०/४० घासीटोला, वाराणसी—गोवधनिरोध-महाभियानम् : उद्भवः प्रगतिश्च ३० ।

श्री (स्व० कविवरः) अनन्तरामशास्त्री वेतालः, वाराणसी—सौभाग्य-'सूर्योदयः' १३६, शरन्नवरत्न-माला २८६ ।

श्री अनन्त पिंगले, सीनयर शास्त्री, डेक्कन कालेज, पूना—विवाह-वयोमर्यादा, प्रकल्पश्च २०६ ।

श्री अमृतलाल जैनः, प्राध्यापकः, वाराणसेय-संस्कृतविश्वविद्यालय, वाराणसी—भगवान् महा-वीरः १३९ ।

श्री अमृतवाग्भवाचार्यः, गङ्गाभवनम्, भरतपुर (राजस्थान)—श्री त्रिगुणेश्वरस्तुति-नुती ६५ ।

श्री अ० वि० काणे, वसई, जि० ठाणे (महाराष्ट्र)—विविध-विघ्नहन्त्रे नमः २४९ ।

श्री ओङ्कारप्रसाद त्रिपाठी, प्रधानाचार्य; मन्नूलाल संस्कृतविद्यालय, अतर्रा, बाँदा—संस्कृतस्य विलासः १४४; पुनराह्लादय, जगदेकतलम् फरवरीमासाङ्क - मुखपृष्ठे ; ईश-प्रार्थना दिसम्बर-मासाङ्क-मुखपृष्ठे ।

श्री उमाशङ्करशर्मा त्रिपाठी, आंग्लभाषा-प्राध्यापकः, काशी-विद्यापीठम्, वाराणसी—क्षत्रपति-महाकाव्यम् २४, ५८, ९१, १२८, १७५, २१३, २४५, २६३, २९४, ३०९, ३३६ ।

श्री (पूज्य) करपात्रस्वामी, ब्रह्मकुटीर, नारद-घाट, वाराणसी—भक्ति-रसार्णवः, साङ्गं भक्तिरस-विवेचनम् ४१, ७२, १०७, १७१, २०१, २३८, २५६, २८१, ३०४, ३३१ ।

श्री (कविः) कवलिः, बैंगलोर—हार्दिकं सौप्रास्थानिकम् (राष्ट्रपति राधाकृष्णन् महोदयानां पदनिवृत्ति-समये) १३१ ।

श्री (स्व०) कुलचन्द्रशास्त्री गौतमः, नेपाल—जाह्नवि कुर्महे नमः १६१ ।

श्री (डॉ०) केशव सदाशिव मुसलगांवकरः, लश्कर ग्वालियर—उपमा कालिदासस्य ३१६ ।

श्री (धर्मदूतः) गङ्गाप्रकाश ब्रह्मचारी, अस्सी, वाराणसी—निखिलभारतीय-तीर्थानां पदयात्रा ८६ ।

श्री गणेश उमाकान्त थिटे, पूना—हरविजयं महा-महाकाव्यम् : एकं समीक्षणम् १५ ।

श्री (सेठ) गोविन्ददासः संसत्सदस्यः,

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

जबलपुर—गोरक्षा - महाभियान-समितेः प्रस्ताव-त्रयम् १९९ ।

श्री गोविन्द नरहरि वैजापुरकरः, एम० ए०, न्याय-वेदान्त-साहित्याचार्य, ३०/४० घासीटोला, वाराणसी—विश्वभ्रातृत्वदूत्य एकादशोपनिषदः १४५ ।

श्री (पद्मविभूषण-महामहोपाध्यायः) गोपीनाथ कविराजः, सिगरा, वाराणसी—चक्षुष उन्मीलनम् २६९ ।

श्री (डॉ०) गौरीनाथशास्त्री, उपकुलपतिः वाराणसेय - संस्कृत - विश्वविद्यालय, वाराणसी—स्वाभिलषितं संस्कृतविश्वविद्यालयस्य चित्रम् २३१ ।

श्री चाणक्य शर्मा—संस्कृत - विश्वविद्यालयः, राज्यपालोद्बोधनञ्च २३३ ।

श्री जनार्दन गङ्गाधर रटाटे, बी० ए०, साहित्याचार्यः, दुर्गाघाट, वाराणसी—मानस-भारती : देवगिरा गुम्फितं मानसम् (सुन्दरकाण्डम्) ३१; (किष्किन्धाकाण्डम्) ८५, १२१, १८५, २०५, २४४, २६५, २८४, ३१५, ३३३ ।

श्री (आचार्य) जानकीवल्लभ शास्त्री, चतुर्भुज-स्थान, मुजफ्फरपुर (विहार)—श्रीराधिकायाः लास्यम् २९७ ।

श्री (स्व०) दामोदरलाल गोस्वामी, वाराणसी—श्रीसूर्य-स्तुतिः १ ।

श्री दीनानाथ शास्त्री सारस्वतः, प्रधानाचार्यः रामदल संस्कृत महाविद्यालय, दरीबा कला, दिल्ली—द्विज-शूद्रयोर्भेदो वैदिक एव ९, ४८ ।

श्री देवमाता देवकी—मृत्युरस्मादपैति २२५ ।

श्री न० च० वे० नरसिंहाचार्यः, तिरुपति (आन्ध्र)—मङ्गलाशंसनम् २९; शाकुन्तलीयं जीवन-दर्शनम् ५१, ७९, ११६, १७८; मुक्तकानि २०९ ।

श्री (देवर्षिः) नारदः—श्रीरामभद्रस्तुतिः ९७ ।

श्री पद्मनाथ निरौला, वाराणसी—काव्यशास्त्र-विनोदेन ५० ।

श्री परमहंस मिश्रः, एम० ए०, आचार्य, भारत-धर्म-महामण्डलम्, वाराणी—गुरुदेव-वन्दनम् १०० ।

श्री प्रशस्तमित्र शास्त्री, आचार्यनगर कानपुर—विकला भवन्ति २०३ ।

श्री प्रेमवल्लभ त्रिपाठी, प्राध्यापकः, वाराणसेय संस्कृत विश्वविद्यालय, वाराणसी—स्वतन्त्र-भारते धर्मशास्त्राणां स्थानम् २६५ ।

श्री (प्राध्यापकः) बटुकनाथ शास्त्री खिस्ते, एम० ए०, साहित्याचार्यः, विनयका, कोल्हुआ, वाराणसी—अस्माकम् आगमा : एकं संक्षिप्तं विवेचनम् १३२ ।

श्री बलदेव उपाध्यायः, सञ्चालकः, अनुसन्धान-विभाग, वाराणसेय संस्कृत विश्वविद्यालय, वाराणसी—समन्वय-संस्कृतेः मार्मिक-सन्तवराः श्री गोपीनाथ कविराजाः २६५ ।

श्री ब्रह्मानन्द त्रिपाठी, एम. ए., साहित्य-आयुर्वेदाचार्यः, गौमठ, मणिकर्णिकाघाट, वाराणसी—सेवस्व सक्तून् सदा ! १३७ ।

श्री बालचन्द्र दीक्षितः, प्रधानाचार्यः, बाजोरिया संस्कृत महाविद्यालय, अस्सी, वाराणसी—विवाह-वयोमर्यादा, प्रकल्पश्चेति लेखकस्य अशास्त्रीयत्वम् ३३७ ।

श्री मधुसूदन शास्त्री, साहित्य-विभागाध्यक्षः संस्कृत - महाविद्यालयः, हिन्दू - विश्वविद्यालयः, वाराणसी—कल्पनापोढं कहानीतिवृत्तम् ६१ ।

श्री मनसाराम शर्मा 'अरुणः' राजकीय महाविद्यालय, सोलन (हिमाचल प्रदेश)—उत्सर्गः (कथा) ३११ ।

श्री मुरलीधर मिश्रः, व्याकरणविभागाध्यक्षः, वाराणसेय संस्कृत विश्वविद्यालय, वाराणसी—मनस्तत्त्व-विमर्शः १८८, २१०, २४१, २६१ ।

श्री रा० ब० खाडिलकरः, वकील, नाशिक—व्यासं महान्तं मुनिमानतोऽस्मि १९३ ।

श्री रामचन्द्र शास्त्री, वसन्त-स्कूल राजघाट, वाराणसी—प्रभात-विलसितम् २७१ ।

श्री रामनाथ पाठकः 'प्रणयी' प्राध्यापकः जैन-कालेज, आरा (शाहाबाद)—पुनः कामये राम ते राजनीतिम् १०६ ।

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

श्री (डॉ०) रामशङ्कर भट्टाचार्यः, सोनारपुरा, वाराणसी—मूढ-दशकम् ११० ।

श्री रामस्वरूप शास्त्री वैद्यः, सम्पादकः बाल-संस्कृतम्, घाटकोपर, बम्बई—सर्वतः संस्कृतं संस्कृतम् २७९; संसेविता सा निधिरेक नित्यम् ३१४ ।

श्री रामस्वरूप शास्त्री 'अमरः' प्रधानाध्यापकः बालमण्डल-संस्कृत विद्यालयः, तालबहेट, झांसी—नेतृ-चरितम् ३४० ।

श्री (स्व० म० म०) लक्ष्मण शास्त्री तैलङ्गः, वाराणसी—सुप्त-प्रबुद्धम् : अभिनवं खण्डकाव्यम् २०, ४४, ७५, १११; निदाघ-विलसितम् १८६ ।

श्री लक्ष्मीनारायण द्विवेदः प्रधानाचार्यः, श्रीधर-संस्कृत-विद्यालय, तिर्वा, फर्रूखाबाद—अस्माकं भारतम् १३; जानकीजानेः वनप्रस्थानम् ८४; शिशिर-विलासः ३३४ ।

श्री (प्राध्यापकः) वा० का० क्षीरसागरः, पूना—नाटचे च दक्षा वयम् १२३ ।

श्री विन्ध्येश्वरीप्रसाद शास्त्री, नारायण-मठ, लक्ष्मीकुण्ड, वाराणसी—श्री महर्षिज्ञानानन्द-चरितं महाकाव्यम् २, ३४, ६७, ९८, १६२, १९४, २२६, २५०, २७४, २९८, ३२२ ।

श्री विनायक गणेश भागवतः, कीर्तनालङ्कारः, रत्नफाटक, वाराणसी—क्षिप्रा-लहरी १६८; पालयाखिलान् ! सितम्बरमासाङ्कस्य मुखपृष्ठे ।

श्री विश्वनाथ त्रिपाठी, साहित्याचार्य, भदैनी, वाराणसी—पृथ्वीराजाख्यानकम् ९४, १५६, १९१, २१७, २४७, २७२, २९५, ३१९, ३३९ ।

श्री विश्वनाथ मिश्रः, व्याकरण-साहित्याचार्यः, एम० ए०, प्रधानाचार्य, शार्दूल संस्कृत विद्यापीठ, बीकानेर—संस्कृतं कथं सुप्रचारितं सर्वग्राहि च भवेत् ? १४१ ।

श्री (भिक्षु) शासनरश्मिः, वाराणसेय संस्कृत विश्वविद्यालय, वाराणसी—थाई-भाषायां संस्कृत-भाषायाः प्रभावः २९१ ।

श्री शिवकुमार शास्त्री, व्याकरणाचार्यः, दर्शनालङ्कारः, प्रधानाचार्य, संस्कृत-महाविद्यालय, इटारसी—श्रीशिव-कुसुमाञ्जलिः १५४ ।

श्री शिवप्रसाद द्विवेदः अस्सी, वाराणसी—श्रीसदाशिव-स्तुतिः २६३; रमा-वाक्सपर्या ३०२ ।

श्री (डॉ०) शिवशरण शर्मा, प्राध्यापकः, राजकीय स्नातक महाविद्यालय, दतिया (म० प्र०)—भरत-मही : जनवरी-मासाङ्क-मुखपृष्ठे; तद्गानं गीयताम् : अप्रैल-मईमासाङ्क-मुखपृष्ठे; वृन्दावनम् जुलाईमासाङ्क-मुखपृष्ठे; मातृवन्दनम् अगस्त-मासाङ्क-मुखपृष्ठे ।

श्री श्रीकृष्णदत्त शर्मा—गो-सेवा, तदादर्शो दिलीपश्च २२ ।

श्री श्रीकृष्णमणि त्रिपाठी, प्राध्यापकः वाराणसेय संस्कृत विश्वविद्यालय, वाराणसी—दर्शनानुशीलन-समीक्षा २८८ ।

श्री (समर्थनुगृहीत-महात्मा) श्रीधरस्वामी महाराजः, वरदपुरम्, पो० यडगेमने, ता० सागर जि० शिमोगा (मैसूर)—श्रीसरस्वती-स्तुतिः ३३, विबुधवन्द्य-दत्तं भजे ३२१ ।

श्री श्रीनिगमशर्मा—ध्वनेरुद्भवो विकासश्च १४९ ।

श्री सरयूप्रसाद शास्त्री 'द्विजेन्द्रः' विरदोपुर, वाराणसी—गुरु-स्मरणम् २०२ ।

श्री हनुमद्दत्तशास्त्री दाधीचः पो० बगड़, झुंनझुनू (राजस्थान)—भारते भातु भारती ३१३ ।

श्री (हरिद्वारस्थो) हरिप्रियः—लुण्ठिते वेश्मनि यामिक-जागरणम् ६० ।

श्री (डॉ०) हरिदत्त पालीवालः, उपमन्युभवन, कायमगंज, फर्रूखाबाद—शिशिर-विलास :—सव्याख्यः ३३४ ।

सङ्कलितानि—श्रीशङ्कराचार्याणां स्वागताभिनन्दम् १६०; ईशवीयं १९६७ वर्षीयं परीक्षाफलम् २२०; श्री गौरीनाथशास्त्रिणामभिनन्दनम् २५९; विदुषां स्वागताभिनन्दने २७१; मातङ्गकन्यां मनसा स्मरामि २७३; पुस्तक-समीक्षणम् : सुस्वागतं हिमांशो ३१७ । इतोऽन्यत् महामण्डलवृत्त-सूचनादिकं तत्र तत्र अङ्के द्रष्टव्यम् ।

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

सूर्योदयः

श्रीभारतधर्ममहामण्डलस्य मासिकं मुखपत्रम्

रागद्वेषनिशाटनं विधुरयन् मोहं तमो नाशयन्,
तामिस्रं जडवादकैरवकुलं ज्ञानत्विषा ग्लापयन्।
विद्वत्कोकमशोकयन् नयसुधीरोलम्बमुन्मीलयन्,
सञ्जातः सुमनोमनो मधुरयन् सर्वत्र सूर्योदयः॥

४३ वर्षे] वाराणसी, मार्गशीर्षः, २०२४ : दिसम्बर, १९६७ ई० [१२ अङ्कः

विबुधवन्द्य-दत्तं भजे

आर्तत्राणपरायणं भवनुदं भक्तौघकल्पद्रुमम्,
तत्त्वज्ञानविबोधकं मुनिनुतं सिद्धान्तरत्नाकरम्।
मोक्षानन्दतनुं मुमुक्षुजनहृन्-मोहान्धकारा-र्चिषम्,
सच्चित्सौख्यरसस्वरूपममलं दत्तप्रभुं नौम्यहम्॥ १॥

सद्भक्तपञ्जरशुकं सुगुणाब्जभृङ्गं वेदान्तरम्य-वनसक्त-पिकं मनोज्ञम्।
शुद्धान्तरङ्ग - वरमानस - राजहंसं दत्तावधूतममलं मुनिगेयमीडे॥ २॥

ॐकार-सुस्वनविलीनमतिं कुरङ्गं निष्काम-कर्मतरु-मध्यचरं मयूरम्।
कामादि-मत्तगज-गण्डविभेदशीलं दत्तं निवृत्ति-वनराजमहं प्रपद्ये॥ ३॥

अशेषजीवाश्रय-भाग्यमूर्तिं सुखात्मरूपं निरुपाधिकं तम्।
विवेक-वैराग्यकरं वसन्तं भवाब्धिसेतुं गुरुदत्तमीडे॥ ४॥

भववारिधि-पोतरूपकं भव-विष्णु-विरिञ्चिरूपिणम्।
भवदुःख-निशारिचिद्रविं भवरोग-भिषग्गुरुं भजे॥ ५॥

स्वभक्तजन-चातक-स्वननिपीड्यमानं मुहुः, स्वबोध-जलवर्षिणं सुखघनात्ममेघं परम्।
अनेकभव दाहभृज्जन-चकोरचन्द्रं शिवं भवाब्धिजनतारकं विबुधवन्द्य दत्तं भजे॥ ६॥

—श्री समर्थानुगृहीत-महात्मानः श्रीधरस्वामिनः—

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

श्री महर्षि-ज्ञानानन्द-चरितं महाकाव्यम्

--श्री विन्ध्येश्वरीप्रसाद शास्त्री--

॥ अथ त्रयोदशः सर्गः ॥

क्रतोर्विधात्रा मनुजाधिपेन विसर्जितास्ते सुधियो नरेन्द्राः ।
प्रतस्थिरे सत्कृत-सुप्रसन्नाः ग्रामांश्च नैजानपि पत्तनानि ॥ १ ॥

२. महीश्वरेणैष यतीश्वरोऽपि
प्रसादितः स्वापचिति-क्रियाभिः ।
तत्रैव काँश्चिद् दिवसानुषित्वा
व्यजिज्ञपत् तं नृपतिं प्रयातुम् ॥

३. महर्षिवर्यस्य वियोगवार्तां
किशनगढस्या - ऽधिपतिर्निशम्य ।
सहात्मवर्गै-र्विकलेन्द्रियः सन्
असह्यशोकाम्बुनिधौ ममज्ज ॥

४. सपर्ययाभि - र्विविधाभिरन्तः-
पुरःस्थितैस्तै - र्ललना - ललामैः ।
प्रसादमाप्तो-ऽम्बुजपत्रवत् सो-
ऽम्भसा सुनिर्लिप्त इवावतस्थे ॥

५. राजन्य-मूर्धन्य-शिरोविराजित-
किरीट - संयुक्त - मणिप्रभाभिः ।
सदैव नीराजित - पाद - पद्मः
सर्वाणि शर्माणि तृणाय मेने ॥

६. बाष्पाकुलं राजकुलं समस्तं
वियोगजा - ऽशान्ति-सुसङ्कुलं च ।
विहाय योगी बत निःस्पृहोऽयं
श्रीकृष्णभूमिं मथुरां प्रतस्थे ॥

७. सद्रत्नराशिं गुरुदक्षिणायां
सहाग्रह - स्वाग्रहिलेन राज्ञा ।
समर्पितं दीन-विपन्न-नृभ्यो
यतीश्वरः संवितताार सर्वम् ॥

८. नुतो मुनीन्द्रै - र्मथुरामुपेतः
स्वशिष्यवृन्दै - र्विबुधैः समेतः ।
स मण्डलीं तां 'निगमागमा'ख्या-
मस्थापि सद्धर्मधुरोद्धरिष्णुः ॥

९. प्रसिद्ध-सुश्रेष्ठि - विशालसौधे
कार्यालयोऽभून् मथुरा-स्थितोऽस्याः ।
संस्थापितोऽध्युष्य तमेष योगी
कार्याणि सञ्चालयितुं प्रवृत्तः ॥

प्रारम्भिकेऽस्याः समये समस्त-व्यापारसञ्चालन-सक्तचित्ताः ।
सन्ति स्म विद्याचण-साधवो हि विरागभाजः सुविगीतचित्ताः ॥ १० ॥

[क्रमशः]

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

सम्पादकीयम्

लोकतन्त्रघाति राष्ट्रभाषा-संशोधन-विधेयकम्

भारतीय - संसदि अत्यधिक - विवादास्पदस्य 'राजभाषा-संशोधन'-विधेयकस्य प्रथमवाचनं ७५ मतविरुद्धैः २२४ मतैः पारितमभूत् । ततो द्वितीय-वाचनं प्रारब्धं यत्र प्रत्येकशस्तास्ता धाराः समाश्रित्य विचारः प्रचलितः । नैकेर्दलीय-संसत्सदस्यैः कानिचन संशोधनान्यप्यत्र प्रस्तावितानि येषु शासक-(कांग्रेस)-दलीयसदस्यानामपि कतिपयानि संशोधनान्यासन् । पर्यन्ते संशोधितरूपेण विधेयकमिदं स्वीकृतं भवितेत्यत्रापि नासीत् संशीतिलेशः । अन्ततस्तदेव सम्पन्नमपि । यतो हि केन्द्रीयं कांग्रेस-शासनं सर्वविधैः साधनैस्तदर्थं बद्धपरिकरमेवासीत् । तथापि विवशतो वक्तव्यं भवति यत् लोकतान्त्रिकता-चर्मपरिच्छिन्नमप्येतत् सर्वथा लोकतन्त्रप्रतीपमेव । अन्यच्च, इदं सर्वथा भारतीयसंस्कृति-परिपन्थि असामयिकञ्च । कथमिति चेत् ? तदेवास्मिन् निबन्धे समासतो विचार्यते । भारतीयसंस्कृति-भारतराष्ट्र-श्रद्धाबिन्दुसम्बद्धेऽस्मिन् विषये मौनावलम्बनं नूनमनौचित्यावहं भवेत् **अप्रतिषिद्धमनुमतं भवति** इति पारिभाषिकानुशासनात् ।

प्रथमग्रासे मक्षिकापातः

विधेयकमेतत् विगते नवम्बरमासस्य २७ दिनाङ्के भूयांसं चिरागतं मौखिकं प्रत्यक्षलोकमत-विरोधमविगणय्य संसदीय-दलगतबहुमतेन २५ विरुद्धैः १८१ मतैः लोकसभायां शासनेन प्रस्तुतं गृहमन्त्रिणां श्री चह्वाण-महोदयानां द्वारा ।

'विधेयकमिदं भूतपूर्व-प्रधानमन्त्रिभिः स्वर्गीय-श्री जवाहरलाल नेहरू - महाभागैः अहिन्दीभाषि-प्रदेशेभ्यः प्रदत्तं 'यावद्धि ते राष्ट्रभाषां हिन्दीं स्वेच्छया नानुगृह्णन्ति तावत्तेषां शिरसि प्रसह्य सा नापाद्येत' इत्याशयकमाश्वासनं नियमरूपतां परिणमयितुं प्रस्तूयते' एभिः शब्दैः यावदिदं गृहमन्त्री प्रस्तोतुमैच्छत्, तावदेव प्रत्नतमाः कांग्रेसदलीयाः संसत्सदस्याः श्री सेठ गोविन्ददास - महोदया एव विधेयकस्यास्य विरोधं कुर्वन्तः प्रोचुः—'यानि राज्यानि हिन्दीभाषां न वाञ्छन्ति, कामं तेषु हिन्द्या अनिवार्यत्वं न कुर्वन्तु । परं यानि राज्यानि आंग्ल-भाषां न वाञ्छन्ति, तेष्वपि कथं सा बलादापद्येत, यदा किल भारतीय-संविधानेन २६ जनवरी १९६५ दिनाङ्कात् परं राष्ट्रभाषात्वेन स्वीकृताया हिन्द्याः सर्वांशतः कार्यान्वयनम् अनिवार्यकर्तव्यतया समाज्ञप्तं वर्तते । अतः प्रथमतः प्रश्नेऽस्मिन् भारतसङ्घ-राज्यस्य सर्वेषां मुख्यमन्त्रिणामभिमतानि समपेक्षितानि लोकतन्त्र-प्राणपद-बहुमतदृष्ट्या समासादनीयानि । ततः परमेवेदं प्रस्तोतव्यमत्रे'ति । प्रस्तावोऽयं सेठ-महाभागानां सर्वथा समञ्जस एवाऽऽसीत् । यतो हि भारतीयं संविधानं न केवलं केन्द्रशासनस्य हिन्दीभाषिराज्यानां वा कृते निर्मितम् अहिन्दी-भाषि-दाक्षिणात्यराज्यानि व्यवकलय्य । न वा अत्रत्यानि सर्वाणि राज्यशासनानि भारतसङ्घ-राज्यतः पृथग्भूतानि, येषां कृते हिन्दी राष्ट्र-

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

भाषात्वेन स्वीकृता सर्वसम्मत्या संविधान-निर्मातृ-परिषदा। सत्यप्येवं तथाकथित-संख्यासुरबलेन प्रस्तावितमेवाभवत् विधेयकमिदम्।

प्रथम-द्वितीयवाचनयोः कलहः

विधेयकस्य प्रथम-द्वितीयवाचनावसरे लोक-सभासदस्येषु यावन्मतवैभिन्न्यं दृष्टम्, यावांश्च कलहः प्रसृतः, लोकसभेतिहासे सोऽभूतपूर्व एव उच्येत। राष्ट्रहितदर्शिभिः कांग्रेसदलीयसदस्यैः कतिपयैः, समाजवादिदलीयैः, जनसङ्घीयैः, साम्य-वादिभिः, अन्यैश्चापि दलविशेष-निर्दलीयैः श्री प्रकाशवीर शास्त्रि - सदृशैर्नेतृभिः युक्ति-प्रमाणाभ्यां तीव्रो विरोधोऽस्य समाचरितः। येषां कृते कार्य-मिदं प्रारब्धम्, तेऽप्यनेन कियत्तुष्टा आसन् इत्यपि समासतो दर्शनीयं किल।

सर्वथा वैदेशिकांग्लभाषा-परिपोषकैः 'द्रविड मुन्नेत्र कडगम'-दलीय-संसत्सदस्यैः स्वार्थसाधने अजागलस्तनायितस्य विधेयकस्यास्य विरोधे आदित एव मतदानं निर्धारितमासीत्। तथैव तैः पूर्वतनीय-विचारविमर्शावसरे स्पष्टं विरोधमाचरद्भिर्मुखतो-ऽपि आविष्कृतम्। परमकस्मात् प्राप्ते प्रसङ्गे पूर्व-निर्णयपरिवृत्तिस्तेषामभवदिति सकृद्दर्शने नून-माश्चर्यकरम् ऐन्द्रजालिकयष्टिविलसितमिव दृश्यते। विवेचकाः पुनरत्र सर्वथा अकुतूहलिनः, विरोधे स्वीयसंविधान-राष्ट्रमर्यादामपि अतिक्रामतां किं दुष्करमिति तेषामाशयात्। समाजवादि-जन-सङ्घीय-संसत्सदस्यैर्विरोधे सभात्यागः कृत इति तेषां विरोधिमतान्यनायासं प्रतिरोधपथादपगतानि। संसदि विषयेऽत्र मतस्वातन्त्र्यं परिस्थित्यनुसारि समवलम्बितुं कृतनिर्देशैः प्रजासमाजवादिसंसत्सद-स्यैरपि अयमेव पन्थाः समाश्रितः। स्वतन्त्रपार्टी-दलीय-संसत्सदस्याः पुनर्धनपति-मुखापेक्षिणः पूर्वत एव वैदेशिकभाषा-परिपोषकाः।

कांग्रेसदलीय-संसत्सदस्येषु हिन्दीभाषि-तदि-तरप्रदेशीयैश्च संसत्सदस्यैः प्रायः सप्ततिसंख्यकैः नैकवारं विधेयकविरोधे भाषमाणैः प्रधानमन्त्रिणः समनुरुद्धा यदस्मिन् विधेयके मतप्रकाशनाय अस्मभ्यं स्वातन्त्र्यं प्रदीयन्तामिति। तैरिदमप्युक्तं पूर्वं प्रधानमन्त्रिभ्यो यद् अस्मदीयनिर्वाचनक्षेत्राभि-जनानां नैतिकः प्रभावो विधेयकविरोधाय नो बाधते। एवंस्थितौ तेषां दलस्य चान्यतरयोर्मध्ये बलादेकस्य कस्यचन निर्वाचनमस्यभ्यमनिवार्यं सम्भवेदिति। सेठ गोविन्ददास - प्रभृतिभिः तत्त्वतः पण्डां समाश्रयद्भिः इतोऽप्यग्रे गत्वा समुद्घुष्टपूर्वं यत् 'यदि नाम कथमपि विधेयकमिदं बलात् पार्येत तदाऽहमस्य वैधताविषये सर्वोच्चन्यायालये आवेदनं करिष्ये' इति। इत्थं बहवः कांग्रेसीयाः संसत्सदस्या अपि विधेयकस्यास्य परिपन्थिन आसन्। न केवलं संसद्येव, स्वीयमन्दुरायामपि कांग्रेस-संसदीय-समित्यधिवेशने डॉक्टर के० आर० वी० राव - सुचेता कृपलानी - प्रभृतिभिरस्य विरोधं समाचरद्भिः नैकानि संशोधनान्यप्यत्र प्रस्थापितानि।

सत्यप्येवं मतदानदिने तत्र गृहमन्त्रिभिः मधु-मिश्रितया वाचा वाराङ्गनायितं नृपनीतिविल-सितं विधाय विधेयकप्राणा - ऽप्रतिकूलानां संशो-धनानां स्वीकरणात्मकं बालभोग्यमिष्टं च प्रस्तूय मोहिताः सर्वे स्वात्मीयाः, 'ह्विपा'ख्यं दलीया-नुशासनात्मकं महास्त्रञ्च भयावहं दूरतः संस्थाप्य।

एवंस्थितौ केवलं साम्यवादिसंसत्सदस्यैः अन्यैश्च कैश्चन निर्दलादिपदभाजैः सदस्यैः विधेयकविरोधे

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

स्वीयानि मतानि प्रदत्तानि। अत एव सुदाम्नः शरीराणीव तानि कृशतराणि समभूवन्। शिष्टानि च सर्वाणि मायाशबलितानि मतानि विधेयकस्य समर्थने समापतितानि। इत्थं लोकतन्त्रस्य जयशब्दं विधाय परिपारितमभूत् विधेयकस्यास्य प्रथम-वाचनम्।

द्वितीयवाचन-प्रसङ्गेऽपि १५ दिनाङ्के 'द्रविड मुन्नेत्र कडगम' दलीय-संसत्सदस्येन श्री राजारामेण यादृशं मर्यादातीतं प्रादेशिकताविष-परिप्लावितं भाषणं कुर्वता शिष्टाननुगृहीतं कृत्यं समाचरितम्, भारतीय-लोकसभेतिहासे नूनं तदभूतपूर्वां घोरां वचनीयतामावहति। भाषाविधेयके कांग्रेससंसदीय-दलेन महता सङ्कोचेन भयेन च स्वीकृतानि कतिपयानि संशोधनान्यपि अहिन्दीभाषिप्रदेशीयैरेभिः सदस्यैः परया अनुदारतया प्रतिषिद्धानि। अत एव कांग्रेसदलीय-सदस्येषु पुनर्मतभेदेन पदं कृतम्। तथापि कांग्रेससदस्येभ्यो विधेयकपक्षे एव मतदानाय समादेशप्रचारणेन स निरोधितः शासनेन।

प्रत्यक्षजनमतविरोधः, छात्रविप्लवश्च

यदाप्रभृति विचारार्थमिदं प्रस्तुतम्, समस्त-भारतीयं जनमतं तादृशं प्रक्षुब्धमभवत् यादृशं वैदेशिकशासन-समये कृष्णविधेयकस्य 'रौलटा'ख्यस्य स्वीकरण-प्रसङ्गे समभवत्। १६४२ मितेशवीये वर्षे देशस्वातन्त्र्यलाभाय समुत्साहितेन राष्ट्रिय-प्रजाजनेन यादृशम् अगस्तक्रान्ति-चक्रं प्रवर्तितम्, तादृशस्य प्रकारस्य पौनरुक्त्यमत्रान्तरे दृष्टिपथ-मुपागतम्। परं लज्जास्पदमेतद् अस्माकं भारत-शासनस्य कृते यत् सर्वथा अध्ययनयोग्ये काले प्रायो मासव्यापि निखिलदेशीय-शिक्षालयमुद्रणात्मकं दुष्कृतं समापतितं विवशतः शिरसि। भारतीयाश्छात्रा एतादृशं विधेयकं कथमपि न वाञ्छन्ति। भाषानीतिविषये केन्द्रशासनस्य अदृष्टपूर्वम् अनैतिकं तर्कविरहितं प्रमाण-मर्यादापरिपन्थि वृत्तमेवात्र भारतराष्ट्रे सर्वत्र प्रसृतस्य दौर्भाग्यपूर्णस्य छात्र-विप्लवस्य मूलम्। विगते १० दिसम्बर-दिनाङ्के काशीहिन्दूविश्वविद्यालये भाषमाणैः केन्द्रीयशिक्षा-मन्त्रिभिः श्री त्रिगुण सेन महोदयैः स्पष्टमुक्तं यत 'शासनेन संविधानानुगृहीत-राष्ट्रभाषा-हिन्दीविषये विगतेषु २० वर्षेषु किमपि न कृतम्। तेन च शिक्षाक्षेत्रे महती अव्यवस्था प्रसृता। यावत् शिक्षा-माध्यमरूपेण क्षेत्रीयाः भाषा न स्वीक्रियेयुस्तावत् राष्ट्रविकासः कथमपि न भवेत्। शिक्षाविभागीय-राज्यमन्त्रिभिः श्रीभागवत झा 'आजाद' महोदयैरप्येकस्मिन् विस्तृते निबन्धे सप्रमाणं भारतीयशिक्षायाः माध्यमभाषाविषयकोऽद्यावधिक इतिहासः प्रस्थापितः। तेनाऽपि सुस्पष्टं जायते यत् सुदृढं संविधानानुगृहीताया राष्ट्रभाषायाः समुचित-सक्रिय-रूपेण आदराभावेन सङ्कुचित-स्वार्थसाधकानां भयेन कूटनीतिज्ञानां राष्ट्रद्वेषिणां दुरभिसन्धिना च वशीभूतेन केन्द्रशासनेन भारतीयशिक्षा-व्यवस्थाया माध्यमभाषाविषये बहु प्रमदितम्, यस्य साक्षादभिशापो विद्यार्थिषु एव प्रतिफलितः। एवंस्थितौ शासनस्य एतादृशचिरसमादृतस्य राष्ट्र-घातक-कार्यक्रमस्य वैधानिकता-साधकेऽस्मिन् विधेयके ते किमपि अभियानादिकं कुर्युश्चेत्तदा तेषां को दोषः? वस्तुतः शासनस्य एतादृश्या अस्थिरावसरवादिन्या नीत्या आत्मघातस्तेषामेव विद्यार्थिनां जायते।

अवश्यमेव तैरेतदर्थम् अहिंसकं महाभियानं करणीयम्, न हिंसकं राष्ट्रियसम्पत्ति-विध्वंसकञ्च।

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

परं ते किल अपरिपक्वबुध्दयः कपिकल्पाः। अत्रापि प्रथमो दोषः शासनस्यैव निःसङ्कोचं वक्तुं शक्यः। तथापि छात्राणामेतादृशी उत्पातकरण - प्रवृत्तिर्न समर्थनीया, न वा राष्ट्रहितकारिणी। अद्यापि तेषामियं प्रवृत्तिर्न प्रशमं गतेति दृश्यते। ते वदन्ति—'राष्ट्रपित्रा हिन्दीराष्ट्रभाषायां शीघ्रातिशीघ्रं सर्वकार्यकरणस्य आश्वासनमेव, नहि नहि, आदेशोऽपि दत्त आसीत्। तमवज्ञाय वर्तमानप्रधानमन्त्री स्वपितुराश्वासनं चरितार्थयितुमेतादृशजनक्षोभाधानतोऽपि अबिभ्यत् पितृनिष्ठां पूरयितुम् अभूतपूर्वमुत्साहं प्रदर्शयति, किमतः परं विधुरम्? नूनं प्रथमतस्तु राष्ट्रपितुरेव आश्वासनं आदेशश्च पूरयितव्यौ। तत्पूरणाय विगतं १९४२ वर्षीयं महाभियानं पुनरावर्तयितुमावश्यकं भवेत्तदा ततोऽपि विमुखा न भविष्यामः' इति। देशस्य सुरक्षा-हितदृष्ट्या विधेयकस्यायं कियान् तीव्रतरोऽभिशापः! भगवानेव अनेन सङ्कटेन देशं परिपातु इत्येवात्र विषये वक्तव्यं भवति।

अन्ततः पारितं विधेयकम्

अन्ततः दिसम्बरमासस्य १६ दिनाङ्के सायङ्काले सप्तदिवसव्यापिनो वाक्सङ्घर्षस्य पश्चात् लोकसभया विधेयकमिदं संशोधितरूपेण ४१ मतविरुद्धं २०५ मतैः पारितम्। विधेयकसम्बद्धः शासकीयः सङ्कल्पोऽपि कतिपयैः शाब्दिकपरिवर्तनैः सह ध्वनिमतद्वारा सदनेन स्वीकृतः। विधेयके पश्च सङ्कल्पे च त्रीणि संशोधनानि, श्री सुचेता कृपलानी द्वारा प्रस्तुतानि, शासनेन स्वीकृतानि। स्वराष्ट्रमन्त्रिणा सङ्कल्पस्वीकृतेः पूर्वमिदमपि घोषितं यदागामिवर्षे अक्तूबरमासतः सङ्घीय-लोकसेवाऽऽयोगपरीक्षाः कतिपयासु भारतीयभाषासु भविष्यन्ति।

इत्थं पारितविधेयकस्यकतिपया उल्लेख्याः विशेषता इत्थम्—

१. केन्द्रीयसेवासु हिन्दीभाषाया आंग्लभाषायाश्च ज्ञानमनिवार्यं भवेत्।

२. केन्द्रेण सह पत्राचारे हिन्दीपत्रेण सह आंग्लभाषीयस्तदनुवादोऽप्यावश्यक एव।

३. हिन्दीभाषिराज्यानि हिन्दीराज्यैः सह हिन्दीभाषायां पत्राचाराय प्रभूनि।

४. अहिन्दीभाषिराज्यैः सह हिन्दीभाषया पत्राचारेण सह आंग्लभाषायां तदनुवादसंयोजनमनिवार्यम्।

५. आगास्यक्तूबरमासतः कतिपयासु क्षेत्रीयभाषासु सङ्घीय-लोकसेवायोगस्य परीक्षाः प्रभविष्यन्ति।

अन्यपरिवर्तनेषु मुख्यं परिवर्तनद्वयं पत्राचारविषये इत्थम्—"१. हिन्दीभाषिकं राज्यम् अहिन्दीभाषिकराज्येण सह हिन्दीपत्रव्यवहारं कामयते तदा तस्य कृते आंग्लभाषायां तदनुवादोऽनिवार्यतया निर्धारितः। स च प्रामाणिकोऽपि मन्येत। हिन्दीराजभाषीयराज्यैः सह पत्राचारे नेदं बन्धनं भवेत्। २. पत्रव्यवहारे आंग्ल-हिन्दीभाषिकानामनुवादानां व्यवस्था तावत्कालं प्रचलिष्यति यावत् सम्बद्धकार्यालय-कर्मचारिणो हिन्दीभाषायाः कार्यक्षमं ज्ञानं नासादयिष्यन्ति। आंग्ल-हिन्दीभाषयोरन्यतरां भाषां जानन् शासकीयः कर्मचारी प्रशासनकार्यं विधातुं प्रभुरि"ति। सङ्कल्पे च संयोजितस्य संशोधनस्यायमाशयो यत् केन्द्रीयसेवासु हिन्दीभाषाया आंग्लभाषाया वा ज्ञानमनिवार्यं भवेदिति।

स्वीकृते विधेयके सङ्कल्पे च दक्षिणाभिजनेभ्यो निश्चितमाश्वासनमस्ति यत् आंग्लभाषायाः केन्द्रीय-

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

भाषात्वं तावत् सुस्थिरं स्यात्, यावत् तत्परित्याग-निर्णयः सर्वैः अहिन्दीक्षेत्रीयैः विधानमण्डलैर्न क्रियेत। नैतावन्मात्रम्, एतानि विधानमण्डलानि तथा कामं स्वीकुर्वन्तु, तथाप्यस्याः परित्यागस्तदैव भवेत् यदा संसद उभय-सदनयोः विषयेऽत्र पृथक्-पृथक् प्रस्तावाः पारिता भवेयुः।

सन्दर्भेऽस्मिन् गृहमन्त्रिणा उक्तं यत् विधेयके स्वीकृते इतः परं सदनात् बहिरत्र वा विषयेऽस्मिन् विरोधस्य सर्वमप्यभियानं शाम्यतु। भाषाविषये विवादः कथमपि शोभनो न भवेदिति।

> विधेयकस्य मुख्य - विरोधि - सदस्यैः कांग्रेसदलीयैः सेठ श्री गोविन्ददास महोदयैरुक्तं यत् 'विषयेऽत्र स्वदले नूनमहमेकाकी विश्वकवे रवीन्द्रनाथस्य 'एकला चलो रे' (एकाकी चल रे) गीतस्य विषयो जातः। सिद्धान्तप्रियोऽहम्। नूनममुं विधेयकं सर्वथा संविधान-विरुद्धमेवाऽनुभवामि।'

विधेयकस्वीकृत्यनन्तरं जनसङ्घ-समाजवादि-सदस्यैर्बहिर्गमनं कृतं संविधानविरुद्धविधेयकस्यास्य विरोधे। 'द्रविड मुन्नेत्र कडगम' - सदस्यैरपि बहिर्गमनं कृतम्। तेषां विरोधस्य अयमेव आशय आसीत् यत् विधेयके संशोधनेन तस्य मौलिकं स्वारस्यमेव व्याहतं जायत इति।

जनतन्त्रं जनप्रवञ्चनं वा ?

इत्थं राजभाषा-संशोधन-विधेयकमाश्रित्य प्रायो विंशतिदिनैर्देशे प्रचलितस्य व्यापकतम-काण्डस्य प्रथमः पटाक्षेपो जातः। २२ दिसम्बरदिने राज्यसभायामिदं विचारोत्तरं पारितमपि। काण्डमिदं समाप्तमिति कथनन्तु साहसमात्रं भवेत्, यतो हि वर्तमानशासनेन वैदेशिकशासन-दायादभूतेन अस्य विधेयकस्य स्वीकरणे स्वकीयादर्शभूतानाम् आंग्ल-प्रभूणामेव सर्वथाऽनुकरणं कृतम्। तत्र अन्तरमेतदेव यत्ते वैदेशिका अलोकतान्त्रिक-पद्धत्या तथा कुर्वन्त आसन्। एतच्छासनं पुनरत्र स्वदेशीय-तथाकथित-लोकतन्त्रपद्धत्या करोति। दमनं पुनः शान्ति-स्थापननाम्ना उभयत्र समम्।

सर्वे जानन्ति, साम्प्रतिके निर्वाचने जनमतस्य वास्तविकं प्रतिनिधित्वं कियद् भवति समुचित-शिक्षाविहीनस्य विविधाऽभावाऽसुविधादिभिः परि-पीडितस्य जनता-जनार्दनस्य ? ततः परं शासन-सङ्घटनाय कीदृशं लज्जालु-लतायितं बहुमतमेकत्री-क्रियते साम्प्रतम्, तदपि नापरोक्षं विवेचकानाम्। विषयविशेषस्य स्वीकृत्यस्वीकृतिविषये तच्छासनं तथाकथित-लोकनिर्वाचितानां बहुमतं स्वाभिलषित-विषये यथाऽनुकूलयति, तदपि हस्तामलकायितम्। स्वदलीय-सदस्यानां स्वतन्त्रविचारशक्तेर्निर्दलनाय दलीयमनुशासनं ह्विपादेशश्च सुरसा-वदनवत् शिष्टस्यापि लोकतन्त्रस्य लघुतर-तनोः निगीरणाय अनावृतमुखः तिष्ठत्येव। एवंस्थितौ सर्वसाधारण-जनजीवनविषयके विषये एतादृशं संसदीयं बहुमतं प्रदर्श्य पारितं विधेयकं वास्तविक-जनमतस्य पुरतः कियन्मूल्यं बिभर्तीति तटस्था एव विदाङ्कुर्वन्तु। यदि शासनमेतादृशं कार्यं राष्ट्रहितकर-मेव मनुते, वास्तवं जनमतं च भ्रान्त्या तत्परिपन्थि, अथापि अलौकिकदेशप्रेम्णा तेषां चेतो द्रवते, तदा तथाकथितं लोकतन्त्रं दूरे संस्थाप्य स्वीयेन अधि-नायकतन्त्रेणैव तत्पारयितव्यम्, तदैव **सत्यमेव जयते नानृतम्** भवेत्। इतरथा तज्जनप्रवञ्चनमेव भवेत्। प्रवञ्चितो जनो यदा उद्बुद्धो भवति, परकृतं स्वात्मनः प्रवञ्चनमवगच्छति, तदपसारयितुञ्च

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

प्रभवति, तदा कथं नाम स तन्मौनेन साक्षिरूपतया वा स्वीकर्तुं शक्नुयात् ? तदा किल मुष्टिमेयैः शासकैः किं क्रियेत ? सन्दर्भेऽस्मिन् राजमार्गस्तु अयमेव यज्जनमतस्य एतादृशं प्रातिकूल्यं निरीक्ष्य शासनेन तद् व्यक्तिशो जनमतसङ्ग्रहाय प्रचारणीयम्। प्रत्यक्षं बहुजनमतमत्र मिलति चेत्तदेव कालान्तरेण स्वीकरणीयम्। एवं कामं सदाशयवदपि शासनं लोकमत-हनन-कलङ्केन अद्य इव कदापि कलङ्कितं भवितुं न शक्नुयात्।

केन्द्रे सक्रियं हिन्दीप्रतीपं कूटचक्रम्

इत्थं विस्तृतविवेचनेन लेखारम्भे विधेयकविषयेऽस्माभिर्यदुक्तं 'कार्यमिदं लोकतान्त्रिकताचर्मपरिच्छिन्नमपि सर्वथा तत्प्रतीपायितमेवे'ति, तत्कियदंशैः सत्यमित्यस्य सुस्पष्टः प्रत्ययो भवेत्।

प्रत्यक्षं लोकतन्त्रविरुद्धमेतद् विधेयकं संविधानप्रतिकूलमपि, राष्ट्रपितुः महात्मगान्धिनोऽभिमतेनापि प्रतिकूलम्। एतद्धि तेषां विविधसन्दर्भेषु समुद्धृतैः वाक्प्रबन्धैरेव स्पष्टम्। नात्र तद्विवरणस्य पदम्। संविधानप्रतिकूलताऽस्य संसदि आचार्यकृपलानी-प्रकाशवीरशास्त्रिप्रभृतिभिर्नेतृभिः सुस्पष्टं प्रकटीकृता।

संविधानेन 'क्रमशः पूर्णतो विकासं प्रापय्य १९६५ खिृष्टाब्दे सर्वशः राष्ट्रभाषापदे हिन्दी प्रतिष्ठापनीये'ति समादिष्टम्। तदनुसारं क्रमशः द्वित्रविषयेषु केन्द्रीयशासनस्य कृते हिन्दीभाषायाः प्रयोगः करणीय आसीत्। एवं कृतं स्यात्तदाऽद्यावधि महत्त्वपूर्णानि ४० विषयाणि हिन्दीभाषायां प्रचलितानि स्युः। शपथग्रहणकार्यन्तु हिन्दीभाषया सम्पद्येत चेत्तेन न कोऽपि महानर्थो भविष्यति। परं तदपि न कृतम्। प्रत्युत दृश्यते, केन्द्रीयशासने संविधानसम्मतस्य विधानस्यास्य हननायैव सुसङ्गठितो कूटयत्नः प्रचलति। नो चेत् कथं प्रथमराष्ट्रपतिभिः प्रस्थापितस्य हिन्दीभाषया शपथग्रहणस्य संसदः संयुक्तसदन - समक्षं हिन्दीभाषया अभिभाषणस्य च आदर्शः तत्परतरे राष्ट्रपतिभिः खण्डितः ? १९६० खिृष्टाब्दे तेनैव राष्ट्रपतिना सत्रारम्भभाषणे १९६५ वत्सरानन्तरमपि आंग्लभाषायाः सहभाषात्वेन प्रतिष्ठापनस्य घोषणा कथं कृता ?

चीनराष्ट्राक्रमणात् पूर्वमेव एकेन संशोधनेन एतत्कार्यं कृतं शासनेन। चीनाक्रमणेन तदा तस्य तावान् विरोध असामयिक आसीत्। पुनः शास्त्रिप्रधानमन्त्रित्व - काले राजभाषा-संशोधन-विधेयकं स्वीकृत्य आंग्लभाषाया अनिश्चितकालं स्थितिः सुस्थीकृता। किमेतत्सर्वं संविधाना-ऽऽदेशानुकूलम्? द्वित्रराज्यानां विरोधं गणयित्वा शिष्टानां राज्यानां बहुमतस्य अपमानकारिणा एतादृशेन विधेयकेनापि किं संविधानादेश-पालनं क्रियते साम्प्रतिकेन लोकतान्त्रिकेन शासनेन ?

अन्यच्च, पूर्वतन-राजभाषा-संशोधन-विधेयकस्य सत्त्वे तेनैव कार्यनिर्वाहे इदमपरं विधेयकं प्रस्तोतुः शासनस्य कियती संविधाननिष्ठा ? अनेन विषयजातेन सुस्पष्टमेतद्, विधेयकं लोकतन्त्रजीवातुहरमेव, केन्द्रीयशासनमेव तादृशं कूटचक्रं परिचालयति च।

सर्वथा भारतीय-संस्कृतिपरिपन्थि

इतः परं भारतीयसंस्कृतिपरिपन्थि एतदित्यपि समासतो विलोकयन्तु। भारतदेशो नाल्पकालिकः। अस्य चिरन्तनी संस्कृतिस्तदाप्रभृत्येव जगति सर्वपूर्णा वेदेषु विलसन्ती दृश्यते, यदा किल शिष्टानां साम्प्रतिकानां संस्कृतीनां जन्माऽपि नाभवत्। संस्कृतेर्वाहनं भाषा। सा यदि विषमा वैदेशिक-

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

संस्कृतिवाहिका भवेत्तदा गर्तं गता भारतीय-संस्कृतिः। भारतीयानां सर्वमपि आजन्म-मरणकृत्यं सुसंस्कृतं जायते। तेनैव तत्र भावः परिस्फुरति। **भावे हि विद्यते देवः**, द्योतनात् देव इति च तन्निरुक्तः। सौभाग्यादेतादृशी भाषा अस्माकं देववाणी संस्कृतं वर्तते, यत्र यथोच्चारणो यथारूपो यथाकारोऽर्थरूप आत्मा परिस्फुटति। सा किल सर्वासां भाषाणां जननी, विशेषतो भारतेरानी-परिवारे परिगणितानां भाषाणाम्। अद्यावधि धार्मिकेषु जन्मत आमरणम् इयमेव धार्मिक-संस्कारविधिषु व्यवह्रियते।

नेयं 'विघटय शासनं कुर्वतां' भाषा। **अमृतस्य पुत्राः** इत्युक्त्वा सर्वान् सङ्घटय्य शाश्वतिकमात्म-स्वातन्त्र्यं यच्छताम् ऋतम्भरा-प्रज्ञावतां भाषा। अयं भारतस्य वास्तविको निधिः। अनेनैव राष्ट्र-मिदं सर्वविध-लौकिकसाधन-सम्पन्नेषु विश्वराष्ट्रेषु स्वीयमनन्यसाधारणं वैशिष्ट्यं बिभर्ति। वस्तुत एतादृशी भाषैव स्वतन्त्रभारतस्य राष्ट्रभाषापदे समभिषेकमर्हति। परं संविधाननिर्मातृ-परिषदा बहुजनसुलभ-भाषारूपेण अस्यास्तनूजा राष्ट्रभाषा-त्वेन वरणाय पुरः समुपस्थापिता, तदा परहित-साधनैकव्रतया देववाण्या स्वगौरवलालसां मोहञ्च समावृत्य दुहित्र्याः संवर्धने पोषणे विकासे चैव स्वीयं सर्वं बलं नियोजयितुं निर्ध्यातम्। परमद्य तस्या एव दुहितुरित्थमवज्ञां कृत्वा आत्मनोऽपौरुषमेव पौरुषं मन्यमानं वैदेशिकया गले पतदस्माकं शासनं क्रमशश्च भारतीयसंस्कृतिरत्नेभ्यो दारिद्र्यं भजत् आत्मनो दीनतां हीनतां ख्यापयितुं प्रभवतीति किं स्वल्पतमं संस्कृतिपरिपन्थित्वं उच्येत ?

क्व ते 'स्वदेशी' धर्मो गतः ?

स्वातन्त्र्यसङ्ग्रामकाले अस्माकमाग्रह आसीद् यत्स्वदेशी-धर्मस्य सर्वेषु क्षेत्रेष्वनुष्ठानं विधेयमिति। तदर्थं विदेशी-वस्त्राणां होलिकादाहः क्रियते स्म। गुरुदेव-रवीन्द्रनाथ टागोर-महोदयेभ्य इदमनुचित-मसहिष्णुतात्मकं प्रतीतम्। तदा महात्मगान्धिभि-रुक्तम्–'एतत् स्वदेशी-वस्त्रपरिधानस्य प्रतीकात्मकं कार्यम्, नात्र कस्याप्यन्यस्य असहिष्णुता वर्तते' इति। अर्थात् शास्त्रभाषया **नहि निन्दा निन्दितुं क्षमा अपि तु स्तव्यं स्तोतुम्** इति। तात्पर्यमेतद्यत् एतादृशंकठोरं स्वदेशी-व्रतं स्वातन्त्र्यकाले अनुष्ठित-वता भारतराष्ट्रेण परकीयदासतायाः प्रतीकरूपया 'मेकाले' महाशयस्य शब्देषु आंग्लसाम्राज्यस्थापनस्य सुदृढ-शाश्वत-मूलभूतया भाषया इयती ममता ! स्वतन्त्रराष्ट्रजनानामेतावान् मोहो नूनं महद्वैरस्यं घोरामसांस्कृतिकतां प्रतिगामितां च दर्शयति।

हिन्दी सन्तभाषा, न प्रादेशिकी

हिन्दीभाषैव देवभाषातः परमद्वितीया भारतीय-संस्कृतेर्वाहिका भाषा। स्पष्टत इयं भारतीय-सन्तसमाजेन महता प्रेम्णाऽनुगृहीता। तेषामेव समुदारानुग्रहेण आसेतुहिमाचलमियं प्रसृता, प्रति-शतं ९८ संख्यकैर्भारतीयैरियं समादृता। भारतीय-सांस्कृतिकतत्त्वानां वास्तविकं रूपमशेषतोऽभि-व्यञ्जयन्ती भाषेयं नूनं भारतीयसंस्कृतेः श्रद्धा-बिन्दुरूपा। अत एव सर्वथा राजनीतितो-ऽसंपृक्तानां सर्वश्री महादेवी वर्मा - माखनलाल चतुर्वेदी - सुमित्रानन्दन पन्त - वृन्दावनलाल वर्मा - सत्यनारायणशास्त्रि कविराज - प्रभृतीनां हिन्दी-संस्कृतवाङ्मयस्य मूर्धन्यविदुषां चेतस्सु केन्द्रीय-शासनस्य अनेनोपक्रमेण महती पीडा समभूत्। अत एव तैरस्य विरोधे भारतशासनद्वारा प्रदत्तायाः सम्मानितपदव्याः अलङ्करणस्य त्यागः कृतः। अने

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

नैव हिन्दीभाषाया भारत-सार्वभौमत्वं यथार्थतः संस्कृति-मानबिन्दुत्वञ्च स्फुटीभवति।

एतेन 'हिन्दी उत्तर-हिन्दुस्थानस्य भाषा, तया च हिन्दी-साम्राज्यवादः प्रस्थाप्यते' इत्यादि वदन्तः परास्ताः। सत्यप्यस्मिन् सूर्यप्रकाशवत् स्फुटे तथ्ये 'विधेयकमिदं उभयोर्भाषयोः सामञ्जस्य-स्थापनस्य श्रेष्ठतम उपायः, दाक्षिणात्यानामुपरि बलात् हिन्दी नापादनीया' इत्यादिवचनपुरस्सरं सर्वहितसाधनवेद्यां स्वजनहितबलिं दातुं गृहीतमहोदारता-ऽवताराणां चार्वाकजालं नातिश्रद्धेयतां भजते। तैर्यद्यत्र मौनमेव आश्रीयेत तदातितरां शोभनं स्वसम्मानरक्षकं च स्यात्।

न केवलं भारते, विभिन्न-देशेष्वपि सर्वत्रैव तत्तद्देशीयजनभावनाः साक्षात्कारयन्ती भाषैव अविकसिताऽपि तत्रत्यैः राष्ट्रभाषात्वेन आश्रित्य विकासं नीयते इत्यपि न विस्मरणीयम्। लैटिन-फ्रेञ्चादिसदृशा अतिविकसिता भाषाः परित्यज्य अविकसिता विशेषप्रकारिका स्काटभाषैव जनभाषात्वेन स्काटदेशीयैरवलम्ब्यते, अत्राप्ययमेव हेतुः। सन्त्येतादृशानि बहूनि उदाहरणानि। अतो हिन्दीभाषाया कीदृशमप्युपेक्षणं सर्वथा भारतीय-संस्कृतिपरिपन्थि एव।

सर्वथा असामयिकम्

राजभाषा - विधेयकस्य असामयिकत्वविषये किमु वक्तव्यम्? अद्य खलु सामान्यजन-जीवनयात्रा-निर्वाहिकानां वस्तूनामपि घोरं दारिद्र्यं देशे दृश्यते। समुचित - प्रावरण - निवासौषधमपि दुर्लभं जायते। महर्घतया प्राणोत्क्रमणमिव जायते भारतीयजन-साधारणस्य। एवंस्थितौ एतादृश-विधेयकस्य काऽऽवश्यकता इत्येव वयं न विद्मः। अन्यच्च, पूर्वतनीय-राजभाषाविधेयकस्य व्याप्तिरद्यापि वर्तत एव। स्वभावत एव जनैरत्यावश्यकानि नैकानि कार्याणि आंग्लभाषया सम्पाद्यन्ते। दाक्षिणात्यानां क्षेत्रीया भाषा अपि क्रमशः पठ्यन्त एव उत्तर-भारतीयैः। प्रतिवेशिनामाक्रमणस्य भयं सदैव शिरसि खड्गायितम्। एवंस्थितौ कतिपयदाक्षिणात्यानां मनस्तोषाय क्रियमाणमिदं कार्यं कीदृशं महर्घं भवेदित्यत्र किं शासनेन कदापि विचारितम्?

भक्षितेऽपि लशुने न शान्तो व्याधिः

किमेवंस्थितावपि एतादृशाग्रहे 'विभज्य शासन-स्थैर्यात्मिकाया' आंग्लशासकानां नीतेरेवानुकरणं तु न क्रियते? सुदृढं ध्येयं यदेतादृशेन प्रयासेन ते नैव तुष्टा भवेयुः, भक्षितेऽपि लशुने न शान्तो व्याधिः। प्रत्युत अनपेक्षित - महत्त्वदानं राष्ट्रघातकाग्रहकारिणामेतादृशमत्यनुचितं संविधानद्रोहि-प्रोत्साहनं भस्मासुरायितमेव शासनस्य भवेदित्येव शङ्क्यते। स्वभावतः अधिकांशतो दाक्षिणात्याः प्रजा अपि हिन्दीराष्ट्रभाषां समनुगृह्णन्त्येव। शासने तेभ्यः समुचितं प्रातिनिध्यमपि दीयत एव। सत्येवमेतादृश-दक्षिणोत्तर-जनक्षोभ-जनलोभवर्धकं कार्यं कथमपि समर्थनीयं न भवति।

हिन्दीप्रणयिनां कर्तव्यम्

तथापि शासनेन तत्पारितमेव। इतः परं वस्तुतो राष्ट्रहितचिन्तकानां हिन्दीराष्ट्र- भाषा-समादरकर्तॄणामिदं सुदृढं मतं यत्स्वीकृतमपि विधेयकं शारदाविवाह-नियमादि (शारदा एक्ट) सदृशमेव कार्यविधौ व्यर्थतां नेयम्। उत्तरप्रदेश-

[शेषांशः ३३५ पृष्ठे]

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

पुरुषसूक्त-देवीसूक्तयोः परमं तात्पर्यम्

—श्री पूज्य करपात्रस्वामिनः—

तं यज्ञं बर्हिषि प्रौक्षन् पुरुषं जातमग्रत।
तेन देवा अयजन्त साध्या ऋषयश्च ये॥
(ऋ० सं १०.९०.७)

अर्थः—तं यज्ञं बर्हिषीति। तदेत्यध्याहार्यम्। तदा तं ब्रह्माख्यं यज्ञम्। यजन्त्यनेनेति यज्ञः, यजनीय-हवीरूपमित्यर्थः। बर्हिषि प्रकृतौ। निधायेत्यध्या-हार्यम्। प्रौक्षन् प्रोक्षणसंस्कारमकुर्वन्, द्रव्यत्याग-योग्यतापादकान् प्रोक्षणोपस्तरणाऽवदानाऽभि-घारणादिसंस्कारान् अकुर्वन्नित्यर्थः। अग्रतः=स्थिर-तरसृष्टेरग्रतः, जातमुत्पन्नम्। तेन पश्वादिसृष्टेः प्रागेवायं यज्ञः प्रवृत्तः, ततो मानसमेव सर्वमक्रियत। तेन ब्रह्मरूपेण हविषा। देवा इन्द्रियाणि। अयजन्त यागमकुर्वन्। अनिरुद्धाग्नौ ब्रह्मरूपं हविः प्रक्षिप्त-वन्तः आत्मसमर्पणं कृतवन्तः। साध्याः कर्म-साधनानि वागादीनि। ऋषयः ज्ञानसाधनानि चक्षुरादीनि।

एतस्मिन्नर्थे पुरुषसूक्त-व्याख्यानभूतं शाकल्यब्राह्मणञ्च उदाहरन्ति—'तस्मात् नारायणात् मूलप्रकृतिरजायत। सा प्रकृतिः पादनारायण-शासनात् महदहङ्कारादीन् सूक्ष्मान् पदार्थानजनयत्। एवं सूक्ष्मायां सृष्टौ कृतायां स पादनारायणः स्थूलसृष्टचर्थं चतुर्मुखं पुरुषमभिदध्यौ। तद्ध्यानात् पश्चात् पुरुषश्चतुर्मुखाख्योऽजायत। स जातो भूमेः पश्चात् पुरतश्चातिरिच्यत, सर्वकार्यक्षमो वृद्धकायः सन् पुरुषस्तूष्णी-मास। तमनिरुद्धनारायणोऽप्राक्षीत्—ब्रह्म त्वं तूष्णीं भवसीति? अज्ञानादिति होवाच। ब्रह्मंस्तवेन्द्रियाणि देवान् ऋत्विजः कृत्वा त्वदीयञ्च कलेवरं हविः कृत्वा मां हविर्भुजं ध्यात्वा मय्यग्नौ निवेदय। मदङ्गस्पर्श-मात्रेण जगत्कोशभूतस्त्वत्कायो बृंहिष्यते। तस्मादुद्भूतानि प्राणिजातानि यथापुरं निर्माय स्रष्टा भविष्यसि। य एवं सृष्टियज्ञं जानाति स जन्मनीह मुक्तो भवति' इति।

यज्ञं यज्ञसाधनभूतं तं पुरुषं पशुत्वभावनया यूपे बद्धम्। बर्हिषि मानसे यज्ञे। प्रौक्षन् प्रोक्षितवन्तः। कीदृशम्? अग्रतः सृष्टेः प्राग् जातम्, पुरुषत्वेन उत्पन्नम्। 'तस्माद्विराडजायत विराजोऽधि पूरुषः' इत्युक्तत्वात्। तेन पुरुषरूपेण पशुना, देवाः अयजन्त मानसं यागं सम्पादितवन्तः। के ते देवाः? साध्याः सृष्टिसाधयोग्याः प्रजापतिप्रभृतयः। तदनुकूलाः ऋषयो मन्त्रद्रष्टारश्च ते सर्वेऽप्यजायन्त इति॥७॥

तस्माद्यज्ञात् सर्वहुतः संभृतं पृषदाज्यम्।
पशूंस्तांश्चक्रे वायव्यानारण्यान् ग्राम्यांश्च ये॥
(ऋ० सं० १०.९०.८)

अर्थः—तस्माद्यज्ञात् सर्वहुत इति। तस्मात् आत्मसमर्पणरूपेण यज्ञेन आराधितात् पुरुषात् लब्धसृष्टयनुकूलज्ञानशक्त्यादिकः चतुर्मुखो यथापूर्वं जगत् ससर्ज। सर्वं जुहोतीति सर्वहुत्, तस्मात्।

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

सर्वं भगवते हुतवतः स्वीयसर्वभारं भगवते समर्पितवतस्तस्मात्। अथवा कौस्तुभस्थानीयस्य जीवात्मनोऽत्युत्तमतया तमेवानर्घतमं स्वात्मानं समर्पितवताऽनेन। सर्वं समर्पितप्रायमिति सर्वहुत्। यद्वा—सर्वशब्दवाच्यो भगवान् तस्मै जुहोतीति सर्वहुत्, भगवदुद्देश्यका-ऽऽत्मसमर्पणरूप - यज्ञकृत्। यज्ञात् यजनीयात्। तस्मात् चतुर्मुखात्। पृषदाज्यं दधि-मिश्राज्यस्थानीयतत्तद्विचित्ररूपं सृज्यवस्तु-जननहेतु शुक्ल-नीलादि। संभृतम् = उत्पन्नम्। यदा त्विदं वाक्यद्वयं न जगत्सृष्टिपरं तदा सर्वहुतः सर्वहोमाधिष्ठानभूतात् पृषदाज्यं सम्भृतम्।

यद्वा—सर्वं हूयतेऽस्मिन्निति व्युत्पत्त्या सर्वहुत् नारायण एव। सर्वाय हूयतेऽस्मिन्निति व्युत्पत्त्या तु तादृशयज्ञपरः। तस्मात् तादृशाद्यज्ञात् यज्ञार्थप्रयोजनस्य हेतुत्वविवक्षया पञ्चमी, अध्ययनाद् वसतीतिवत्। पृषदाज्यं दधि-मिश्राज्यं सम्भृतं कल्पितम्। वायव्यान् वायुमार्ग-चरणशीलान् पक्षिरूपान्, पशून् चक्रे। आरण्यान् अरण्ये भवान्, ये ग्राम्या ग्रामे भवास्तान् च चक्रे। तथा च विष्णुपुराणे प्रथमांशे पञ्चमाध्याये 'गौरजः पुरुषो मेषश्चाश्वाश्वतरगर्दभाः। एतान् ग्राम्यान् पशूनाहुरारण्यांश्च निबोध मे॥ श्वापदा द्विखुरा हस्तिवानराः पक्षिपञ्चमाः। औदकाः पशवः षष्ठाः सप्तमाश्च सरीसृपाः' इति।

सर्वहुतः सर्वात्मकः पुरुषो यस्मिन् यज्ञे हूयते सोऽयं सर्वहुत्। तादृशात् तस्मात् पूर्वोक्तात् मानसात् यज्ञात् पृषदाज्यं दधिमिश्रमाज्यं सम्भृतं सम्पादितम्। दधि चाज्यञ्चेत्येवमादि भोग्यजातं सर्वं सम्पादितम्। तथा वायव्यान् वायुदेवताकान् लोकप्रसिद्धान् आरण्यान् पशून् चक्रे उत्पादितवान्। आरण्या हरिणादयः, तथा ये च ग्राम्या गवाश्वादयः, तानपि चक्रे। पशूनामन्तरिक्षद्वारा वायुदैवत्यत्वं यजुर्ब्राह्मणे समाम्नायते—'वायवः स्थेत्याह। वायुर्वा अन्तरिक्षस्याध्यक्षः। अन्तरिक्षदेवत्याः खलु वै पशवः। वायव एवैनान् परिददाति' (तै० ब्रा० ३.२.१.३) इति॥ ८॥

तस्माद्यज्ञात् सर्वहुत ऋचः सामानि जज्ञिरे।
छन्दांसि जज्ञिरे तस्माद्यजुस्तस्मादजायत॥
(ऋ० सं १०.९०.९)

अर्थः—तस्माद्यज्ञात्सर्वहुत ऋच इति। तस्मात् चतुर्मुखात् ऋच एकविंशतिशाखाः, सामानि सामवेदाः सहस्रशाखाः, जज्ञिरे तत्सर्गीयप्रथमोच्चारण-विषयत्वरूपाम् उत्पत्तिं प्रापुः। तस्मादेव छन्दांसि गायत्र्यादीनि, यजुः नवाधिकशतशाखो यजुर्वेदः, अजायत। इतरसापेक्षोच्चारणेषु प्राथमिकत्वस्य विवक्षितत्वादेव तत्सर्गीय - प्रथमोच्चारणविषयतैव उत्पत्तिः।

तत्सर्गीय-प्रथमोच्चारण-विषयत्वरूपा उत्पत्तिरेव सृष्टिः। तेन वेदानां तत्सर्गीयचतुर्मुखकर्तृकप्राथमिकोच्चारणविषयत्वरूपं चतुर्मुखजन्यत्वमपि यद्यपि न सम्भवति; तथापि इतरसापेक्षोच्चारणेषु प्राथमिकत्वस्य विवक्षितत्वान्न दोषः। तस्मात् परमपुरुषाद्वा वेदानां तादृशोत्पत्तिः। तस्यैव चतुर्मुखं प्रत्युपदेष्टृत्वात्। प्रवाहानादित्वञ्च स्वसमानजातीय-शब्दासमानकालीन - प्रागभावाप्रतियोगित्वम्। तादृशध्वंसाप्रतियोगित्वञ्च प्रवाहनित्यत्वम्। स्वसमानजातीयत्वञ्च स्ववृत्त्यानुपूर्वीवत्त्वरूपम्। तत्तदुच्चारणभेदेन आनुपूर्वीभेदे तु स्ववृत्त्यानुपूर्वीसजातीयानुपूर्वीवत्त्वमेव साजात्यम्। सर्वहुतः, तस्मात् पूर्वोक्तात् यज्ञात् ऋचः सामानि जज्ञिरे उत्पन्नाः। तस्मात् छन्दांसि गायत्र्यादीनि जज्ञिरे। यजुरपि अजायत॥९॥

(क्रमशः)

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

मानस-भारती : देवगिरा गुम्फितं मानसम्

--श्री जनार्दन गङ्गाधर रटाटे--
[बी. ए. साहित्याचार्यः]

भ्रात्रे दत्त्वा निवापं स तीरेऽब्धेः प्राह वानरान् ।
हे कीशवीराः शृणुत तरुणावेकदा स्थितौ ॥
आवां बन्धूड्डयन्तौ तु यातौ खे निकटं रवेः ।
असहन् स परावृत्तः सूर्यतेजोऽनुजो मम ॥
अहं तु गर्वी निकषा दग्धपक्षोऽतितेजसा ।
चीत्कृत्य घोरं पतितः कौ पुरश्चन्द्रमो मुनेः ॥
वीक्ष्य मां स दयार्द्रः सन् ज्ञानमाश्रावयद् बहु ।
देहाध्यासञ्च मे हृत्वा पुनर्मामित्थमब्रवीत् ॥

त्रेतायामीश्वरो ब्रह्म भाति मानुषदेहधृक् ।
ज्ञातुं रक्षोहृतां भार्यां स दूतान् प्रेषयिष्यति ॥
लब्ध्वा तान् पक्षयुक् पूतो भविष्यसि पुनः खग ।
तेभ्योः दर्शय सीतां तु मा चिन्तां कुरु चाब्रवीत् ॥
जाताऽद्य वाङ् मुनेः सत्या तच्छ्रुत्वा वचनं मम ।
कुरुत प्रभुकार्यं यत् पुरी लङ्का त्रिकूटगा ॥
तस्यां स्वभावान्निःशङ्को रक्षोराड् रावणः स्थितः ।
तत्राशोकवने सीता शोकमग्नाऽस्ति संस्थिता ॥

पश्याम्यहं तां न तु यूयमत्र गृद्ध्रस्य दृष्टिर्भवति प्रभूता ।
वृद्धोऽस्मि नो चेत् किमपीह कुर्वे युष्माकमद्येशविधौ विधानम् ॥ २८ ॥

शतयोजनमब्धिं यस्तरेत् कार्यं करिष्यति ।
धीरा भवत मां दृष्ट्वा सुदेहं दयया प्रभोः ॥
नाम स्मृत्वा यस्य पापा अप्यपारभवाब्धितः ।
यान्ति पारं तस्यदूता यूयं त्यक्त्वाऽद्य भीरुताम् ॥
रामं हृदि निधायाथ सम्पादयत साधनम् ॥

इत्युक्त्वा तार्क्ष्य याते तु गृद्ध्रे तेऽतीव विस्मिताः ।
ऋक्षेशो जाम्बवानूचे वृद्धो जातोऽस्मि सम्प्रति ॥
नास्ति पूर्वबलांशोऽपि यदा वामनरूपधृक् ।
आसीत् खरारी रामस्तु युवाऽऽसं बहुशक्तिमान् ॥

बध्नन् बलिं वृद्धिमितः प्रभुस्तत् कलेवरं वर्णयितुं न शक्यम् ।
प्रदक्षिणा वै घटिकाद्वयेऽहं तथापि तस्याकरवं जवेन ॥ २९ ॥

अङ्गदः प्राह गन्तास्मि पारं शङ्का त्विहागतौ ।
जाम्बवानाह योग्योऽसि नेता प्रेष्यः कथं परम् ॥
ऋक्षेशः प्राह हनुमंस्त्वं बली मौनवान् कुतः ।
पवनस्य सुतस्तुल्यो विवेकज्ञान-धीनिधिः ॥
किं तत् कार्यं दुष्करं यत् त्वया तात न शक्यते ।
तवावतारो रामस्य कार्यायेति निशम्य सः ॥
हनुमान् पर्वताकारो जातः कनकवर्णवान् ।
तनौ तेजोऽपरो राजा सुमेरुरिव भूभृताम् ॥
कृत्वोचे सिंहनादं स लीलयोल्लङ्घयेऽर्णवम् ।
सहायै रावणं हत्वोत्पाट्यानेष्ये त्रिकूटकम् ।
पृच्छामि जाम्बवन्मां त्वं कार्यं निर्दिश साम्प्रतम् ॥

जाम्बवानाह हे तात कृत्यमेतावदेव ते ।
गत्वा सीतां तथा दृष्ट्वा वद तस्याःस्थितिं पुनः ॥
ततो भुजबलेनैव रामो राजीवलोचनः ।
तामानेष्यति साकं स्यात् कौतुकात् कीशवाहिनी ॥
कपीश वाहिनीं प्रभुर्विधाय साकमुद्यतः ।
प्रहृत्य राक्षसान् प्रियां ग्रहिष्यति प्रभावतः ॥
त्रिलोकिपावनं यशः सुरर्षिभिः समीरितम् ।
श्रुतेरितप्रगीतकैस्तथैव यस्य बोधनैः ॥
व्रजन्ति सद्गतिं परं पदं जनाः सुनिश्चितम् ।
रघूत्तमाङ्घ्रिपङ्कजे मधुव्रतोऽनिशं च यत् ।
तुलस्यदन्यदासकः सदैव गायति प्रियम् ॥

भवौषधं रामयशः सदैव शृण्वन्ति नार्यः पुरुषाश्च येऽत्र ।
तेषामभीष्टं सकलं सुसिद्धं करोति रामस्त्रिशिरोऽरिरूपः ॥३०॥
श्रवश्यं निशाम्यो गुणग्राम एष प्रभोस्तस्य यः कामकोटिप्रभाढ्यः ।
तथा नीलपद्माभमूर्तिर्यदीयमघौघद्विजे व्याधरूपश्च नाम ॥३०॥ (ख)

सीताचिन्तापरतस्यापि चिन्ताहर्तुः पदाम्बुजे । चिन्तये यस्य कृपया किष्किन्धाकाण्ड-पूर्णता ॥

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

शिशिर-विलासः | सव्याख्यः

मूललेखकाः—

कविवराः श्री लक्ष्मीनारायण द्विवेदाः

*

—व्याख्यातारः

डॉ. हरिदत्त पालीवालाः

[तिर्वा-फर्रुखाबाद-स्थाः कविवराः आचार्य श्री द्विवेद महाभागाः सूर्योदय'-पाठकानां सुपरिचताः । तत्र भवतां 'ऋतुबिलसितम्' इत्याख्यस्य षड्-ऋतुवर्णनपरस्य काव्यस्य हेमन्तविलासोऽस्याभिः प्रकाशितपूर्वः सव्याख्यः । इदानीं 'शिशिर-विलासः' सामयिकस्तथैव प्रस्तूयते काव्यस्य । पालीवाल-महोदयानां मर्मस्फोरणी व्याख्याऽपि नूनमत्र स्वर्ण-सौगन्ध्यं भजत । नूनमयमुपक्रमः पाठकानां तोषाय भवेदित्याशासे । —सम्पादकः]

शिशिरे शिशिरेण समुल्लसति
श्वसनेन रयं दधताऽथ तता ।
मिहिकाऽपि विना सुरतं जनता
कृत - कुञ्चित - वेपथु सीत्कुरुते ॥ १ ॥

हरिप्रिया [व्याख्या]

वन्दे बालहरिं केलि-लीलया बाल-बल्लवीः ।
धूलयन्तं प्रमृद्नन्तं हठात् कुङ्कुम-मुष्टिभिः ॥

शिशिर इति । अथ हेमन्तविलासानन्तरं रयं दधता वेगं धारयता, शिशिरेण शीतलेन, श्वसनेन वायुना 'श्वसनः स्पर्शनो वायुः' इत्यमरः, शिशिरे शिशिरर्तौ, समुल्लसति समुल्लासं गच्छति सति, मिहिका कुहेलिका, तता विस्तृता । अत एव जनता जनसमूहः 'ग्रामजनबन्धुभ्यस्तल्' इति तल्, विनापि सुरतं निधुवनं विनापि, कृतकुञ्चितवेपथुः कुञ्चितम् अङ्गसङ्कोचनं वेपथुः कम्पश्च कृतो यस्मिन्कर्मणि यथा स्यात्तथा, सीत्कुरुते सीत्कारमाचरति । स्वभावोक्तिः, लाटच्छेकानुप्रासौ । तोटकवृत्तम् 'इह तोटकमम्बुधिसैः प्रथितम्' इति ॥ १ ॥

दलितश्चलितै - रदनैरधरः
शिशिरेण सदागतिना च हतः ।
अरतक्षतधा अजनि क्षतधाः
क्षणसङ्गदिते शिथिलः शिथिलः ॥ २ ॥

दलित इति । चलितैः शीतवशात्सञ्चलितैः रदनैर्दन्तैः, अधरो दलितो विशीर्णः, शिशिरेण सदागतिना समीरेण च हतस्ताडितः । अत एव रतक्षतं न दधातीत्यरतक्षतधा अपि क्षतधाः क्षतधरः, कर्तरि क्विप्, अजनि जातः । शिशिरवातेन प्रायोऽधरः स्फुटति, दन्तक्षतवत्त्वं तत्र विशेषवेदनावत्त्वमिति भावः । अत एव क्षणसङ्गदिते क्षणेऽवसरे सङ्गदिते समालापे, शिथिलः शिथिलः अधिकं शिथिल इत्यर्थः, 'आधिक्ये द्वे वाच्ये' इति वार्तिकेण 'आधिक्येनित्यवीप्सयोः' इति वीप्सायां वा द्वित्वम् । ननु पदार्थभेदस्याभावाद् 'ग्रामो ग्रामो रमणीय' इत्यादिवदत्र वीप्साभावाद् द्वित्वं न स्यादिति चेन्न । एकस्यैव शैथिल्यावस्थासु भेदं परिकल्प्य वीप्सासद्भावात् । तथा हि कविकुलगुरुः कालिदासः—'खिन्नः खिन्नः शिखरिषु पदं न्यस्य गन्तादि यत्र, क्षीणः क्षीणः परिलघु पयः स्रोतसां चोपभुज्य' इति । निरौष्ठ्यवर्णं पद्यम् ॥ २ ॥

अधिगत्य जलं जडताधिकतां
सृजति स्फटिकाच्छतुषारशिलाः ।

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

सरसी न तरङ्ग - विलासमयी
स्वपितीव निमीलित - पङ्कजदृक् ॥ ३ ॥

अधिगत्येति । जलं कर्तृ, जडताधिकतां जडता शीतलता तया अधिकता ताम्, अधिगत्य प्राप्य, स्फटिकाच्छ-तुषारशिलाः स्फटिकमणिवत् अच्छाः अमलाः 'अच्छो भल्लूके स्फटिकेऽमले' इति हैमः, या तुषारशिलास्ताः, सृजति रचयति । सरसी तरङ्गविलासमयी न, अपितु निमीलितपङ्कजदृक् निमीलितानि संमुद्रितानि पङ्कजान्येव दृशो नेत्राणि यस्याः सा, स्वपितीव निद्रातीव ॥ ३ ॥

शुचि-धौतशिलस्य रुचिं हरता
सलिलेन वृता जडताधिकता ।
न तु तस्य सजातिगुणो मणिता
बत लब्धुमपारि न तत्स्थिरता ॥ ४ ॥

शुचीति । शुचिधौतशिलस्य शुचि विशुद्धं यद् धौतशिलं स्फाटिकोपलस्तस्य भासुरः 'स्फाटिकोपलः शालिपिष्टं धौतशिलम्' इति सूरिपुरुषोत्तमः, रुचिं छविं हरता मुष्णता, सलिलेन, जडताधिकता शैत्याधिक्यं महामूर्खता च, वृता अङ्गीकृता । तस्य धौतशिलस्य, सजातिगुणः समाना जातिर्यस्य स सजातिः स्फटिक एव, तस्य गुणः मणिता मणित्व-धर्मः, न तु लब्धुमपारि, बतेति खेदे । न प्राप्तुं प्राभावि, न तत्स्थिरता तस्य, स्फटिकस्येव स्थिरता नित्यस्थायुकता लब्धुमपारि बत । अधमजनेन उत्तमजनानुकरणं तस्य उत्तमत्वसाधकं तु न भव-त्येव, अपि तु तस्य अधमत्वाधिक्यं मौर्ख्यातिशय-मेवाधिक्येन साधयतीति भावः ॥ ४ ॥

[क्रमशः]

[शेषांशः ३३० पृष्ठस्य]

शासनेन अस्योपक्रमः कृत एव वित्तमन्त्रिणा श्री रामस्वरूपवर्मणामेतेन वक्तव्येन यद्वयं हिन्दी-भाषयैव सर्वेभ्यः पत्राणि प्रेषयिष्यामः, अनुवादरूपेण आंग्लभाषीयं पत्रं न प्रेषयिष्याम इति । सविनया-वज्ञामार्गोऽयं राष्ट्रपित्रा एवास्मभ्यं प्रदर्शितः ।

अपरं कर्तव्यं श्री सेठ गोविन्ददाससदृशैः स्वीयवचनानुसारं सर्वोच्च-न्यायालयमत्र विषये शरणीकरणीयम् । यदि न्यायस्य बिन्दुरप्यत्र शिष्येत, तदा विषयेऽत्र अवश्यं किमपि भवितुं शक्यते । तथापि हिंसात्मकं राष्ट्रसम्पत्ति-धन-जन-हानिकरं किमपि कार्यमितः परं न भाव्यमित्येव राष्ट्रस्य कृते श्रेयः । हिन्दीसमुन्नायिकानां संस्थानामत्र दायित्वम् अनेन विधेयकेन अतितरां प्रवृद्धम् । ताभिः नैकाः कार्य-कारिण्यो योजनाः निर्माय तेषामापत्कालिकमिव (इमर्जेन्सी) कार्यान्वियनं विधेयम् (अत्र विषये यथाव-काशं विवेचयिष्यते)। तदैव विधेयकजनिक-भीषणा-भिशापेन देशो रक्ष्येत, तासां संस्थानाम् अस्तित्वमपि सार्थकं भवेत् । सर्वैः भारतीयसंस्कृति-पक्षपातिभि-रद्य उत्थातव्यम्, जागृतव्यम्, योक्तव्यं च स्वात्मानं कर्मभूमिषु इत्येव नो मतम् ।

★

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

क्षत्रपति-महाकाव्यम्

—श्री उमाशंकरशर्मा त्रिपाठी—

[आंग्लभाषा-प्राध्यापकः—काशीविद्यापीठम्, वाराणसी]

वात्सल्यसूतीन् नवजातवत्सान्
सोत्कर्णमौत्कण्ठ्य-निपीतमार्गान्।
हम्बेति नादैः परिसान्त्वयन्त्यो
यत्राभिगोष्ठं प्रचलन्ति गावः ॥२५॥

यदुत्पलाङ्घ्रि - च्युतरेणु - पूतो
हिमालयो याति नगाधिपत्यम्।
तदर्चित - श्रीशकराग्र - पीठो
गोवर्धनोऽयं विनतो महिम्ना ॥२६॥

शचीपते रुद्धबलेर्निदेशाद्
युगान्त - पाथोद - परिप्लवेन।
व्रजे व्रजत्यर्णवतामपायो
जनानुरक्षात्मसुतान् पितेव ॥२७॥

मानुष्यसूतेरपि विष्णुकीर्तै-
स्तारुण्यशौर्या - भिनवावतारः।
यां लोकलक्ष्मीमिव हेमपुत्रात्
कंसान्मुमोचाऽसुर - सर्गभाजः ॥२८॥

यं धीवरं धूतधराधुराधिं
धनञ्जयोऽशेषधिया प्रपन्नः।
ततार मोहार्णवघोरपूरं
लीलास्थलीयं मथुरा हि तस्य ॥२९॥

द्वावेव नूनं मनुवर्त्मसिद्धौ
कृष्णस्तथा सत्यवतीसुतश्च।
आत्मप्रयोगैर्भुवनं दिशन्तौ
ज्ञानक्रियाऽऽराधितजीविपद्याम् ॥३०॥

निदाघतप्तं कलभं यथाऽसौ
तत्राऽध्वनि क्लान्तमवेक्ष्य सूनुम्।
नामान्वितार्थ - द्विजबन्धुहस्ते
गुप्त्यै समर्प्यात्मशुचं मुमोच[1] ॥३१॥

स्वधर्मयाथार्थ्यविदस्तु तेऽपि
स्वात्मानुभावैः सुतनिर्विशेषैः।
अरातिशङ्कामपनीय तस्मिन्
तं जीवितैः रक्ष्यतरं ररक्षुः ॥३२॥

प्रयागं प्रति—

क्रियोपगूढेव रहस्यविद्या-
मुक्तौ यथा निर्वृतिमेति योगिन्।
तथा द्युनद्यां यमुनाऽनुनीता
सरस्वतीहाऽऽत्मफलं बिभर्ति ॥३३॥

तापत्रयध्वस्त - जगद्धितानां
धुरिस्थितास्तीर्थवराः न केऽत्र।
परं श्रिता तीर्थसतीर्थ्यपङ्क्तिः,
यस्मिन्नयं सः खलु तीर्थराजः ॥३४॥

सर्गक्षयेऽप्यक्षय - धामकीर्तिः
स्वयम्भुवोऽप्येकशिशोः शरण्यः।
भाग्यान्महात्मा सकृदेव दृष्टो
बटोऽयमेनोऽपि करोति पूतम् ॥३५॥

[क्रमशः]

१. सम्भाजिनामानं तनयं दुर्बलाङ्गं रुग्णञ्च सम्प्रधार्य मरावासिनो विश्वासरावस्य महाराष्ट्रद्विजस्य पार्श्वे संरक्ष्य प्रचलितो महाराष्ट्रभूपतिः। —इति इतिहासः

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

वादे वादे जायते तत्त्वबोधः

'विवाह-वयोमर्यादा, प्रकल्पश्चे'ति लेखस्य अशास्त्रीयत्वम्

—श्री बालचन्द्र दीक्षितः—

[प्रधानाचार्यः—बाजोरिया-संस्कृत-महाविद्यालयस्य, वाराणसी]

'सूर्योदय'स्य ४२तमवर्षीयस्य सप्तमाङ्के 'विवाह-वयोमर्यादा, प्रकल्पश्च' इति शीर्षकेण एको लेखः प्रकाशमागतः। तत्र विधेयत्वेन प्रतिपादितो बह्वंशः शास्त्रविधि-प्रतिकूलः। अतः—

यः शास्त्रविधिमुत्सृज्य वर्तते कामकारतः।
न स सिद्धिमवाप्नोति न सुखं न परां गतिम्॥
तस्माच्छास्त्रं प्रमाणं ते कार्याकार्य-व्यवस्थितौ।
ज्ञात्वा शास्त्रविधानोक्तं कर्म कर्तुमिहार्हसि॥

इति गीता-वचनेन तदशास्त्रीयं विधेयमनुवर्तमाना न ऐहिकामुष्मिक-कल्याणमासादयितुं समर्थाः। अतस्तदंशस्य तादृक्त्व-प्रदर्शनं शास्त्रविश्वासिन आवश्यकं कर्तव्यमिति मन्यमानोऽयं जनस्तत्र यथामति यत्नमाचरति।

तत्र लेखे विधेयांशप्रवृत्तौ स्वीयरुचिमनुसृत्य प्रदत्तेऽर्थवादविषये किमपि कथनं नातीव उपयोगीति। यत्तत्रोक्तम्—"विवाहविधि-कलापे विभागद्वयं कर्तव्यम्—वाङ्निश्चय-पाणिग्रहण-सप्तपदीपर्यन्तो भागः प्रथमः' अस्य विषये 'अयं संस्कारः समन्त्रकः कर्तव्यः।...न चात्र बालवैधव्य-शङ्का कर्तव्या, 'सा चेदक्षतयोनिः स्यात् पुनः-संस्कारमर्हति' इति याज्ञवल्क्याज्ञया कुमार्याः स्वगृहे स्थिताया एव तस्याः पुनर्मण्डनविधानात्" इति; तद्विषये विचार्यते।

अत्र सप्तपदीपर्यन्तविवाहस्य प्रथमभागत्वेन स्वीकृतिस्तत्र च सप्तपदीपर्यन्ते विवाहे सम्पन्नेऽपि पुनस्तस्या विवाहान्तरकथनं सर्वथा उच्छास्त्रम्। तथा हि, निर्णयसिन्धौ मदनपारिजाते च नारदः—

पाणिग्रहणिका मन्त्रा नियतं दारलक्षणम्।
तेषां निष्ठा तु विज्ञेया विद्वद्भिः सप्तमे पदे॥

अत्र पाणिग्रहणस्य दारत्वसम्पादकत्वं सप्तमपदस्य विवाहपरिसमापकत्वं स्पष्टं बोध्यते। तत्सम्पन्नेऽपि पुनर्विवाहान्तरकथनं कथं न सर्वथोच्छास्त्रम्?

याज्ञवल्क्यस्मृतावपि 'दत्तामपि हरेत् कन्यां श्रेयांश्चेद् दूर आव्रजेत्' इति श्लोके 'एतच्च सप्तपदीगमनात् प्राग् द्रष्टव्यम्' इति मिताक्षराकारः, सप्तपदीगमनानन्तरं कन्यायाः पुनर्विवाहाभावमेव शास्त्रानुमतं प्रमाणयति। धर्मसिन्धावपि—

अनन्यपूर्विकां कान्तामसपिण्डां यवीयसीम्।
अरोगिणीं भ्रातृमतीं - मसमानार्ष-गोत्रजाम्॥

इति याज्ञवल्क्याद्युक्त-कन्याविशेषणेषु कान्तत्व-नीरोगत्व-भ्रातृमत्त्व-भिन्नविशेषणानामभावे इह परत्र च पातित्यात् तानि प्रपञ्च्यन्ते। तत्र अनन्यपूर्विकाः = पुरुषान्तर-पूर्विकाः—मनोदत्ता वाचादत्ता अग्निं परिगता सप्तमं पदं नीता भुक्ता गृहीतगर्भा प्रसूतेति सप्तविधाः पुनर्भ्वः, तद्भिन्नाम् अनन्य-

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

पूर्विकाम्। सप्तपदीविधेः पूर्वमाद्यानां तिसृणां सङ्कटेऽन्येन विवाहो भवति। सप्तपदीविधौ जाते तु बलाद् विवाहिताऽपि नान्यत्र देया इति सप्तपदीविधिसम्पत्त्यनन्तरं बलादपि विवाहितायाः पुनरन्यत्र दानस्य उच्चैः प्रतिषेधमाचरन् ग्रन्थकारः सप्तपदीपर्यन्तस्यापि जातस्य विवाहस्य, विवाहासम्पत्तित्वबोधकत्वेन स्वीकृते प्रथमभागे गणकस्य तत्पर्यन्त-विवाहिताया अपि पुनर्विवाह-समर्थकस्य उक्तलेखस्य च सर्वथा शास्त्राज्ञतां संसाधयन् परिहासमाचरति।

सा चेदक्षतयोनिः स्यात् पुनः संस्कारमर्हति।

इति वचनस्य कृते 'याज्ञवल्क्याज्ञये'ति लिखन्ती स्वयं मषीमुखी सत्यपीयं लेखनी लेखकस्यावधि याज्ञवल्क्यस्मृति-दर्शनाभावं सडिण्डिमोद्घोषं घोषयन्ती तदीयराद्धान्तविन्-मिताक्षरा-धर्मसिन्धु-निर्णयसिन्ध्वादि-शिष्टपरम्परासम्मानित-निबन्धानभिज्ञत्वं कर्णे कर्णे च जपन्ती प्रयत्नेन वारिताऽपि न विरमति।

निर्णयसिन्ध्वादि-सर्वनिबन्धेषु 'दत्ताक्षतायाः कन्यायाः पुनर्दानं परस्य च' इति वचनस्य कलिवर्ज्यप्रकरणे उपलम्भेन 'दत्ता संस्कृता, न वाग्दत्ता, तदानीं क्षतत्वाप्रसङ्गेन कन्यात्वविशेषणानर्थक्यापातात्। "कन्या अक्षतयोनिर्दत्ताक्षताया' इति वचनात् कन्येति विशेषणेन दानयोग्यतायामपीत्युक्तं दानमन्यस्मै प्रतिपादनं 'पुनर्दानं परस्य चेति वचनाद्" इति पराशरस्मृतेः 'विद्वन्मनोहरा'-ख्यटीकायां तस्यार्थकरणेन च सप्तपदीपर्यन्तं संस्कृताया अक्षतयोन्याः सर्वथा विवाहनिषेधबोधनात्।

'दत्ताक्षतायाः' इति वचसि समायातस्त 'दत्ता'-पदस्य विवरणम् 'ऊढा' इति कृतवान् निर्णयसिन्धुकारः। तत्र च—

ऊढाया पुनरुद्वाहं ज्येष्ठांशं गोवधं तथा।
कलौ पञ्च न कुर्वीत भ्रातृजायां कमण्डलुम्॥

इति वचनं प्रमाणत्वेन उपन्यस्तवान्। एवंविधाया विवाहः केन वचसा प्राप्त इति शङ्कायां स एवाह—"ऊढायाः 'पुरा पुरुषसंयोगान्मृते देयेति केचन' इत्यादिभिः विवाह्यतोक्ता इति।

न कलौ क्रियते ह्यश्वमेधो वाऽप्यथ गोसवः।
नरमेधोऽक्षता नारी देवरात् पुत्रसन्ततिः।
गर्हितं सप्तकं ह्येतद् राजसूयः कमण्डलुः॥

इति हेमाद्र्युद्धृत-गारुडवचनाच्च सप्तपदीपर्यन्तं विवाहिताया अक्षताया अपि युगेऽस्मिन् पुनर्विवाहस्य सर्वथा निषेधात्। सप्तपदीपर्यन्तं सञ्जातविवाहायाः स्वपुरुषदर्शनरहिताया अपि विवाहाभावस्य सर्वत्र शिष्टपरम्परायां परिगृहीतत्वाच्चैवंविधायाः पुनर्विवाहमङ्गीकर्तुरुक्तलेखस्य अशास्त्रीयत्वं परम्परानभिमतत्वञ्चेति पाठकानां केषामपि विदुषां न तिरोहितमिति विभावयन्तु सूरय इति।

❀

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

पृथ्वीराजाख्यानकम्

—श्री विश्वनाथ त्रिपाठी, साहित्याचार्यः—

[अष्टभिर्मासैः धारावारिकतया प्रवहत् इदं पृथ्वीराजाख्यानकम् अनेन अङ्केन परिसमाप्यते। यदीदं गृहरत्नानां चेतस्सागरे स्थैर्यमासाद्य तान् स्वराष्ट्रोत्थानाय नागपि प्रेरयेत्तदा मग्रथयितुः श्रमः सार्थको भवेत्। अन्येऽपि साहित्य-मर्मज्ञाः बालमनोविज्ञानविज्ञा विपश्चितः प्रार्थ्यन्ते यदेवमेव तैरपि भारतीयगौरवमयेतिवृत्तेभ्यः प्रेरणोत्तेजकम् उपाख्यानं विलिख्य 'सूर्योदय'-माध्यमेन प्रकाश्य गृहरत्नानि लालनीयानि। सूर्योदयो हार्दिकस्वागतपूर्वकं तान् एतदर्थं निमन्त्रयति इति।—सम्पादकः]

चन्द्रस्य कूटचक्रम्

एकस्मिन् दिवसे बाणविद्याम आश्रित्य चर्चा प्रचलिता या शब्दवेधि बाणपर्यन्तं विचार्य मध्ये एव अवरुद्धा। शाहेनोक्तम्—'एवंविध - बाणचालकस्तु नाद्यावधि मया दृष्टः। कदाचिद् वृत्तमिदं वितथं भवेत्' इति। श्रुत्वेदं चन्दवरदायी अब्रवीत्—'नेदम्, सर्वथा सत्यमेव। पृथ्वीराजोऽत्र प्रमाणं योऽत्र कृती वर्तते' इति।

इत्थं चन्द्रमुखात् 'पृथ्वीराजः शब्दवेधिनो बाणान् निक्षिपति' इति विज्ञाय शाहः तत्कलां दर्शयितुं समीहां प्रकटय्य आज्ञप्तवान् यत् त्वमेव शीघ्रमस्य संयोजनं कुरु। मदादेशं तु स न पालयिष्यति। मत्तः अतितरां क्लेशितोऽपि सः स्वाभिमानतो न प्रच्यवति' इति। चन्द्रेण 'ओमि'त्युक्तम्।

चन्द्रवरदायी मध्ये मध्ये पृथ्वीराजेन सह मिलन् आसीत्। विषयममुं पुरस्कृत्य तेन महाराजो नैकाभिः युक्तिभिः प्रतिबोधितः। अन्ते चन्द्रेण इत्थं वैरप्रतिशोधनाय प्रेरितः पृथ्वीराजः शब्दवेधिबाण-कला-प्रदर्शनाय सहमतोऽभवत्।

पृथ्वीराजस्य स्वीकृतिम् आसाद्य शाहो दूर-दूरतः सम्मान्यान् सभासदो वीरान् एतत्कलावलोकनाय निमन्त्रयामास। अन्तःपुरसन्निधौ चतुर्वंशोपरि अष्टाङ्गुलोत्तराष्टचत्वारिंशद्धस्तमिते उच्चे कल्पिते मञ्चे शहाबुद्दिन गोरी स्वासनं कारयामास। एकत्र उच्चतरप्रदेशे क्रमशः सप्त लौहखण्ड - वर्तुलानि लम्बितानि अकारयत्। चन्द्रकथनानुसारं सम्पन्नायां सर्वव्यवस्थायां शाहः पृथ्वीराजम् आनेतुं प्रेषयामास, स्वयं च कल्पिते उच्चमञ्चासने आरुह्य कौतुकं दिदृक्षुः अतिष्ठत्।

बाण-कौशलम्

अथ चन्द्रवरदायिना साकं पृथ्वीराजः धीरोद्धतया गत्या शनैः शनैः आगत्य प्रदर्शनसभां बभ्राज। काराकष्टपीडितो नेत्राभ्यां विहीनोऽपि सः स्वाभाविकीं तेजस्वितां दधान एवाऽऽसीत्। स यस्यां दिशि मुखं परावर्तयति स्म, तत्रस्थाः लोकाः ससंभ्रमम् उत्तिष्ठन्त आसन्। शनैः शनैः भ्रमन् चन्द्रः पृथ्वीराजं रङ्गभूमिम् आनिनाय। पृथ्वीराजस्तत्र तूष्णीं स्थितोऽभवत।

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

नेतुश्चरितम्

पापे तत्परता सुखे विधुरताऽऽदाने समुत्साहिता
मित्रे वञ्चकता गुरौ विषमता चित्ते न गम्भीरता ।
आचारेऽशुचिता गुणेऽनियमिता शास्त्रे च विज्ञानिता
द्रव्ये सुन्दरता पदे भजनिता नेतृष्वपि दृश्यते ॥१॥

चन्दा यस्य पिता रमा च जननी निन्दाचिरं गेहिनी
जाड्यं सूनुरसौ मृषा च भगिनी भ्राता सदाऽसंयमः ।
शय्या मन्त्रिपदेषु खादि-वसनं मांसं सुराभोजनम्
जीपे यानमसंशयं जन-मते नेतुर्भयं कीदृशम् ? ॥२॥

करे श्लाघ्यो रागः शिरसि सित-टोपी प्रणयिता
मुखे मिथ्यावाणी परधनहरा बुद्धिरतुला ।
हृदि क्रौर्यं वृत्तिर्जनमतरतिः स्वार्थपरता
मदान्धैश्वर्येण प्रचलनमिदं नेतृ-चरितम् ॥३॥

लोका वदन्ति मति-हीन-जनो जघन्यः
विज्ञा वदन्ति मत-हीनजनो जघन्यः ।
नेता वदत्यखिल - नीति - विशेषविज्ञः
स्वार्थप्रसाधन-विहीन-जनो जघन्यः ॥ ४ ॥

मांसाशनं 'चाय' - सुरादिपानं
नित्यं प्रवासः सिगरेट-ध्यानम् ।
प्रवञ्चनं वृत्तिरनीतिकृत्यं
षड् नेतृलोकस्य कलौ गुणानि ॥ ५ ॥

उत्कोचः साहसं क्रान्तिः चन्दा निन्दा च नीचता ।
षडेते यत्र विद्यन्ते तत्र नेता सहायकः ॥ ६ ॥

——श्री रामस्वरूपशास्त्री "अमरः"

कतिपयैरेव क्षणैः चन्द्रसङ्केतानुसारं शाहाज्ञया राज्ञे शर-कार्मुके दीयेते स्म । परं किमपि धनुः तद्योग्यं नाभवत् । कियन्ति त्रुटितानि. कियन्ति च वक्रीभूतानि । कार्मुकाणां दशामिमां दृष्ट्वा चन्द्र-वरदायिना शाह उक्तो यत् पृथ्वीराजस्यैव धनुः, यद्भवता गृहीतमस्ति, आनाय्य अस्मै दीय-ताम् । शाहाज्ञया तद्धनुः शीघ्रम् आनीय राज्ञे समर्पितमभवत् ।

चिरात् लब्धेन स्वधनुषा परं समुल्लसन् पृथ्वी-राजः क्षिप्रं तत् सज्जीचकार, टङ्कारेण च सर्वाः दिशः समपूरयत् । शरासने शरं सन्धाय वीरवेषा-लङ्कृतः लक्ष्यवेधाय नियते स्थले स्थितः पृथ्वीराजः परां सुषमां विस्तारयन् आसीत् । तत्पार्श्वे एव चन्द्रोऽपि अतिष्ठत् । शाहस्य इङ्गितानुसारं लौह-वर्तुलखण्डं ध्वनितमभवत् । सपदि एव पृथ्वीराज-कार्मुकात् निर्गतः शरो लौहमयानि सप्तान्यपि वर्तुलानि विद्धयन् पारे निरससार । आश्चर्यचकितो गोरी 'साधु साधु' इति उदचरत् ।

तदा पृथ्वीराजस्य स्फूर्तिः अतितरां दर्शनीया आसीत् । निमेषमात्रेणैव शाहशब्दं लक्ष्यीकृत्य स शरासने अपरं बाणं संयोजयामास । यावत् सर्वे अवहिता भवन्ति, तदन्तरे एव बाणः स्वलक्ष्ये प्रति-ष्ठितः पृथ्वीराजस्य शब्दवेधितां चिरं प्रमापयत् । गोरिणः आतालुशिरो भित्त्वा बाणः अलक्षितो-ऽभवत् । शहाबुद्दीन गोरी संज्ञाशून्यो भूत्वा अत्युच्च-मञ्चात् निपत्य भूमौ पतितः ।

अकल्पितमिदं दृष्ट्वा आश्चर्य-शोकपूरे प्रवा-हिताः सर्वे शाहसहचराः यावत् पृथ्वीराजम् अभिपेतुः, तावत् चन्द्रवरदायिनः कृपाणिका महाकवेः महाराजस्य च पार्थिवं वपुः चिराय तयो-र्जनन्याः क्षमाया उत्सङ्गे समर्पयत् । इत्थं भारत-भुवो ललामभूतं भाग्यतिलकं 'पिथौरा' - नाम्ना ख्यातः पृथ्वीराजसूरिः चन्द्रसूरिश्च सममेव अस्तं जग्मतुः । इन्द्रप्रस्थस्य सौभाग्यसूर्यः चिराय अस्त-मियात् । धन्या सा भारत-भूः, यत्रैवंविधा वीराः अहरहः उत्पद्य विलीयन्ते ।

V2600

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

सूर्योदयस्य नियमाः

पत्र-संहिता

१. 'सूर्योदय'-मासिकपत्रस्य वार्षिकं शुल्कं रूप्यकपञ्चकं वर्तते। धनादेश (मनीआर्डर) द्वारा तत्प्रेषणीयम्। वी० पी० द्वारा प्रेषणे ५० पणाः पृथक् प्रदेयाः स्युः।

२. प्रतिवर्षं गम्भीरसाहित्यसमन्विताः १२ अङ्काः प्रकाश्यन्ते। नवीनग्राहकत्वं प्रथमाङ्कतः (जनवरी-अंकतः) एव स्वीक्रियते। माध्यमिकेन केनापि अङ्केन ग्राहकत्वं न स्वीक्रियेत।

३. आंग्लमासस्य २६ दिनाङ्के 'सूर्योदयः' प्रकाशितो भवति, वारद्वयं संशोध्य ग्राहकेभ्यः स प्रेष्यते। अतस्तदलाभे पूर्वं स्वकीय-पत्रालयतस्तदनागमनस्य निश्चयं कृत्वैव १० दिनाङ्कानन्तरं वयं सूचनीयाः।

४. लेख-कवितादीनां भाषा सयता, सरला, शुद्धा च भाव्या। प्रकाशनीय-लेखादीनां स्पष्टाक्षरैः कर्गजस्यैकपृष्ठे एव लेखनमावश्यकम्। अस्वीकृता लेखादयः पोस्टविभागीय-चिटिका (टिकट) प्राप्त्यनन्तरं परावर्तयितुं शक्यन्ते।

५. सम्पादकीय-विषयसम्बद्धे पत्र-व्यवहारे 'सम्पादकः' इति, व्यवस्थाविभागीय-पत्रव्यवहारे च 'व्यवस्थापकः' इति च स्पष्टं लेखनीयम्। तेन उत्तरलाभे मुधा विलम्बो न भवेत्।

विज्ञापन-शुल्कम्

सूर्योदये सुरुचिपूर्णं विज्ञापनं प्रकाश्यते। एकवारं तस्य प्रकाशनस्य शुल्कक्रमश्च अधोलिखितोऽस्ति। सार्वकालिकस्य दीर्घकालिकस्य च विज्ञापनस्य कृते विशेष-सौविध्याय पत्र-व्यवहारः कार्यः।

साधारणस्य प्रतिपृष्ठस्य	१००) रु०	साधारणस्य प्रत्यर्धपृष्ठस्य	६०) रु०
साधारणस्य चतुर्थांशपृष्ठस्य	३५) रु०	आवरण-चतुर्थपृष्ठस्य	२००) रु०
आवरण-द्वितीय-तृतीयपृष्ठयोः	१५०) रु०	प्रथमावरणपृष्ठे विज्ञापनं न स्वीक्रियेत।	

—सङ्केतः—

'सूर्योदय'-कार्यालयः, भारतधर्म-महामण्डलम्, जगतगंज वाराणसी।

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

112600
Digitized by Arya Samaj Foundation Chennai and eGangotri

पञ्जीकृतसंख्या एन० १८९१

राष्ट्रपिता राष्ट्रभाषा च

[राष्ट्रपिता महात्मगान्धी आंग्लभाषाया मोहनिद्रायां स्वपतां 'मेकाले'-मानसपुत्राणां तः सुस्पष्टं परिचिता आसन् । अत एव तैः २-९-२१ दिनाङ्के हिन्दी 'नवजीवन'-पत्रे माध्यमविषये लिखितम्—]

"यदि मम हस्ते अधिनायकताधिकारः स्यात्तदा अद्यप्रभृत्येव विदेशीभाषामाध्यमेन छात्र छात्राणां शिक्षां निरोधयेयम्, सर्वैः शिक्षकैः प्राध्यापकैश्च तत्कालं शिक्षाया माध्यमोऽयं परिवर्तयेयम्, तान् पदच्युतान् वा कुर्याम् । नाहं पाठ्यपुस्तकानां नवसंयोजनं प्रतीक्ष्ये । तानि किल माध्यमपरिवर्तनादनु क्रमशस्तमनुकरिष्यन्त्येव । महानयं दोषो यो हि तत्कालं चिकित्स्य" इति ।

[किन्तु आंग्लाना मानसपुत्राः दोषममुं चिकित्सितुं कमपि यत्नं कर्तुं नापारयन् । आंग्लभाषाकलङ्कं स्वतन्त्रभारतस्य उज्ज्वलभालतः प्रोञ्छितुं नाशक्नुवन् । शासनपदे प्रतिष्ठिताः ते जनवाणीमपि व्याहर्तुं नितान्तमक्षमा अभवन् । अत एव जीवद्भिरेव महात्मगान्धिभिः स्वराज्यप्राप्तेरनुपदमेव उत्कलाभिजनानां वयोवृद्ध-हिन्दी-प्रेमिविदुषां श्री अनसूयाप्रसाद पाठकानां पत्रोत्तरे लिखितम्—]

"जानास्येव त्वं यन्मम प्रियतमेषु १८ कार्येषु हिन्दीप्रचारोऽप्यन्यतमोऽस्ति । मन्येऽहं यत् राष्ट्रभाषामन्तरा स्वातन्त्र्यस्य न किमपि मूल्यम् । भाषाविषये तु भारतं पूर्ववदेव पराधीनमास्ते । अत एवाहं तं पूर्णस्वतन्त्रं वक्तुं न पारये । मम मतं यत् यावत् भारतस्य राष्ट्रभाषारूपेण आंग्लभाषा स्थास्यति, तावद् देशोऽयं परतन्त्र एव । स्वातन्त्र्योत्तरं मया कल्पितं यद् राष्ट्रभाषायाः महती सम्पत्तिर्भवेत्, तेनैव च राष्ट्रकार्यं प्रचलेत् ।"

[अस्मिन्नेव पत्रे तैरग्रे लिखितम्—] "ये नेतारो मम स्वरेण सह संवादितां विदधन्त आसन्, शासनपदं समारुह्य ते मदिच्छामपि अवमन्तुं प्रवृत्ताः । त्वं धैर्यं धेहि । यदा दिष्टं कार्यप्रवणं भवेत्तदा एकस्मिन्नेव दिने तत् एतद्विधास्यति । तदा एते नेतारः साक्षिभूतास्तद् द्रष्टुं विवशा भविष्यन्ति । न ज्ञास्यन्ति यत्किमिदं सञ्जातमिति ? अत एव त्वं निष्ठया कार्यं कुरु । ते कर्तव्यमपि कार्यकरणमात्रम्, फलं भगवति निर्भरम् । अहं ते कार्यस्य साफल्यं कामये" इति ।

सम्पादकः, प्रकाशकः, मुद्रकश्च—गोविन्द नरहरि वैजापुरकरः,
श्रीभारतधर्ममहामण्डलम्, जगतगंज, वाराणसी कैण्ट ।
मुद्रण-स्थलम्—वज्रघोष-मुद्रणालय, सी० के० ३६/२०, वाराणसी ।

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

Compiled
1999-2000

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar